इसके बाद घड़े की देवी अपने में जितनी शक्ति थी, उसे प्रकट कर अकलंक के साथ शास्त्रार्थ करने लगी। इधर अकलंकदेव भी देवी के प्रतिपादन किए हुए विषय का अपनी दिव्य भारती द्वारा खण्डन और अपने पक्ष का समर्थन तथा परपक्ष का खण्डन करने वाले परम पवित्र अनेकान्त-स्याद्वाद मत का समर्थन बड़े ही पाण्डित्य के साथ निडर होकर करने लगे। इस प्रकार शास्त्रार्थ होते-होते छह महीने बीत गए, पर किसी की विजय न हो पाई, यह देख अकलंकदेव को बड़ी चिन्ता हुई उन्होंने सोचा-संघश्री साधारण पढ़ा-लिखा और जो पहले ही दिन मेरे सम्मुख थोड़ी देर भी न ठहर सका था, वह आज बराबर छह महीने से शास्त्रार्थ करता चला आता है; इसका क्या कारण है, सो नहीं जान पड़ता। उन्हें इसकी बड़ी चिन्ता हुई पर वे कर ही क्या सकते थे। एक दिन इसी चिन्ता में डूबे हुए थे कि इतने में जिनशासन की अधिष्ठात्री चक्रेश्वरी देवी आई और अकलंकदेव से बोली-प्रभो! आपके साथ शास्त्रार्थ करने की मनुष्य मात्र में शक्ति नहीं है और बेचारा संघश्री भी तो मनुष्य है, तब उसकी क्या मजाल जो वह आपसे शास्त्रार्थ करे? पर यहाँ तो बात कुछ और ही है। आपके साथ जो शास्त्रार्थ करता है वह संघश्री नहीं है किन्तु बुद्धधर्म की अधिष्ठात्री तारा नाम की देवी है। इतने दिनों से वही शास्त्रार्थ कर रही है। संघश्री ने उसकी आराधना कर यहाँ बुलाया है। इसलिए कल जब शास्त्रार्थ होने लगे और देवी उस समय जो कुछ प्रतिपादन करे तब आप उससे उसी विषय का फिर से प्रतिपादन

अतः प्रातः समुत्थाय पूर्वोपन्यस्तं तद्वचः। व्याघुट्य पृच्छतां तस्या मानभङ्गो भविष्यति ॥१०६॥
इत्युक्त्वा सा गता देवी ततः सोप्यकलङ्कवाक्। देवतादर्शनाज्जातपरमानन्दनिर्भरः ॥१०७॥
प्रातर्गत्वा जिनं नत्वा सभायां दिव्यमूर्त्तिभाक्। क्रीडार्थं च प्रभावार्थं धर्मस्यैव जिनेशिनः ॥१०८॥
दिनान्येतानि संचक्रे वादोऽनेन समं मया। अद्य वादं द्रुतं जित्वा भोजनं क्रियते ध्रुवम् ॥१०९॥
उक्त्वेति स्पष्टसद्वाक्यैर्वादं कर्त्तुं समुद्यतः। उपन्यासं ततस्तस्याः कुर्वत्यास्तेन जल्पितम् ॥११०॥
प्रागुक्तं कीदृशं वाक्यं तदस्माकं प्रकथ्यते। तदाकर्ण्याकलङ्कस्य वाक्यं हृत्क्षोभकारणम् ॥१११॥
देवता वचनैकत्वादुत्तरं दातुमक्षमा। सूर्योदये निशेवाशु सा गता मानभङ्गतः ॥११२॥
ततोऽकलङ्कदेवेन समुत्थायप्रकोपतः। अन्तःपटं विदार्योच्चैः स्फोटयित्वा च तं घटम् ॥११३॥
महापादप्रहारेण हत्वा रूपं तु सौगतम्। मानभङ्गं तथा कृत्वा तेषां मिथ्याकुवादिनाम् ॥११४॥
पुनर्मदनसुन्दर्या सम्प्राप्तानन्दसम्पदः। समस्तभव्यलोकानामग्रतः परया मुदा ॥११५॥
गलगर्जितं विद्ययोच्चैस्तेनोक्तं चेति सोत्सवम्। अहो मया वराकोऽयं सङ्घश्रीर्धर्मवर्जितः ॥११६॥

करने के लिए कहिए। वह उसे फिर न कह सकेगी और तब उसे अवश्य नीचा देखना पड़ेगा। यह कहकर देवी अपने स्थान पर चली गई, अकलंकदेव की चिन्ता दूर हुई वे बड़े प्रसन्न हुए ॥९७-१०७॥

प्रातःकाल हुआ। अकलंकदेव अपने नित्यकर्म से मुक्त होकर जिनमन्दिर गए। बड़े भक्तिभाव से उन्होंने भगवान् की स्तुति की। इसके बाद वे वहाँ से सीधे राजसभा में आए। उन्होंने महाराज शुभतुंग को सम्बोधन करके कहा–राजन्! इतने दिनों तक मैंने जो शास्त्रार्थ किया, उसका यह मतलब नहीं था कि मैं संघश्री को पराजित नहीं कर सका परन्तु ऐसा करने से मेरा अभिप्राय जिनधर्म का प्रभाव बतलाने का था। वह मैंने बतलाया। पर अब मैं इस वाद का अन्त करना चाहता हूँ। मैंने आज निश्चय कर लिया है कि मैं आज इस वाद की समाप्ति करके ही भोजन करूँगा। ऐसा कहकर उन्होंने परदे की ओर देखकर कहा–क्या जैनधर्म के सम्बन्ध में कुछ और कहना बाकी है या मैं शास्त्रार्थ समाप्त करूँ? वे कहकर जैसे ही चुप रहे कि परदे की ओर से फिर वक्तव्य आरम्भ हुआ। देवी अपना पक्ष समर्थन करके चुप हुई कि अकलंकदेव ने उसी समय कहा–जो विषय अभी कहा गया है, उसे फिर से कहो? वह मुझे ठीक नहीं सुन पड़ा। आज अकलंक का यह नया ही प्रश्न सुनकर देवी का साहस एक साथ ही न जाने कहाँ चला गया। देवता जो कुछ बोलते वे एक ही बार बोलते हैं–उसी बात को वे पुनः नहीं बोल पाते। तारा देवी का भी यही हाल हुआ। वह अकलंकदेव के प्रश्न का उत्तर न दे सकी। आखिर उसे अपमानित होकर भाग जाना पड़ा। जैसे सूर्योदय से रात्रि भाग जाती है ॥१०८-११२॥

इसके बाद ही अकलंकदेव उठे और परदे को फाड़कर उसके भीतर घुस गए। वहाँ जिस घड़े में देवी का आह्वान किया गया था, उसे उन्होंने पाँव की ठोकर से फोड़ डाला। संघश्री सरीखे जिनशासन के शत्रुओं का, मिथ्यात्वियों का अभिमान चूर्ण किया। अकलंक की इस विजय और जिनधर्म की प्रभावना से मदनसुन्दरी और सर्वसाधारण को बड़ा आनन्द हुआ। अकलंक ने सब लोगों के सामने जोर देकर कहा–सज्जनों! मैंने इस धर्मशून्य संघश्री को पहले ही दिन पराजित कर दिया था

निर्जितः प्रथमे घस्रे किन्तु देव्यैतया समम्। श्रीमज्जिनेन्द्रचन्द्राणां मतोद्योतनहेतवे ॥११७॥
संज्ञानोद्योतनार्थं च कृतो वादः स्वलीलया। एतदुक्त्वा महाकाव्यं स्वामिना पठितं स्फुटम् ॥११८॥
''नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं। नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया।
राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो बौद्धौघान्सकलान्विजित्य सुगतः पादेन विस्फालितः॥''
तदा प्रभृति बौद्धास्ते नरेन्द्राद्यैर्निराकृताः। त्यक्त्वा देशं द्रुतं नष्टा खद्योता वा दिनागमे ॥११९॥
एवं श्रीमज्जिनेन्द्राणां दृष्ट्वा ज्ञानप्रभावनाम्। हिमशीतलभूपाद्याः सर्वे ते भक्तिभारतः ॥१२०॥
जिनधर्मरता भूत्वा त्यक्त्वा मिथ्यामतं द्रुतम्। नाना रत्नसुवर्णाद्यैः संस्तोत्रैः शर्मकारिभिः ॥१२१॥
पूजयन्ति स्म तं पूतमकलङ्कं बुधोत्तमम्। श्रीमज्जिनेन्द्रसंज्ञानप्रभावात्के न पूजिताः ॥१२२॥
तथा मदनसुन्दर्या महोत्सवशतै रथः। विचित्ररचनोपेतो लसत्पट्टांशुकैर्वृतः ॥१२३॥
संरणत्किङ्किणीजालो घण्टाटङ्कारशोभितः। त्रैलोक्यपूज्यजैनेन्द्रमहाबिम्बैः पवित्रितः ॥१२४॥
नाना छत्रं वितानाद्यैश्चामराद्यैरलङ्कृतः। कनत्काञ्चनसद्रत्नमुक्तामालाविराजितः ॥१२५॥
अनेक भव्यलोकानां समन्ताज्जयघोषणैः। सम्पतत्कुसुमामोदैः सुगन्धीकृतदिङ्मुखः ॥१२६॥

किन्तु इतने दिन जो देवी के साथ शास्त्रार्थ किया, वह जिनधर्म का माहात्म्य प्रकट करने के लिए और सम्यग्ज्ञान का लोगों के हृदय पर प्रकाश डालने के लिए था। यह कहकर अकलंकदेव ने इस श्लोक को पढ़ा ॥११३-११८॥

अर्थात्-महाराज, हिमशीतल की सभा में मैंने सब बौद्ध विद्वानों को पराजित कर सुगत को ठुकराया, यह न तो अभिमान के वश होकर किया और न किसी प्रकार द्वेषभाव से किन्तु नास्तिक बनकर नष्ट होते हुए जनों पर मुझे बड़ी दया आई इसलिए उनकी दया से बाध्य होकर मुझे ऐसा करना पड़ा।

उस दिन से बौद्धों का राजा और प्रजा के द्वारा चारों और अपमान होने लगा। किसी की बुद्धधर्म पर श्रद्धा नहीं रही। सब उसे घृणा की दृष्टि से देखने लगे। यही कारण है बौद्ध लोग यहाँ से भागकर विदेशों में जा बसे ॥११९॥

महाराज हिमशीतल और प्रजा के लोग जिनशासन की प्रभावना देखकर बड़े खुश हुए। सबने मिथ्यात्व मत छोड़कर जिनधर्म स्वीकार किया और अकलंकदेव का सोने, रत्न आदि के अलंकारों से खूब आदर सम्मान किया, खूब उनकी प्रशंसा की। सच बात है जिन भगवान् के पवित्र सम्यग्ज्ञान के प्रभाव से कौन सत्कार का पात्र नहीं होता ॥१२०-१२२॥

अकलंकदेव के प्रभाव से जिनशासन का उपद्रव टला देखकर महारानी मदनसुन्दरी ने पहले से भी कई गुणे उत्साह से रथ निकलवाया। रथ बड़ी सुन्दरता के साथ सजाया गया था। उसकी शोभा देखते ही बन पड़ती थी। वह वेशकीमती वस्त्र था, छोटी-छोटी घंटियाँ उसके चारों ओर लगी हुई थी, उनकी मधुर आवाज एक बड़े घंटे की आवाज से मिलकर, जो कि उन घंटियों के ठीक बीच में था, बड़ी सुन्दर जान पड़ती थी, उस पर रत्नों और मोतियों की माला से अपूर्व शोभा दे रही थी, उसके

झल्लरीतालकंसालभेरीभम्भामृदङ्गकैः। पठत्पण्डितसन्दोहैश्चारणस्तुतिपाठकैः ॥१२७॥
कामिनीगीतझङ्कारैर्नानानृत्यादिभिर्युतः। जङ्गमः पुण्यरत्नानां रोहणाद्रिरिवोद्गतः ॥१२८॥
वस्त्राभरणसन्दोहैर्नाना ताम्बूलदानतः। स भव्यानां विभाति स्म पर्यटन्निव सुरद्रुमः ॥१२९॥
वर्ण्यते स रथः केन यस्य दर्शनमात्रतः। अनेकदुर्दृशां चापि संजाता दर्शनश्रियः ॥१३०॥
इत्यादि सम्पदासारै रथः पूर्णमनोरथः। सम्यक्त्वचाल तद्राज्ञ्या यशोराशिरिवापरः ॥१३१॥
सोऽस्माकं भव्यजीवानां नाना शर्मशतप्रदः। नित्यं सम्भावितश्चित्ते दद्यात्सद्दर्शनश्रियम् ॥१३२॥
यथाऽकलङ्कदेवोऽसौ चक्रे ज्ञानप्रभावनाम्। अन्येनापि सुभव्येन कर्त्तव्या सा सुखप्रदा ॥१३३॥
स जयति जिनदेवो देवदेवेन्द्रवन्द्यस्त्रिभुवनसुखकारी यस्य बोधप्रदीपः।
गुणगणमणिरुद्रो बोधसिन्धुर्मुनीन्द्रो दिशतु मम शिवानि श्रीप्रभाचन्द्रदेवः ॥१३४॥

इति कथाकोशे ज्ञानोद्योतिनी श्रीमदकलङ्कदेवस्य कथा समाप्ता।

ठीक बीच में रत्नमयी सिंहासन पर जिनभगवान् की बहुत सुन्दर प्रतिमा शोभित थी। वह मौलिक छत्र, चामर, भामण्डल आदि से अलंकृत थी। रथ चलता जाता था और उसके आगे-आगे भव्य पुरुष बड़ी भक्ति के साथ जिनभगवान् की जय बोलते हुए और भगवान् पर अनेक प्रकार के सुगन्धित फूलों की, जिनकी महक से सब दिशाएँ सुगन्धित होतीं थीं, वर्षा करते चले जाते थे। चारणलोग भगवान् की स्तुति पढ़ते जाते थे। कुल कामिनियाँ सुन्दर-सुन्दर गीत गाती जाती थीं। नर्तकियाँ नृत्य करती जातीं थीं। अनेक प्रकार के बाजों का सुन्दर शब्द दर्शकों के मन को अपनी ओर आकर्षित करता था। इन सब शोभाओं से रथ ऐसा जान पड़ता था, मानों पुण्यरूपी रत्नों के उत्पन्न करने को चलने वाला वह एक दूसरा रोहण पर्वत उत्पन्न हुआ है। उस समय जो याचकों को दान दिया जाता था, वस्त्राभूषण वितीर्ण किए जाते थे, उससे रथ की शोभा एक चलते हुए कल्पवृक्ष की सी जान पड़ती थी। हम रथ की शोभा का कहाँ तक वर्णन करें? आप इसी से अनुमान कर लीजिए कि जिसकी शोभा को देखकर ही बहुत से अन्यधर्मी लोगों ने जब सम्यग्दर्शन ग्रहण कर लिया, तब उसकी सुन्दरता का क्या ठिकाना है? इत्यादि दर्शनीय वस्तुओं से सजाकर रथ निकाला गया, उसे देखकर यही जान पड़ता था, मानों महादेवी मदनसुन्दरी की यशोराशि ही चल रही है। वह रथ भव्य-पुरुषों के लिए सुख को देने वाला था। उस सुन्दर रथ की हम प्रतिदिन भावना करते है, उसका ध्यान करते हैं। वह हमें सम्यग्दर्शनरूपी लक्ष्मी प्रदान करें ॥१२३-१३२॥

जिस प्रकार अकलंकदेव ने सम्यग्ज्ञान की प्रभावना की, उसका महत्त्व सर्व साधारण लोगों के हृदय पर अंकित कर दिया उसी प्रकार और-और भव्य पुरुषों को भी उचित है कि वे भी अपने से जिस तरह बन पड़े जिनधर्म की प्रभावना करें, जैनधर्म के प्रति उनका जो कर्तव्य है उसे वे पूरा करे। संसार में जिनभगवान् की सदा जय हो, जिन्हें इन्द्र, धरणेन्द्र नमस्कार करते हैं और जिनका ज्ञानरूपी प्रदीप सारे संसार को सुख देने वाला है। श्रीप्रभाचन्द्र मुनि मेरा कल्याण करें, जो गुण रत्नों के उत्पन्न होने के स्थान पर्वत हैं और ज्ञान के समुद्र हैं ॥१३३-१३४॥

३. सनत्कुमारचक्रवर्त्तिनः कथा

नत्वा पञ्च गुरून्भक्त्या स्वर्गमोक्षसुखप्रदान्। चारित्रद्योतने वच्मि चरित्रं तुर्यचक्रिणः ॥१॥
अत्रैव भरतक्षेत्रे वीतशोकपुरे प्रभुः। अभूदनन्तवीर्याख्यो राज्ञी सीताऽभिधा सती ॥२॥
पुत्रः सनत्कुमारोऽभूत्तयोः सत्पुण्यपाकतः। चतुर्थश्चक्रवर्तीशः सम्यग्दृष्टिशिरोमणिः ॥३॥
षट्खण्डमण्डितां पृथ्वीं संसाध्यैव शुभोदयात्। निधानैर्नवभी रत्नैश्चतुर्दशभिरुत्तमैः ॥४॥
गजैश्चतुरशीत्युक्तलक्षैर्दक्षो विराजितः। रथैस्तावत्प्रमाणैश्च नित्यं पूर्णमनोरथैः ॥५॥
अश्वैरष्टादशोत्कृष्टैः कोटिभिर्मर्मभूषितैः। भटैश्चतुरशीत्युक्तकोटिभिः शस्त्रपाणिभिः ॥६॥
ग्रामैः षण्णवतिप्रोक्तकोटिभिर्धान्यसम्भृतैः। स्त्रीणां षण्णवतिप्राप्तसङ्ख्यानैश्च सहस्त्रकैः ॥७॥
लसद्रत्नकिरीटाद्यैर्नरेन्द्राणां सहस्त्रकैः। द्वात्रिंशद्गणनोपेतैर्नित्यं सेवाविधायिभिः ॥८॥
इत्यादिसम्पदासारैर्देवविद्याधरैः श्रितः। रूपलावण्यसौभाग्यमहाभाग्यैः समन्वितः ॥९॥
कुर्वन्राज्यं महाप्राज्यं यावदास्ते विचक्षणः। श्रीमज्जिनेन्द्रचन्द्राणां धर्मकर्मपरायणः ॥१०॥
तावत्सौधर्मकल्पेशः स्वकीये सदसि स्थितः। पुरुषस्य लसद्रूपगुणव्यावर्णनां पराम् ॥११॥
प्रकुर्वाणः सुरैः पृष्टो देव किं कोपि वर्तते। उक्तप्रकाररूपश्रीर्भरतक्षेत्रके न वा ॥१२॥

---

३. सनत्कुमार चक्रवर्ती की कथा

स्वर्ग और मोक्ष सुख के देने वाले श्री अर्हत्, सिद्ध, आचार्य, उपाध्याय और साधुओं को नमस्कार करके मैं सम्यक्चारित्र का उद्योत करने वाले चौथे सनत्कुमार चक्रवर्ती की कथा लिखता हूँ ॥१॥

अनन्तवीर्य भारतवर्ष के अन्तर्गत वीतशोक नामक शहर के राजा थे। उनकी महारानी का नाम सीता था। हमारे चरित्रनायक सनत्कुमार इन्हीं के पुण्य के फल थे। वे चक्रवर्ती थे। सम्यग्दृष्टियों में प्रधान थे। उन्होंने छहों खण्ड पृथ्वी अपने वश में कर ली थी। उनकी विभूति का प्रमाण ऋषियों ने इस प्रकार लिखा है–नवनिधि, चौदहरत्न, चौरासी लाख हाथी, इतने ही रथ, अठारह करोड़ घोड़े, चौरासी करोड़ शूरवीर, छ्यानवें करोड़ धान्य से भरे हुए ग्राम छ्यानवें हजार सुन्दरियाँ और सदा सेवा में तत्पर रहने वाले बत्तीस हजार बड़े-बड़े राजा इत्यादि संसार श्रेष्ठ संपत्ति से वे युक्त थे। देव विद्याधर उनकी सेवा करते थे। वे बड़े सुन्दर थे, बड़े भाग्यशाली थे। जिनधर्म पर उनकी पूर्ण श्रद्धा थी। वे अपना नित्य-नैमित्तिक कर्म श्रद्धा के साथ करते, कभी उनमें विघ्न नहीं आने देते। इसके सिवा अपने विशाल राज्य का वे बड़ी नीति के साथ पालन करते और सुखपूर्वक दिन व्यतीत करते ॥२-१०॥

एक दिन सौधर्म स्वर्ग का इन्द्र अपनी सभा में पुरुषों के रूप सौन्दर्य की प्रशंसा कर रहा था। सभा में बैठे हुए एक विनोदी देव ने उनसे पूछा–प्रभो! जिस रूप गुण की आप बेहद तारीफ कर रहे हैं, भला, ऐसा रूप भारतवर्ष में किसी का है भी या केवल यह प्रशंसा ही मात्र है? ॥११-१२॥

इन्द्रेणोक्तं शुभं रूपं यादृशं चक्रवर्त्तिनः। सनत्कुमारनाम्नोऽस्ति देवानां नापि तादृशम् ॥१३॥
तच्छ्रुत्वा मणिमालाख्यरत्नचूलौ सुरोत्तमौ। तद्रूपं दृष्टुमायातौ प्रच्छन्नं मज्जनक्षणे ॥१४॥
चक्रिणोरूपमालोक्य सर्वावयवसुन्दरम्। वस्त्रभूषादिनिर्मुक्तं तथापि त्रिजगत्प्रियम् ॥१५॥
देवानामपि नास्त्येवं रूपं ताभ्यां विचिन्त्य च। शिरःकम्पं विधायेति सिंहद्वारे प्रहर्षतः ॥१६॥
स्वरूपं प्रकटीकृत्य प्रतीहारं प्रतीरितम्। भो दौवारिक भूपाग्रे त्वया शीघ्रं निरूप्यते ॥१७॥
दृष्टुकामौ भवद्रूपं स्वर्गाद्देवौ समागतौ। तदाकर्ण्य प्रतीहारश्चक्रिणं तन्निवेदयत् ॥१८॥
ततस्तेन विधायोच्चैः शृङ्गारं चक्रवर्तिना। स्थित्वा सिंहासने भूत्याऽऽकारितौ तौ सुधाशिनौ ॥१९॥
सभायां तौ समागत्य दृष्ट्वा भूपं समूचतुः। हा कष्टं यादृशं रूपं दृष्टं प्रच्छन्नवृत्तितः ॥२०॥
आवाभ्यां पूर्वमेवेदं लीलया मज्जनाश्रितम्। साम्प्रतं तादृशं नास्ति ततः सर्वमशाश्वतम् ॥२१॥
तच्छ्रुत्वा सेवकैरुक्तं तथा मण्डनकारिणा। पूर्वरूपादिदानीं च न किञ्चिद्धीनतामितम् ॥२२॥

उत्तर में इन्द्र ने कहा–हाँ, इस समय भी भारतवर्ष में एक ऐसा पुरुष है, जिसके रूप की मनुष्य तो क्या देव भी तुलना नहीं कर सकते। उसका नाम है सनत्कुमार चक्रवर्ती ॥१३॥

इन्द्र के द्वारा देव दुर्लभ सनत्कुमार चक्रवर्ती के रूपसौन्दर्य की प्रशंसा सुनकर मणिमाल और रत्नचूल नाम के दो देव चक्रवर्ती की रूपसुधा के पान की बढ़ी हुई लालसा को किसी तरह नहीं रोक सके। वे उसी समय गुप्त वेश में स्वर्गधरा को छोड़कर भारतवर्ष में आए और स्नान करते हुए चक्रवर्ती का वस्त्रालंकार रहित, पर उस हालत में भी त्रिभुवनप्रिय और सर्वसुन्दर रूप को देखकर उन्हें अपना सिर हिलाना ही पड़ा। उन्हें मानना पड़ा कि चक्रवर्ती का रूप वैसा ही सुन्दर है, जैसा इन्द्र ने कहा था और सचमुच यह रूप देवों के लिए भी दुर्लभ है। इसके बाद उन्होंने अपना असली वेष प्रकट कर पहरेदार से कहा तुम जाकर अपने महाराज से कहो कि आप के रूप को देखने के लिए स्वर्ग से दो देव आए हुए हैं। पहरेदार ने जाकर महाराज से देवों के आने का हाल कहा। चक्रवर्ती ने इसी समय अपना शृंगार किया। इसके बाद वे सिंहासन पर आकर बैठे और देवों को राजसभा में आने की आज्ञा दी ॥१४-१९॥

देव राजसभा में आए और चक्रवर्ती का रूप उन्होंने देखा। देखते ही वे खेद के साथ बोल उठे, महाराज! क्षमा कीजिए; हमें बड़े दुःख के साथ कहना पड़ता है कि स्नान करते समय वस्त्राभूषण रहित आपके रूप में जो सुन्दरता, जो माधुरी हमने छुपकर देखी थी, अब वह नहीं रही। इससे जैनधर्म का यह सिद्धान्त बहुत ठीक है कि संसार की सब वस्तुएँ क्षण-क्षण में परिवर्तित होती है–सब क्षणभंगुर हैं ॥२०-२१॥

देवों की विस्मय उत्पन्न करने वाली बात सुनकर राज कर्मचारियों तथा और उपस्थित सभ्यों ने देवों से कहा–हमें तो महाराज के रूप में पहले से कुछ भी कमी नहीं दिखती, न जाने तुमने कैसे पहली

अस्माकं प्रतिभातीति श्रुत्वा ताभ्यां च तद्वचः। तद्धीनस्य प्रतीत्यर्थं नृपाग्रे जलसम्भृतम् ॥२३॥
कुम्भमानीय सर्वेषां दर्शयित्वा पुनश्च तान्। बहिर्निष्कास्य भूपस्य पश्यतः पुरतो घटम् ॥२४॥
तोयबिन्दुमपाकृत्य तस्मात्तृणशलाकया। तानाहूय पुनस्तेषां स कुम्भो दर्शितस्तराम् ॥२५॥
कीदृशः प्रागिदानीं च कुम्भोयं कथ्यतामिति। सम्पृष्टास्ते जगुश्चैवं पूर्णोयं पूर्ववद्ध्रुवम् ॥२६॥
देवौ ततश्च भो राजन् यथायं जलबिन्दुकः। दूरीकृतोपि न ज्ञातस्तथा ते रूपहीनता ॥२७॥
एतैर्न लक्ष्यते चेति कथयित्वा दिवं गतौ। ततश्चक्री चमत्कारं दृष्ट्वा चित्ते विचारयन् ॥२८॥
पुत्रमित्रकलत्रादिसम्पदा विविधा तराम्। चंचला चपलेवासौ संसारे दुःखसागरे ॥२९॥
बीभत्सु तापकं पूति शरीरमशुचेर्गृहम्। का प्रीतिर्विदुषामत्र यत्क्षणार्धे-परिक्षयि ॥३०॥
भोगाः पञ्चेन्द्रियोत्पन्ना वञ्चकेभ्योतिवञ्चकाः। यैर्वञ्चितो जनोयं च पिशाचीव प्रवर्तते ॥३१॥
मिथ्यात्वग्रसितो जीवो जैनवाक्यामृते हिते। न करोति मतिं मूढो ज्वरीव क्षीरशर्करे ॥३२॥
अद्य हत्वा महामोहं कुर्वेहं स्वात्मनो हितम्। इत्यादिकं विचार्योच्चैः सुधीर्वैराग्यतत्परः ॥३३॥
कृत्वा पूजां जिनेन्द्राणां सर्वसिद्धिप्रदायिनीम्। दानं विधाय कारुण्यादथायोग्यं सुखप्रदम् ॥३४॥

सुन्दरता से इसमें कमी बतलाई है। सुनकर देवों ने सबको उसका निश्चय कराने के लिए एक जल भरा हुआ घड़ा मँगवाया और उसे सबको बतलाकर फिर उसमें से तृण द्वारा एक जल की बूँद निकाल ली। उसके बाद फिर घड़ा सबको दिखलाकर उन्होंने उनसे पूछा–बतलाओ पहले जैसे घड़े में जल भरा था अब भी वैसा ही भरा है, पर तुम्हें पहले से इसमें कुछ विशेषता दिखती है क्या? सबने एक मत होकर यही कहा कि नहीं। तब देवों ने राजा से कहा–महाराज, घड़ा पहले जैसा था, उसमें से एक बूँद जल की निकाल ली गई, तब भी वह इन्हें वैसा ही दिखता है। इसी तरह हमने आपका जो रूप पहले देखा था, वह अब नहीं रहा। वह कमी हमें दिखती है, पर इन्हें नहीं दिखती। यह कहकर दोनों देव स्वर्ग की ओर चले गए ॥२२-२८॥

चक्रवर्ती ने इस चमत्कार को देखकर विचारा–स्त्री, पुत्र, भाई, बन्धु, धन, धान्य, दासी, दास, सोना, चाँदी आदि जितनी सम्पत्ति है, वह सब बिजली की तरह क्षणभर में देखते-देखते नष्ट होने वाली है और संसार दुःख का समुद्र है। यह शरीर भी, जिसे दिन-रात प्यार किया जाता है, घिनौना है, सन्ताप को बढ़ाने वाला है, दुर्गन्धयुक्त है और अपवित्र वस्तुओं से भरा हुआ है। तब इस क्षण विनाशी शरीर के साथ कौन बुद्धिमान् प्रेम करेगा? ये पाँच इन्द्रियों के विषय ठगों से भी बढ़कर ठग हैं। इनके द्वारा ठगा हुआ प्राणी एक पिशाचिनी की तरह उनके वश होकर अपनी सब सुध भूल जाता है और फिर जैसा वे नाच नचाते हैं नाचने लगता है। मिथ्यात्व जीव का शत्रु है, उसके वश हुए जीव अपने आत्महित के करने वाले, संसार के दुःखों से छुड़ाकर अविनाशी सुख के देने वाले, पवित्र जिनधर्म से भी प्रेम नहीं करते। सच भी तो है–पित्तज्वर वाले पुरुष को दूध भी कड़वा ही लगता है परन्तु मैं तो अब इन विषयों के जाल से अपनी आत्मा को छुड़ाऊँगा। मैं आज ही मोह-माया का नाशकर अपने हित के लिए तैयार होता हूँ। यह विचार कर वैरागी चक्रवर्ती ने जिनमन्दिर में पहुँचकर सब सिद्धि की

दत्वा देवकुमाराय राज्यं पुत्राय धीधनः। त्रिगुप्तमुनिपार्श्वे च दीक्षां जैनीं जगद्धिताम् ॥३५॥
गृहीत्वा गुरुसद्भक्त्या तपश्चोग्राग्रसंज्ञकम्। कुर्वन्पञ्च प्रकारं च चारित्रं प्रतिपालयन् ॥३६॥
तदा विरुद्धकाहारैस्तस्य सर्वशरीरके। अनेकव्याधयो जाताः कण्डूप्रभृतयस्तराम् ॥३७॥
तथाप्यसौ महासाधुः शरीरेऽत्यन्तनिस्पृहः। चिन्तां नैव करोत्युच्चैः कुरुते चोत्तमं तपः ॥३८॥
तदा सौधर्मकल्पेशः सुधीर्धर्मानुरागतः। संस्थितः स्वसभामध्ये चारित्रं पञ्चधा मुदा ॥३९॥
व्यावर्ण्यंश्च देवेन पृष्टो मदनकेतुना। देव देव यथा प्रोक्तं चारित्रं भवता तथा ॥४०॥
किं कस्यापि लसद्दृष्टेः क्षेत्रे भरतसंज्ञके। अस्ति वा नास्ति तच्छ्रुत्वा सौधर्मेन्द्रो जगाद च ॥४१॥
सनत्कुमारचक्रेशस्त्यक्त्वा षट्खण्डमण्डिताम्। तृणवच्च महीं धीमान्स्वदेहेऽतीव निस्पृहः ॥४२॥

प्राप्ति कराने वाले भगवान् की पूजा की, याचकों को दयाबुद्धि से दान दिया और उसी समय पुत्र को राज्यभार देकर आप वन की ओर रवाना हो गए और चारित्रगुप्त मुनिराज के पास पहुँचकर उनसे जिनदीक्षा ग्रहण कर ली, जो कि संसार का हित करने वाली है। इसके बाद वे पंचाचार आदि मुनिव्रतों का निरतिचार पालन करते हुए कठिन से कठिन तपश्चर्या करने लगे। उन्हें न शीत सताती है और न आताप सन्तप्त करता है। न उन्हें भूख की परवाह है और न प्यास की। वन के जीव-जन्तु उन्हें खूब सताते हैं, पर वे उससे अपने को कुछ भी दुःखी ज्ञान नहीं करते। वास्तव में जैन साधुओं का मार्ग बड़ा कठिन है, उसे ऐसे ही धीर वीर महात्मा पाल सकते हैं। साधारण पुरुषों में गम्य नहीं। चक्रवर्ती इस प्रकार आत्मकल्याण के मार्ग में आगे-आगे बढ़ने लगे ॥२९-३६॥

एक दिन की बात है कि वे आहार के लिए शहर में गए। आहार करते समय कोई प्रकृति-विरुद्ध वस्तु उनके खाने में आ गई उसका फल यह हुआ कि उनका सारा शरीर खराब हो गया, उसमें अनेक भयंकर व्याधियाँ उत्पन्न हो गई और सबसे भारी व्याधि तो यह हुई कि उनके सारे शरीर में कोढ़ फूट निकली। उससे रुधिर, पीप बहने लगा, दुर्गन्ध आने लगी। यह सब कुछ हुआ पर इन व्याधियों का असर चक्रवर्ती के मन पर कुछ भी नहीं हुआ। उन्होंने कभी इस बात की चिन्ता तक भी नहीं की कि मेरे शरीर की क्या दशा है? किन्तु वे जानते थे कि-

बीभत्सु तापकं पूति शरीरमशुचेर्गृहम्।
का प्रीतिर्विदुषामत्र यत्क्षणार्थे परिक्षयि॥

इसलिए वे शरीर से सर्वथा निर्मोही रहे और बड़ी सावधानी से तपश्चर्या करते रहे-अपने व्रत पालते रहे ॥३७-३८॥

एक दिन सौधर्म स्वर्ग का इन्द्र अपनी सभा में धर्म-प्रेम के वश हो मुनियों के पाँच प्रकार के चारित्र का वर्णन कर रहा था। उस समय एक मदनकेतु नामक देव ने उनसे पूछा-प्रभो! जिस चारित्र का आपने अभी वर्णन किया उसका ठीक पालने वाला क्या कोई इस समय भारतवर्ष में है? उत्तर में इन्द्र ने कहा, सनत्कुमार चक्रवर्ती हैं। वे छह खण्ड पृथ्वी को तृण की तरह छोड़कर संसार, शरीर, भोग

तच्चरित्रं जगच्चित्रं पञ्चधास्ति जिनोदितम्। एतदाकर्ण्य देवोसौ शीघ्रं मदनकेतुवाक् ॥४३॥
तत्रागत्य महाटव्यामनेकव्याधिसंयुतम्। निश्चलं मेरुवद्गाढं सुरासुरनमस्कृतम् ॥४४॥
दुर्धरं भूरि चारित्रमनुतिष्ठन्तमद्भुतम्। समालोक्य मुनीन्द्रं तं पवित्रीकृतभूतलम् ॥४५॥
सम्प्राप्य परमानन्दं तथा तस्य परीक्षितुम्। शरीरे निस्पृहत्वं च वैद्यरूपं विधाय वै ॥४६॥
स्फेटयित्वा महाव्याधीन्सर्वान्वैद्यशिरोमणिः। शीघ्रं दिव्यं करोम्युच्चैः शरीरं रोगवर्जितम् ॥४७॥
एवं मुहुर्मुहुर्व्यक्तं ब्रुवाणः पुरतो मुनेः। इतस्ततश्च सञ्चरन्पृष्टोऽसौ मुनिना तदा ॥४८॥
कस्त्वं किमर्थमत्रैव निर्जने च वने घने। पूत्कारं सङ्करोषीति तदाकर्ण्य सुरोऽवदत् ॥४९॥
वैद्योऽहं भवतां देव निखिलं व्याधिसञ्चयम्। स्फेटयित्वा सुवर्णाभशरीरं सङ्करोम्यहम् ॥५०॥
ततश्च स मुनिः प्राह यदि स्फेटयसि ध्रुवम्। व्याधिं मे स्फेटय त्वं च शीर्घं सांसारिकं सुधीः ॥५१॥
तेनोक्तं भो मुने नाऽहं समर्थस्तन्निवारणे। तत्र शूरा भवन्त्येव भवन्तस्तु विचक्षणाः ॥५२॥
ततः प्रोक्तं मुनीन्द्रेण किं व्याधिस्फेटनेन मे। अशाश्वतेऽशुचौ काये निर्गुणे दुर्जनोपमे ॥५३॥
निष्ठीवनस्य संस्पर्शमात्रेण व्याधिसंक्षयः। यत्र शीघ्रं भवत्येव किं कार्यं वैद्यभेषजैः ॥५४॥

आदि से उदास हैं और दृढ़ता के साथ तपश्चर्या तथा पंच प्रकार का चारित्र पालन करते हैं ॥३९-४३॥

मदनकेतु सुनते ही स्वर्ग से चलकर भारतवर्ष में जहाँ सनत्कुमार मुनि तपश्चर्या करते थे, वहाँ पहुँचा। उसने देखा कि उनका सारा शरीर रोगों का घर बन रहा है, तब भी चक्रवर्ती सुमेरु के समान निश्चल होकर तप कर रहे हैं। उन्हें अपने दुःख की कुछ परवाह नहीं हैं। वे अपने पवित्र चारित्र का धीरता के साथ पालन कर पृथ्वी को पावन कर रहे हैं। उन्हें देखकर मदनकेतु बहुत प्रसन्न हुआ। तब भी वे शरीर से कितने निर्मोही हैं, इस बात की परीक्षा करने के लिए उसने वैद्य का वेष बनाया और लगा वन में घूमने। वह घूम-घूमकर यह चिल्लाता था कि ''मैं एक बड़ा प्रसिद्ध वैद्य हूँ, सब वैद्यों का शिरोमणि हूँ। कैसी ही भयंकर से भयंकर व्याधि क्यों न हो उसे देखते-देखते नष्ट करके शरीर को क्षणभर में मैं निरोग कर सकता हूँ।'' देखकर सनत्कुमार मुनिराज ने उसे बुलाया और पूछा तुम कौन हो? किसलिए इस निर्जन वन में घूमते फिरते हो? और क्या कहते हो? उत्तर में देव ने कहा-मैं एक प्रसिद्ध वैद्य हूँ। मेरे पास अच्छी से अच्छी दवाएँ हैं। आपका शरीर बहुत बिगड़ रहा है, यदि आज्ञा दे तो मैं क्षणमात्र में इसकी सब व्याधियाँ खोकर इसे सोने सरीखा बना सकता हूँ। मुनिराज बोले-हाँ तुम वैद्य हो? यह तो बहुत अच्छा हुआ जो तुम इधर अनायास आ निकले। मुझे एक बड़ा भारी और महाभयंकर रोग हो रहा है, मैं उसके नष्ट करने का प्रयत्न करता हूँ, पर सफल प्रयत्न नहीं होता। क्या तुम उसे दूर कर दोगे? ॥४४-५०॥

देव ने कहा-निस्सन्देह मैं आपके रोग को जड़ मूल से खो दूँगा। वह रोग शरीर से गलने वाला कोढ़ ही है न।

मुनिराज बोले-नहीं, यह तो एक तुच्छ रोग है। इसकी तो मुझे कुछ भी परवाह नहीं। जिस रोग

इत्युक्त्वा मुनिना तेन स्वनिष्ठीवनमात्रतः। अपनीय महाव्याधिं स्वबाहुर्दर्शितः शुभः ॥५५॥
दृष्ट्वा स्वर्णशलाकाभं बाहुमेकं मुनेस्तराम्। स्वमायामुपसंहृत्य तं प्रणम्य जगाद सः ॥५६॥
भो स्वामिन्भवतां चित्रं चरित्रं दोषवर्जितम्। निस्पृहत्वं शरीरादौ सौधर्मेन्द्रेण वर्णितम् ॥५७॥
सभायां यादृशं देव महाधर्मानुरागतः। तादृशं दृष्टमेवात्र समागत्य मयाऽधुना ॥५८॥
अतस्त्वं धन्य एवात्र भूतले जन्म ते शुभम्। मानुष्यं शर्मदं चेति तं प्रशस्य मुहुर्मुहुः ॥५९॥
नत्वा भक्तिभरेणोच्चैः स्वर्गं देवो गतस्तदा। मुनिः सनत्कुमारोऽसौ महावैराग्यतः पुनः ॥६०॥
पञ्च प्रकारचारित्रं प्रकृष्टोद्योतनादिकम्। विधाय क्रमशो धीरः शुक्लध्यानप्रभावतः ॥६१॥
घातिकर्मक्षयं कृत्वा लोकालोकप्रकाशकम्। सम्प्राप्तः केवलज्ञानं देवेन्द्राद्यैः प्रपूजितः ॥६२॥
सम्बोध्य सकलान्भव्यान्सद्धर्मामृतवर्षणैः। शेषकर्मक्षयं कृत्वा प्राप्तवान्मोक्षमक्षयम् ॥६३॥

की बात मैं तुमसे कह रहा हूँ, वह तो बड़ा ही भयंकर है। देव बोला–अच्छा, तब बतलाइए यह क्या रोग है, जिसे आप इतना भयंकर बतला रहे हैं? मुनिराज ने कहा–सुनो, वह रोग है संसार का परिभ्रमण। यदि तुम मुझे उससे छुड़ा दोगे तो बहुत अच्छा होगा। बोलो क्या कहते हो? सुनकर देव बड़ा लज्जित हुआ। वह बोला, मुनिनाथ! इस रोग को तो आप ही नष्ट कर सकते हैं। आप ही इसके दूर करने में शूरवीर और बुद्धिमान् हैं। तब मुनिराज ने कहा–भाई, जब इस रोग को तुम नष्ट नहीं कर सकते, तब मुझे तुम्हारी आवश्यकता भी नहीं। कारण विनाशीक, अपवित्र, निर्गुण और दुर्जन के समान इस शरीर की व्याधियों को तुमने नष्ट कर भी दिया तो उसकी मुझे जरूरत नहीं। जिस व्याधि का वमन के स्पर्शमात्र से जब क्षय हो सकता है, तब उसके लिए बड़े-बड़े वैद्यशिरोमणि की और अच्छी-अच्छी दवाओं की आवश्यकता ही क्या है? यह कहकर मुनिराज ने अपने वमन द्वारा एक हाथ के रोग को नष्टकर उसे सोने-सा निर्मल बना दिया। मुनि की इस अतुल शक्ति को देखकर देव भौंचक्का रह गया। वह अपने कृत्रिम वेष को पलटकर मुनिराज से बोला–भगवन्! आपके विचित्र और निर्दोष चारित्र की तथा शरीर में निर्मोहपने की सौधर्म इन्द्र ने धर्म प्रेम के वश होकर जैसी प्रशंसा की थी, वैसा ही मैंने आपको पाया। प्रभो! आप धन्य है, संसार में आप ही का मनुष्य जन्म प्राप्त करना सफल और सुख देने वाला है। इस प्रकार मदनकेतु सनत्कुमार मुनिराज की प्रशंसा कर और बड़ी भक्ति के साथ उन्हें बारम्बार नमस्कार कर स्वर्ग में चला गया ॥५१-६०॥

इधर सनत्कुमार मुनिराज क्षणक्षण में बढ़ते हुए वैराग्य के साथ अपने चारित्र को क्रमशः उन्नत करने लगे अन्त में शुक्लध्यान के द्वारा घातिया कर्मों का नाशकर उन्होंने लोकालोक का प्रकाशक केवलज्ञान प्राप्त किया और इन्द्र धरणेन्द्रादि द्वारा पूज्य हुए ॥६१-६२॥

इसके बाद वे संसार में दुःखरूपी अग्नि से झुलसते हुए अनेक जीवों को सद्धर्मरूपी अमृत की वर्षा से शान्त कर उन्हें मुक्ति का मार्ग बतलाकर और अन्त में अघातिया कर्मों का भी नाशकर मोक्ष में जा विराजे, जो कभी नाश नहीं होने वाला है ॥६३॥

सोऽस्माकं केवलज्ञानी स्वर्गमोक्षसुखप्रदः। पूजितो वन्दितो नित्यं भूयात्सत्केवलश्रिये ॥६४॥
यथाऽनेन मुनीन्द्रेण चारित्रोद्योतनं कृतम्। तथान्येन सुभव्येन कर्त्तव्यं तद्धि शर्मदम् ॥६५॥
गच्छे श्रीमति मूलसङ्घतिलके श्रीशारदायाः शुभे। श्रीभट्टारकमल्लिभूषणगुरुश्चारित्रचूडामणिः।
तच्छिष्यो गुणरत्नरञ्जितमतिर्नित्यं सतां सद्गतिर्भूयान्मे भवतारको वरमुदे श्रीसिंहनन्दी मुनिः ॥६६॥

इति चारित्रोद्योतिनी श्रीसनत्कुमारचक्रवर्तिनः कथा समाप्ता।

४. श्रीसमन्तभद्रस्वामिनः कथा

नत्वा जिनं जगत्पूज्यं द्योतने दृष्टिबोधयोः। श्रीमत्समन्तभद्रस्य चरित्रं रचयाम्यहम् ॥१॥
इहैव दक्षिणस्थायां काञ्च्यां पुर्यां परात्मवित्। मुनिः समन्तभद्राख्यो विख्यातो भुवनत्रये ॥२॥
तर्कव्याकरणोत्कृष्टच्छन्दोऽलङ्कारकादिभिः। अनेकशास्त्रसन्दोहैर्मण्डितो बुधसत्तमः ॥३॥
दुर्द्धरानेकचारित्ररत्नरत्नाकरो महान्। यावदास्ते सुखं धीरस्तावत्तत्कायकेऽभवत् ॥४॥
असद्वेद्यमहाकर्मोदयाद् दुर्दुःखदायिनः। तीव्रकष्टप्रदः कष्टं भस्मकव्याधिसंज्ञकः ॥५॥

उन स्वर्ग और मोक्ष-सुख देने वाले श्रीसनत्कुमार केवली की हम भक्ति और पूजन करते हैं, उन्हें नमस्कार करते हैं। वे हमें भी केवलज्ञानरूपी लक्ष्मी प्रदान करें ॥६४॥

जिस प्रकार सनत्कुमार मुनिराज ने सम्यक्चारित्र का उद्योत किया उसी तरह सब भव्य पुरुषों को भी करना उचित है। वह सुख का देने वाला है ॥६५॥

श्रीमूलसंघ सरस्वतीगच्छ में चारित्रचूड़ामणि श्रीमल्लिभूषण भट्टारक हुए। सिंहनन्दी मुनि उनके प्रधान शिष्यों में थे। वे बड़े गुणी थे और सत्पुरुषों को आत्मकल्याण का मार्ग बतलाते थे। वे मुझे भी संसार समुद्र से पार करें ॥६६॥

४. समन्तभद्राचार्य की कथा

संसार के द्वारा पूज्य और सम्यग्दर्शन तथा सम्यग्ज्ञान का उद्योत करने वाले श्री जिन भगवान् को नमस्कार कर श्री समन्तभद्राचार्य की पवित्र कथा लिखता हूँ, जो कि सम्यक्चारित्र की प्रकाशक है ॥१॥

भगवान् समन्तभद्र का पवित्र जन्म दक्षिणप्रान्त के अन्तर्गत कांची नाम की नगरी में हुआ था। वे बड़े तत्त्वज्ञानी और न्याय, व्याकरण, साहित्य आदि विषयों के भी बड़े भारी विद्वान् थे। संसार में उनकी बहुत ख्याति थी। वे कठिन से कठिन चारित्र का पालन करते, दुस्सह तप तपते और बड़े आनन्द से अपना समय आत्मानुभव, पठन-पाठन, ग्रन्थरचना आदि में व्यतीत करते ॥२-४॥

कर्मों का प्रभाव दुर्निवार है। उसके लिए राजा हो या रंक हो, धनी हो या निर्धन हो, विद्वान् हो या मूर्ख हो, साधु हो या गृहस्थ हो सब समान हैं, सबको अपने-अपने कर्मों का फल भोगना ही पड़ता है। भगवान् समन्तभद्र के लिए भी एक ऐसा ही कष्ट का समय आया। वे बड़े भारी तपस्वी थे, विद्वान् थे, पर कर्मों ने इन बातों की कुछ परवाह न कर उन्हें अपने चक्र में फँसाया। असातावेदनीय के तीव्र

तेन सम्पीडितश्चित्ते चिन्तयत्यैवमञ्जसा। व्याधिनानेन सन्तप्ता विद्वान्सोपि वयं भुवि ॥६॥
दर्शनस्योपकाराय जाता नैव समर्थकाः। अतस्तद्व्याधिनाशाय विधिः कश्चिद्विधीयते ॥७॥
स विधिस्तु भवेन्नाना पक्वान्नाहारसञ्चयैः। अन्यैः स्निग्धतरैरन्नैस्तद्दुःखौघप्रशान्तिदः ॥८॥
तदाहारस्य सम्प्राप्तेरभावादत्र साम्प्रतम्। यस्मिन्देशे यथास्थाने येन लिङ्गेन सम्भवेत् ॥९॥
तथाहारपरिप्राप्तिराश्रयं तं व्रजाम्यहम्। विचार्येति परित्यज्य पुरीं काञ्चीं स संयमी ॥१०॥
उत्तराभिमुखो गच्छन्पुण्ड्रेन्दुनगरे गतः। तत्र वन्दकलोकानां स्थाने च महतीं मुदा ॥११॥
दानशालां समालोक्य भस्मकव्याधिसङ्क्षयः। भविष्यत्यत्र संचित्य धृतवान्बौद्धलिङ्गकम् ॥१२॥
तत्रापि तन्महाव्याधिशान्तिदाहारदुर्विधात्। स निर्गत्य पुनस्तस्मादुत्तरापथसम्मुखः ॥१३॥
पर्यटन्नगराण्युच्चैरनेकानि क्षुधाहतः। सम्प्राप्तः कतिभिर्घस्त्रैः पुरं दशपुराभिधम् ॥१४॥
तत्र दृष्ट्वा तथा भागवतानाम् मठमुन्नतम्। तल्लिङ्गिभिः समाकीर्णं काककीर्णं वनं यथा ॥१५॥
तद्भाक्तिकैः सदा दत्तविशिष्टाहारसञ्चयम्। त्यक्त्वा वन्दकलिङ्गं च धृत्वा भागवतं हि तत् ॥१६॥
तत्रैवं भस्मकव्याधिविनाशाहारहानितः। ततो निर्गत्य नानोरुदिग्देशादींश्च पर्यटन् ॥१७॥

उदय से भस्मक व्याधि नाम का एक भयंकर रोग उन्हें हो गया। उससे वे जो कुछ खाते वह उसी समय भस्म हो जाता और भूख वैसी की वैसी बनी रहती। उन्हें इस बात का बड़ा कष्ट हुआ कि हम विद्वान् हुए और पवित्र जिनशासन का संसार भर में प्रचार करने के लिए समर्थ भी हुए तब भी उसका कुछ उपकार नहीं कर पाते। इस रोग ने असमय में बड़ा कष्ट पहुँचाया। अस्तु। अब कोई ऐसा उपाय करना चाहिए जिससे इसकी शान्ति हो। अच्छे-अच्छे स्निग्ध, सच्चिकण और पौष्टिक पकवान का आहार करने से इसकी शान्ति हो सकेगी; इसलिए ऐसे भोजन का योग मिलाना चाहिए, पर यहाँ तो इसका कोई साधन नहीं दीख पड़ता। इसलिए जिस जगह, जिस तरह ऐसे भोजन की प्राप्ति हो सकेगी मैं वहीं जाऊँगा और वैसा ही उपाय करूँगा ॥५-१०॥

यह विचार कर वे कांची से निकले और उत्तर की ओर रवाना हुए। कुछ दिनों तक चलकर वे पुण्ड्र नगर में आए। वहाँ बौद्धों की एक बड़ी भारी दानशाला थी। उसे देखकर आचार्य ने सोचा, यह स्थान अच्छा है। यहाँ अपना रोग नष्ट हो सकेगा ॥११-१२॥

इस विचार के साथ ही उन्होंने बौद्ध साधु का वेष बनाकर वहाँ रहे, परन्तु योग्य भोजन नहीं मिला। इसलिए वे फिर उत्तर की ओर आगे बढ़े और अनेक शहरों में घूमते हुए कुछ दिनों के बाद दशपुर-मन्दोसोर में आए। वहाँ उन्होंने भागवत-वैष्णवों का एक बड़ा भारी मठ देखा। उसमें बहुत से भागवत सम्प्रदाय के साधु रहते थे। उनके भक्त लोग उन्हें खूब अच्छा-अच्छा भोजन देते थे। यह देखकर उन्होंने बौद्धवेष को छोड़कर भागवत साधु का वेष ग्रहण कर लिया। वहाँ वे कुछ दिनों तक रहे, फिर उनकी व्याधि के योग्य उन्हें वहाँ भी भोजन नहीं मिला। तब वे वहाँ से भी निकलकर और अनेक देशों और पर्वतों में घूमते हुए बनारस आए। उन्होंने यद्यपि बाह्य में जैनमुनियों के वेष को

अन्तः स्फुरितसम्यक्त्वो बहिर्व्याप्तकुलिङ्गकः। शोभितोऽसौ महाकान्तिः कर्दमाक्तो मणिर्यथा ॥१८॥
वाराणसीं ततः प्राप्तः कुलघोषैः समन्विताम्। योगिलिङ्गं तथा तत्र गृहीत्वा पर्यटन्पुरे ॥१९॥
स योगी लीलया तत्र शिवकोटिमहीभुजा। कारितं शिवदेवोरुप्रासादं सम्विलोक्य च ॥२०॥
दृष्टाष्टादशसद्भक्षसमूहैश्चारुकैर्युतम्। अत्रास्मदीयदुर्व्याधिशान्तिता सम्भविष्यति ॥२१॥
यावदेवं विचार्योच्चैः संस्थितस्तावदेव च। कृत्वा देवस्य तैः पूजां भाक्तिकैर्भक्षभेदकैः ॥२२॥
बहिर्निक्षिप्यमाणं च दृष्ट्वा नैवेद्यकं महत्। अहो किमत्र कस्यापि सामर्थ्यं नास्ति सोऽवदत् ॥२३॥
यः कोपि देवमत्रेममवतार्य सुभक्तितः। राज्ञा सम्प्रेषितं दिव्यमाहारं भोजयत्यलम् ॥२४॥
इत्याकर्ण्य जगुस्तेपि किं सामर्थ्यं तवास्ति च। भक्षं भोजयितुं देवमवतार्य यतो भवान् ॥२५॥
वदत्येवं तदाकर्ण्य स जगौ मेस्ति तद्ध्रुवम्। ततस्तत्र स्थितैर्लोकैः शीघ्रं राज्ञे निवेदितम् ॥२६॥
योगिनैकेन देवात्र समागत्य महाद्भुतम्। त्वदीयदेवसत्पूजाविसर्जनविधौ प्रभो ॥२७॥
बहिर्निक्षिप्यमाणं च नैवेद्यं संविलोक्य तत्। प्रोक्तमत्रावतार्याशु देवं दिव्याशनं महत् ॥२८॥
भोजयामीति तच्छ्रुत्वा शिवकोटिमहीपतिः। सञ्जातकौतुको दिव्यं नानाहारं घृतादिभिः ॥२९॥

छोड़कर कुलिंग धारण कर रखा था, पर इसमें कोई सन्देह नहीं कि उनके हृदय में सम्यग्दर्शन की पवित्र ज्योति जगमगा रही थी। इस वेष में वे ठीक ऐसे जान पड़ते थे, मानों कीचड़ से भरा हुआ कान्तिमान् रत्न हो। इसके बाद आचार्य योगलिंग धारण कर शहर में घूमने लगे ॥१३-१९॥

उस समय बनारस के राजा थे शिवकोटि। वे शिव के बड़े भक्त थे। उन्होंने शिव का एक विशाल मन्दिर बनवाया था। वह बहुत सुन्दर था। उसमें प्रतिदिन अनेक प्रकार के व्यंजन शिव को भेंट चढ़ा करते थे। आचार्य ने देखकर सोचा कि यदि किसी तरह अपनी इस मन्दिर में कुछ दिनों के लिए स्थिति हो जाये, तो निस्सन्देह अपना रोग शान्त हो सकता है। यह विचार वे कर ही रहे कि इतने में पुजारी लोग महादेव की पूजा करके बाहर आए और उन्होंने एक बड़ी भारी व्यंजनों की राशि, जो कि शिव को भेंट चढ़ाई गई थी, लाकर बाहर रख दी। उसे देखकर आचार्य ने कहा, क्या आप लोगों में ऐसी किसी की शक्ति नहीं जो महाराज के भेजे हुए इस दिव्य भोजन को शिव की पूजा के बाद शिव को ही खिला सकें? तब उन ब्राह्मणों ने कहा, तो क्या आप अपने में इस भोजन को शिव को खिलाने की शक्ति रखते हैं? आचार्य ने कहा-हाँ मुझमें ऐसी शक्ति है। सुनकर उन बेचारों को बड़ा आश्चर्य हुआ। उन्होंने उसी समय जाकर यह हाल राजा से कहा-प्रभो! आज एक योगी आया है। उसकी बातें बड़ी विलक्षण हैं। हमने महादेव की पूजा करके उनके लिए चढ़ाया हुआ नैवेद्य बाहर लाकर रखा, उसे देखकर वह योगी बोला कि-''आश्चर्य है, आप लोग इस महादिव्य भोजन को पूजन के बाद महादेव को न खिलाकर पीछे उठा ले आते हो! भला ऐसी पूजा से कैसा लाभ? उसने साथ ही यह भी कहा कि मुझमें ऐसी शक्ति है जिसके द्वारा यह सब भोजन मैं महादेव को खिला सकता हूँ। यह कितने खेद की बात है कि जिसके लिए इतना आयोजन किया जाता है, इतना खर्च उठाया जाता है, वह यों ही

प्रचुरेक्षुरसैर्दुग्धदध्यादिकसमन्वितैः। पूर्णैः कुम्भशतैर्युक्तं सत्प्रपैर्वटकादिभिः ॥३०॥
समादाय समागत्य तत्रैवं संजगाद सः। भोजयन्तु भवन्तस्तु देवं भो योगिनोऽशनम् ॥३१॥
एवं करोमि तेनोक्त्वा सर्वं तद्भोज्यसञ्चयम्। प्रासादान्तः प्रविश्योच्चैः सर्वान्निष्कास्य तान्बहिः ॥३२॥
द्वारं दत्वा स्वयं भुक्त्वा कपाटयुगलं पुनः। समुद्घाट्य ततः प्रोक्तं भाजनानि बहिस्तराम् ॥३३॥
निस्सार्यतां ततो जाते महाश्चर्ये स भूपतिः। नित्यं नैवेद्यसन्दोहं कारयित्वोत्तरोत्तरम् ॥३४॥
प्रेषयामास सद्भक्त्या षण्मासेषु गतेषु च। संजाते भस्मकव्याधिप्रक्षये तस्य योगिनः ॥३५॥
आहारे प्रकृतिं प्राप्ते शरीरे शान्तितामिते। समस्तभक्षसन्दोहं दृष्ट्वा चोद्धरितं जगुः ॥३६॥
ततस्तत्र स्थिता लोकाः किं भो योगीन्द्र साम्प्रतम्। तथैवोद्ध्रियते सर्वो नाना भक्षसमुच्चयः ॥३७॥

रह जाये और दूसरे ही उससे लाभ उठावें? यह ठीक नहीं। इसके लिए कुछ प्रबन्ध होना चाहिए, जो जिसके लिए इतना परिश्रम और खर्च उठाया जाता है वही उसका उपयोग भी कर सके।'' महाराज को भी इस अभूतपूर्व बात के सुनने से बड़ा अचंभा हुआ। वे इस विनोद को देखने के लिए उसी समय अनेक प्रकार के सुन्दर और सुस्वादु पकवान अपने साथ लेकर शिव मन्दिर गए और आचार्य से बोले- योगिराज! सुना है कि आपमें कोई ऐसी शक्ति है, जिसके द्वारा शिवमूर्ति को भी आप खिला सकते हैं, तो क्या यह बात सत्य है? और सत्य है तो लीजिये यह भोजन उपस्थित है, इसे महादेव को खिलाइए ॥२०-३१॥

उत्तर में आचार्य ने 'अच्छी बात है' यह कहकर राजा के लाये हुए, सब पकवानों को मन्दिर के भीतर रखवा दिया और सब पुजारी पंडों को मन्दिर से बाहर निकालकर भीतर से आपने मन्दिर के किवाड़ बन्द कर लिए। इसके बाद लगे उसे आप उदरस्थ करने। आप भूखे तो खूब थे ही इसलिए थोड़ी ही देर में सब आहार को हजमकर आपने झट से मन्दिर का दरवाजा खोल दिया और निकलते ही नौकरों को आज्ञा की कि सब बरतन बाहर निकाल लो। महाराज इस आश्चर्य को देखकर भौचक्के से रह गए। वे राजमहल लौट गए। उन्होंने बहुत तर्क-वितर्क उठाये पर उनकी समझ में कुछ भी नहीं आया कि वास्तव में बात क्या है? ॥३२-३४॥

अब प्रतिदिन एक से एक बढ़कर पकवान आने लगे और आचार्य महाराज भी उनके द्वारा अपनी व्याधि नाश करने लगे। इस तरह पूरे छह महीना बीत गए। आचार्य का रोग भी नष्ट हो गया ॥३५॥

एक दिन आहार राशि को ज्यों की त्यों बची हुई देखकर पुजारी-पण्डों ने उनसे पूछा, योगिराज! यह क्या बात है? क्यों आज यह सब आहार यों ही पड़ा रहा? आचार्य ने उत्तर दिया-राजा की परम भक्ति से भगवान् बहुत खुश हुए, वे अब तृप्त हो गए हैं। पर इस उत्तर से उन्हें सन्तोष नहीं हुआ। उन्होंने जाकर आहार के बाकी बचे रहने का हाल राजा से कहा। सुनकर राजा ने कहा-अच्छा इस बात का पता लगाना चाहिए कि वह योगी मन्दिर के किवाड़ बंदकर भीतर क्या करता है? जब इस बात का

तेनोक्तं भूपतेर्भक्त्या सन्तृप्तो भगवानयम्। स्तोकमेवात्र भुंक्ते च तच्छ्रुत्वा ते जगुर्नृपम् ॥३८॥
तत्सर्वं भूपतिः सोपि शुष्कपुष्पादिवेष्टितम्। धृतं माणवकं तस्य चारित्रं वीक्षितुं तराम् ॥३९॥
तं प्रणालप्रदेशे च स्थापयामास मूढतः। द्वारं दत्वा तु योगीन्द्रं भुञ्जानं वीक्ष्य तत्स्वयम् ॥४०॥
छात्रो जगौ नृपस्याग्रे योगी भो देव किंचन। देवं न भोजयत्येव किन्तु भुङ्क्ते स्वयं पुनः ॥४१॥
तदाकर्ण्य नृपः प्राह कोपेन कलितस्तराम्। भो योगिस्त्वं मृषावादी न किञ्चिद्भोजनादिकम् ॥४२॥
देवं मे भोजयस्येव किन्तु दत्वा कपाटकम्। स्वयं त्वं भक्षयस्येव महान्धूर्ततरो भवान् ॥४३॥
नमस्कारं न देवस्य करोषीति कथं पुनः। तच्छ्रुत्वा योगिना प्रोक्तं देवस्ते सोढुमक्षमः ॥४४॥

ठीक-ठीक पता लग जाये तब उससे भोजन के बचे रहने का कारण पूछा जा सकता है और फिर उस पर विचार भी किया जा सकता है। बिना ठीक हाल जाने उससे कुछ पूछना ठीक नहीं जान पड़ता ॥३६-३८॥

एक दिन की बात है कि आचार्य कहीं गए हुए थे और पीछे से उन सब ने मिलकर एक चालाक लड़के को महादेव के अभिषेक जल के निकलने की नाली में छुपा दिया और उसे खूब फूल पत्तों से ढक दिया। वह वहाँ छिपकर आचार्य की गुप्त क्रिया देखने लगा ॥३९॥

सदा के माफिक आज भी खूब अच्छे-अच्छे पकवान आए। योगिराज ने उन्हें भीतर रखवाकर भीतर से मन्दिर का दरवाजा बन्द कर दिया और आप लगे भोजन करने। जब आपका पेट भर गया, तब किवाड़ खोलकर आप नौकरों से उस बचे सामान को उठा लेने के लिए कहना ही चाहते थे कि उनकी दृष्टि सामने ही खड़े हुए राजा और ब्राह्मणों पर पड़ी। आज एकाएक उन्हें वहाँ उपस्थित देखकर उन्हें बड़ा आश्चर्य हुआ। ये झट से समझ गए कि आज अवश्य कुछ न कुछ दाल में काला है। इतने में ही वे ब्राह्मण उनसे पूछ बैठे कि योगिराज! क्या बात है, जो कई दिनों से बराबर आहार बचा रहता है? क्या शिवजी अब कुछ नहीं खाते? जान पड़ता है, वे अब खूब तृप्त हो गए हैं। इस पर आचार्य कुछ कहना ही चाहते थे कि वह धूर्त लड़का उन फूल पत्तों के नीचे से निकलकर महाराज के सामने आ खड़ा हुआ और बोला-राजा राजेश्वर! वे योगी तो यह कहते थे कि मैं शिवजी को भोजन कराता हूँ, पर इनका यह कहना बिल्कुल झूठा है। असल में ये शिवजी को भोजन न कराकर स्वयं ही खाते हैं। इन्हें खाते हुए मैंने अपनी आँखों से देखा है। योगिराज! सब की आँखों में आपने तो बड़ी बुद्धिमानी से धूल झोंकी है। इसमें कोई सन्देह नहीं कि आप योगी नहीं, किन्तु एक बड़े भारी धूर्त हैं और महाराज! इनकी धूर्तता तो देखिये, जो शिवजी को हाथ जोड़ना तो दूर रहा उल्टा ये उनका अविनय करते हैं। इतने में वे ब्राह्मण भी बोल उठे, महाराज! जान पड़ता है यह शिवभक्त भी नहीं है। इसलिए इससे शिवजी को हाथ जोड़ने के लिए कहा जाये, तब सब पोल स्वयं खुल जायेगी। सब कुछ सुनकर महाराज ने आचार्य से कहा-अच्छा जो कुछ हुआ उस पर ध्यान न देकर हम यह जानना चाहते हैं कि तुम्हारा असल धर्म क्या है? इसलिए तुम शिवजी को नमस्कार करो। सुनकर भगवान् समन्तभद्र बोले-राजन्! मैं नमस्कार कर सकता हूँ, पर मेरा नमस्कार स्वीकार कर लेने को शिवजी समर्थ नहीं हैं।

अस्माकं सुनमस्कारं रागद्वेषमलीमसः। राजत्वं राजते नैव राजन्सामान्यके नरे ॥४५॥
यस्त्वष्टादशदुर्दोषैर्निर्मुक्तो जिनभास्करः। केवलज्ञानसत्तेजोलोकालोकप्रकाशकः ॥४६॥
अस्मदीयं नमस्कारं स सोढुं वर्तते क्षमः। तेनाहं न नमस्कारं करोम्यस्मै महीपते ॥४७॥
यद्यस्मै तं करोम्युच्चैस्तदायं तव देवकः। स्फुटत्यैव तदाकर्ण्य नृपः प्राह सकौतुकः ॥४८॥
स्फुटत्यसौ स्फुटत्यैव कुरु त्वं च नमस्कृतिम्। पश्यामस्ते नमस्कारसामर्थ्यं सकलं ध्रुवम् ॥४९॥
ततो जगाद योगीन्द्रः प्रभाते भवतां पुनः। सामर्थ्यं दर्शयिष्यामि मदीयं भो महीपते ॥५०॥
एवमस्त्वीति सम्प्रोक्त्वा राज्ञा तं योगिनं तदा। धृत्वा देवगृहे पश्चाद्बहिस्तु बहुयत्नतः ॥५१॥
खड्गपाणिभटैर्गाढं हस्तिनां च घटादिभिः। संरक्षितस्तदा रात्रिप्रहरद्वितये गते ॥५२॥
मयोक्तं रभसादित्थं न विद्मः किं भविष्यति। इत्यादिचिन्तनोपेतः संस्मरञ्जिनपादयोः ॥५३॥

कारण-वे राग, द्वेष, क्रोध, मान, माया आदि विकारों से दूषित हैं। जिस प्रकार पृथ्वी के पालन का भार एक सामान्य मनुष्य नहीं उठा सकता, उसी प्रकार मेरी पवित्र और निर्दोष नमस्कृति को एक रागद्वेषादि विकारों से अपवित्र देव नहीं सह सकता, किन्तु जो क्षुधा, तृषा, राग, द्वेष, क्रोध, मान, माया, लोभ आदि अठारह दोषों से रहित हैं, केवलज्ञानरूपी प्रचण्ड तेज का धारक है और लोकालोक का प्रकाशक है, वही जिनसूर्य मेरे नमस्कार के योग्य है और वही उसे सह भी सकता है। इसलिए मैं शिवजी को नमस्कार नहीं करूँगा इसके सिवा भी यदि आप आग्रह करेंगे तो आपको समझ लेना चाहिए कि इस शिवमूर्ति की कुशल नहीं है, यह तुरंत ही फट पड़ेगी। आचार्य की इस बात से राजा का विनोद और भी बढ़ गया। उन्होंने कहा-योगिराज! आप इसकी चिन्ता न करें, यह मूर्ति यदि फट पड़ेगी तो इसे फट जाने दीजिये, पर आपको तो नमस्कार करना ही पड़ेगा। राजा का बहुत ही आग्रह देख आचार्य ने 'तथास्तु' कहकर कहा, अच्छा तो कल प्रातःकाल ही मैं अपनी शक्ति का आपको परिचय कराऊँगा। 'अच्छी बात है, यह कहकर राजा ने आचार्य को मन्दिर में बन्द करवा दिया और मन्दिर के चारों ओर नंगी तलवार लिए सिपाहियों का पहरा लगवा दिया। इसके बाद ''आचार्य की सावधानी के साथ देख-रेख की जाये, वे कहीं निकल न भागें'' इस प्रकार पहरेदारों को खूब सावधान कर आप राजमहल लौट गए ॥४०-५२॥

आचार्य ने कहते समय तो कह डाला, पर अब उन्हें ख्याल आया कि मैंने यह ठीक नहीं किया। क्यों मैंने बिना कुछ सोचे-विचारे जल्दी से ऐसा कह डाला। यदि मेरे कहने के अनुसार शिवजी की मूर्ति न फटी तब मुझे कितना नीचा देखना पड़ेगा और उस समय राजा क्रोध में आकर न जाने क्या कर बैठे। खैर, उसकी भी कुछ परवाह नहीं, पर इससे धर्म की कितनी हँसी होगी। जिस परमात्मा की राजा के सामने मैं इतनी प्रशंसा कर चुका हूँ, उसे और मेरी झूठ को देखकर सर्व साधारण क्या विश्वास करेंगे आदि एक पर एक चिन्ता उनके हृदय में उठने लगी। पर अब हो भी क्या सकता था। आखिर उन्होंने यह सोचकर कि जो होना था वह तो हो चुका और जो कुछ बाकी है वह कल सबेरे हो जायेगा, अब व्यर्थ चिन्ता से ही लाभ क्या? जिनभगवान् की आराधना में अपने ध्यान को लगाया और बड़े पवित्र भावों से उनकी स्तुति करने लगे ॥५३॥

यावदास्ते स योगीन्द्रस्तावदासनकम्पनात्। अम्बिकाशु समागत्य जिनशासनदेवता ॥५४॥
तं जगाद प्रभो श्रीमज्जिनपादाब्जषट्पद। चिन्तां मा कुरु योगीन्द्र यत्प्रोक्तं भवता ध्रुवम् ॥५५॥
''स्वयंभुवाभूतहिते-नाभूतले'' इति स्फुटम्। पदमाद्यं विधायोच्चैः कुर्वतः स्तुतिमुन्नताम् ॥५६॥
चतुर्विंशतितीर्थेशां शान्तिकोटिविधायिनाम्। भविष्यति द्रुतं सर्वं स्फुटिष्यति कुलिङ्गकम् ॥५७॥
इत्युक्त्वा सा गता देवी जिनभक्तिपरायणा। ततः समन्तभद्रोसौ देवतादर्शनात्तराम् ॥५८॥
सञ्जातपरमानन्दप्रोल्लसद्वदनाम्बुजः। चतुर्विंशतितीर्थेशां स्तुतिं कृत्वा सुखस्थितः ॥५९॥
प्रभाते च समागत्य राज्ञा कौतुहलाद् द्रुतम्। समस्तलोकसन्दोहसंयुतेन महाधिया ॥६०॥
देवद्वारं समुद्घाट्य बहिराकारितो हि सः। आगच्छन्तं समालोक्य सम्मुखं हृष्टचेतसम् ॥६१॥
विकाशितमुखाम्भोजभास्करं वा महाद्युतिम्। ततश्चेतसि भूपेन चिन्तितं योगिनोधुना ॥६२॥
मूर्तिः सन्दृश्यते दिव्या ध्रुवं निर्वाहयिष्यति। आत्मीयं भाषितं चेति संविचार्यैव योगिराट् ॥६३॥
तेनोचैर्भणितः शीघ्रं भो योगीन्द्र कुरु ध्रुवम्। त्वं देवस्य नमस्कारं पश्यामो वयमद्भुतम् ॥६४॥
चतुर्विंशतितीर्थेशां योगीन्द्रेण महास्तुतिः। प्रारब्धा भक्तितः कर्त्तुं शर्मदा दिव्यभाषया ॥६५॥
तां कुर्वन्नष्टमश्रीमच्चन्द्रप्रभजिनेशिनः। तमस्तमोरिव रश्मिभिन्नमिति संस्तुतेः ॥६६॥

आचार्य की पवित्र भक्ति और श्रद्धा के प्रभाव से शासनदेवी का आसन कम्पित हुआ। वह उसी समय आचार्य के पास आई और उनसे बोली–हे जिन चरण कमलों के भ्रमर! हे प्रभो! आप किसी बात की चिन्ता न कीजिए। विश्वास रखिये कि जैसा आपने कहा है वह अवश्य ही होगा। आप **स्वयंभुवाभूतहितेन भूतले** इस पद्यांश को लेकर चतुर्विंशति तीर्थंकरों का एक स्तवन रचियेगा। उसके प्रभाव से आपका कहा हुआ सत्य होगा और शिवमूर्ति भी फट पड़ेगी। इतना कहकर अम्बिका देवी अपने स्थान पर चली गई ॥५४–५८॥

आचार्य को देवी के दर्शन से बड़ी प्रसन्नता हुई उनके हृदय की चिन्ता मिटी, आनन्द ने अब उस पर अपना अधिकार किया। उन्होंने उसी समय देवी के कहे अनुसार एक बहुत सुन्दर जिनस्तवन बनाया। वह उसी समय से **स्वयंभूस्तोत्र** के नाम से प्रसिद्ध है ॥५९॥

रात सुखपूर्वक बीती। प्रातःकाल हुआ। राजा भी इसी समय वहाँ आ उपस्थित हुआ। उसके साथ और भी बहुत से अच्छे-अच्छे विद्वान् आए। अन्य साधारण जनसमूह भी बहुत इकट्ठा हो गया। राजा ने आचार्य को बाहर ले आने की आज्ञा दी। वे बाहर लाये गए। अपने सामने आते हुए आचार्य को खूब प्रसन्न और उनके मुँह को सूर्य के समान तेजस्वी देखकर राजा ने सोचा इनके मुँह पर तो चिन्ता के बदले स्वर्गीय तेज की छटायें छूट रही हैं, इससे जान पड़ता हैं ये अपनी प्रतिज्ञा अवश्य पूरी करेंगे। अस्तु। तब भी देखना चाहिए कि ये क्या करते हैं। इसके साथ ही उसने आचार्य से कहा–योगिराज! कीजिए नमस्कार, जिससे हम भी आपकी अद्भुत शक्ति का परिचय पा सकें ॥६०–६४॥

राजा की आज्ञा होते ही आचार्य ने संस्कृत भाषा में एक बहुत ही सुन्दर और अर्थपूर्ण जिनस्तवन आरम्भ किया। स्तवन रचते-रचते जहाँ उन्होंने चन्द्रप्रभ भगवान् की स्तुति का **चन्द्रप्रभ चन्द्रमरीचिगौरम्**

वाक्यं यावत्पठत्येवं स योगी निर्भयो महान्। तावत्तल्लिङ्गकं शीघ्रं स्फुटितं च ततस्तराम् ॥६७॥
निर्गता श्रीजिनेन्द्रस्य प्रतिमा सुचतुर्मुखी। संजातः सर्वतस्तत्र जयकोलाहलो महान् ॥६८॥
समुत्पन्ने महाश्चर्ये भूपादीनां ततो नृपः। जगौ योगीन्द्र भो कस्त्वं परमाश्चर्यकारकः ॥६९॥
महासामर्थ्यसंयुक्तोऽव्यक्तलिंगीति तच्छ्रुतेः। स्फुटं काव्यद्वयं चेति योगीन्द्रः समुवाच सः ॥७०॥
''काञ्च्यां नग्नाटकोहं मलमलिनतनुर्लाम्बुशे पांडुपिण्डः पुण्ड्रोड्रे शाक्यभिक्षुर्दशपुरनगरे मृष्टभोजी परिव्राट्।
वाणारस्यामभूवं शशधरधवलः पाण्डुराङ्गस्तपस्वी राजन् यस्यास्ति शक्तिः स वदतु पुरतो जैननिर्ग्रन्थवादी॥
पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता पश्चान्मालवसिन्धुढक्क विषये काञ्चीपुरे वैदिशे।
प्राप्तोऽहं करहाटकं बहुभटैर्विद्योत्कटैः सङ्कटं वादार्थी विचराम्यहं नरपतेः शार्दूलविक्रीडितम्॥''
इत्युक्त्वा कुलघोषस्य त्यक्त्वा लिङ्गं कुलिंङ्गिनः। जैननिर्ग्रन्थसल्लिङ्गं शिखिपिच्छसमन्वितम् ॥७१॥
सन्धृत्वैकान्तिनः सर्वान्वादिनो दुर्मदान्वितान्। अनेकान्तप्रवादेन निर्जित्यैकहेलया ॥७२॥
कृत्वा श्रीमज्जिनेन्द्राणां शासनस्य प्रभावनाम्। स्वर्मोक्षदायिनीं धीरो भावितीर्थङ्करो गुणी ॥७३॥

यह पद्यांश रचना शुरू किया कि उसी समय शिवमूर्ति फटी और उसमें से श्रीचन्द्रप्रभ भगवान् की चतुर्मुख प्रतिमा प्रकट हुई इस आश्चर्य के साथ ही जयध्वनि के मारे आकाश गूँज उठा। आचार्य के इस अप्रतिम प्रभाव को देखकर उपस्थित जनसमूह को दाँतों तले अँगुली दबानी पड़ी। सबके सब आचार्य की ओर देखते के देखते ही रह गए। इसके बाद राजा ने आचार्य महाराज से कहा–योगिराज! आपकी शक्ति, आपका प्रभाव, आपका तेज देखकर हमारे आश्चर्य का कुछ ठिकाना नहीं रहता। बतलाइए तो आप हैं कौन? और आपने वेष तो शिवभक्त का धारण कर रखा है, पर आप शिवभक्त हैं नहीं। सुनकर आचार्य ने नीचे लिखे दो श्लोक पढ़े– ॥६५-७०॥

''मैं कांची में नग्न दिगम्बर साधु होकर रहा। इसके बाद शरीर में रोग हो जाने से पुंढ्र नगर में बुद्धभिक्षुक, दशपुर (मंदसौर) में मिष्टान्नभोजी परिव्राजक और बनारस में शैवसाधु बनकर रहा। राजन्, मैं जैन निर्ग्रन्थवादी स्याद्वादी हूँ। जिसकी शक्ति वाद करने की हो, वह मेरे सामने आकर वाद करे।''

पहले मैंने पाटलीपुत्र (पटना) में वादभेरी बजाई। इसके बाद मालवा, सिन्धुदेश, ढक्क (ढाका-बंगाल) कांचीपुर और विदिश नामक देश में भेरी बजाई। अब वहाँ से चलकर मैं बड़े-बड़े विद्वानों से भरे हुए इस करहाटक (कराड़जिला सतारा) में आया हूँ। राजन् शास्त्रार्थ करने की इच्छा से मैं सिंह के समान निर्भय होकर इधर-उधर घूमता ही रहता हूँ। यह कहकर ही समन्तभद्रस्वामी ने शैव वेष छोड़कर जिनमुनि का वेष धारण कर लिया, जिसमें साधु लोग जीवों की रक्षा के लिए हाथ में मोर की पिच्छिका रखते हैं ॥७१॥

इसके बाद उन्होंने शास्त्रार्थ कर बड़े-बड़े विद्वानों को, जिन्हें अपने पाण्डित्य का अभिमान था, अनेकान्त-स्याद्वाद के बल से पराजित किया और जैन शासन की खूब प्रभावना की, जो स्वर्ग और

समुद्योतितवान्सारं सम्यग्दर्शनमुत्तमम्। कुदेवस्य नमस्काराऽकरणात्कविसत्तमः ॥७४॥
एकान्तवादिनां भङ्गात्सम्यग्ज्ञानं जिनेशिनः। स्वामी समन्तभद्राख्यो द्योतयामास शुद्धधीः ॥७५॥
एवं दृष्ट्वा महाश्चर्यं लोकानां भूपतेस्तराम्। श्रद्धा श्रीमज्जिनेन्द्राणां शासने समभूत्तदा ॥७६॥
शिवकोटिमहाराजो विवेकोत्कृष्टमानसः। चारित्रमोहनीयस्य क्षयोपशमहेतुना ॥७७॥
महावैराग्यसम्पन्नो राज्यं त्यक्त्वा विचक्षणः। जैनीं दीक्षां समादाय शर्मदां गुरुभक्तितः ॥७८॥
सकलश्रुतसन्दोहमधीत्य क्रमशः सुधीः। लोहाचार्यकृतां पूर्वां शुद्धात्माराधनां पराम् ॥७९॥
सहस्रैश्चतुराशीत्या श्लोकैः संख्यामितां हिताम्। संक्षिप्य ग्रन्थतो मन्दमेधातुच्छायुषोर्वशात् ॥८०॥
अर्थतश्चारिहे लिङ्ग इत्यादिभिरनुत्तरैः। चत्वारिंशन्महासूत्रैः सन्मूलाराधनां नवाम् ॥८१॥
तृतीयार्द्धसहस्राप्तसंख्यां चक्रे जगद्धिताम्। सा-राधना मुनीन्द्रौ तौ शर्मदाः सन्तु मे सदा ॥८२॥
सम्यग्दर्शनबोधवृत्तविलसद्रत्नाकरो निर्मलः कामोद्दामकरीन्द्रपञ्चवदनो विद्यादिनन्दी गुरुः।
षट्तर्कागमजैनशास्त्रनिपुणः श्रीमूलसङ्घे श्रियं श्रीभट्टारकमल्लिभूषणगुरुः सूरिः श्रुताब्धिः क्रियात् ॥८३॥

इति सम्यग्दर्शनज्ञानोद्योतिनी श्रीसमन्तभद्रस्वामिनः कथा समाप्ता।

मोक्ष की देने वाली है। भगवान् समन्तभद्र भावी तीर्थंकर हैं। उन्होंने कुदेव को नमस्कार न कर सम्यग्दर्शन का खूब प्रकाश किया, सबके हृदय पर उसकी श्रेष्ठता अंकित कर दी। उन्होंने अनेक एकान्तवादियों को जीतकर सम्यग्ज्ञान का भी उद्योत किया ॥७२-७५॥

आश्चर्य में डालने वाली इस घटना को देखकर राजा की जैनधर्म पर बड़ी श्रद्धा हुई। विवेकबुद्धि ने उसके मन को खूब ऊँचा बना दिया और चारित्रमोहनीय कर्म का क्षयोपशम हो जाने से उसके हृदय में वैराग्य का प्रवाह बह निकला। उसने उसे सब राज्यभार छोड़ देने के लिए बाध्य किया। शिवकोटि ने क्षणभर में सब मायामोह के जाल को तोड़कर जिनदीक्षा ग्रहण कर ली। साधु बनकर उन्होंने गुरु के पास खूब शास्त्रों का अभ्यास किया। इसके बाद उन्होंने श्रीलोहाचार्य के बनाये हुए चौरासी हजार श्लोक प्रमाण आराधना ग्रन्थ को संक्षेप में लिखा। वह इसलिए कि अब दिन पर दिन मनुष्यों की आयु और बुद्धि घटती जाती है और वह ग्रन्थ बड़ा और गंभीर था, सर्व साधारण उससे लाभ नहीं उठा सकते थे। शिवकोटि मुनि के बनाये हुए ग्रन्थ के चवालीस अध्याय हैं और उसकी श्लोक संख्या साढ़े तीन हजार है। उससे संसार का बहुत उपकार हुआ ॥७६-८१॥

वह आराधना ग्रन्थ और समन्तभद्राचार्य तथा शिवकोटि मुनिराज मुझे सुख के देने वाले हों तथा सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूप परम रत्नों के समुद्र और कामरूपी प्रचंड बलवान् हाथी के नष्ट करने को सिंह समान विद्यानन्दि गुरु और छहों शास्त्रों के अपूर्व विद्वान् तथा श्रुतज्ञान के समुद्र श्रीमल्लिभूषण मुनि मुझे मोक्षश्री प्रदान करें ॥८२-८३॥

५. श्रीसञ्जयन्तमुनेः कथा

श्रीमज्जैनपदाम्भोजयुग्मं नत्वा सुखप्रदम्। सञ्जयन्तमुनेर्वच्मि सत्तपोद्योतने कथाम् ॥१॥
जम्बूद्वीपे महामेरोः पश्चिमास्थे विदेहके। विषये गन्धमालिन्यां वीतशोकपुरे पुरे ॥२॥
वैजयन्तो महाराजो भव्यश्री नाम तत्प्रिया। सञ्जयन्तजयन्ताख्यौ सञ्जातौ सुसुतौ तयोः ॥३॥
एकदा स महीनाथो विजयन्तोऽतिनिर्मलः। विद्युत्पातेन संवीक्ष्य मरणं पट्टहस्तिनः ॥४॥
महावैराग्यसम्पन्नो पुत्राभ्यां राज्यसम्पदम्। ददानो भणितस्ताभ्यां भो पितश्चेदिदं शुभम् ॥५॥
कथं सन्त्यज्यते राज्यं युष्माभिः सुविक्षणैः। आवाभ्यां न ततस्तात राज्यं तद्गृह्यते सुधीः ॥६॥
ततो राज्यं बुधैस्त्याज्यं सञ्जयन्तसुताय च। वैजयन्ताय दत्वेति गृहीतं सुतपस्त्रिभिः ॥७॥
विशिष्टं स तपः कुर्वन्पिता सद्ध्यानवह्निना। घातिकर्मेन्धनं दग्ध्वा प्राप्तवान्केवलश्रियम् ॥८॥
केवलज्ञानपूजार्थं सञ्जाते मरुदागमे। मुनिर्जयन्तनामासौ संविलोक्य तदा लघुः ॥९॥

---

५. संजयन्त मुनि की कथा

सुख के देने वाले श्री जिन भगवान् के चरण कमलों को नमस्कार कर श्रीसंजयन्त मुनिराज की कथा लिखता हूँ, जिन्होंने सम्यक् तप का उद्योत किया था। सुमेरु के पश्चिम की ओर विदेह के अन्तर्गत गन्धमालिनी नाम का देश है। उसकी प्रधान राजधानी वीतशोकपुर है। जिस समय की बात हम लिख रहे हैं, उस समय उसके राजा वैजयन्त थे। उनकी महारानी का नाम भव्यश्री था। उनके दो पुत्र थे। उनके नाम थे संजयन्त और जयन्त ॥१-५॥

एक दिन की बात है कि बिजली के गिरने से महाराज वैजयन्त का प्रधान हाथी मर गया। यह देख उन्हें संसार से बड़ा वैराग्य हुआ। उन्होंने राज्य छोड़ने का निश्चय कर अपने दोनों पुत्रों को बुलाया और उन्हें राज्य भार सौंपना चाहा; तब दोनों भाईयों ने उनसे कहा–पिताजी, राज्य तो संसार के बढ़ाने का कारण है, इससे तो उल्टा हमें सुख की जगह दुःख भोगना पड़ेगा। इसलिए हम तो इसे नहीं लेते। आप भी तो इसीलिए छोड़ते हैं न ? कि यह बुरा है, पाप का कारण है। इसीलिए हमारा तो विश्वास है कि बुद्धिमानों को, आत्म हित के चाहने वालों को, राज्य सरीखी झंझटों को शिर पर उठाकर अपनी स्वाभाविक शान्ति को नष्ट नहीं करना चाहिए। यही विचार कर हम राज्य लेना उचित नहीं समझते। बल्कि हम तो आपके साथ ही साधु बनकर अपना आत्महित करेंगे ॥६॥

वैजयन्त ने पुत्रों पर अधिक दबाव न डालकर उनकी इच्छा के अनुसार उन्हें साधु बनने की आज्ञा दे दी और राज्य का भार संजयन्त के पुत्र वैजयन्त को देकर स्वयं भी तपस्वी बन गये। साथ ही वे दोनों भाई भी साधु हो गये ॥७॥

तपस्वी बनकर वैजयन्त मुनिराज खूब तपश्चर्या करने लगे, कठिन से कठिन परीषह सहन करके अन्त में ध्यानरूपी अग्नि से घातिया कर्मों का नाश कर उन्होंने लोकालोक का प्रकाशक केवलज्ञान प्राप्त किया। उस समय उनके ज्ञानकल्याणक की पूजा करने को स्वर्ग से देव आये। उनके स्वर्गीय ऐश्वर्य और उनकी दिव्य सुन्दरता को देखकर संजयन्त के छोटे भाई जयन्त ने निदान किया–

सद्रूपं धरणेन्द्रस्य विभूतिं च मनोहराम्। ईदृशं सुतरां रूपं सम्पदा महतीदृशी ॥१०॥
तपोमाहात्म्यतो भूयाच्छीघ्रं मे परजन्मनि। इत्युत्कटनिदानेन धरणेन्द्रश्चाभवत्ततः ॥११॥
सञ्जयन्तमुनिश्चापि पक्षमासोपवासकैः। क्षुत्पिपासादिभिः क्षीणो महाटव्यां सुनिश्चलः ॥१२॥
स सूर्यप्रतिमायोगसंस्थितो गिरिवत्तराम्। तदा तस्योपरिप्राप्तो विद्युद्दंष्ट्रो खगाधिपः ॥१३॥
आकाशे स्वविमानस्य स्खलनाद्वीक्ष्य तं मुनिम्। ततस्तस्योपसर्गं च चक्रे कोपतो दृढम् ॥१४॥
स मुनिस्तु निजध्यानाच्चलितो नैव धीरधीः। महावायुशतैश्चापि चालितः किं सुराचलः ॥१५॥
ततस्तेनातिकष्टेन मुनिं विद्याप्रभावतः। नीत्वा च भरतक्षेत्रे पूर्वदिग्भागसंस्थिते ॥१६॥
क्षिप्त्वा सिंहवतीमुख्यनदीपञ्चकसङ्गमे। तद्देशवर्तिनश्चापि सर्वलोकाः सुपापिनः ॥१७॥

मैंने जो इतना तपश्चरण किया है, मैं चाहता हूँ कि उसके प्रभाव से मुझे दूसरे जन्म में ऐसी ही सुन्दरता और ऐसी ही विभूति प्राप्त हो। वही हुआ। उसका किया निदान उसे फला। वह आयु के अन्त में मरकर धरणेन्द्र हुआ ॥८-११॥

चैत्र का महीना था। एक दिन अनन्तमती विनोदवश हो, अपने बगीचे में अकेली झूले पर झूल रही थी। इसी समय एक कुण्डलमंडित नामक विद्याधरों का राजा, जो कि विद्याधरों की दक्षिण श्रेणी के किन्नरपुर का स्वामी था, इधर ही होकर अपनी प्रिया के साथ वायुयान में बैठा हुआ जा रहा था। एकाएक उसकी दृष्टि झूलती हुई अनन्तमती पर पड़ी उसकी स्वर्गीय सुन्दरता को देखकर कुण्डलमंडित काम के बाणों से बुरी तरह बींधा गया। उसने अनन्तमती की प्राप्ति के बिना अपने जन्म को व्यर्थ समझा। वह उस बेचारी बालिका को उड़ा तो उसी वक्त ले जाता, पर साथ में प्रिया के होने से ऐसा अनर्थ करने के लिए उसकी हिम्मत न पड़ी। पर उसे बिना अनन्तमती के कब चैन पड़ सकता था ? इसलिए वह अपने विमान को शीघ्रता से घर लौटा ले गया और वहाँ अपनी प्रिया को रखकर उसी समय अनन्तमती के बगीचे में आ उपस्थित हुआ और बड़ी फुर्ती से उस भोली बालिका को उठा ले चला। उधर उसकी प्रिया को भी इसके कर्म का कुछ-कुछ अनुसन्धान लग गया था। इसलिए कुण्डलमंडित तो उसे घर पर छोड़ आया था, पर वह घर पर न ठहर कर उसके पीछे-पीछे हो चली। जिस समय कुण्डलमंडित अनन्तमती को लेकर आकाश की ओर जा रहा था कि उसकी दृष्टि अपनी प्रिया पर पड़ी। उसे क्रोध के मारे लाल मुख किये हुई देखकर कुण्डलमंडित के प्राणदेवता एक साथ शीतल पड़ गये। उसके शरीर को काटो तो खून नहीं। ऐसी स्थिति में अधिक गोलमाल होने के भय से उसने बड़ी फुर्ती के साथ अनन्तमती को एक पर्णलध्वी नाम की विद्या के आधीन कर उसे एक भयंकर वनी में छोड़ देने को आज्ञा दे दी और आप पत्नी के साथ घर लौट गया और उसके सामने अपनी निर्दोषता का यह प्रमाण पेश कर दिया कि अनन्तमती न तो विमान में उसे देखने को मिली और न विद्या के सुपुर्द करते समय कुण्डलमंडित ने ही उसे देखने दी ॥१२-१७॥

उस भयंकर वनी में अनन्तमती बड़े जोर-जोर से रोने लगी, पर उसके रोने को सुनता भी कौन? वह तो कोसों तक मनुष्यों के पदचार से रहित थी। कुछ समय बाद एक भीलों का राजा शिकार खेलता हुआ उधर आ निकला। उसने अनन्तमती को देखा। देखते ही वह भी काम के बाणों से घायल हो गया और उसी समय उसे उठाकर अपने गाँव में ले गया। अनन्तमती तो यह समझी कि देव ने मुझे इसके हाथ सौंपकर मेरी रक्षा की है और अब मैं अपने घर पहुँचा दी जाऊँगी। पर नहीं, उसकी यह समझ ठीक नहीं थी। वह छुटकारे के स्थान में एक और नई विपत्ति के मुख में फँस गई ॥१८॥

करोमि त्वां महाराज्ञीं ददामि बहुसम्पदम्। मामिच्छेति भणित्वा सा नेच्छन्ती वातिवित्तकम् ॥१९॥
रात्रौ प्रभोक्तुमारब्धा तदा तच्छीलपुण्यतः। वनदेवतया तस्य ताडनाद्युपसर्गकः ॥२०॥
कृतः काचिदियं देवी महासामर्थ्यसंयुता। भिल्लेनेति विचार्योच्चैः सा कन्या कमलेक्षणा ॥२१॥
पुष्पकाख्यमहासार्थवाहकस्य समर्पिता। सोपि तद्रूपसंसक्तः प्रोवाच मलिनं वचः ॥२२॥
एतान्याभरणान्युच्चैर्नानासद्वस्त्रसञ्चयम्। गृहाण तव दासोस्मि मामिच्छेति प्रणष्टधीः ॥२३॥

राजा उसे अपने महल ले जाकर बोला–बाले, आज तुम्हें अपना सौभाग्य समझना चाहिए कि एक राजा तुम पर मुग्ध है और वह तुम्हें अपनी पट्टरानी बनाना चाहता है। प्रसन्न होकर उसकी प्रार्थना स्वीकार करो और अपने स्वर्गीय समागम से उसे सुखी करो। वह तुम्हारे सामने हाथ जोड़े खड़ा है तुम्हें वनदेवी समझकर अपना मन चाहा वर माँगता है। उसे देकर उसकी आशा पूरी करो। बेचारी भोली अनन्तमती उस पापी की बातों का क्या जवाब देती ? वह फूट–फूटकर रोने लगी और आकाश पाताल एक करने लगी। पर उसकी सुनता कौन? वह तो राज्य ही मनुष्य जाति के राक्षसों का था ॥१९॥

भील राजा के निर्दयी हृदय में तब भी अनन्तमती के लिए कुछ भी दया नहीं आई। उसने और भी बहुत–बहुत प्रार्थना की, विनय–अनुनय किया, भय दिखाया, पर अनन्तमती ने उस पर कुछ ध्यान नहीं दिया किन्तु यह सोचकर कि इन नारकियों के सामने रोने धोने से कुछ काम नहीं चलेगा, उसने उसे फटकारना शुरू किया। उसकी आँखों से क्रोध की चिनगारियाँ निकलने लगीं, उसका चेहरा लाल सुर्ख पड़ गया। सब कुछ हुआ, पर उस भील राक्षस पर उसका कुछ प्रभाव न पड़ा। उसने अनन्तमती से बलात्कार करना चाहा। इतने में उसके पुण्य प्रभाव से, नहीं, शील के अखंड बल से वनदेवी ने आकर अनन्तमती की रक्षा की और उस पापी को उसके पाप का खूब फल दिया और कहा–नीच, तू नहीं जानता यह कौन है? याद रख यह संसार की पूज्य एक महादेवी है, जो इसे तूने सताया कि समझ तेरे जीवन की कुशल नहीं है। यह कहकर वनदेवी अपने स्थान पर चली गई। उसके कहने का भीलराज पर बहुत असर पड़ा और पड़ना चाहिए था क्योंकि थी तो वह देवी ही न ? देवी के डर के मारे दिन निकलते ही उसने अनन्तमती को एक साहूकार के हाथ सौंपकर उससे कह दिया कि इसे इसके घर पहुँचा दीजियेगा। पुष्पक सेठ ने उस समय तो अनन्तमती को उसके घर पहुँचा देने का इकरार कर भीलराज से ले ली। पर यह किसने जाना कि उसका हृदय भी भीतर से पापपूर्ण होगा। अनन्तमती को पाकर वह समझने लगा कि मेरे हाथ अनायास स्वर्ग की सुन्दरी लग गई। यह यदि मेरी बात प्रसन्नता पूर्वक मान ले तब तो अच्छा ही है, नहीं तो मेरे पंजे से छूट कर भी तो यह नहीं जा सकती। यह विचार कर उस पापी ने अनन्तमती से कहा–सुन्दरी, तुम बड़ी भाग्यवती हो, जो एक नर–पिशाच के हाथ से छूटकर पुण्य पुरुष के सुपुर्द हुई। कहाँ तो यह तुम्हारी अनिन्द्य स्वर्गीय सुन्दरता और कहाँ वह भील राक्षस, कि जिसे देखते ही हृदय काँप उठता है? मैं तो आज अपने को देवों से भी कहीं बढ़कर भाग्यशाली समझता हूँ, जो मुझे अनमोल स्त्री रत्न सुलभता के साथ प्राप्त हुआ। भला, बिना

तयोक्तं यादृशं मेस्ति प्रियदत्तः पितापरः। तादृशस्त्वमपि भ्रष्ट मावादीः पापदं वचः ॥२४॥
इत्यादिकं स्थिरं वाक्यं समाकर्ण्यैव पापिना। सार्थवाहेन चानीयायोध्यायां सुदृढव्रता ॥२५॥
कामसेनाख्यकुट्टिन्याः पापिन्याः सा समर्पिता। कः कस्य दीयते दोषो विचित्रा कर्मणां स्थितिः ॥२६॥

महाभाग्य के कहीं ऐसा रत्न मिल सकता है? सुन्दरी, देखती हो, मेरे पास अटूट धन है, अनन्त वैभव है, पर उस सबको तुम पर न्यौछावर करने को तैयार हूँ और तुम्हारे चरणों का अत्यन्त दास बनता हूँ। कहो, मुझ पर प्रसन्न हो ? मुझे अपने हृदय में जगह दोगी न ? दो और मेरे जीवन को, मेरे धन-वैभव को सफल करो ॥२०-२३॥

अनन्तमती ने समझा था कि इस भले मानस की कृपा से मैं सुखपूर्वक पिताजी के पास पहुँच जाऊँगी, पर वह बेचारी पापियों के पापी हृदय की बात को क्या जाने? उसे जो मिलता था, उसे वह भला ही समझती थी। यह स्वाभाविक बात है कि अच्छे को संसार अच्छा ही दिखता है। अनन्तमती ने पुष्पक सेठ की पापपूर्ण बातें सुनकर बड़े कोमल शब्दों में कहा–महाशय, आपको देखकर तो मुझे विश्वास हुआ था कि अब मेरे लिए कोई डर की बात नहीं रही। मैं निर्विघ्न अपने घर पर पहुँच जाऊँगी, क्योंकि मेरे एक दूसरे पिता मेरी रक्षा के लिए आ गये हैं। पर मुझे अत्यन्त दुःख के साथ कहना पड़ता है कि आप सरीखे भले मानस के मुँह से और ऐसी नीच बातें ? जिसे मैंने रस्सी समझकर हाथ में लिया था, मैं नहीं समझती थी कि वह इतना भयंकर सर्प होगा। क्या यह बाहरी चमक-दमक और सीधापन केवल दाम्भिकपना है? केवल हंसों में गणना कराने के लिए है? यदि ऐसा है तो मैं तुम्हें तुम्हारे इस ठगी वेष को, तुम्हारे कुल को, तुम्हारे धन-वैभव को और तुम्हारे जीवन को धिक्कार देती हूँ, अत्यन्त घृणा की दृष्टि से देखती हूँ। जो मनुष्य केवल संसार को ठगने के लिए ऐसे मायाचार करता है, बाहर धर्मात्मा बनने का ढोंग रचता है, लोगों को धोखा देकर अपने मायाजाल में फँसाता है, वह मनुष्य नहीं है किन्तु पशु है, पिशाच है, राक्षस है। वह पापी मुँह देखने योग्य नहीं, नाम लेने योग्य नहीं। उसे जितना धिक्कार दिया जाये थोड़ा है। मैं नहीं जानती थी कि आप भी उन्हीं पुरुषों में से एक होंगे। अनन्तमती और भी कहती, पर वह ऐसे कुल कलंक नीचों के मुँह लगना उचित नहीं समझ चुप हो रही। अपने क्रोध को वह दबा गई ॥२४॥

उसकी जली भुनी बातें सुनकर पुष्पक सेठ की अक्ल ठिकाने आ गई। वह जलकर खाक हो गया, क्रोध से उसका सारा शरीर काँप उठा, पर तब भी अनन्तमती के दिव्य तेज के सामने उससे कुछ करते नहीं बना। उसने अपने क्रोध का बदला अनन्तमती से इस रूप में चुकाया कि वह उसे अपने शहर में ले जाकर एक कामसेना नाम की कुट्टिनी के हाथ सौंप दिया। सच बात तो यह है कि यह सब दोष दिया किसे जा सकता है किन्तु कर्मों की ही ऐसी विचित्र स्थिति है, जो जैसा कर्म करता है उसका उसे वैसा फल भोगना ही पड़ता है। इसमें नई बात कुछ नहीं है ॥२५-२६॥

वेश्ययापि तयानेकप्रकारैश्चालिता सती। मेरोः सच्चूलिकेवासौ नाचलच्छीलशैलतः ॥२७॥
येषां संसारभीरूणां न्यायोपार्जितवस्त्वपि। कदाचित्प्रीतये न स्यात्तन्मतिः किं कुकर्मसु ॥२८॥
तदा तयापि कुट्टिन्या सिंहराजमहीभुजः। समर्पिता तथा बाला तस्याः सद्रूपयौवनम् ॥२९॥
संविलोक्य सुलुब्धेन तेन रात्रौ दुरात्मना। हठात्सेवितुमारब्धा सा सती भुवनोत्तमा ॥३०॥
तदा तद्व्रतमाहात्म्यात्पुरदेवतया क्रुधा। उपसर्गो महांश्चक्रे तस्य दुष्कर्मणस्ततः ॥३१॥
निस्सारिता सुभीतेन भूभुजा तेन मंदिरात्। सापि पञ्चनमस्कारं संस्मरन्ती सुखप्रदम् ॥३२॥
क्वचिद्देशे स्थिता यावत्तस्याः पुण्यप्रभावतः। पद्मश्रीरार्यिका वीक्ष्य तां ज्ञात्वा श्रावकोत्तमाम् ॥३३॥

कामसेना ने भी अनन्तमती को कष्ट देने में कुछ कसर नहीं रखी। जितना उससे बना उसने भय से, लोभ से उसे पवित्र पथ से गिराना चाहा, उसके सतीत्व धर्म को भ्रष्ट करना चाहा पर अनन्तमती उससे नहीं डिगी। वह सुमेरु के समान निश्चल बनी रही। ठीक तो है जो संसार के दुःखों से डरते हैं, वे ऐसे भी सांसारिक कामों के करने से घबरा उठते हैं, जो न्याय मार्ग से भी क्यों न प्राप्त हुए हों, तब भला उन पुरुषों की ऐसे घृणित और पाप कार्यों में कैसे प्रीति हो सकती है? कभी नहीं होती ॥२७-२८॥

कामसेना ने उस पर अपना चक्र चलता न देखकर उसे एक सिंहराज नाम के राजा को सौंप दिया। बेचारी अनन्तमती का जन्म ही न जाने कैसे बुरे समय में हुआ था, जो वह जहाँ पहुँचती वहीं आपत्ति उसके सिर पर सवार रहती। सिंहराज भी एक ऐसा ही पापी राजा था। वह अनन्तमती के देवांगना दुर्लभ रूप को देखकर उस पर मोहित हो गया। उसने भी उससे बहुत हाथाजोड़ी की, पर अनन्तमती ने उसकी बातों पर कुछ ध्यान न देकर उसे भी फटकार डाला। पापी सिंहराज ने अनन्तमती का अभिमान नष्ट करने को उससे बलात्कार करना चाहा। पर जो अभिमान मानवी प्रकृति का न होकर अपने पवित्र आत्मीय तेज का होता है, भला, किसकी मजाल जो उसे नष्ट कर सके ? जैसे ही पापी सिंहराज ने उस तेजोमय मूर्ति की ओर पाँव बढ़ाया कि उसी वनदेवी ने, जिसने एक बार पहले भी अनन्तमती की रक्षा की थी, उपस्थित होकर कहा–खबरदार! इस सती देवी का स्पर्श भूलकर भी मत करना, नहीं तो समझ लेना कि तेरा जीवन जैसे संसार में था ही नहीं। इसके साथ ही देवी उसे उसके पापकर्मों का उचित दण्ड देकर अन्तर्हित हो गई। देवी को देखते ही सिंहराज का कलेजा काँप उठा। वह चित्रलिखे सा निश्चेष्ट हो गया। देवी के चले जाने पर बहुत देर बाद उसे होश हुआ। उसने उसी समय नौकर को बुलवाकर अनन्तमती को जंगल में छोड़ आने की आज्ञा दी। राजा की आज्ञा का पालन हुआ। अनन्तमती एक भयंकर वन में छोड़ दी गई ॥२९-३१॥

अनन्तमती कहाँ जायेगी, किस दिशा में उसका शहर है और वह कितनी दूर है? इन सब बातों का यद्यपि उसे कुछ पता नहीं था, तब भी वह पंचपरमेष्ठी का स्मरण कर वहाँ से आगे बढ़ी और फल-फूलादि से अपना निर्वाह कर वन, जंगल, पर्वतों को लाँघती हुई अयोध्या में पहुँच गई। वहाँ उसे एक पद्मश्री नाम की आर्यिका के दर्शन हुए। आर्यिका ने अनन्तमती से उसका परिचय पूछा। उसने अपना

दृष्ट्वा तस्याश्चरित्रं च स्वान्तिके परमादरात्। स्थापयामास पूतात्मा सतां वृत्तं परार्थकृत् ॥३४॥
अथानन्तमतीशोकवह्निसन्तप्तमानसः। प्रियदत्तो महाश्रेष्ठी गृहान्निर्गत्य पुण्यधीः ॥३५॥
तद्दुःखहानये कैश्चित्सज्जनैः परिवेष्टितः। श्रीमज्जिनेन्द्रसत्तीर्थयात्रां कुर्वन्सुखप्रदाम् ॥३६॥
अयोध्यानगरीं प्राप्य सन्ध्यायां स गुणोज्ज्वलः। तत्रस्थ जिनदत्ताख्यश्यालकस्य गृहं गतः ॥३७॥
तेन श्रीजिनदत्तेन कृत्वा प्राघूर्णकक्रियाम्। सुखं पृष्टो जगौ श्रेष्ठी दुःखदं निजवृत्तकम् ॥३८॥
ततः प्रातः समुत्थाय प्रियदत्तोतिधार्मिकः। स्नानादिकं विधायोच्चैर्गतो गेहं जिनेशिनाम् ॥३९॥
तदा कर्त्तुं च सद्भोज्यं चतुष्कं दातुमङ्गणे। जिनदत्तस्त्रियाहूता पद्मश्रीक्षान्तिकाश्रिता ॥४०॥
कन्या सापि समागत्य भोज्यं कृत्वामृतोपमम्। दत्वा गणे चतुष्कं च प्रीतितो वसतिं गता ॥४१॥
ततो देवेन्द्रनागेन्द्रनरेन्द्राद्यैः समर्चिताः। जिनेन्द्रप्रतिमाः श्रेष्ठी समभ्यर्च्य समागतः ॥४२॥

सब परिचय देकर अपने पर जो-जो विपत्ति आई थी और उससे जिस-जिस प्रकार अपनी रक्षा हुई थी उसका सब हाल आर्यिका को सुना दिया। आर्यिका उसकी कथा सुनकर बहुत दुःखी हुई। उसे उसने एक सती-शिरोमणि रमणी-रत्न समझ कर अपने पास रख लिया। सच है सज्जनों का व्रत परोपकारार्थ ही होता है ॥३२-३४॥

उधर प्रियदत्त को जब अनन्तमती के हरे जाने का समाचार मालूम हुआ तब वह अत्यन्त दुःखी हुआ। उसके वियोग से वह अस्थिर हो उठा। उसे घर श्मशान सरीखा भयंकर दिखने लगा। संसार उसके लिए सूना हो गया। पुत्री के विरह से दुःखी होकर तीर्थयात्रा के बहाने से वह घर से निकल खड़ा हुआ। उसे लोगों ने बहुत समझाया, पर उसने किसी की बात को न मानकर अपने निश्चय को नहीं छोड़ा। कुटुम्ब के लोग उसे घर पर न रहते देखकर स्वयं भी उसके साथ-साथ चले। बहुत से सिद्धक्षेत्रों और अतिशय क्षेत्रों की यात्रा करते-करते वे अयोध्या में आये। वहीं पर प्रियदत्त का साला जिनदत्त रहता था। प्रियदत्त उसी के घर पर ठहरा। जिनदत्त ने बड़े आदर सम्मान के साथ अपने बहनोई की पाहुनगति की। इसके बाद स्वस्थता के समय जिनदत्त ने अपनी बहिन आदि का समाचार पूछा। प्रियदत्त ने जैसी घटना बीती थी, वह सब उससे कह सुनाई। सुनकर जिनदत्त की भी अपनी भानजी के बाबत बहुत दुःख हुआ। दुःख सभी को हुआ पर उसे दूर करने के लिए सब लाचार थे। कर्मों की विचित्रता देखकर सब ही को सन्तोष करना पड़ा ॥३५-३८॥

दूसरे दिन प्रातःकाल उठकर और स्नानादि करके जिनदत्त तो जिनमन्दिर चला गया। इधर उसकी स्त्री भोजन की तैयारी करके पद्मश्री आर्यिका के पास जो बालिका थी, उसे भोजन करने को और आँगन में चौक पूरने को बुला लाई। बालिका ने आकर चौक पूरा और बाद भोजन करके वह अपने स्थान पर लौट आई ॥३९-४१॥

जिनदत्त के साथ प्रियदत्त भी भगवान् की पूजा करके घर पर आया। आते ही उसकी दृष्टि चौक पर पड़ी। देखते ही उसे अनंतमती की याद हो उठी। वह रो पड़ा। पुत्री के प्रेम से उसका हृदय व्याकुल

तच्चतुष्कं समालोक्य स्मृत्वानन्तमतीं स ताम्। अश्रुपातेन संयुक्तो जगाद प्रियदत्तवाक् ॥४३॥
ययेदं मण्डनं चक्रे सा समानीयतां द्रुतम्। ततस्तैः सुजनैस्तस्य सुतामानीय दर्शिता ॥४४॥
निर्गलच्छोकपानीयपूरपूरितलोचनाम्। समालिंग्य सतां श्रेष्ठी प्रोवाच मधुरं वचः ॥४५॥
भो पुत्रि त्वं महाशीलसलिलक्षालिताखिलः। पापकर्दमसन्दोहपापिना केन संहृता ॥४६॥
केन वात्र समानीता शून्यं कृत्वा ममालयम्। संपृष्टेति सुता प्राह सर्वं तद्वृत्तकं निजम् ॥४७॥
तदा श्रीजिनदत्तेन तयोर्मेलापके तराम्। चक्रे महोत्सवः पुर्यां सन्तुष्टेन स्वचेतसा ॥४८॥
प्रियदत्तस्ततः प्राह भो सुते निजमन्दिरम्। एहि संगम्यतेऽस्माभिः सानन्दं सुमनोहरम् ॥४९॥
सा चोवाच तदा पुत्री दृष्टं तात मयाधुना। कष्टं संसारवैचित्र्यं ततो दापय मे तपः ॥५०॥
वल्लीवत्कोमलाङ्गी त्वं जैनीदीक्षां सुदुःसहां। कियत्कालं सुते तिष्ठ धर्मध्यानेन मन्दिरे ॥५१॥
पश्चात्ते वाञ्छितं पुत्रि पुण्यतः सम्भविष्यति। इत्यादिकोमलालापैः श्रेष्ठिना गुणशालिना ॥५२॥
निषेध्यापि तथा पुत्री महावैराग्यमण्डिता। पद्मश्रीक्षान्तिका पार्श्वे जैनीं दीक्षां सुखप्रदाम् ॥५३॥

हो गया। उसने रोते-रोते कहा-जिसने यह चौक पूरा है, क्या मुझ अभागे को उसके दर्शन होंगे। जिनदत्त अपनी स्त्री से उस बालिका का पता पूछकर जहाँ वह थी, वहीं दौड़ा गया और झट से उसे अपने घर ले लाया। बालिका को देखते ही प्रियदत्त के नेत्रों से आँसू बह निकले। उसका गला भर आया। आज वर्षों बाद उसे अपनी पुत्री के दर्शन हुए। बड़े प्रेम के साथ उसने अपनी प्यारी पुत्री को छाती से लगाया और उसे गोदी में बैठाकर उससे एक-एक बातें पूछना शुरू कीं। उसके दुःखों का हाल सुनकर प्रियदत्त बहुत दुःखी हुआ। उसने कर्मों का, इसलिए कि अनन्तमती इतने कष्टों को सहकर भी अपने धर्म पर दृढ़ रही और कुशलपूर्वक अपने पिता से आ मिली, बहुत-बहुत उपकार माना। पिता-पुत्री का मिलाप हो जाने से जिनदत्त को बहुत प्रसन्नता हुई। उसने इस खुशी में जिनभगवान् का रथ निकलवाया, सबका यथायोग्य आदर सम्मान किया और खूब दान किया ॥४२-४८॥

इसके बाद प्रियदत्त अपने घर जाने को तैयार हुआ। उसने अनन्तमती से भी चलने को कहा। वह बोली-पिताजी, मैंने संसार की लीला को खूब देखा है। उसे देखकर तो मेरा जी काँप उठता है। अब मैं घर पर नहीं चलूँगी। मुझे संसार के दुःखों से बहुत डर लगता है। अब तो आप दया करके मुझे दीक्षा दिलवा दीजिये। पुत्री की बात सुनकर प्रियदत्त बहुत दुःखी हुआ, पर अब उसने उससे घर पर चलने का विशेष आग्रह न करके केवल इतना कहा कि-पुत्री, तेरा यह नवीन शरीर अत्यन्त कोमल है और दीक्षा का पालन करना बड़ा कठिन है उसमें बड़ी-बड़ी कठिन परीषह सहनी पड़ती है इसलिए अभी कुछ दिनों के लिए मन्दिर ही में रहकर अभ्यास कर और धर्मध्यान पूर्वक अपना समय बिता। इसके बाद जैसा तू चाहती है, वह स्वयं ही हो जायेगा। प्रियदत्त ने इस समय दीक्षा लेने से अनन्तमती को रोका, पर उसके तो रोम-रोम में वैराग्य प्रवेश कर गया था; फिर वह कैसे रुक सकती थी ? उसने मोह-जाल तोड़कर उसी समय पद्मश्री आर्यिका के पास जिनदीक्षा ग्रहण कर ही ली। दीक्षित होकर

समादाय लसद्भक्त्या तथानन्तमती दृढम्। पक्षमासोपवासादितपः कृत्वा सुदारुणम् ॥५४॥
संन्यासविधिना मृत्वा स्मरन्ती जिनपङ्कजम्। सहस्रारे सुरो जातः प्रोल्लसन्मुकुटादिभिः ॥५५॥
श्रीमज्जिनेन्द्रचन्द्राणां साभवद्भक्तिभाजनम्। नाना सत्सम्पदोपेतः सुपुण्यात्किं न जायते ॥५६॥
क्रीडामात्रगृहीतशीलममलं सम्पाल्य शर्मप्रदं नाना रत्नसुवर्णभोगनिचये निष्काङ्क्षितामाश्रिता।
या सानन्तमती जिनेन्द्रचरणाम्भोजात्तभृङ्गीव्रतात्स्वर्गे देवमहर्द्धिकोजनि तरां दद्यात्सतां मङ्गलम् ॥५७॥

इति श्रीकथाकोशे निष्काङ्क्षिताङ्गेऽनन्तमतीकथा समाप्ता।

८. उद्दायनराज्ञः कथा

नत्वार्हतं जगत्पूज्यं भारतीं गुरुपङ्कजम्। वक्ष्ये निर्विचिकित्साङ्गे कथामुद्दायनप्रभोः ॥१॥
इहैव भरतक्षेत्रे देशे कच्छाभिधे शुभे। पुरे रौरवके नाम्ना सुधीरुद्दायनप्रभुः ॥२॥
सद्दृष्टिर्जिनदेवानां पादपद्मार्चने रतः। दाता भोक्ता विचारज्ञः प्रजानां सुतरां हितः ॥३॥
तस्य प्रभावती राज्ञी साध्वी पूर्णेन्दुनिर्मला। दानपूजाव्रताम्भोभिः प्रक्षालितमनोमला ॥४॥

अनन्तमती खूब दृढ़ता के साथ तप तपने लगी। महिना-महिना के उपवास करने लगी, परीषह सहने लगी। उसकी उमर और तपश्चर्या देखकर सबको दाँतों तले अंगुली दबानी पड़ती थी। अनन्तमती का जब तक जीवन रहा तब तक उसने बड़े साहस से अपने व्रत का निर्वहन किया। अन्त में वह संन्यास मरण कर सहस्रार स्वर्ग में जाकर देव हुई। वहाँ वह नित्य नये रत्नों के स्वर्गीय भूषण पहनती है, जिनभगवान् की भक्ति के साथ पूजा करती है, हजारों देव देवाङ्गनायें उसकी सेवा में रहती हैं। उसके ऐश्वर्य का पार नहीं और न उसके सुख ही की सीमा है। बात यह है कि पुण्य के उदय से क्या-क्या नहीं होता ? ॥४९-५६॥

अनन्तमती को उसके पिता ने केवल विनोद से शीलव्रत दे दिया था। पर उसने उसका बड़ी दृढ़ता के साथ पालन किया, कर्मों के पराधीन सांसारिक सुख की उसने स्वप्न में भी चाह नहीं की। उसके प्रभाव से वह स्वर्ग में जाकर देव हुई, जहाँ सुख का पार नहीं। वहाँ वह सदा जिनभगवान् के चरणों में लीन रहकर बड़ी शान्ति के साथ अपना समय बिताती है। सती-शिरोमणि अनन्तमती हमारा भी कल्याण करे ॥५७॥

८. उद्दायन राजा की कथा

संसार-श्रेष्ठ जिनभगवान्, जिनवाणी और जैन ऋषियों को नमस्कार कर उद्दायन राजा की कथा लिखता हूँ, जिन्होंने सम्यक्त्व के तीसरे निर्विचिकित्सा अंग का पालन किया है ॥१॥

उद्दायन रौरवक नामक शहर के राजा थे, जो कि कच्छदेश के अन्तर्गत था। उद्दायन सम्यग्दृष्टि थे, दानी थे, विचारशील थे, जिनभगवान् के सच्चे भक्त थे और न्यायी थे। सुतरां प्रजा का उन पर बहुत प्रेम था और वे भी प्रजा के हित में सदा उद्यत रहा करते थे ॥२-३॥

उसकी रानी का नाम प्रभावती था। वह भी सती थी, धर्मात्मा थी। उसका मन सदा पवित्र रहता था। वह अपने समय को प्रायः दान, पूजा, व्रत, उपवास, स्वाध्यायादि में बिताती थी ॥४॥

निष्कण्टकं महाराज्यं कुर्वन्सद्धर्मतत्परः। यावदास्ते सुखं राजा स पुण्येन तदा मुदा ॥५॥
धर्मानुरागतः स्वर्गे सौधर्मेन्द्रेण धीमता। सभायां सर्वदेवानामग्रतश्चेति भाषितम् ॥६॥
देवोर्हन्दोषनिर्मुक्तो धर्मश्चेति क्षमादिकः। गुरुर्निर्ग्रन्थतायुक्तस्तत्त्वे श्रद्धार्हते रुचिः ॥७॥
सा रुचिस्तु जिनेन्द्राणां स्वर्गमोक्षसुखप्रदा। धर्मानुरागतस्तीर्थयात्राभिः सुमहोत्सवैः ॥८॥
जिनेन्द्रभवनोद्धारैः प्रतिष्ठाप्रतिमादिभिः। साधर्मिकेषु वात्सल्याज्जायते भव्यदेहिनाम् ॥९॥
शृण्वन्तु सुधियो देवाः सम्यक्त्वं जगदुत्तमम्। दुर्गत्यादिक्षयो यस्मात्सम्प्राप्तिः स्वर्गमोक्षयोः ॥१०॥
इत्यादिसारसम्यक्त्व-स्फीतिं वर्णयता सता। चक्रे निर्विचिकित्साङ्गे तेन तद्भूपतेः स्तुतिः ॥११॥
तच्छ्रुत्वा वासवाख्यश्च देवो मायामयं द्रुतम्। दुष्टकुष्टव्रणोपेतं धृत्वा रूपं महामुनेः ॥१२॥
मध्याह्ने तत्परीक्षार्थं भिक्षार्थी स समागतः। तदोद्दायनभूपालस्तं विलोक्य मुनीश्वरम् ॥१३॥
पतन्तं पीडयाक्रान्तं मक्षिकाजालवेष्टितम्। ससम्भ्रमं समुत्थाय तिष्ठ तिष्ठेति सम्वदन् ॥१४॥

उद्दायन अपने राज्य का शान्ति और सुख से पालन करते और अपनी शक्ति के अनुसार जितना बन पड़ता, उतना धार्मिक काम करते। कहने का मतलब यह कि वे सुखी थे, उन्हें किसी प्रकार की चिन्ता नहीं थी। उनका राज्य भी शत्रु रहित निष्कंटक था ॥५॥

एक दिन सौधर्म स्वर्ग का इन्द्र अपनी सभा में धर्मोपदेश कर रहा था कि संसार में सच्चे देव अरहन्त भगवान् हैं, जो कि भूख, प्यास, रोग, शोक, भय, जन्म, जरा, मरण आदि दोषों से रहित और जीवों को संसार के दुःखों से छुड़ाने वाले हैं; सच्चा धर्म, उत्तम क्षमा, मार्दव, आर्जव आदि दशलक्षण रूप है; गुरु निर्ग्रन्थ हैं; जिनके पास परिग्रह का नाम निशान नहीं और जो क्रोध, मान, माया, लोभ, राग, द्वेष आदि से रहित हैं और वह सच्ची श्रद्धा है, जिससे जीवाजीवादिक पदार्थों में रुचि होती है। वही रुचि स्वर्ग-मोक्ष की देने वाली है। यह रुचि अर्थात् श्रद्धा धर्म में प्रेम करने से, तीर्थयात्रा करने से, रथोत्सव कराने से, जिनमन्दिरों का जीर्णोद्धार कराने से, प्रतिष्ठा कराने से, प्रतिमा बनवाने से और साधर्मियों से वात्सल्य अर्थात् प्रेम करने से उत्पन्न होती है। आप लोग ध्यान रखिये कि सम्यग्दर्शन संसार में एक सर्वश्रेष्ठ वस्तु है और कोई वस्तु उसकी समानता नहीं कर सकती। यही सम्यग्दर्शन दुर्गतियों का नाश करके स्वर्ग और मोक्ष का देने वाला है। इसे तुम धारण करो। इस प्रकार सम्यग्दर्शन का और उसके आठ अंगों का वर्णन करते समय इन्द्र ने निर्विचिकित्सा अंग का पालन करने वाले उद्दायन राजा की बहुत प्रशंसा की। इन्द्र के मुँह से एक मध्यलोक के मनुष्य की प्रशंसा सुनकर एक बासव नाम का देव उसी समय स्वर्ग से भारत में आया और उद्दायन राजा की परीक्षा करने के लिए एक कोढ़ी मुनि का वेश बनाकर भिक्षा के लिए दोपहर ही को उद्दायन के महल गया ॥६-१३॥

उसके शरीर से कोढ़ गल रहा था, उसकी वेदना से उसके पैर इधर-उधर पड़ रहे थे, सारे शरीर पर मक्खियाँ भिनभिना रही थीं और सब शरीर विकृत हो गया था। उसकी यह हालत होने पर भी जब वह राजद्वार पर पहुँचा और महाराज उद्दायन की उस पर दृष्टि पड़ी तब वे उसी समय सिंहासन से

प्रतिष्ठाप्य महाभक्त्या पादप्रक्षालनादिभिः। प्रासुकं सरसाहारं स तस्मै दत्तवान्मुदा ॥१५॥
स भुक्त्वा विविधाहारं मायया प्रचुरं पुनः। महादुर्गन्धसंयुक्तं चकार वमनं मुनिः ॥१६॥
तदा दुर्गन्धतो नष्टाः पार्श्वस्थाः सज्जनाः जनाः। प्रतीच्छन्वान्तिकं भूपः सस्त्रीकः संस्थितः सुधीः ॥१७॥
तदा सोपि मुनिर्गाढं प्रभावत्यास्तथोपरि। महाकष्टेन दुर्गन्धं छर्दिकं कृतवान्पुनः ॥१८॥
हा मया पापिना दत्तं विरुद्धं मुनयेऽशनम्। महापुण्येर्विना पात्र-दानसिद्धिर्न भूतले ॥१९॥
यथा चिन्तामणिः कल्प-वृक्षो वा वाञ्छितप्रदः। प्राप्यते तुच्छपुण्यैर्न पात्रदानं तथा क्षितौ ॥२०॥
इत्यादिकं स भूपालो निन्दां कुर्वन्निजात्मनः। स्वच्छतोयं समादाय क्षालनार्थं पुनर्वपुः ॥२१॥
समुत्थितस्तदा सोपि ज्ञात्वा तद्भक्तिमद्भुताम्। देवो मायामपाकृत्य संजगाद प्रहर्षतः ॥२२॥
अहो नरेन्द्र सद्दृष्टेर्महादानपतेस्तव। गुणो निर्विचिकित्साङ्गे सौधर्मेन्द्रेण वर्णितः ॥२३॥
यादृशोत्र मयागत्य स दृष्टस्तादृशस्तराम्। अतस्त्वं श्रीजिनेन्द्रोक्त-सारधर्मस्य तत्ववित् ॥२४॥
त्वां विना पाणिपद्माभ्यां मुनेर्वान्ति सुदुःसहाम्। समुद्धर्तुं क्षमः कोत्र सम्यग्दृष्टिः शिरोमणिः ॥२५॥
इति स्तुत्वा महीनाथं देवो वासवसंज्ञकः। प्रोक्त्वा वृत्तान्तकं सर्वं तं समर्च्य दिवं गतः ॥२६॥
अहो पुण्यस्य माहात्म्यं सतां केनात्र वर्ण्यते। यद्वर्णनं सुराधीशः करोति परमादरात् ॥२७॥

उठकर आये और बड़ी भक्ति से उन्होंने उस छली मुनि का आह्वान किया। इसके बाद नवधाभक्तिपूर्वक हर्ष के साथ राजा ने मुनि को प्रासुक आहार कराया। राजा आहार कराकर निवृत हुए कि इतने में उस कपटी मुनि ने अपनी माया से महा दुर्गन्धित वमन कर दिया। उसकी असह्य दुर्गन्ध के कारण जितने और लोग पास खड़े हुए थे, वे सब भाग खड़े हुए किन्तु केवल राजा और रानी मुनि की सम्हाल करने को वहीं रह गये। रानी मुनि का शरीर पोंछने को उसके पास गई। कपटी मुनि ने उस बेचारी पर भी महा दुर्गन्धित उछाट कर दी। राजा और रानी ने इसकी कुछ परवाह न कर उलटा इस बात पर बहुत पश्चाताप किया कि हमसे मुनि की प्रकृति विरुद्ध न जाने क्या आहार दे दिया गया, जिससे मुनिराज को इतना कष्ट हुआ। हम लोग बड़े पापी हैं। इसीलिए तो ऐसे उत्तम पात्र का हमारे यहाँ निरन्तराय आहार नहीं हुआ। सच है जैसे पापी लोगों को मनोवांछित देने वाला चिन्तामणि रत्न और कल्पवृक्ष प्राप्त नहीं होता, उसी तरह सुपात्र के दान का योग भी पापियों को नहीं मिलता है। इस प्रकार अपनी आत्मनिन्दा कर और अपने प्रमाद पर बहुत-बहुत खेद प्रकाश कर राजा रानी ने मुनि का सब शरीर जल से धोकर साफ किया। उनकी इस प्रकार अचलभक्ति देखकर देव अपनी माया समेटकर बड़ी प्रसन्नता के साथ बोला-राजराजेश्वर, सचमुच हो तुम सम्यग्दृष्टि हो, महादानी हो। निर्विचिकित्सा अंग के पालन करने में इन्द्र ने जैसी तुम्हारी प्रशंसा की थी, वह अक्षर-अक्षर ठीक निकली, वैसा ही मैंने तुम्हें देखा। वास्तव में तुम ही ने जैनशासन का रहस्य समझा है। यदि ऐसा न होता तो तुम्हारे बिना और कौन मुनि की दुर्गन्धित उछाट अपने हाथों से उठाता? राजन्! तुम धन्य हो, शायद ही इस पृथ्वी मंडल पर इस समय तुम सरीखा सम्यग्दृष्टियों में शिरोमणि कोई होगा ? इस प्रकार उद्दायन की प्रशंसा

एकदोद्दायनो राजा राज्यं कुर्वन्स्वलीलया। दानपूजाव्रताद्युक्ते जिनधर्मे सुतत्परः ॥२८॥
कियत्यपि गते काले कारणं वीक्ष्य किंचन। त्रिधा वैराग्यसम्पन्नो दत्वा राज्यं सुताय च ॥२९॥
वर्द्धमानजिनेन्द्रस्य स्वर्गमोक्षप्रदायिनः। पादपङ्कजयोर्मूले महाभक्त्या सुनिश्चलः ॥३०॥
दीक्षामादाय जैनेन्द्रीं देवेन्द्राद्यैः समर्चिताम्। प्रतिपाल्य जगत्सारं सुधी रत्नत्रयं मुदा ॥३१॥
ततो ध्यानाग्निना दग्ध्वा घातिकर्मचतुष्टयम्। केवलज्ञानमुत्पाद्य सुरासुरनरार्चितः ॥३२॥
सम्बोध्य सकलान्भव्यान्स्वर्गमोक्षप्रदायकः। शेषकर्मक्षयं कृत्वा सम्प्राप्तो मोक्षमक्षयम् ॥३३॥
प्रभावती महादेवी गृहीत्वा सुतपः सती। मुक्त्वा स्त्रीलिङ्गकं कष्टं ब्रह्मस्वर्गे सुरोऽभवत् ॥३४॥

सकलगुणसमुद्रः केवलज्ञानचन्द्रः पदनमदमरेन्द्रः शर्मदः श्रीजिनेन्द्रः।
स भवतु मम नित्यं सेवितो भक्तिभारैर्गुणगणमणिरुद्रो बोधसिन्धुर्यतीन्द्रः ॥३५॥

इति कथाकोशे निर्विचिकित्साङ्गे श्रीमदुद्दायनस्य कथा समाप्ता।

कर देव अपने स्थान पर चला गया और राजा फिर अपने राज्य का सुखपूर्वक पालन करते हुए दान, पूजा, व्रत आदि में अपना समय बिताने लगे ॥१४-२८॥

इसी तरह राज्य करते-करते उद्दायन का कुछ और समय बीत गया। एक दिन वे अपने महल पर बैठे हुए प्रकृति की शोभा देख रहे थे कि इतने में एक बड़ा भारी बादल का टुकड़ा उनकी आँखों के सामने से निकला। वह थोड़ी ही दूर पहुँचा होगा कि एक प्रबल वायु के वेग ने उसे देखते-देखते नामशेष कर दिया। क्षणभर में एक विशाल मेघखण्ड की यह दशा देखकर उद्दायन की आँखें खुलीं। उन्हें सारा संसार ही अब क्षणिक जान पड़ने लगा। उन्होंने उसी समय महल से उतरकर अपने पुत्र को बुलाया और उसके मस्तक पर राजतिलक करके आप भगवान् वर्द्धमान के समवसरण में पहुँचे और भक्ति के साथ भगवान् की पूजा कर उनके चरणों के पास ही उन्होंने जिनदीक्षा ग्रहण कर ली, जिसका इन्द्र, नरेन्द्र, धरणेन्द्र आदि सभी आदर करते हैं ॥२९-३१॥

साधु होकर उद्दायन राजा ने खूब तपश्चर्या की, संसार का सर्वश्रेष्ठ पदार्थ रत्नत्रय प्राप्त किया। इसके बाद ध्यानरूपी अग्नि से घातिया कर्मों का नाशकर उन्होंने केवलज्ञान प्राप्त किया। उसके द्वारा उन्होंने संसार के दुःखों से तड़फते हुए अनेक जीवों को उबार कर, अनेकों को धर्म के पथ पर लगाया और अन्त में अघातिया कर्मों का भी नाश कर अविनाशी अनन्त मोक्षपद प्राप्त किया ॥३२-३३॥

उधर उनकी रानी सती प्रभावती भी जिनदीक्षा ग्रहण कर तपश्चर्या करने लगी और अन्त में समाधि-मृत्यु प्राप्त कर ब्रह्मस्वर्ग में जाकर देव हुई ॥३४॥

वे जिन भगवान् मुझे मोक्ष लक्ष्मी प्रदान करें, जो सब श्रेष्ठ गुणों के समुद्र हैं, जिनका केवलज्ञान संसार के जीवों का हृदयस्थ अज्ञानरूपी आताप नष्ट करने को चन्द्रमा समान है, जिनके चरणों को इन्द्र, नरेन्द्र आदि सभी नमस्कार करते हैं, जो ज्ञान के समुद्र और साधुओं के शिरोमणि हैं ॥३५॥

९. श्रीरेवतीराज्ञ्याः कथा

प्रणम्य परया भक्त्या जिनेन्द्रं त्रिजगद्धितम्। कथाममूढदृष्टेश्च रेवत्या रचयाम्यहम् ॥१॥
अत्रैव विजयार्धस्थ-दक्षिणश्रेणिसंस्थिते। मेघकूटपुरे राजा नाम्ना चन्द्रप्रभः सुधीः ॥२॥
प्राज्यं राज्यं प्रकुर्वाणश्चैकदा स खगेश्वरः। चन्द्रशेखरपुत्राय दत्वा राज्यं सुधार्मिकः ॥३॥
यात्रां कुर्वञ्जिनेन्द्राणां महातीर्थेषु शर्मदाम्। गत्वा दक्षिणदेशस्थ-मथुरायां स्वपुण्यतः ॥४॥
गुप्ताचार्यमुनेः पार्श्वे श्रुत्वा धर्मकथास्ततः। प्रोक्तः परोपकारोत्र महापुण्याय भूतले ॥५॥
इति ज्ञात्वा तथा तीर्थयात्रार्थं श्रीजिनेशिनाम्। काश्चिद्विद्या दधानोपि क्षुल्लको भक्तितोऽभवत् ॥६॥
एकदा तीर्थयात्रार्थमुत्तरां मथुरां प्रति। गन्तुकामेन तेनोच्चैर्गुरुः पृष्टः प्रणम्य च ॥७॥
किं कस्य कथ्यते देव भवद्भिः करुणापरैः। स प्राह परमानन्दाद् गुप्ताचार्यो विचक्षणः ॥८॥
सुव्रताख्यमुनेर्वाच्या नतिर्मे गुणशालिनः। धर्मवृद्धिश्च रेवत्याः सम्यक्त्वासक्तचेतसः॥९॥
त्रिःपृष्टेन तदेवोच्चैराचार्येण प्रजल्पितम्। ततश्चन्द्रप्रभः सोपि क्षुल्लको निजचेतसि ॥१०॥

---

९. रेवती रानी की कथा

संसार का हित करने वाले जिनभगवान् को परम भक्तिपूर्वक नमस्कार कर अमूढ़दृष्टि अंग का पालन करने वाली रेवती रानी की कथा लिखता हूँ। विजयार्ध पर्वत की दक्षिण श्रेणी में मेघकूट नाम का एक सुन्दर शहर है। उसके राजा हैं चन्द्रप्रभ। चन्द्रप्रभ ने बहुत दिनों तक सुख के साथ अपना राज्य किया। एक दिन वे बैठे हुए थे कि एकाएक उन्हें तीर्थयात्रा करने की इच्छा हुई। राज्य का कारोबार अपने चन्द्रशेखर नाम के पुत्र को सौंपकर वे तीर्थयात्रा के लिए चल दिये। वे यात्रा करते हुए दक्षिण मथुरा में आये। उन्हें पुण्य से वहाँ गुप्ताचार्य के दर्शन हुए। आचार्य से चन्द्रप्रभ ने धर्मोपदेश सुना। उनके उपदेश का उन पर बहुत असर पड़ा। वे आचार्य के द्वारा–

प्रोक्तः परोपकारोऽत्र महापुण्याय भूतले। –ब्रह्म नेमिदत्त

अर्थात् परोपकार करना महान् पुण्य का कारण है, यह जानकर और तीर्थयात्रा करने के लिए एक विद्या को अपने अधिकार में रखकर क्षुल्लक बन गये ॥१–६॥

एक दिन उनकी इच्छा उत्तर मथुरा की यात्रा करने की हुई। जब वे जाने को तैयार हुए तब उन्होंने अपने गुरु महाराज से पूछा–हे दया के समुद्र! मैं यात्रा के लिए जा रहा हूँ, क्या आपको कुछ समाचार तो किसी के लिए नहीं कहना है? गुप्ताचार्य बोले–मथुरा में एक सूरत नाम के बड़े ज्ञानी और गुणी मुनिराज हैं, उन्हें मेरा नमस्कार कहना और सम्यग्दृष्टिनी धर्मात्मा रेवती के लिए मेरी धर्मवृद्धि कहना ॥७–९॥

क्षुल्लक ने और पूछा कि इसके सिवा और भी आपको कुछ कहना है क्या ? आचार्य ने कहा

भव्यसेनमुनेरेका-दशाङ्गश्रुतधारिणः। अन्येषामपि न प्रोक्तं किंचिदत्रास्ति कारणम् ॥११॥
सम्प्रधार्येति गत्वा च तत्र सुव्रतसन्मुनेः। प्रोक्त्वा तद्वन्दनां तस्य तुष्टो वात्सल्यतस्तराम् ॥१२॥
ये कुर्वन्ति सुवात्सल्यं भव्या धर्मानुरागतः। साधर्मिकेषु तेषां हि सफलं जन्म भूतले ॥१३॥
ततोऽसौ क्षुल्लकश्चापि विनोदेन विशिष्टधीः। लिङ्गमात्रमुनेर्भव्य-सेनस्य वसतिं गतः ॥१४॥
तेन विद्याप्रमत्तेन तस्मै सुब्रह्मचारिणे। न दत्ता धर्मवृद्धिश्च धिग्गर्वं कष्टकोटिदम् ॥१५॥
यत्र वाक्येपि दारिद्र्यं विवेकविकलात्मनि। प्राघूर्णकक्रिया तत्र स्वप्ने स्यादपि दुर्लभा ॥१६॥
सर्वदोषापहं जैनं ज्ञानं तस्य मदोभवः। सत्यं पुण्यविहीनानाममृतं च विषायते ॥१७॥
ततस्तस्य परीक्षार्थं बहिर्भूमिं प्रगच्छतः। प्रातः कुण्डीं समादाय पृष्टतश्चलितो व्रती ॥१८॥
मार्गे स्वविद्यया तस्य ब्रह्मचारी गुणोज्ज्वलः। कोमलैर्हरितैः स्निग्धैस्तृणाङ्कुरकदम्बकैः ॥१९॥
आच्छादितं महीपीठं दर्शयामास सर्वतः। तद्विलोक्य महीपीठं भव्यसेनो विनष्टधीः ॥२०॥

नहीं। तब क्षुल्लक ने विचारा कि क्या कारण है जो आचार्य ने एकादशांग के ज्ञाता श्री भव्यसेन मुनि तथा और-और मुनियों की रहते उन्हें कुछ नहीं कहा और केवल सूरत मुनि और रेवती के लिए ही नमस्कार किया तथा धर्मवृद्धि दी ? इसका कोई कारण अवश्य होना चाहिए। अस्तु। जो कुछ होगा वह आगे स्वयं मालूम हो जायेगा। यह सोचकर चन्द्रप्रभ क्षुल्लक वहाँ से चल दिये। उत्तर मथुरा पहुँचकर उन्होंने सूरत मुनि को गुप्ताचार्य की वन्दना कह सुनाई। उससे सूरत मुनि बहुत प्रसन्न हुए। उन्होंने चन्द्रप्रभ के साथ खूब वात्सल्य का परिचय दिया। उससे चन्द्रप्रभ को बड़ी खुशी हुई। बहुत ठीक कहा है ॥१०-१२॥

ये कुर्वन्ति सुवात्सल्यं भव्या धर्मानुरागतः।
साधर्मिकेषु तेषां हि सफलं जन्म भूतले ॥ -ब्रह्म नेमिदत्त

अर्थात् संसार में उन्हीं का जन्म लेना सफल है जो धर्मात्माओं से वात्सल्य-प्रेम करते हैं।

इसके बाद क्षुल्लक चन्द्रप्रभ एकादशांग के ज्ञाता, पर नाम मात्र के भव्यसेन मुनि के पास गये। उन्होंने भव्यसेन को नमस्कार किया। पर भव्यसेन मुनि ने अभिमान में आकर चन्द्रप्रभ को धर्मवृद्धि तक भी न दी। ऐसे अभिमान को धिक्कार है जिन अविचारी पुरुषों के वचनों में भी दरिद्रता है जो वचनों से भी प्रेमपूर्वक आये हुए अतिथि से नहीं बोलते-वे उनका और क्या सत्कार करेंगे ? उनसे तो स्वप्न में भी अतिथिसत्कार नहीं बन सकेगा। जैन शास्त्रों का ज्ञान सब दोषों से रहित है, निर्दोष है। उसे प्राप्त कर हृदय पवित्र होना ही चाहिए। पर खेद है कि उसे पाकर भी मान होता है। पर यह शास्त्र का दोष नहीं किन्तु यों कहना चाहिए कि पापियों के लिए अमृत भी विष हो जाता है। जो हो, तब भी देखना चाहिए कि इनमें कुछ भी भव्यपना है भी या केवल नाम मात्र के ही भव्य हैं? यह विचार कर दूसरे दिन सबेरे जब भव्यसेन कमण्डलु लेकर शौच के लिए चले तब उनके पीछे-पीछे चन्द्रप्रभ

एते त्वेकेन्द्रिया जीवाः प्रोक्ताः सन्ति जिनागमे। इत्युक्त्वात्रारुचिं कृत्वा गतस्तेषां तदोपरि ॥२१॥
ततः शौचक्षणे सोपि मायया कुण्डिकाजलम्। शोषयित्वा जगादैवं भो मुने नात्र विद्यते ॥२२॥
कुण्डिकायां जलं तस्मादेतस्मिंश्च सरोवरे। शौचं मृत्तिकया सार्द्धं कुरु त्वं सुमनोहरे ॥२३॥
भवत्वेवं भणित्वेति तत्र शौचं चकार सः। किं करोति न मूढात्मा कार्यं मिथ्यात्वदूषितः ॥२४॥
न स्यान्मुक्तिप्रदं ज्ञान-चारित्रं दुर्दृशामपि। उद्गतो भास्करश्चापि किं घूकस्य सुखायते ॥२५॥
मिथ्यादृष्टिश्रितं शास्त्रं कुमार्गाय प्रवर्तते। तथा मृष्टं भवेत्कष्टं सुदुग्धं तुम्बिकागतम्? ॥२६॥
इत्यादिकं विचार्योच्चैः स्वचित्ते चतुरोत्तमः। मिथ्यादृष्टिं परिज्ञात्वा तं कुमार्गविधायिनम् ॥२७॥
भव्यसेनस्य तस्यैवा-भव्यसेन इति व्रती। चक्रे नाम दुराचारात्किं न कष्टं प्रवर्तते ॥२८॥

क्षुल्लक भी हो लिए। आगे चलकर क्षुल्लक महाशय ने अपने विद्याबल से भव्यसेन के आगे की भूमि को कोमल और हरे-हरे तृणों से युक्त कर दिया। भव्यसेन उसकी कुछ परवाह न कर और यह विचार कर कि जैनशास्त्रों में तो इन्हें एकेन्द्री कहा है, इनकी हिंसा का विशेष पाप नहीं होता, उस पर से निकल गए। आगे चलकर जब वे शौच हो लिए और शुद्धि के लिए कमण्डलु की ओर देखा तो उसमें जल नहीं और वह औंधा पड़ा हुआ है, तब तो उन्हें बड़ी चिन्ता हुई। इतने में एकाएक क्षुल्लक महाशय भी उधर आ निकले। कमण्डलु का जल यद्यपि क्षुल्लकजी ने ही अपने विद्याबल से सुखा दिया था, तब भी वे बड़े आश्चर्य के साथ भव्यसेन से बोले-मुनिराज, पास ही एक निर्मल जल का सरोवर भरा हुआ है, वहीं जाकर शुद्धि कर लीजिए न? भव्यसेन ने अपने पदस्थ पर, अपने कर्तव्य पर कुछ भी ध्यान न देकर जैसा क्षुल्लक ने कहा, वैसा ही कर लिया। सच बात तो यह है- ॥१३-२३॥

किं करोति न मूढ़ात्मा कार्यं मिथ्यात्वदूषितः।
न स्यान्मुक्तिप्रदं ज्ञानं चरित्रं दुर्दशामपि॥
उद्गतो भास्करश्चापि किं घूकस्य सुखायते।
मिथ्यादृष्टेः श्रुतं शास्त्रं कुमार्गाय प्रवर्तते।
यथा मृष्टं भवेत्कष्टं सुदुग्धं तुम्बिकागतम् ॥ -ब्रह्म नेमिदत्त

अर्थात् मूर्ख पुरुष मिथ्यात्व के वश होकर कौन बुरा काम नहीं करते ? मिथ्यादृष्टियों का ज्ञान और चारित्र मोक्ष का कारण नहीं होता। जैसे सूर्य के उदय से उल्लू को कभी सुख नहीं होता। मिथ्यादृष्टियों का शास्त्र सुनना, शास्त्राभ्यास करना केवल कुमार्ग में प्रवृत होने का कारण है। जैसे मीठा दूध भी तूबड़ी के सम्बन्ध से कड़वा हो जाता है। इन सब बातों को विचार क्षुल्लक ने भव्यसेन के आचरण से समझ लिया कि ये नाम मात्र के जैनी हैं, पर वास्तव में इन्हें जैनधर्म पर श्रद्धान नहीं, ये मिथ्यात्वी हैं। उस दिन से चन्द्रप्रभ ने भव्यसेन का नाम अभव्यसेन रखा। सच बात है दुराचार से क्या नहीं होता ? ॥२४-२८॥

ततोन्यस्मिन्दिने सोपि ब्रह्मचारी शुचिव्रतः। वरुणाख्यमहीनाथ-राज्ञी या रेवती सती ॥२९॥
तस्याश्चापि परीक्षार्थं पूर्वस्यां दिशि मायया। पद्मस्थितं चतुर्वक्त्रं महायज्ञोपवीतकम् ॥३०॥
वेदध्वनिसमायुक्तं सुरासुरनमस्कृतम्। ब्रह्मणो रूपमादाय संस्थितो निजलीलया ॥३१॥
तदाकर्ण्य च भूपाल-भव्यसेनादयो जनाः। गत्वा तद्वन्दनां चक्रुः प्रमोदेन जडाशयाः ॥३२॥
तदा वरुणभूपेन प्रेर्यमाणापि रेवती। सम्यक्त्वरत्नसंयुक्ता जिनभक्तिपरायणा ॥३३॥
मोक्षे तथात्मनि ज्ञाने वृत्ते श्रीवृषभेश्वरः। ब्रह्मा जिनागमे चेति सम्प्रोक्तो न परो नरः ॥३४॥
अयं कोपि महाधूर्त्तो जनानां चित्तरञ्जकः। इत्युक्त्वा सा गता नैव तत्र राज्ञी विचक्षणा ॥३५॥
तथान्ये दिवसे सोपि दक्षिणस्यां दिशि व्रती। गरुडस्थं चतुर्बाहु-शङ्खचक्रगदान्वितम् ॥३६॥
लसत्खड्गेन संयुक्तं सर्वदैत्यभयप्रदम्। दर्शयामास गूढात्मा वैष्णवं रूपमद्भुतम् ॥३७॥
पश्चिमस्यां दिशि प्रौढं वृषारूढं तथान्यदा। पार्वतीवदनाम्भोज-समीक्षणसमन्वितम् ॥३८॥
जटाजूटशिरोदेशं लम्बोदरविराजितम्। रूपं माहेश्वरं तेन दर्शितं च सुरैः स्तुतम् ॥३९॥
ततोन्यस्मिन्दिने धीमा-नुत्तरस्यां दिशि स्फुरत्। समवादिसृतिस्थं च प्रातिहार्यैर्विभूषितम् ॥४०॥
मानस्तंभादिभिर्मिथ्या-दृशां चेतोविडम्बनम्। सुरासुरनराधीश-समर्चितपदद्वयम् ॥४१॥

क्षुल्लक ने भव्यसेन की परीक्षा कर अब रेवती रानी की परीक्षा करने का विचार किया। दूसरे दिन उसने अपने विद्याबल से कमल पर बैठे हुए और वेदों का उपदेश करते हुए चतुर्मुख ब्रह्मा का वेष बनाया और शहर से पूर्व दिशा की ओर कुछ दूरी पर जंगल में वह ठहरा। यह हाल सुनकर राजा, भव्यसेन आदि सभी वहाँ गए और ब्रह्माजी को उन्होंने नमस्कार किया। उनकी चरण वंदना कर वे बड़े खुश हुए। राजा ने चलते समय अपनी प्रिया रेवती से भी ब्रह्माजी की वन्दना के लिए चलने को कहा था, पर रेवती सम्यक्त्व रत्न से भूषित थी, जिनभगवान् की अनन्यभक्त थी इसलिए वह नहीं गई। उसने राजा से कहा—महाराज, मोक्ष और सम्यग्दर्शन, सम्यग्ज्ञान तथा सम्यक्चारित्र को प्राप्त कराने वाला सच्चा ब्रह्मा जिनशासन में आदि जिनेन्द्र कहा गया है, उसके सिवा अन्य ब्रह्मा हो ही नहीं सकता और जिस ब्रह्मा की वन्दना के लिए आप जा रहे हैं, वह ब्रह्मा नहीं है किन्तु कोई धूर्त ठगने के लिए ब्रह्मा का वेष लेकर आया है। मैं तो नहीं चलूँगी ॥२९-३५॥

दूसरे दिन क्षुल्लक ने गरुड़ पर बैठे हुए, चतुर्बाहु, शंख, चक्र, गदा आदि से युक्त और दैत्यों को कँपाने वाले वैष्णव भगवान् का वेष बनाकर दक्षिण दिशा में अपना डेरा जमाया ॥३६-३७॥

तीसरे दिन उस बुद्धिमान् क्षुल्लक ने बैल पर बैठे हुए, पार्वती के मुख कमल को देखते हुए, सिर पर जटा रखाये हुए, गणपति युक्त और जिन्हें हजारों देव आ-आकर नमस्कार कर रहे हैं, ऐसा शिव का वेष धारण कर पश्चिम दिशा की शोभा बढ़ाई ॥३८-३९॥

चौथे दिन उसने अपनी माया से सुन्दर समवसरण में विराजे हुए, आठ प्रातिहार्यों से विभूषित, मिथ्यादृष्टियों के मान को नष्ट करने वाले मानस्तंभादि से युक्त, निर्ग्रन्थ और जिन्हें हजारों देव,

निर्ग्रन्थादिगुणोपेतं रूपं तीर्थेशिनः शुभम्। विद्यया दर्शयामास स क्षुल्लको जगदुत्तमम् ॥४२॥
तदानन्दभरेणोच्चै-र्वरुणाख्यमहीभुजा। सार्द्धं सर्वजनाः शीघ्रं भव्यसेनादयो गताः ॥४३॥
तद्भक्त्यर्थं तथा पौरैः प्रेर्यमाणापि रेवती। जगाद त्रिजगत्सार-सम्यक्त्वेन विराजिता ॥४४॥
अहो जिनागमे प्रोक्ताश्चतुर्विंशतिरेव च। श्रीमत्तीर्थंकरा देवाः सर्वदेवेन्द्रवन्दिताः ॥४५॥
नवैव वासुदेवाश्च रुद्राश्चैकादश स्मृताः। ते सर्वे तु यथास्थानं सम्प्राप्ताः स्वगुणैः क्रमात् ॥४६॥
अतः कोपि समायातो मूढानां मूढताप्रदः। जनानां वञ्चने चंचु-रेष पाखण्डमण्डितः ॥४७॥
इत्युक्त्वा सा स्थिता गेहे राज्ञी सम्यक्त्वशालिनी। किं कदा चलिता वातैर्निश्चला मेरुचूलिका ॥४८॥
ततः क्षुल्लकरूपेण स व्रती मायया पुनः। महाव्याधिग्रहग्रस्त-परेद्युर्व्रतभूषितः ॥४९॥
रेवत्या प्राङ्गणे चर्या-वेलायां भोजनाय च। आगच्छन्मूर्छयाक्रान्तः स पपात महीतले ॥५०॥
तं विलोक्य तदा राज्ञी रेवती धर्मवत्सला। हा हा कारं विधायोच्चैः शीघ्रमागत्य भक्तितः ॥५१॥
कृत्वा सचेतनं चारु-शीतवातादिभिस्ततः। नयति स्म गृहान्तस्तु महाकारुण्यमण्डिता ॥५२॥
सा तस्मै प्रासुकाहारं सरसं विधिपूर्वकम्। ददौ कारुण्ययुक्तानां युक्तं दाने मतिः सदा ॥५३॥

विद्याधर, चक्रवर्ती आ-आकर नमस्कार करते हैं, ऐसा संसार श्रेष्ठ तीर्थंकर का वेष बनाकर उत्तर दिशा को अलंकृत किया। तीर्थंकर भगवान् का आगमन सुनकर सबको बहुत आनन्द हुआ। सब प्रसन्न होते हुए भक्तिपूर्वक उनकी वन्दना करने को गए। राजा, भव्यसेन आदि भी उनमें शामिल थे। तीर्थंकर भगवान् के दर्शनों के लिए भी रेवती रानी को न जाती हुई देखकर सबको बड़ा आश्चर्य हुआ। बहुतों ने उससे चलने के लिए आग्रह भी किया, पर वह न गई कारण, वह सम्यक्त्वरूप मौलिक रत्न से भूषित थी, उसे जिनभगवान् के वचनों पर पूरा विश्वास था कि तीर्थंकर परम देव चौबीस ही होते हैं और वासुदेव नौ और रुद्र ग्यारह होते हैं। फिर उनकी संख्या को तोड़ने वाले ये दसवें वासुदेव, बारहवें रुद्र और पच्चीसवें तीर्थंकर आ कहाँ से सकते हैं? वे तो अपने-अपने कर्मों के अनुसार जहाँ उन्हें जाना था वहाँ चले गए। फिर यह नई सृष्टि कैसी? इनमें न तो कोई सच्चा रुद्र है, न वासुदेव है और न तीर्थंकर है किन्तु कोई मायावी ऐन्द्रजालिक अपनी धूर्तता से लोगों को ठगने के लिए आया है। यह विचार कर रेवती रानी तीर्थंकर की वन्दना के लिए भी नहीं गई। सच है कहीं वायु से मेरु पर्वत भी चला है? ॥४०-४८॥

इसके बाद चन्द्रप्रभ, क्षुल्लक वेष ही में, पर अनेक प्रकार की व्याधियों से युक्त तथा अत्यन्त मलिन शरीर होकर रेवती के घर भिक्षा के लिए पहुँचे। आँगन में पहुँचते ही वे मूर्च्छा खाकर पृथ्वी पर धड़ाम से गिर पड़े। उन्हें देखते ही धर्मवत्सला रेवती रानी हाय-हाय कहती हुई उनके पास दौड़ी गई और बड़ी भक्ति और विनय से उसने उन्हें उठाकर सचेत किया। इसके बाद अपने महल में ले जाकर बड़े कोमल और पवित्र भावों से उसने उन्हें प्रासुक आहार कराया। सच है जो दयावान् होते हैं उनकी बुद्धि दान देने में स्वभाव ही से तत्पर रहती है ॥४९-५३॥

भुक्त्वाहारं व्रती सोपि मायया प्रचुरं पुनः। चकार वमनं भूरि पूतिगन्धं सुदुस्सहम् ॥५४॥
अपथ्यं हा मयादत्तं पापिन्या व्रतिनेऽशनम्। इत्यात्मनो महानिन्दां कुर्वन्ती रेवती सती ॥५५॥
दूरीकृत्य तदा वान्तिं भक्त्या निःशङ्कमानसा। सुखोष्णतोयमादाय तद्वपुः क्षालनं व्यधात् ॥५६॥
तदा चन्द्रप्रभो सोपि ब्रह्मचारी दृढव्रतः। तस्याः सद्भक्तिमालोक्य सुधीर्हृष्ट्वा स्वचेतसि ॥५७॥
तां मायामुपसंहृत्य संजगाद लसद्वचः। महासन्तोषसन्दोह-दायकः परमादरात् ॥५८॥
भो देवि त्रिजगत्सार-गुप्ताचार्यस्य मद्गुरोः। धर्मवृद्धिः स्फुरत्सिद्धिः पुनातु तव मानसम् ॥५९॥
पूजा श्रीमज्जिनेन्द्राणां त्वन्नाम्ना या मया कृता। धर्मानुरागतः सा ते भूयात्कल्याणदायिनी ॥६०॥
अमूढत्वं त्रिजगत्सारं संसाराम्भोधिपारदम्। दृष्टं मया तवागत्य व्यक्तं नाना प्रकारकैः ॥६१॥
अतस्ते त्रिजगत्पूज्यं सम्यक्त्वं केन वर्ण्यते। श्रीमज्जिनेन्द्रचन्द्राणां चरणार्चनकोविदे ॥६२॥
इत्यादिकं प्रशस्योच्चै-स्तां देवीं गुणशालिनीम्। प्रोक्त्वा सर्वं च वृत्तान्तं स्वस्थानं स व्रती गतः ॥६३॥
ततो वरुणभूपालः सूनवे शिवकीर्तये। दत्वा राज्यं जगद्वन्द्यं तपो धृत्वा जिनोदितम् ॥६४॥
जातो माहेन्द्रकल्पेसौ देवो दिव्याङ्गभासुर; श्रीमज्जिनेन्द्रपादाब्ज-पूजनेऽतीव तत्परः ॥६५॥

क्षुल्लक को अब तक भी रेवती की परीक्षा से सन्तोष नहीं हुआ। सो उन्होंने भोजन करने के साथ ही वमन कर दिया, जिसमें अत्यन्त दुर्गन्ध आ रही थी क्षुल्लक की यह हालत देखकर रेवती को बहुत दुःख हुआ। उसने बहुत पश्चाताप किया कि न जाने क्या अपथ्य मुझ पापिनी के द्वारा दे दिया गया, जिससे इनकी यह हालत हो गई मेरी इस असावधानता को धिक्कार है। इस प्रकार बहुत कुछ पश्चाताप करके उसने क्षुल्लक का शरीर पोंछा और बाद में कुछ गरम जल से उसे धोकर साफ किया ॥५४-५६॥

क्षुल्लक रेवती की भक्ति देखकर बहुत प्रसन्न हुए। वे अपनी माया समेट कर बड़ी खुशी के साथ रेवती से बोले-देवी, संसार श्रेष्ठ मेरे परम गुरु महाराज गुप्ताचार्य की धर्मवृद्धि तेरे मन को पवित्र करे, जो कि सब सिद्धियों की देने वाली है और तुम्हारे नाम से मैंने यात्रा में जहाँ-जहाँ जिनभगवान् की पूजा की है वह भी तुम्हें कल्याण की देने वाली हो ॥५७-६०॥

देवी, तुमने जिन संसार श्रेष्ठ और संसार समुद्र से पार करने वाले अमूढ़दृष्टि अंग को ग्रहण किया है, उसकी मैंने नाना तरह से परीक्षा की, पर उसमें तुम्हें अचल पाया तुम्हारे इस त्रिलोक पूज्य सम्यक्त्व की कौन प्रशंसा करने को समर्थ हैं? कोई नहीं। इस प्रकार गुणवती रेवती रानी की प्रशंसा कर और उसे सब हाल कहकर क्षुल्लक अपने स्थान चले गए ॥६१-६३॥

इसके बाद वरुण नृपति और रेवती रानी का बहुत समय सुख के साथ बीता। एक दिन राजा को किसी कारण से वैराग्य हो गया है। वे अपने शिवकीर्ति नामक पुत्र को राज्य सौंपकर और सब माया जाल तोड़कर तपस्वी बन गए। साधु बनकर उन्होंने खूब तपश्चर्या की और आयु के अन्त में समाधिमरण कर वे माहेन्द्र स्वर्ग में जाकर देव हुए ॥६४-६५॥

रेवती च महाराज्ञी जिनेन्द्रवचने रता। वैराग्येन समादाय जैनीं दीक्षां सुखप्रदाम् ॥६६॥
क्रमेण तपसा ब्रह्म-स्वर्गे देवो महर्द्धिकः। संजातो जैनतीर्थेषु महायात्राविधायकः ॥६७॥
धर्मे श्रीजिनभाषिते शुचितरे स्वर्मोक्षसौख्यप्रदे देवेन्द्रैश्च नरेन्द्रखेचरतरैर्भक्त्या निसंसेविते।
भो भव्याः कुरुत प्रतीतिमतुलां चेदिच्छवः सत्सुखं त्यक्त्वा सर्वकुमार्गसङ्गमचिरं श्रीरेवतीवत्तराम् ॥६८॥

इति कथाकोशेऽमूढदृष्ट्यङ्गे श्रीमद्रेवतीकथा समाप्ता।

१०. श्रीजिनेन्द्रभक्तस्य कथा

नत्वा श्रीमज्जिनं भक्त्या स्वर्गमोक्षसुखप्रदम्। वक्ष्ये जिनेन्द्रभक्तस्य सत्कथां सोपगूहने ॥१॥
सौराष्ट्रविषयेऽत्रैव सरसे सद्दयान्विते। श्रीमान्नेमिजिनेन्द्रस्य जन्मना सुपवित्रिते ॥२॥
पुरे पाटलिपुत्राख्ये राजा जातो यशोध्वजः। तस्य राज्ञी सुसीमाख्या रूपलावण्यमण्डिता ॥३॥
तयोः पुत्रः सुवीराख्यः सप्तव्यसनतत्परः। संजातः पापतः सोपि तस्करोत्करसेवितः ॥४॥
किं करोति पिता माता कुलं जातिश्च सर्वथा। भाविदुर्गतिदुःखानां कुले जन्मापि निष्फलम् ॥५॥
अथास्ति गौडदेशे च ताम्रलिप्ताभिधा पुरी। यत्र संतिष्ठते लक्ष्मीर्दानपूजायशस्करी ॥६॥

जिनभगवान् की परम भक्त महारानी रेवती भी जिनदीक्षा ग्रहण कर और शक्ति के अनुसार तपश्चर्या और आयु के अन्त में ब्रह्मस्वर्ग में जाकर महर्द्धिक देव हुए। भव्य पुरुषों, यदि तुम भी स्वर्ग या मोक्ष-सुख को चाहते हो, तो जिस तरह श्रीमती रेवती रानी ने मिथ्यात्व छोड़ा उसी तरह तुम भी मिथ्यात्व को छोड़कर स्वर्ग-मोक्ष के देने वाले, अत्यन्त पवित्र और बड़े-बड़े देव विद्याधर, राजा महाराजाओं से भक्तिपूर्वक ग्रहण किए हुए जैनधर्म का आश्रय स्वीकार करो ॥६६-६८॥

१०. जिनेन्द्रभक्त की कथा

स्वर्ग-मोक्ष के देने वाले श्रीजिनभगवान् को नमस्कार कर मैं जिनेन्द्रभक्त की कथा लिखता हूँ, जिन्होंने कि सम्यग्दर्शन के उपगूहन अंग का पालन किया था ॥१॥

नेमिनाथ भगवान् के जन्म से पवित्र और दयालु पुरुषों से परिपूर्ण सौराष्ट्र देश के अन्तर्गत एक पाटलिपुत्र नाम का शहर था। जिस समय की कथा है, उस समय वहाँ के राजा यशोध्वज थे। उनकी रानी का नाम सुसीमा था। वह बड़ी सुन्दर थी। उसके एक पुत्र था। उसका नाम था सुवीर। बेचारी सुसीमा के पाप के उदय से वह महाव्यसनी और चोर हुआ। सच तो यह है जिन्हें आगे कुयोनियों के दुःख भोगना होता है, उनका न तो अच्छे कुल में जन्म लेना काम आता है और न ऐसे पुत्रों से बेचारे माता-पिता को सुख होता है ॥२-५॥

गोड़देश के अन्तर्गत ताम्रलिप्ता नाम की एक पुरी है। उसमें एक सेठ रहते थे। उनका नाम था जिनेन्द्रभक्त। जैसा उनका नाम था वैसे ही वे जिनभगवान् के भक्त थे भी। जिनेन्द्रभक्त सच्चे सम्यग्दृष्टि

श्रेष्ठी जिनेन्द्रभक्ताख्यो जिनभक्तिपरायणः। संजातस्तत्र सद्दृष्टिः श्रावकाचारसच्चणः ॥७॥
स्वर्मोक्षसस्यदं पूतं जिनोक्तं क्षेत्रसप्तकम्। तर्पयामास स श्रेष्ठी स्ववित्तजलदोत्करैः ॥८॥
जिनेन्द्रभवनोद्धार-प्रतिमापुस्तकस्तथा। सङ्घश्चतुर्विधश्चेति संप्रोक्तं क्षेत्रसप्तकम् ॥९॥
श्रेष्ठिनो विद्यते तस्य सम्यग्दृष्टेः शिरोमणेः। सप्तभूम्याश्रितोत्कृष्ट-प्रासादस्योपरिस्थिताः ॥१०॥
श्रीमत्पार्श्वजिनेन्द्रस्य महायत्नेन रक्षिता। छत्रत्रयेण संयुक्ता प्रतिमा रत्ननिर्मिता ॥११॥
तस्याश्छत्रत्रयस्योच्चै-रुपरिप्रस्फुरद्द्युतिः। मणिर्वैडूर्यनामास्ति बहुमूल्यसमन्वितः ॥१२॥
तां वार्त्तां च समाकर्ण्य सुवीरस्तस्कराग्रणीः। स्वांस्तस्करान्प्रति प्राह तमानेतुं लसत्प्रभम् ॥१३॥
अहो कोपि समर्थोऽस्ति तच्छ्रुत्वा सूर्यनामकः। चोरो जगाद भो स्वामिन्नहं शक्रस्य मस्तकात् ॥१४॥
आनयामि क्षणार्धेन शिरोरत्नं सुनिर्मलम्। युक्तं ये तु दुराचाराः स्युस्ते दुष्कर्मतत्पराः ॥१५॥
ततोऽसौ सूर्यको धूर्त्तः कपटेन तदाज्ञया। धृत्वा क्षुल्लकरूपं च क्लेशतः क्षीणतां गतः ॥१६॥
पर्यटन्नगरग्राम-पत्तनेषु निरन्तरम्। लोकान्प्रतारयन्नुच्चैः स्फीतिं सन्दर्शयन्निजाम् ॥१७॥
क्रमेण ताम्रलिप्ताख्यां तां पुरीं प्राप्तवांस्ततः। श्रुत्वा जिनेन्द्रभक्तोसौ श्रेष्ठी तं वन्दितुं गतः ॥१८॥

थे और अपने श्रावक धर्म का बराबर सदा पालन करते थे। उन्होंने बड़े-बड़े विशाल जिनमन्दिर बनवाएँ, बहुत से जीर्ण मन्दिरों का उद्धार किया, जिनप्रतिमायें बनवाकर उनकी प्रतिष्ठा करवाई और चारों संघों को खूब दान दिया, उनका खूब सत्कार किया ॥६-९॥

सम्यग्दृष्टि शिरोमणि जिनेन्द्रभक्त का महल सात मंजिला था। उसकी अन्तिम मंजिल पर एक बहुत ही सुन्दर जिन चैत्यालय था। चैत्यालय में श्री पार्श्वनाथ भगवान् की बहुत मनोहर और रत्नमयी प्रतिमा थी। उस पर तीन छत्र, जो कि रत्नों के बने हुए थे, बड़ी शोभा दे रहे थे। उन छत्रों पर एक वैडूर्यमणि नाम का अत्यन्त कान्तिमान् बहुमूल्य रत्न लगा हुआ था। इस रत्न का हाल सुवीर ने सुना। उसने अपने साथियों को बुलाकर कहा—सुनते हो, जिनेन्द्रभक्त सेठ के चैत्यालय में प्रतिमा पर लगे हुए छत्रों में एक रत्न लगा हुआ है, वह अमोल है। क्या तुम लोगों में से कोई उसे ला सकता है? सुनकर उनमें से एक सूर्य नाम का चोर बोला, यह तो एक अत्यन्त साधारण बात है। यदि वह रत्न इन्द्र के सिर पर भी होता, तो मैं उसे क्षणभर में ला सकता था। यह सच भी है कि जो जितने ही दुराचारी होते हैं वे उतना ही पाप कर्म भी कर सकते हैं ॥१०-१५॥

सूर्य के लिए रत्न लाने की आज्ञा हुई वहाँ से आकर उसने मायावी क्षुल्लक का वेष धारण किया। क्षुल्लक बनकर वह व्रत उपवासादि करने लगा। उससे उसका शरीर बहुत दुबला-पतला हो गया। इसके बाद वह अनेक शहरों और ग्रामों में घूमता हुआ और लोगों को अपने कपटी वेष से ठगता हुआ कुछ दिनों में ताम्रलिप्ता पुरी में आ पहुँचा। जिनेन्द्रभक्त सच्चे धर्मात्मा थे, इसलिए उन्हें धर्मात्माओं को देखकर बड़ा प्रेम होता था। उन्होंने जब इस धूर्त क्षुल्लक का आगमन सुना तो उन्हें

दृष्ट्वा तं क्षुल्लकं चापि मायया तपसा कृशम्। स्तुत्वा प्रणम्य सद्भक्त्या नयति स्म निजालयम् ॥१९॥
अहो धूर्त्तस्य धूर्त्तत्वं लक्ष्यते केन भूतले। यस्य प्रपञ्चतो गाढं विद्वान्सश्चापि वञ्चिताः ॥२०॥
ततो विलोक्य चोरोऽसौ तं मणिं विस्फुरत्प्रभम्। सन्तुष्टो स्वर्णकारो वा कनत्काञ्चनवीक्षणात् ॥२१॥
तदासौ श्रेष्ठिना तेन स्थापितः कपटव्रती। अनिच्छन्मायायाप्युच्चै-रक्षार्थं तत्र भक्तितः ॥२२॥
एकदासौ वणिग्वर्यः पृष्ट्वा तं क्षुल्लकं सुधीः। गन्तुं समुद्रयात्रायां पुरबाह्ये स्थितस्तदा ॥२३॥
स तस्करः समालोक्य कुटुम्बं कार्यव्यग्रकम्। अर्धरात्रौ समादाय तं मणिं निर्गतो गृहात् ॥२४॥
कोट्टपालैस्तदामार्गे दृष्टोसौ मणितेजसा। गृहीतुं च समारब्धो न समर्थः पलायितुम् ॥२५॥
रक्ष रक्षेति संजल्पन् श्रेष्ठिनः शरणं गतः। तदा जिनेन्द्रभक्तोऽसौ श्रुत्वा कोलाहलध्वनिम् ॥२६॥
ज्ञात्वा तं तस्करं धीमान्सम्यग्दृष्टिर्विशाम्पतिः। दर्शनोद्वाहनाशार्थं कोट्टपालान् जगाद च ॥२७॥
रे रे मूर्खा भवद्भिस्तु कृतं वाढं विरूपकम्। महातपस्विनश्चास्य तस्करत्वं यदीरितम् ॥२८॥
मद्वाक्येन समानीतो मणिश्चैतेन धीमता। महाचारित्ररत्नेन नित्यं सम्भावितात्मना ॥२९॥

बड़ी प्रसन्नता हुई वे उसी समय घर का सब कामकाज छोड़कर क्षुल्लक महाराज की वन्दना करने के लिए गए। उसे तपश्चर्या से क्षीण शरीर देखकर उनकी उस पर और अधिक श्रद्धा हुई उन्होंने भक्ति के साथ क्षुल्लक को प्रणाम किया और बाद वे उसे अपने महल लिवा लाये। सब बात यह है कि– ॥१६-१९॥

जिनकी धूर्तता से अच्छे-अच्छे विद्वान् भी जब ठगे जाते हैं, तब बेचारे साधारण पुरुषों की क्या मजाल जो वे उनकी धूर्तता का पता पा सकें ॥२०॥

क्षुल्लक जी ने चैत्यालय में पहुँच कर जब उस मणि को देखा तो उनका हृदय आनन्द के मारे बाँसों उछलने लगा। वे बहुत सन्तुष्ट हुए। जैसे सुनार अपने पास कोई रकम बनवाने के लिए लाये हुए पुरुष के पास का सोना देखकर प्रसन्न होता है क्योंकि उसकी नियत सदा चोरी की ओर ही लगी रहती है ॥२१॥

जिनेन्द्रभक्त को उसके मायाचार का कुछ पता नहीं लगा। इसलिए उन्होंने उसे बड़ा धर्मात्मा समझ कर और मायाचारी से क्षुल्लक के मना करने पर भी जबरन अपने जिनालय की रक्षा के लिए उसे नियुक्त कर दिया और आप उससे पूछकर समुद्रयात्रा करने के लिए चल पड़े ॥२२-२३॥

जिनेन्द्रभक्त के घर बाहर होते ही क्षुल्लक जी की बन पड़ी। आधी रात के समय आप उस तेजस्वी रत्न को कपड़ों में छुपाकर घर से बाहर हो गए। पर पापियों का पाप कभी नहीं छुपता। यही कारण था कि रत्न लेकर भागते हुए उसे सिपाहियों ने देख लिया। वे उसे पकड़ने को दौड़े। क्षुल्लक जी दुबले पतले तो पहले ही से हो रहे थे, इसलिए वे अपने को भागने में असक्त समझ लाचार होकर जिनेन्द्रभक्त की ही शरण में गए और प्रभो, बचाइये! बचाइये!! यह कहते हुए उनके पाँवों में गिर पड़े। जिनेन्द्रभक्त ने, 'चोर भागा जाता है! इसे पकड़ना' ऐसा हल्ला सुन करके जान लिया कि यह चोर है और क्षुल्लक वेष में लोगों को ठगता फिरता है। यह जानकर भी सम्यग्दर्शन की निन्दा के भय से जिनेन्द्रभक्त ने क्षुल्लक के पकड़ने को आए हुए सिपाहियों से कहा–आप लोग बड़े कम समझ के हैं!

इत्याकर्ण्य तमानम्य श्रेष्ठिनं गुणशालिनम्। कोट्टपालजना: शीघ्रं स्वस्थानं ते गतास्तत: ॥३०॥
श्रेष्ठी तस्मात्समादाय तं मणिं तेजसा युतम्। एकान्ते तं प्रति प्राह दुराचारसमन्वितम् ॥३१॥
रे रे नष्ट महाकष्ट धिक्ते पापिष्ठ चेष्टितम्। अन्यायेन रतो मूढो दुर्गतिं यास्यसि ध्रुवम् ॥३२॥
ये कृत्वा पातकं पापा: पोषयन्ति स्वकं भुवि। त्यक्त्वा न्यायक्रमं तेषां महादु:खं भवार्णवे ॥३३॥
कुमार्गकलितो लोक: क्षयं याति न संशय:। तीव्रतृष्णातुर: प्राणी त्वत्दृश: पापपण्डित: ॥३४॥
इत्यादिदुर्वचोवज्र-पातेनैव निहत्य च। चक्रे निष्कासनं तस्य स्वस्थानात्स गुणाकर: ॥३५॥
एवमन्यो महाभव्यो दुर्जनासक्तलम्पटै:। दर्शनस्यागते दोषे कुर्यादाच्छादनं श्रिये ॥३६॥
विमलतरजिनेन्द्रप्रोक्तमार्गेत्र दोषं वदति विगतबुद्धिर्यस्तु सोस्ति प्रमत्त:।
अमृतरससमानं शर्करादुग्धपानं कटु भवति न किं वा दुष्टपित्तज्वराणाम् ॥३७॥

इति कथाकोशे उपगूहनाङ्गे जिनेन्द्रभक्तस्य कथा समाप्ता।

११. श्रीवारिषेणमुने: कथा

श्रीमज्जिनं जगत्पूज्यं नत्वा भक्त्या प्रवच्म्यहम्। सुस्थितिकरणाङ्गे च वारिषेणस्य सत्कथाम् ॥१॥

आपने बहुत बुरा किया जो एक तपस्वी को चोर बतला दिया। रत्न तो ये मेरे कहने से लाये हैं। आप नहीं जानते कि ये बड़े सच्चरित्र साधु हैं? अस्तु। आगे से ध्यान रखिये। जिनेन्द्रभक्त के वचनों को सुनते ही सब सिपाही लोग ठण्डे पड़ गए और उन्हें नमस्कार कर चलते बने ॥२४-३०॥

जब सब सिपाही चले गए तब जिनेन्द्रभक्त ने क्षुल्लक जी से रत्न लेकर एकान्त में उनसे कहा– बड़े दु:ख की बात है कि तुम ऐसे पवित्र वेष को धारण कर उसे ऐसे नीच कर्मों से लजा रहे हो? तुम्हें यही उचित है क्या? याद रक्खो, ऐसे अनर्थों से तुम्हें कुगतियों में अनन्त काल दु:ख भोगना पड़ेंगे। शास्त्रकारों ने पापी पुरुषों के लिए लिखा है कि– ॥३१-३२॥

अर्थात्–जो पापी लोग न्यायमार्ग को छोड़कर और पाप के द्वारा अपना निर्वाह करते हैं, वे संसार समुद्र में अनन्त काल दु:ख भोगते हैं। ध्यान रक्खो कि अनीति से चलने वाले और अत्यन्त तृष्णावान् तुम सरीखे पापी लोग बहुत ही जल्दी नाश को प्राप्त होते हैं। तुम्हें उचित है, तुम बड़ी कठिनता से प्राप्त हुए इस मनुष्य जन्म को इस तरह बर्बाद न कर कुछ आत्म हित करो। इस प्रकार शिक्षा देकर जिनेन्द्रभक्त ने अपने स्थान से उसे अलग कर दिया ॥३३-३५॥

इसी प्रकार और भी भव्य पुरुषों को, दुर्जनों के मलिन कर्मों से निन्दा को प्राप्त होने वाले सम्यग्दर्शन की रक्षा करनी उचित है। जिनभगवान् का शासन पवित्र है, निर्दोष है, उसे जो सदोष बनाने की कोशिश करते हैं, वे मूर्ख हैं, उन्मत्त हैं। ठीक भी है उन्हें वह निर्दोष धर्म अच्छा जान भी नहीं पड़ता। जैसे पित्तज्वर वाले को अमृत के समान मीठा दूध भी कड़वा ही लगता है ॥३६-३७॥

११. वारिषेण मुनि की कथा

मैं संसारपूज्य जिनभगवान् को नमस्कार कर श्रीवारिषेण मुनि की कथा लिखता हूँ, जिन्होंने

अथेह मगधदेशे निवेशे सारसम्पदाम्। पुरे राजगृहे नाम्ना सद्दृष्टिः श्रेणिकः प्रभुः ॥२॥
तद्राज्ञी चेलना नाम्ना सम्यक्त्वव्रतशालिनी। वारिषेणस्तयोः पुत्रः संजातेः श्रावकोत्तमः ॥३॥
एकदासौ चतुर्दश्यां रात्रौ तत्त्वविदाम्वरः। श्मशाने सोपवासश्च कायोत्सर्गेण संस्थितः ॥४॥
तस्मिन्नेव दिने क्रीडां कर्तुं मगधसुन्दरी। विलासिनी वनं प्राप्ता श्रीकीर्त्तेः श्रेष्ठिनो गले ॥५॥
दृष्ट्वा हारं द्युतिस्फारं निस्सारं जन्म मे भुवि। विना हारेण चैतेन सञ्चिन्त्येति गृहं गता ॥६॥
सुदुःखिता स्थिता यावत्तावद्रात्रौ समागतः। विद्युच्चोरस्तदासक्तः संविलोक्य जगाद च ॥७॥
हे प्रिये त्वं स्थिता कष्टं कस्मात्तद् ब्रूहि कारणम्। तयोक्तं श्रेष्ठिनो हारं श्रीकीर्त्तेर्विलसत्प्रभम् ॥८॥
समानीय ददास्येव यदि त्वं प्राणवल्लभ। अस्ति मे जीवितं भर्त्ता भवस्यत्र च नान्यथा ॥९॥
तच्छ्रुत्वा तां समुद्धीर्य तस्करः साहसोद्धतः। गत्वा रात्रौ गृहीत्वा च तं हारं निजबुद्धितः ॥१०॥
मार्गे तत्तेजसा ज्ञात्वा समागच्छंश्च तस्करः। कोट्टपालैस्तथा धर्तुं प्रारब्धो गृहरक्षकैः ॥११॥

सम्यग्दर्शन के स्थितिकरण नामक अंग का पालन किया है। अपनी सम्पदा से स्वर्ग को नीचा दिखाने वाले मगधदेश के अन्तर्गत राजगृह नाम का एक सुन्दर शहर था। उसके राजा थे श्रेणिक। वे सम्यग्दृष्टि थे, उदार थे और राजनीति के अच्छे विद्वान् थे। उनकी महारानी का नाम चेलना था। वह भी सम्यक्त्वरूपी अमोल रत्न से भूषित थी, बड़ी धर्मात्मा, सती और विदुषी थी। उसके एक पुत्र था। उसका नाम था वारिषेण। वारिषेण बहुत गुणी था, धर्मात्मा श्रावक था एक बार सत्य को जानने वाला यह वारिषेण चतुर्दशी की रात्रि में उपवास सहित कायोत्सर्ग से श्मशान में स्थित था। एक दिन मगधसुन्दरी नाम की एक वेश्या राजगृह के उपवन में क्रीड़ा करने को आई हुई थी। उसने वहाँ श्रीकीर्ति नामक सेठ के गले में एक बहुत ही सुन्दर रत्नों का हार पड़ा हुआ देखा। उसे देखते ही मगधसुन्दरी उसके लिए लालायित हो उठी। उसे हार के बिना अपना जीवन निरर्थक जान पड़ने लगा। सारा संसार उसे हारमय दिखने लगा। वह उदास मुँह घर पर लौट आई। रात के समय उसका प्रेमी विद्युत्चोर जब घर पर आया तब उसने मगधसुन्दरी को उदास मुँह देखकर बड़े प्रेम से पूछा–प्रिये! आज मैं तुम्हें उदास देखता हूँ, क्या इसका कारण तुम बतलाओगी? तुम्हारी यह उदासी मुझे अत्यन्त दुःखी कर रही है ॥२-८॥

मगधसुन्दरी विद्युत् पर कटाक्षबाण चलाते हुए कहा–प्राणवल्लभ! तुम मुझे इतना प्रेम करते हो, पर मुझे तो जान पड़ता है कि यह सब तुम्हारा दिखाऊ प्रेम है और सचमुच तुम्हारा यदि मुझ पर प्रेम है तो कृपाकर श्रीकीर्ति सेठ के गले का हार, जिसे आज मैंने बगीचे में देखा है और जो बहुत ही सुन्दर है, लाकर मुझे दीजिये; जिससे मेरी इच्छा पूरी हो। तब ही मैं समझूँगी कि आप मुझ से सच्चा प्रेम करते हैं और तब ही मेरे प्राणवल्लभ होने के अधिकारी हो सकेंगे ॥९॥

मगधसुन्दरी के जाल में फँसकर उसे इस कठिन कार्य के लिए भी तैयार होना पड़ा। वह उसे सन्तोष देकर उसी समय वहाँ से चल दिया और श्रीकीर्ति सेठ के महल पर पहुँचा। वहाँ से वह श्रीकीर्ति के शयनागार में गया और अपनी कार्यकुशलता से उसके गले में से हार निकाल लिया और बड़ी फुर्ती

तदा पलायितुं तेभ्यो न समर्थः स पापधीः। वारिषेणकुमाराग्रे तं धृत्वाऽदृश्यतां गतः ॥१२॥
दृष्ट्वा ते तं तथाभूतं कोट्टपालादयो जगुः। नृपस्याग्रे कुमारोऽयं तस्करश्चेति भो प्रभो ॥१३॥
तच्छ्रुत्वा श्रेणिको भूपो महाकोपेन कम्पितः। पश्य भो पापिनश्चास्य दुश्चरित्रं दुरात्मनः ॥१४॥
क्व श्मशाने महाध्यानं वञ्चनं क्व च कष्टदम्। लोकानां किं न कुर्वन्ति वञ्चने ये तु चञ्चवः ॥१५॥
यौवराज्ये मया प्राज्ये स्थापनीयो महोत्सवैः। स चेदीदृग्विधः पुत्रः किं नु कष्टमतः परम् ॥१६॥
इत्युक्त्वासौ कुमारस्य मस्तकच्छेदनाय वै। आदेशं दत्तवांस्तूर्णं तेषां दुष्कर्मकारिणाम् ॥१७॥
नृपादेशात्समादाय श्मशाने मिलितास्ततः। चण्डालश्चण्डकर्माणश्चौराणां प्राणहारिणः ॥१८॥
तदैकेन गले तस्य वारिषेणस्य पापिना। गृहीतुं मस्तके क्षिप्तस्तीक्ष्णः खड्गः लसद्युतिः ॥१९॥

के साथ वहाँ से चल दिया। हार के दिव्य तेज को वह नहीं छुपा सका। सो भागते हुए उसे सिपाहियों ने देख लिया। वे उसे पकड़ने को दौड़े। वह भागता हुआ श्मशान की ओर निकल आया। वारिषेण इस समय श्मशान में कायोत्सर्ग ध्यान कर रहे थे। सो विद्युत्चोर मौका देखकर पीछे आने वाले सिपाहियों के पंजे से छूटने के लिए उस हार को वारिषेण के आगे पटक कर वहाँ से भाग खड़ा हुआ। इतने में सिपाही भी वहीं आ पहुँचे, जहाँ वारिषेण को हार के पास खड़ा देखकर भौचक्के से रह गए। वे उसे उस अवस्था में देखकर हँसे और बोले–वाह, चाल तो खूब खेली गई? मानों हम कुछ जानते ही नहीं। तुझे धर्मात्मा जानकर हम छोड़ जायेंगे। पर याद रखिये हम अपने मालिक की सच्ची नौकरी करते हैं। हम तुम्हें कभी नहीं छोड़ेंगे यह कहकर वे वारिषेण को बाँधकर श्रेणिक के पास ले गए और राजा से बोले–महाराज, ये हार चुराकर लिए जा रहा था, सो हमने इन्हें पकड़ लिया ॥१०–१३॥

सुनते ही श्रेणिक का चेहरा क्रोध के मारे लाल सुर्ख हो गया, उनके ओठ काँपने लगे, आँखों से क्रोध की ज्वालाएँ निकलने लगीं। उन्होंने गरज कर कहा–देखो, इस पापी का नीच कर्म जो श्मशान में जाकर ध्यान करता है और लोगों को, यह बतलाकर कि मैं बड़ा धर्मात्मा हूँ, ठगता है, धोखा देता है। पापी! कुल कलंक! देखा मैंने तेरा धर्म का ढोंग! सच है-दुराचारी, लोगों को धोखा देने के लिए क्या-क्या अनर्थ नहीं करते? जिसे मैं राज्यसिंहासन पर बिठाकर संसार का अधीश्वर बनाना चाहता था, वह इतना नीच होगा? इससे बढ़कर और क्या कष्ट हो सकता है? अच्छा जो इतना दुराचारी है और प्रजा को धोखा देकर ठगता है उसका जीवित रहना सिवा हानि के लाभदायक नहीं हो सकता इसलिए जाओ इसे ले जाकर मार डालो ॥१४–१७॥

अपने खास पुत्र के लिए महाराज की ऐसी कठोर आज्ञा सुनकर सब चित्र लिखे से होकर महाराज की ओर देखने लगे। सबकी आँखों में पानी भर आया। पर किस की मजाल जो उनकी आज्ञा का प्रतिवाद कर सके। जल्लाद लोग उसी समय वारिषेण को बध्यभूमि में ले गए। उनमें से एक ने तलवार खींचकर बड़े जोर से वारिषेण की गर्दन पर मारी, पर यह क्या आश्चर्य? जो उसकी गर्दन पर

तदा तत्पुण्यमाहात्म्यात्स खड्गः संपतन्नपि। पश्यत्सु सर्वलोकेषु पुष्पमाला बभूव च ॥२०॥
अहो पुण्येन तीव्राग्निर्जलत्वं याति भूतले। समुद्रः स्थलतामेति दुर्विषं च सुधायते ॥२१॥
शत्रुर्मित्रत्वमाप्नोति विपदा सम्पदायते। तस्मात्सुखैषिणो भव्याः पुण्यं कुर्वन्तु निर्मलम् ॥२२॥
पुण्यं श्रीमज्जिनेन्द्राणां पादपद्मद्वयार्चनम्। पात्रदानं तथा शील-रक्षणं सोपवासकम् ॥२३॥
तदाश्चर्यं समालोक्य सन्तुष्टास्ते सुरासुराः। अहो पुण्यमहोपुण्यं कुर्वन्तश्चेति संस्तवम् ॥२४॥
भ्रमद्भृङ्गसमाकीर्णां सुगन्धीकृतदिङ्मुखाम्। तस्योपरि महाभक्त्या पुष्टवृष्टिं प्रचक्रिरे ॥२५॥
पौरा ये तु महाशूराः परमानन्दनिर्भराः। साधु भो वारिषेणात्र चरित्रं ते मनोहरम् ॥२६॥
त्वं हि श्रीमज्जिनेन्द्राणां पादपङ्कजषट्पदः। श्रावकाचारशुद्धात्मा जिनधर्मविचक्षणः ॥२७॥
इत्यादिभिः शुभैर्वाक्यैर्महाधर्मानुरागतः। चक्रुस्ते संस्तुतिं तस्य सुपुण्यात्किं न जायते ॥२८॥
श्रेणिकोपि महाराजः श्रुत्वा तद्वृत्तमद्भुतम्। पश्चात्तापेन सन्तप्तो हा मया किं कृतं वृथा ॥२९॥
ये कुर्वन्ति जडात्मानः कार्यं लोकेऽविचार्य च। ते सीदन्ति महान्तोपि मादृशा दुःखसागरे ॥३०॥

बिल्कुल घाव नहीं हुआ किन्तु वारिषेण को उल्टा यह जान पड़ा–मानो किसी ने उस पर फूलों की माला फेंकी है। जल्लाद लोग देखकर दाँतों में अँगुली दबा गए। वारिषेण के पुण्य ने उसकी रक्षा की। सच है– ॥१८–२०॥

पुण्य के उदय से अग्नि जल बन जाती है, समुद्र स्थल हो जाता है, विष अमृत हो जाता है, शत्रु मित्र बन जाता है और विपत्ति सम्पत्ति के रूप में परिणत हो जाती है। इसलिए जो लोग सुख चाहते हैं, उन्हें पवित्र कार्यों द्वारा सदा पुण्य उत्पन्न करना चाहिए ॥२१–२२॥

जिनभगवान् की पूजा करना, दान देना, व्रत-उपवास करना, सदा विचार पवित्र और शुद्ध रखना, परोपकार, हिंसा, झूठ, चोरी आदि पापकर्मों का न करना ये पुण्य उत्पन्न करने के कारण हैं ॥२३॥

वारिषेण की यह हालत देखकर सब उसकी जय जयकार करने लगे। देवों ने प्रसन्न होकर उस पर सुगंधित फूलों की वर्षा की। नगरवासियों को इस समाचार से बड़ा आनन्द हुआ। सबने एक स्वर से कहा कि, वारिषेण तुम धन्य हो, तुम वास्तव में साधु पुरुष हो, तुम्हारा चारित्र बहुत निर्मल है, तुम जिनभगवान् के सच्चे सेवक हो, तुम पवित्र पुरुष हो, तुम जैनधर्म के सच्चे पालन करने वाले हो। पुण्य-पुरुष, तुम्हारी जितनी प्रशंसा की जाये उतनी थोड़ी है। सच है, पुण्य से क्या नहीं होता? श्रेणिक ने जब इस अलौकिक घटना का हाल सुना तो उन्हें भी अपने अविचार पर बड़ा पश्चाताप हुआ। वे दुःखी होकर बोले– ॥२४–२९॥

जो मूर्ख लोग आवेश में आकर बिना विचारे किसी काम को कर बैठते हैं, वे फिर बड़े भी क्यों न हों, उन्हें मेरी तरह दुःख ही उठाने पड़ते हैं। इसलिए चाहे कैसा ही काम क्यों न हो, उसे बड़े विचार के साथ करना चाहिए। श्रेणिक बहुत कुछ पश्चाताप करके पुत्र के पास श्मशान में आए। वारिषेण

इत्यालोच्य समागत्य श्मशाने भूरिभीतिदे। अहो पुत्र मयाज्ञान-शून्येनात्र विनिर्मितम् ॥३१॥
यत्र त्वया महाधीरः क्षम्यतामिति वाग्भरैः। तं पुत्रं विनियोपेतं सत्क्षमां नयति स्म सः ॥३२॥
चन्दनं घृष्यमाणं च दह्यमानो यथागुरुः। न याति विक्रियां साधुः पीडितोपि तथापरैः ॥३३॥
ततो लब्धभयो विद्युच्चोरश्चागत्य भूपतिम्। नत्वा जगाद वृत्तान्तं स्वकीयं सुभटः स्फुटम् ॥३४॥

की पुण्यमूर्ति को देखते ही उनका हृदय पुत्र प्रेम से भर आया। उनकी आँखों से आँसू बह निकले। उन्होंने पुत्र को छाती से लगाकर रोते-रोते कहा–प्यारे पुत्र, मेरी मूर्खता को क्षमा करो! मैं क्रोध के मारे अन्धा बन गया था, इसलिए आगे पीछे का कुछ सोच विचार न कर मैंने तुम्हारे साथ बड़ा अन्याय किया। पुत्र, पश्चाताप से मेरा हृदय जल रहा है, उसे अपने क्षमारूपी जल से बुझाओ! दुःख के समुद्र में मैं गोते खा रहा हूँ, मुझे सहारा देकर निकालो! ॥३०-३१॥

अपने पूज्य पिता की यह हालत देखकर वारिषेण को बड़ा कष्ट हुआ। वह बोला–पिताजी, आप यह क्या कहते हैं? आप अपराधी कैसे? आपने तो अपने कर्तव्य का पालन किया है और कर्तव्य पालन करना कोई अपराध नहीं है। मान लीजिए कि यदि आप पुत्र-प्रेम के वश होकर मेरे लिए ऐसे दण्ड की आज्ञा न देते, तो उससे प्रजा क्या समझती? चाहे मैं अपराधी नहीं भी था तब भी क्या प्रजा इस बात को देखती? वह तो यही समझती कि आपने मुझे अपना पुत्र जानकर छोड़ दिया। पिताजी, आपने बहुत ही बुद्धिमानी और दूरदर्शिता का काम किया है। आप की नीतिपरायणता देखकर मेरा हृदय आनन्द के समुद्र में लहरें ले रहा है। आपने पवित्र वंश की आज लाज रख ली। यदि आप ऐसे समय में अपने कर्तव्य से जरा भी खिसक जाते, तो सदा के लिए अपने कुल में कलंक का टीका लग जाता। इसके लिए तो आपको प्रसन्न होना चाहिए न कि दुःखी। हाँ इतना जरूर हुआ कि मेरे इस समय पापकर्म का उदय था; इसलिए मैं निरपराधी होकर भी अपराधी बना। पर इसका मुझे कुछ खेद नहीं क्योंकि– ॥३२॥

अवश्य ह्यनुभोक्तव्यं कृतं कर्म शुभाऽशुभम्–वादीभसिंह

अर्थात्-जो जैसा कर्म करता है उसका शुभ या अशुभ फल उसे अवश्य ही भोगना पड़ता है। फिर मेरे लिए कर्मों का फल भोगना कोई नई बात नहीं है।

पुत्र के ऐसे उन्नत और उदार विचार सुनकर श्रेणिक बहुत आनन्दित हुए। वे सब दुःख भूल गए। उन्होंने कहा, पुत्र सत्पुरुषों ने बहुत ठीक लिखा है–

चन्दन को कितना भी घिसिये, अगुरु को खूब जलाइये, उससे उनका कुछ न बिगड़कर उल्टा उनमें से अधिक-अधिक सुगन्ध निकलेगी। उसी तरह सत्पुरुषों को दुष्ट लोग कितना ही सतावें, कितना ही कष्ट दें, पर वे उससे कुछ भी विकार को प्राप्त नहीं होते, सदा शान्त रहते हैं और अपनी बुराई करने वाले का भी उपकार ही करते हैं ॥३३॥

वारिषेण के पुण्य का प्रभाव देखकर विद्युत्चोर को बड़ा भय हुआ। उसने सोचा कि राजा को मेरा हाल मालूम हो जाने से वे मुझे बहुत कड़ी सजा देंगे। इससे यही अच्छा है कि मैं स्वयं ही जाकर

इदं मे चेष्टितं देव वेश्यासक्तस्य पापिनः। वारिषेणस्तु पुत्रस्ते शुद्धात्मा श्रावकोत्तमः ॥३५॥
तदा श्रीश्रेणिकः प्राह स्वपुत्रं प्रति सादरम्। आगच्छ पुत्र गच्छावः स्वगेहं सम्पदाभृतम् ॥३६॥
तेनोक्तं भो मया तात दृष्टं संसारचेष्टितम्। अतो मे श्रीजिनेन्द्राणां शरणं चरणद्वयम् ॥३७॥
भोक्तव्यं पाणिपात्रेण कर्त्तव्यं स्वात्मनो हितम्। गन्तव्यं च वने नित्यं स्थातव्यं मुनिमार्गतः ॥३८॥
इत्युक्त्वा वारिषेणोसौ संविरक्तो भवादितः। सूरदेवमुनेः पार्श्वे जैनीं दीक्षां गृहीतवान् ॥३९॥
ततोसौ श्रीजिनेन्द्रोक्त-महाचारित्रतत्परः। कुर्वन्विहारमत्युच्चैर्भव्यान्सम्बोधयन्मुनिः ॥४०॥
ग्रामं पलासकूटाख्यं संप्राप्तश्चैकदा सुधीः। श्रेणिकस्य महीभर्तु-र्मन्त्री तत्रास्ति भूतिवाक् ॥४१॥

उनसे सब सच्चा-सच्चा हाल कह दूँ। ऐसा करने से वे मुझे क्षमा भी कर सकेंगे। यह विचार कर विद्युत्चोर महाराज के सामने जा खड़ा हुआ और हाथ जोड़कर उनसे बोला-प्रभो, यह सब पापकर्म मेरा है। पवित्रात्मा वारिषेण सर्वथा निर्दोष है। पापिनी वेश्या के जाल में फँसकर ही मैंने यह नीच काम किया था; पर आज से मैं कभी ऐसा काम नहीं करूँगा। मुझे दया करके क्षमा कीजिए ॥३४-३५॥

विद्युत्चोर को अपने कृतकर्म के पश्चाताप से दुःखी देख श्रेणिक उसे अभय देकर अपने प्रिय पुत्र वारिषेण से बोले-पुत्र, अब राजधानी में चलो, तुम्हारी माता तुम्हारे वियोग से बहुत दुःखी हो रही होंगी ॥३६॥

उत्तर में वारिषेण ने कहा-पिताजी, मुझे क्षमा कीजिए। मैंने संसार की लीला देख ली। मेरी आत्मा उसमें और प्रवेश करने के लिए मुझे रोकती है। इसलिए मैं अब घर पर न जाकर जिनभगवान् के चरणों का आश्रय ग्रहण करूँगा। सुनिये, अब मेरा कर्तव्य होगा कि मैं हाथ ही में भोजन करूँगा, सदा वन में रहूँगा और मुनि मार्ग पर चलकर अपना आत्महित करूँगा। मुझे अब संसार में घूमने की इच्छा नहीं, विषयवासना से प्रेम नहीं। मुझे संसार दुःखमय जान पड़ता है, इसलिए मैं जान-बूझकर अपने को दुःखों में फँसाना नहीं चाहता क्योंकि-

निजे पाणौ दीपे लसति भुवि कूपे निपततां फलं किं तेन स्यादिति-जीवंधर चम्पू

अर्थात्-हाथ में प्रदीप लेकर भी यदि कोई कुएँ में गिरना चाहे, तो बतलाइए उस दीपक से क्या लाभ? जब मुझे दो अक्षरों का ज्ञान है और संसार की लीला से मैं अपरिचित नहीं हूँ; इतना होकर भी फिर मैं यदि उसमें फँसू, तो मुझसा मूर्ख और कौन होगा? इसलिए आप मुझे क्षमा कीजिए कि मैं आपकी पालनीय आज्ञा का भी बाध्य होकर विरोध कर रहा हूँ। यह कहकर वारिषेण फिर एक मिनट के लिए भी न ठहर कर वन की ओर चल दिया और श्रीसूरदेव मुनि के पास जाकर उसने जिनदीक्षा ग्रहण कर ली ॥३७-३९॥

तपस्वी बनकर वारिषेण मुनि बड़ी दृढ़ता के साथ चारित्र का पालन करने लगे। वे अनेक देश-विदेशों में घूम-घूम कर धर्मोपदेश करते हुए एक बार पलाशकूट नामक शहर में पहुँचे। वहाँ श्रेणिक

तत्पुत्रः पुष्पडालाख्यो दानपूजापरायणः। दृष्ट्वा चर्यार्थमायातं तं मुनिं गुणशालिनम् ॥४२॥
ससंभ्रमं समुत्थाय तिष्ठ तिष्ठेति सम्वदन्। संस्थाप्य नवभिः पुण्यैः सप्तभिः स्वगुणैर्युतः ॥४३॥
प्रासुकं सरसाहारं भक्तितः परया मुदा। स तस्मै दत्तवान्दाता सुपात्राय सुखप्रदम् ॥४४॥
पुष्पडालस्ततो राज-पुत्रत्वाद्बालमित्रतः। भक्तितश्च तथा सार्धं मुनिना तेन गच्छता ॥४५॥
सोमिल्यां स्वस्त्रियं पृष्ट्वा सोनुव्रजनहेतवे। स्तोकमार्गं समादाय कुण्डिकां निर्गतो गृहात् ॥४६॥
पश्चादागन्तुकामोसौ मंत्रिपुत्रो जगौ पथि। पश्य देव पुरावाभ्यां क्रीडितं सरसीह च ॥४७॥
सच्छायः सफलस्तुङ्गो जनानां सौख्यदायकः। सुराजेव विभात्युच्चै-रयं चाम्रतरुः पुरः ॥४८॥
यत्रावाभ्यां समागत्य पूर्वं क्रीडा विनिर्मिता। शोभतेयं महीदेशो विस्तीर्णो वा सतां मनः ॥४९॥
इत्यादिकं मुहुश्चिह्नं दर्शयन्प्रणमन्पुनः। तच्चित्तं जानताप्युच्चैः स्वामिना तेन सादरम् ॥५०॥
धृत्वा करे सुवैराग्यं नीत्वा सत्तत्त्ववाग्भरैः। कृत्वा धर्मश्रुतिं जैनीं दीक्षां संग्राहितः सखा ॥५१॥
पठन्नपि महाशास्त्रं पालयन्नपि संयमम्। सोमिल्यां भामिनीं काणीं स्मरत्येव नवव्रती ॥५२॥

का मन्त्री अग्निभूति रहता था। उसका एक पुष्पडाल नाम का पुत्र था। वह बहुत धर्मात्मा था और दान, व्रत, पूजा आदि सत्कर्मों के करने में सदा तत्पर रहा करता था। वह वारिषेण मुनि को भिक्षार्थ आए हुए देखकर बड़ी प्रसन्नता के साथ उनके सामने गया और भक्तिपूर्वक उनका आह्वान कर उसने नवधा भक्ति सहित उन्हें प्रासुक आहार दिया। आहार करके जब वारिषेण मुनि वन में जाने लगे तब पुष्पडाल भी कुछ तो भक्ति से, कुछ बालपने की मित्रता के नाते से और कुछ राजपुत्र होने के लिहाज से उन्हें थोड़ी दूर पहुँचाने के लिए अपनी स्त्री से पूछकर उनके पीछे-पीछे चल दिया। वह दूर तक जाने की इच्छा न रहते हुए भी मुनि के साथ-साथ चलता गया क्योंकि उसे विश्वास था कि थोड़ी दूर जाने के बाद ये मुझे लौट जाने के लिए कहेंगे ही। पर मुनि ने उसे कुछ नहीं कहा, तब उसकी चिन्ता बढ़ गई उसने मुनि को यह समझाने के लिए, कि मैं शहर से बहुत दूर निकल आया हूँ, मुझे घर पर जल्दी लौट जाना है, कहा-कुमार, देखते हैं यह वहीं सरोवर है, जहाँ हम आप खेला करते थे; यह वही छायादार और उन्नत आम का वृक्ष है, जिसके नीचे आप हम बाललीला का सुख लेते थे और देखो, यह वही विशाल भूभाग है, जहाँ मैंने और आपने बालपन में अनेक खेल खेले थे इत्यादि अपने पूर्व परिचित चिह्नों को बार-बार दिखलाकर पुष्पडाल ने मुनि का ध्यान अपने दूर निकल आने की ओर आकर्षित करना चाहा, पर मुनि उसके हृदय की बात जानकर भी उसे लौट जाने को न कह सके। कारण, वैसा करना उनका मार्ग नहीं था। इसके विपरीत उन्होंने पुष्पडाल के कल्याण की इच्छा से उसे खूब वैराग्य का उपदेश देकर मुनिदीक्षा दे दी। पुष्पडाल मुनि हो गया, संयम का पालन करने लगा और खूब शास्त्रों का अभ्यास करने लगा; पर तब भी उसकी विषयवासना न मिटी, उसे अपनी स्त्री की बार-बार याद आने लगी। आचार्य कहते हैं कि- ॥४०-५२॥

धिक्कामं धिङ्महामोहं धिङ्भोगान्यैस्तु वञ्चितः। सम्मार्गेपि स्थितो जन्तुर्न जानाति निजं हितम् ॥५३॥
ततो द्वादशवर्षाणि तत्तपःसिद्धिहेतवे। गुरुस्तं कारयामास तीर्थयात्रां निजैः सह ॥५४॥
एकदा तौ मुनी श्रीमद्वर्धमानजिनेशिनः। समवादिसृतिं प्राप्तौ चक्रतुर्जिनवन्दनाम् ॥५५॥
तत्रस्थैर्जिनसद्भक्त्या सद्गन्धर्वसुधाशिभिः। गीयमानमिदं पद्यं शृणोति स्म लघुव्रती ॥५६॥
''मइल कुचेली दुम्मणी णाहे पवसियएण। कह जीवेसइ धणियधर वब्भंते विरहेण॥''
तच्छ्रुत्वा पुष्पडालोसौ मुनिः कामाग्निपीडितः। सोमिल्यासक्तचेतस्कश्चक्रे चित्तं व्रतोन्मुखम् ॥५७॥
वरिषेणेन सुज्ञात्वा मानसं तस्य तादृशम्। चचाल स्वपुरीं नीत्वा तं स्थितीकरणाय च ॥५८॥
तमागच्छन्तमालोक्य मुनीन्द्रं शिष्यसंयुतम्। चारित्राच्चलितः किं वा पुत्रोऽयं चेलना सती ॥५९॥
सञ्चिन्त्य मानसे चेति परीक्षार्थं तदा ददौ। सरागवीतरागे द्वे आसने तस्य भक्तितः ॥६०॥
वीतरागासने धीमान्संस्थितो वारिषेणवाक्। मुनीन्द्रो न तपत्येव सतां भ्रान्तिः क्रियावधौ ॥६१॥
तदामृतरसस्वादु-हारिभिर्वचनोत्करैः। मातरं तोषयामास यतीन्द्रो विनयान्विताम् ॥६२॥

उस काम को, उस मोह को, उन भोगों को धिक्कार है, जिनके वश होकर उत्तम मार्ग से चलने वाले भी अपना हित नहीं कर पाते। यही हाल पुष्पडाल का हुआ, जो मुनि होकर भी वह अपनी स्त्री को हृदय से न भुला सका ॥५३॥

इसी तरह पुष्पडाल को बारह वर्ष बीत गए। उसकी तपश्चर्या सार्थक होने के लिए गुरु ने उसे तीर्थयात्रा करने की आज्ञा दी और उसके साथ वे भी चले। यात्रा करते-करते एक दिन वे भगवान् वर्धमान के समवसरण में पहुँच गए। भगवान् को उन्होंने भक्तिपूर्वक प्रणाम किया। उस समय वहाँ गंधर्वदेव भगवान् की भक्ति कर रहे थे। उन्होंने काम की निन्दा में एक पद्य पढ़ा। वह सब यह था– ॥५४-५६॥

''स्त्री चाहे मैली हो, कुचैली हो, हृदय की मलिन हो, पर वह भी अपने पति के प्रवासी होने पर, विदेश में रहने पर, पतिवियोग से वन-वन, पर्वतों-पर्वतों में मारी-मारी फिरती है अर्थात् काम के वश होकर नहीं करने के काम भी कर डालती है।''

उक्त पद्य को सुनते ही पुष्पडाल मुनि भी काम से पीड़ित होकर अपनी स्त्री की प्राप्ति के लिए अधीर हो उठे। वे व्रत से उदासीन होकर अपने शहर की ओर रवाना हुए। उनके हृदय की बात जानकर वारिषेण मुनि भी उन्हें धर्म में दृढ़ करने के लिए उनके साथ-साथ चल दिये ॥५७-५८॥

गुरु और शिष्य अपने शहर में पहुँचे। उन्हें देखकर सती चेलना ने सोचा-कि जान पड़ता है, पुत्र चारित्र से चलायमान हुआ है। नहीं तो ऐसे समय इसके यहाँ आने की क्या आवश्यकता थी? वह विचार कर उसने उसकी परीक्षा के लिए उसके बैठने को दो आसन दिये। उनमें एक काष्ठ का था और दूसरा रत्नजड़ित। वारिषेण मुनि रत्नजड़ित आसन पर न बैठकर काष्ठ के आसन पर बैठे। सच है- जो सच्चे मुनि होते हैं वे कभी ऐसा तप नहीं करते जिससे उनके आचरण में किसी को सन्देह हो। इसके बाद वारिषेण मुनि ने अपनी माता के सन्देह को दूर करके उनसे कहा-माता, कुछ समय के लिए मेरी

ततः प्राह मुनिर्मातर्मदीयान्तःपुरं परम्। आनीयतामिति श्रुत्वा सा सती चेलना तदा ॥६३॥
द्वात्रिंशद्गणनोपेतास्तद्भार्या रूपमण्डिताः। सालङ्काराः समानीय दर्शयामास सद्गुणाः ॥६४॥
कृत्वा नतिं ततस्तास्तु संस्थिताः सुयथाक्रमम्। गुरुः शिष्यं प्रति प्राह सावधानः प्रमादिनम् ॥६५॥
यौवराज्यमिदं प्राज्यमेता मे सारसम्पदः। सर्वं गृहाण चेत्तुभ्यं रोचते भो मुने ध्रुवम् ॥६६॥
तच्छ्रुत्वा पुष्पडालोऽसौ मुनिर्लज्जाभरान्वितः। समुत्थाय गुरोपाद-द्वयं नत्वा जगाद च ॥६७॥
धन्यस्त्वं भो मुने स्वामिन्हतलोभमहाग्रहः। श्रीमज्जिनेन्द्रचन्द्रोक्त-सारतत्त्वविदाम्वरः ॥६८॥
ये कुर्वन्ति महास्तोत्र मुक्त्वैताः सारसम्पदः। त्वादृशाः सुतपस्तेषां किं लोके यच्च दुर्लभम् ॥६९॥
सत्यं जन्मान्धकोहं च गृहीत्वा यत्तपोमणिम्। अक्ष्णा काणीं तु सोमिल्यां नात्यजन्निजचेतसः ॥७०॥
त्वया द्वादशवर्षाणि तपश्चक्रे सुनिर्मलम्। मया मूर्खेण तत्रैव तत्कृतं शल्यकश्मलम् ॥७१॥
अतोपराधिनो मे च प्रायश्चित्तं प्रदीयताम्। भवद्भिः करुणासारैर्यतो पापक्षयो भवेत् ॥७२॥
तदासौ वारिषेणश्च मुनीन्द्रो निश्चलव्रतः। संजगाद् वचो धीमान्परमानन्ददायकम् ॥७३॥
अहो धीर महादुःखं मा कुरु त्वं स्वचेतसि। दुष्टकर्मवशाज्जीवो विद्वान् क्वापि च मुह्यति ॥७४॥

सब स्त्रियों को यहाँ बुलवा लीजिये। महारानी ने वैसा ही किया। वारिषेण की सब स्त्रियाँ खूब वस्त्राभूषणों से सजकर उनके सामने आ उपस्थित हुई वे बड़ी सुन्दरी थीं। देवकन्यायें भी उनके रूप को देखकर लज्जित होती थीं। मुनि को नमस्कार कर वे सब उनकी आज्ञा की प्रतीक्षा के लिए खड़ी रहीं ॥५९-६५॥

वारिषेण ने तब अपने शिष्य पुष्पडाल से कहा-क्यों देखते हो न? ये मेरी स्त्रियाँ हैं, यह राज्य है, यह सम्पत्ति है, यदि तुम्हें ये अच्छी जान पड़ती हैं, तुम्हारा संसार से प्रेम है, तो इन्हें तुम स्वीकार करो। वारिषेण मुनिराज का यह आश्चर्य में डालने वाला कर्तव्य देखकर पुष्पडाल बड़ा लज्जित हुआ। उसे अपनी मूर्खता पर बहुत खेद हुआ। वह मुनि के चरणों को नमस्कार कर बोला-प्रभो, आप धन्य हैं, आपने लोभरूपी पिशाच को नष्ट कर दिया है, आप ही ने जिनधर्म का सच्चा सार समझा है। संसार में वे ही बड़े पुरुष हैं, महात्मा हैं, जो आपके समान संसार की सब सम्पत्ति को लात मारकर वैरागी बनते हैं। उन महात्माओं के लिए फिर कौन वस्तु संसार में दुर्लभ रह जाती हैं? दयासागर, मैं तो सचमुच जन्मान्ध हूँ, इसीलिए तो मौलिक तपरत्न को प्राप्त कर भी अपनी स्त्री को चित्त से अलग नहीं कर सका। प्रभो, जहाँ आपने बारह वर्ष पर्यन्त खूब तपश्चर्या की वहाँ मुझ पापी ने इतने दिन व्यर्थ गँवा दिये-सिवा आत्मा को कष्ट पहुँचाने के कुछ नहीं किया। स्वामी, मैं बहुत अपराधी हूँ इसलिए दया करके मुझे अपने पाप का प्रायश्चित्त देकर पवित्र कीजिए। पुष्पडाल के भावों का परिवर्तन और कृतकर्म के पश्चाताप से उनके परिणामों की कोमलता तथा पवित्रता देखकर वारिषेण मुनिराज बोले-धीर! इतने दुःखी न बनिये। पापकर्मों के उदय से कभी-कभी अच्छे-अच्छे विद्वान् भी हतबुद्धि हो जाते हैं। इसमें कोई आश्चर्य की बात नहीं। यही अच्छा हुआ जो तुम पीछे अपने मार्ग पर

इत्युक्त्वा तं समुद्धीर्य प्रायश्चित्तं यथागमम्। दत्वा तत्तपसश्चेति सुस्थितीकरणं व्यधात् ॥७५॥
पुष्पडालस्ततो धीमान्गुरुवाक्यप्रसादतः। महावैराग्यभावेन तपश्चक्रे सुदुःसहम् ॥७६॥
इत्थं चान्येन कर्त्तव्यं सुस्थितीकरणं श्रिये। केनापि कारणेनात्र पततो धर्मपर्वतात् ॥७७॥
येऽत्र भव्याः प्रकुर्वन्ति सुस्थितीकरणं परम्। स्वर्मोक्षफलदस्तैश्च सिञ्चितो धर्मपादपः ॥७८॥
शरीरसम्पदादीना-मस्थिराणां क्वचिद्भवेत्। रक्षणं शर्मदं धर्मे का कथा शर्मकोटिदे ॥७९॥
एवं ज्ञात्वा समुत्सृज्य प्रमादं दुःखकारणम्। कार्यं तद्धि महाभव्यैः संसाराम्भोधितारणम् ॥८०॥
श्रीमज्जैनपदाब्जयुग्ममधुलिट् श्रीवारिषेणो मुनिर्दत्वा तस्य मुनेस्तपोद्रिपततो हस्तावलम्बं दृढम्।
ज्ञानध्यानरतः प्रसिद्धमहिमा प्राप्तो वनं निर्मलं दद्यान्मे भवतारकः स भगवान्नित्यं सुखं मङ्गलम् ॥८१॥

इति कथाकोशे स्थितिकरणाङ्गे श्रीवारिषेणमुनेः कथा समाप्ता।

१२. श्रीविष्णुकुमारमुनेः कथा

श्रीजिनं भारतीं साधु-पादद्वैतं सुखप्रदम्। नत्वा विष्णुकुमारस्य वात्सल्याङ्गे कथां ब्रुवे ॥१॥

आ गए। इसके बाद उन्होंने पुष्पडाल मुनि को उचित प्रायश्चित्त देकर धर्म में स्थिर किया, अज्ञान के कारण सम्यग्दर्शन से विचलित देखकर उनका धर्म में स्थितिकरण किया ॥६६-७५॥

पुष्पडाल मुनि गुरु महाराज की कृपा से अपने हृदय को शुद्ध बनाकर बड़े वैराग्य भावों से कठिन-कठिन तपश्चर्या करने लगे, भूख-प्यास की कुछ परवाह न कर परीषह सहने लगे।

इसी प्रकार अज्ञान व मोह से कोई धर्मात्मा पुरुष धर्मरूपी पर्वत से गिरता हो, तो उसे सहारा देकर न गिरने देना चाहिए। जो धर्मज्ञ पुरुष इस पवित्र स्थितिकरण अंग का पालन करते हैं, समझो कि वे स्वर्ग और मोक्ष सुख के देने वाले धर्मरूपी वृक्ष को सींचते हैं। शरीर, सम्पत्ति, कुटुम्ब आदि अस्थिर हैं, विनाशक हैं इनकी रक्षा भी जब कभी-कभी सुख देने वाली हो जाती है तब अनन्तसुख देने वाली धर्म की रक्षा का कितना महत्त्व होगा, यह सहज में जाना जा सकता है। इसलिए धर्मात्माओं को दुःख देने वाले प्रमाद को छोड़कर संसार-समुद्र से पार करने वाले पवित्र धर्म का सेवन करना चाहिए ॥७६-८०॥

श्रीवारिषेण मुनि, जो कि सदा जिनभगवान् की भक्ति में लीन रहते थे, तप पर्वत से गिरते हुए पुष्पडाल मुनि को हाथ का सहारा देकर तपश्चर्या और ध्यानाध्ययन करने के लिए वन में चले गए, वे प्रसिद्ध महात्मा आत्मसुख प्रदान कर मुझे भी संसार-समुद्र से पार करें ॥८१॥

१२. विष्णुकुमार मुनि की कथा

अनन्त सुख प्रदान करने वाले जिनभगवान् जिनवाणी और जैन साधुओं को नमस्कार कर मैं वात्सल्य अंग के पालन करने वाले श्री विष्णुकुमार मुनिराज की कथा लिखता हूँ ॥१॥

अथेह भारते क्षेत्रेऽवन्ति देशे महापुरि। उज्जयिन्यां प्रभुर्जातः श्रीवर्मा श्रीमतिप्रियः ॥२॥
न्यायशास्त्रविचारज्ञो धार्मिको वैरिमर्दकः। प्रजानां पालने दक्षो दुष्टानां निग्रहे क्षमः ॥३॥
बलिर्बृहस्पतिस्तस्य प्रह्लादो नमुचिस्तथा। चत्वारो मन्त्रिणश्चेति संजाता धर्मशत्रवः ॥४॥
शोभते स्म स भूपालोऽधार्मिकैस्तैर्निसेवितः। पन्नगैर्वेष्टितो दुष्टैर्यथा चन्दनपादपः ॥५॥
एकदाकम्पनाचार्यो लसत्संज्ञानलोचनः। प्रसिञ्चन्भव्यसस्यौघान्स्ववाक्यामृतवर्षणैः ॥६॥
मुनीनां कामशत्रूणां संयुक्तः सप्तभिः शतैः। समागत्य तदुद्याने संस्थितः सुरपूजितः ॥७॥
वारितो गुरुणा तेन स्वसंघो विनयान्वितः। आगते भूमिपादौ च भवद्भिर्भो यतीश्वराः ॥८॥
सार्धं केनापि कर्त्तव्यं जल्पनं नैव साम्प्रतम्। अन्यथा सर्वसंघस्य विनाशोद्य भविष्यति ॥९॥
तदाकर्ण्य गुरोर्वाक्यं लोकद्वयहितप्रदम्। मौनेन संस्थितास्तेऽपि मुनयो ध्यानमानसाः ॥१०॥
शिष्यास्तेऽत्र प्रशस्यन्ते ये कुर्वन्ति गुरोर्वचः। प्रीतितो विनयोपेता भवन्त्यन्ये कुपुत्रवत् ॥११॥

अवन्तिदेश के अन्तर्गत उज्जयिनी बहुत सुन्दर और प्रसिद्ध नगरी है। जिस समय का यह उपाख्यान है, उस समय उसके राजा श्रीवर्मा थे। वे बड़े धर्मात्मा थे, सब शास्त्रों के अच्छे विद्वान् थे, विचारशील थे, और अच्छे शूरवीर थे। वे दुराचारियों को उचित दण्ड देते और प्रजा का नीति के साथ पालन करते। सुतरां प्रजा उनकी बड़ी भक्त थी ॥२-३॥

उनकी महारानी का नाम था श्रीमती। वह भी विदुषी थी। उस समय की स्त्रियों में वह प्रधान सुन्दरी समझी जाती थी। उसका हृदय बड़ा दयालु था। वह जिसे दुःखी देखती, फिर उसका दुःख दूर करने के लिए जी जान से प्रयत्न करती। महारानी को सारी प्रजा देवी समझती थी।

श्रीवर्मा के राजमंत्री चार थे। उनके नाम थे बलि, बृहस्पति, प्रह्लाद और नमुचि। ये चारों ही धर्म के कट्टर शत्रु थे। इन पापी मंत्रियों से युक्त राजा ऐसे जान पड़ते थे मानों जहरीले सर्प से युक्त जैसे चन्दन का वृक्ष हो ॥४-५॥

एक दिन ज्ञानी अकम्पनाचार्य देश-विदेशों में पर्यटन कर भव्य पुरुषों को धर्मरूपी अमृत से सुखी करते हुए उज्जयिनी में आए। उनके साथ सात सौ मुनियों का बड़ा भारी संघ था। वे शहर के बाहर एक पवित्र स्थान में ठहरे। अकम्पनाचार्य को निमित्तज्ञान से उज्जयिनी की स्थिति अनिष्ट कर जान पड़ी। इसलिए उन्होंने सारे संघ से कह दिया कि देखो, राजा वगैरह कोई आवे पर आप लोग उनसे वादविवाद न कीजियेगा। नहीं तो सारा संघ बड़े कष्ट में पड़ जायेगा, उस पर घोर उपसर्ग आएगा। गुरु की हितकर आज्ञा को स्वीकार कर सब मुनि मौन के साथ ध्यान करने लगे। सच है– ॥६-१०॥

वे शिष्य प्रशंसा के पात्र हैं, जो विनय और प्रेम के साथ अपने गुरु की आज्ञा का पालन करते हैं। इसके विपरीत चलने वाले कुपुत्र के समान निन्दा के पात्र हैं ॥११॥

तदा पौराः समादाय पूजाद्रव्यं मनोहरम्। निर्गता वन्दनाभक्त्या तेषामानन्दनिर्भराः ॥१२॥
स्वप्रसादस्थितो राजा श्रीवर्मा वीक्ष्य ताञ्जगौ। अकालेऽपि क्व यात्येष पौरः पुष्पादिसंयुतः ॥१३॥
तच्छ्रुत्वा मंत्रिणः प्राहुर्दुष्टास्ते भूपतिं प्रति। देवोद्याने समायाता नित्यं नग्ना दिगम्बराः ॥१४॥
तत्र प्रयाति लोकोयं तदाकर्ण्य नृपोवदत्। तान्द्रष्टुं वयमप्युच्चै-र्गच्छामः कौतुकीमयान् ॥१५॥
इत्युक्त्वा मंत्रिभिः सार्धं गत्वा तत्र महीपतिः। तान्विलोक्य महाध्यान-सम्पन्नान्हृष्टमानसः ॥१६॥
प्रत्येकं भक्तितस्तेषां स चक्रे वन्दनां मुदा। केनापि मुनिना नैव दत्तमाशीर्वचस्तदा ॥१७॥
महाध्यानेन तिष्ठन्ति निस्पृहा मुनयस्तराम्। स कुर्वन्संस्तुतिं चेति व्याघुट्य चलितो नृपः ॥१८॥
तदा ते पापिनः प्राहुर्मंत्रिणो द्वेषिणः सताम्। एते देव किमप्यत्र वक्तुं जानन्ति नैव च ॥१९॥
ततो मौनं समादाय संस्थिताः कपटेन हि। हास्यं कृत्वेति तेनैव निर्गता भूभुजा समम् ॥२०॥
इन्द्रप्रतीन्द्रनागेन्दै-र्वन्दितानां मुनीशिनाम्। निन्दां कुर्वन्ति ये सत्यं दुर्जना भाषणोपमाः ॥२१॥
ततो मार्गे समालोक्य चर्यां कृत्वा मुनीश्वरम्। आगच्छन्तं जगुस्तेऽपि श्रुतसागरसंज्ञकम् ॥२२॥

अकम्पनाचार्य के आने के समाचार शहर के लोगों को मालूम हुए। वे पूजा द्रव्य लेकर बड़ी भक्ति के साथ आचार्य की वन्दना को जाने लगे। आज एकाएक अपने शहर में आनन्द की धूमधाम देखकर महल पर बैठे हुए श्रीवर्मा ने मंत्रियों से पूछा—ये सब लोग आज ऐसे सजधज कर कहाँ जा रहे हैं? उत्तर में मंत्रियों ने कहा—महाराज, सुना जाता है कि अपने शहर में नंगे जैन साधु आए हुए हैं। ये सब उनकी पूजा के लिए जा रहे हैं। राजा ने प्रसन्नता के साथ कहा—तब तो हमें भी चलकर उनके दर्शन करना चाहिए। वे महापुरुष होंगे। यह विचार कर राजा भी मंत्रियों के साथ आचार्य के दर्शन करने को गए। उन्हें आत्मध्यान में लीन देखकर वे बहुत प्रसन्न हुए। उन्होंने क्रम से एक-एक मुनि को भक्तिपूर्वक नमस्कार किया। सब मुनि अपने आचार्य की आज्ञानुसार मौन रहे। किसी ने भी उन्हें धर्मवृद्धि नहीं दी। राजा उनकी वन्दना कर वापस महल लौट चले। लौटते समय मंत्रियों ने उनसे कहा—महाराज, देखा साधुओं को? बेचारे बोलना तक भी नहीं जानते, सब नितान्त मूर्ख हैं। यही तो कारण है कि सब मौनी बैठे हुए हैं। उन्हें देखकर सर्व साधारण तो यह समझेंगे कि ये सब आत्मध्यान कर रहे हैं, बड़े तपस्वी हैं पर यह इनका ढोंग है। अपनी सब पोल न खुल जाये, इसलिए उन्होंने लोगों को धोखा देने को यह कपटजाल रचा है। महाराज, ये दाम्भिक हैं। इस प्रकार त्रैलोक्यपूज्य और परम शान्त मुनिराजों की निन्दा करते हुए ये मलिनहृदयी मंत्री राजा के साथ लौट के आ रहे थे कि रास्ते में इन्हें एक मुनि मिल गए, जो कि शहर से आहार करके लौट रहे थे, इन पापियों ने उनकी हँसी की, महाराज, देखिए वह एक बैल और पेट भरकर चला आ रहा है। मुनि ने मंत्रियों के निन्दा वचनों को सुन लिया। सुनकर भी उनका कर्तव्य था कि वे शान्त रह जाते, पर वे निन्दा न सह सकें। कारण वे आहार के लिए शहर में चले गए थे, इसलिए उन्हें अपने आचार्य की आज्ञा मालूम न थी। मुनि ने यह

बलीवर्दः समायाति पूर्णकुक्षिस्तु नूतनः। तदाकर्ण्य मुनीन्द्रेण ज्ञात्वा वादोद्धतांश्च तान् ॥२३॥
स्याद्वादवादिना तेन द्विजास्ते ज्ञानगर्विताः। निर्जिता भूपसान्निध्ये वाक्कल्लोलभरैर्निजैः ॥२४॥
एकेन तेन सर्वेपि निर्जिताश्चेति नाद्भुतम्। एको हि तिमिरश्रेणि-प्रक्षये भास्करः प्रभुः ॥२५॥
समागत्य गुरोः पार्श्वे स्ववृत्तान्तं जगौ हि सः। तच्छ्रुत्वा च गुरुः प्राह हा कृतं भो विरूपकम् ॥२६॥
हतस्त्वया स्वहस्तेन संघोयं शर्मदः सताम्। वादस्थाने त्वमेकाकी गत्वा रात्रौ यदि ध्रुवम् ॥२७॥
कायोत्सर्गेण सद्ध्यानं करोषि परमार्थतः। संघस्य जीवितं ते च विशुद्धिः संभवेत्तदा ॥२८॥
स धीरो मेरुवद्गाढं मुनिः श्रीश्रुतसागरः। श्रुत्वेति संघरक्षार्थं गत्वा तत्र तथा स्थितः ॥२९॥
तदा ते विप्रकाः सर्वे मानभङ्गेन लज्जिताः। मुनीनां मारणार्थं च रात्रौ गेहाद्विनिर्गताः ॥३०॥
मार्गे तं मुनिमालोक्य कायोत्सर्गेण संस्थितम्। येनास्माकं कृतो मान-भङ्गः सोयं तु हन्यते ॥३१॥
इत्यालोच्य मुनेस्तस्य वधार्थं दुष्टमानसाः। खङ्गानुत्थापयामासुश्चत्वारश्चैकवारतः ॥३२॥

समझ कर, कि इन्हें अपनी विद्या का बड़ा अभिमान है, उसे मैं चूर्ण करूँगा, कहा–तुम व्यर्थ क्यों किसी की बुराई करते हो? यदि तुममें कुछ विद्या हो, आत्मबल हो, तो मुझ से शास्त्रार्थ करो। फिर तुम्हें जान पड़ेगा कि बैल कौन है? भला वे भी तो राजमंत्री थे, उस पर भी दुष्टता उनके हृदय में कूट-कूटकर भरी हुई थी; फिर वे कैसे एक अकिंचन साधु के वचनों को सह सकते थे? उन्होंने कह तो दिया कि हम ने शास्त्रार्थ करना स्वीकार कर लिया। अभिमान में आकर उन्होंने कह तो दिया कि हम शास्त्रार्थ करेंगे पर जब शास्त्रार्थ हुआ तब उन्हें जान पड़ा कि शास्त्रार्थ करना बच्चों का सा खेल नहीं है। एक ही मुनि ने अपने स्याद्वाद के बल से बात की बात में चारों मंत्रियों को पराजित कर दिया। सच है–एक ही सूर्य सारे संसार के अन्धकार को नष्ट करने के लिए समर्थ है ॥१२-२५॥

विजय लाभ कर श्रुतसागर मुनि अपने आचार्य के पास आए। उन्होंने रास्ते की सब घटना आचार्य से ज्यों की त्यों कह सुनाई सुनकर आचार्य खेद के साथ बोले–हाय! तुमने बहुत ही बुरा किया, जो उनसे शास्त्रार्थ किया। तुमने अपने हाथों से सारे संघ का घात किया, संघ की अब कुशल नहीं है। अस्तु, जो हुआ, अब यदि तुम सारे संघ की जीवन रक्षा चाहते हो, तो पीछे जाओ और जहाँ मंत्रियों के साथ शास्त्रार्थ हुआ है, वहीं जाकर कायोत्सर्ग ध्यान करो। आचार्य की आज्ञा को सुनकर श्रुतसागर मुनिराज जरा भी विचलित नहीं हुए। वे संघ की रक्षा के लिए उसी समय वहाँ से चल दिये और शास्त्रार्थ की जगह पर आकर मेरु की तरह निश्चल हो बड़े धैर्य के साथ कायोत्सर्ग ध्यान करने लगे ॥२६-२९॥

शास्त्रार्थ कर मुनि से पराजित होकर मंत्री बड़े लज्जित हुए। अपने मानभंग का बदला चुकाने का विचार कर मुनिवध के लिए रात्रि समय वे चारों शहर से बाहर हुए। रास्ते में श्रुतसागर मुनि ध्यान करते हुए मिले। पहले उन्होंने अपने मानभंग करने वाले ही को परलोक पहुँचा देना चाहा। उन्होंने मुनि की गर्दन काटने को अपनी तलवार को म्यान से खींचा और एक ही साथ उनका काम तमाम करने

तदा तत्पुण्यमाहात्म्यात्प्रकम्पितनिजासना। तथैव स्तंभयामास मंत्रिणः पुरदेवता ॥३३॥
प्रभातसमये श्रुत्वा लोकेभ्यो भूपतिस्तदा। मंत्रिणां दुश्चरित्रं तत्संदृष्ट्वा कीलितांश्च तान् ॥३४॥
बाधा निरपराधानां येऽत्र कुर्वन्ति पापिनः। प्रयान्ति नरकं घोरं दुस्सहं ते दुराशयाः ॥३५॥
सामान्यजन्तुहन्तॄणां मुखं दृष्टुं न युज्यते। किं पुनस्त्रिजगत्पूज्य-मुनिपीडाविधायिनाम् ॥३६॥
इत्युक्त्वा कुलमंत्रित्वाद्विप्रत्वाच्च न मारिताः। कोपेन कारयित्वाशु गर्दभारोहणं च तान् ॥३७॥
देशान्निर्घाटयामास श्रीवर्मा न्यायशास्त्रवित्। युक्तं पापप्रयुक्तानां जनानामीदृशी गतिः ॥३८॥
तं प्रभावं समालोक्य सर्वे भव्यजनास्तदा। संचक्रुः परमानन्दैर्जयकोलाहलध्वनिम् ॥३९॥
अथास्ति हस्तिनागाख्ये पुरे राजा सुधार्मिकः। महापद्मो गतच्छद्मा राज्ञी लक्ष्मीमती सती ॥४०॥
बभूवतुस्तयोः पुत्रौ पद्मो विष्णुश्च शर्मदौ। एकदा स महापद्मो राजा राजीवलोचनः ॥४१॥

के विचार से उन पर वार करना चाहा कि, इतने में मुनि के पुण्य प्रभाव से पुरदेवी ने आकर उन्हें तलवार उठाये हुए ही कील दिये ॥३०-३४॥

प्रातःकाल होते ही बिजली की तरह सारे शहर में मंत्रियों की दुष्टता का हाल फैल गया। सब शहर उन्हें देखने को आया। राजा भी आए। सबने एक स्वर से उन्हें धिक्कारा। है भी तो ठीक, जो पापी लोग निरपराधों को कष्ट पहुँचाते हैं वे इस लोक में भी घोर दुःख उठाते हैं और परलोक में नरकों के असह्य दुःख सहते हैं। राजा ने उन्हें बहुत धिक्कार कर कहा–पापियों, जब तुमने मेरे सामने इन निर्दोष और संसार मात्र का उपकार करने वाले मुनियों की निन्दा की थी, तब मैं तुम्हारे विश्वास पर निर्भर रहकर यह समझा था कि संभव है मुनि लोग ऐसे ही हों, पर आज मुझे तुम्हारी नीचता का ज्ञान हुआ, तुम्हारे पापी हृदय का पता लगा। तुम इन्हीं निर्दोष साधुओं की हत्या करने को आए थे न? पापियों, तुम्हारा मुख देखना भी महापाप है। तुम्हें तुम्हारे इस घोर कर्म का उपयुक्त दण्ड तो यही देना चाहिए था कि जैसा तुम करना चाहते थे, वही तुम्हारे लिए किया जाता। पर पापियों, तुम ब्राह्मण कुल में उत्पन्न हुए हो और तुम्हारी कितनी ही पीढ़ियाँ मेरे यहाँ मंत्री पद पर प्रतिष्ठा पा चुकी हैं इसलिए उसके लिहाज से तुम्हें अभय देकर अपने नौकरों को आज्ञा करता हूँ कि वे तुम्हें गधों पर बैठाकर मेरे देश की सीमा से बाहर कर दें। राजा की आज्ञा का उसी समय पालन हुआ। चारों मन्त्री देश से निकलवा दिये गए। सच है–पापियों की ऐसी दशा होना उचित ही है ॥३५-३८॥

धर्म के ऐसे प्रभाव को देखकर लोगों के आनन्द का ठिकाना न रहा। वे अपने हृदय में बढ़ते हुए हर्ष के वेग को रोकने में समर्थ नहीं हुए। उन्होंने जयध्वनि के मारे आकाश पाताल को एक कर दिया। मुनिसंघ का उपद्रव टला। सबके चित्त स्थिर हुए। अकम्पनाचार्य भी उज्जयिनी से विहार कर गए ॥३९॥

हस्तिनापुर नाम का एक शहर है। उसके राजा हैं महापद्म, उनकी रानी का नाम लक्ष्मीमती था। उसके पद्म और विष्णु नाम के दो पुत्र हुए ॥४०-४१॥

त्रिधा वैराग्यमासाद्य जिनपादाब्जयो रतः। दत्वा राज्यं सुधीर्ज्येष्ठ-पुत्राय परमार्थतः ॥४२॥
श्रुतसागरचन्द्राख्यं मुनिं नत्वा जगद्धितम्। सार्धं विष्णुकुमारेण जैनीं दीक्षां गृहीतवान् ॥४३॥
श्रीमद्विष्णुकुमारोसौ मुनिः सद्ध्यानतत्परः। कुर्वंस्तपो जिनेन्द्रोक्तं संजातो विक्रयर्द्धिवाक् ॥४४॥
तदा पद्ममहीभर्त्तुः सद्राज्यं कुर्वतः सुखम्। विप्रास्ते तु समागत्य संजाता मंत्रिणः पुनः ॥४५॥
अन्यदा दुर्बलं वीक्ष्य पद्मराजानमब्रवीत्। बलिः किं देव दौर्बल्य-कारणं च प्रभुर्जगौ ॥४६॥
अस्ति कुंभपुरे राजा नाम्ना सिंहबलो महान्। दुष्टो दुर्गबलेनासौ मद्देशं हन्ति दारुणः ॥४७॥
ततो नृपाज्ञया सोपि बलिर्मंत्री स्वबुद्धितः। गत्वा दुर्गाश्रयं भङ्क्त्वा गृहीत्वा च महारिपुम् ॥४८॥
आगत्य नृपतिं प्राह सोयं सिंहबलः प्रभो। इत्याकर्ण्य जगौ राजा पद्माख्यो हृष्टमानसः ॥४९॥
प्रार्थय त्वं वरं धीर यत्तुभ्यं रोचते तराम्। तेनोक्तं प्रार्थयिष्यामि तदा मे दीयतां विभो ॥५०॥

एक दिन राजा संसार की दशा पर विचार कर रहे थे। उसकी अनित्यता और निस्सारता देखकर उन्हें बहुत वैराग्य हुआ। उन्हें संसार दुःखमय दिखने लगा। वे उसी समय अपने बड़े पुत्र पद्म को राज्य देकर अपने छोटे पुत्र विष्णुकुमार के साथ वन में चले गए और श्रुतसागर मुनि के पास पहुँचकर दोनों पिता-पुत्र ने दीक्षा ग्रहण कर ली। विष्णुकुमार बालपने से ही संसार से विरक्त थे इसलिए पिता के रोकने पर भी वे दीक्षित हो गए। विष्णुकुमार मुनि साधु बनकर खूब तपश्चर्या करने लगे। कुछ दिनों बाद तपश्चर्या के प्रभाव से उन्हें विक्रियाऋद्धि प्राप्त हो गई ॥४२-४४॥

पिता के दीक्षित हो जाने पर हस्तिनापुर का राज्य पद्मराज करने लगे। उन्हें सब कुछ होने पर भी एक बात का बड़ा दुःख था। वह यह कि, कुंभपुर का राजा सिंहबल उन्हें बड़ा कष्ट पहुँचाया करता था। उनके देश में अनेक उपद्रव किया करता था। उसके अधिकार में एक बड़ा भारी सुदृढ़ किला था। इसलिए वह पद्मराज की प्रजा पर एकाएक धावा मारकर अपने किले में जाकर छुप जाता है। तब पद्मराज उसका कुछ अनिष्ट नहीं कर पाते थे। इस कष्ट की उन्हें सदा चिन्ता रहा करती थी ॥४५-४७॥

इसी समय श्रीवर्मा के चारों मंत्री उज्जयिनी से निकलकर कुछ दिनों बाद हस्तिनापुर की ओर आ निकले। उन्हें किसी तरह राजा के इस दुःख सूत्र का पता लग गया। वे राजा से मिले और उन्हें चिन्ता से निर्मुक्त करने का वचन देकर कुछ सेना के साथ सिंहबल पर जा चढ़े और अपनी बुद्धिमानी से किले को तोड़कर सिंहबल को उन्होंने बाँध लिया और लाकर पद्मराज के सामने उपस्थित कर दिया। पद्मराज उनकी वीरता और बुद्धिमानी से बहुत प्रसन्न हुआ। उसने उन्हें अपना मंत्री बनाकर कहा-कि तुमने मेरा उपकार किया है। तुम्हारा मैं बहुत कृतज्ञ हूँ। यद्यपि उसका प्रतिफल नहीं दिया जा सकता, तब भी तुम जो कहो वह मैं तुम्हें देने को तैयार हूँ। उत्तर में बलि नाम के मंत्री ने कहा-प्रभो, आपकी हम पर कृपा है, तो हमें सब कुछ मिल चुका। इस पर भी आपका आग्रह है, तो उसे हम अस्वीकार भी नहीं कर सकते। अभी हमें कुछ आवश्यकता नहीं है। जब समय होगा तब आपसे प्रार्थना करेंगे ही ॥४८-५०॥

अथैकदा समागत्य मुनिवृन्दैः समन्वितः। सुधीरकम्पनाचार्यो भव्यौघान्प्रतिबोधयन् ॥५१॥
संस्थितः पुरबाह्येसौ पौरास्तत्र महोत्सवैः। तान्वन्दितुं गताः सर्वे पूजाद्रव्यैः प्रमोदतः ॥५२॥
तदाकर्ण्य द्विजास्तेऽपि चक्रुश्चिन्तां स्वचेतसि। एतेषां भाक्तिको राजा भीत्वा मंत्रं विधाय च ॥५३॥
बलिः प्राह ततो भूपं दीयतां मे प्रभो वरम्। राज्यं सप्तदिनान्येव भवद्भिः सत्यसंयुतैः ॥५४॥
ततोसौ पद्मभूपालो वंचितस्तैः कुमंत्रिभिः। दत्वा राज्यं निजं तस्मै स्वयंः वान्तःपुरे स्थितः ॥५५॥
तैस्तदा राज्यमादाय कपटेन शठद्विजैः। मुनीनां मारणार्थं च वृत्या संवेष्ट्य तान्पुनः ॥५६॥

इसी समय श्री अकम्पनाचार्य अनेक देशों में विहार करते हुए और धर्मोपदेश द्वारा संसार के जीवों का हित करते हुए हस्तिनापुर के बगीचे में आकर ठहरे। सब लोग उत्सव के साथ उनकी वन्दना करने को गए। अकम्पनाचार्य के आने का समाचार राजमंत्रियों को मालूम हुआ। मालूम होते ही उन्हें अपने अपमान की बात याद हो आई उनका हृदय प्रतिहिंसा से उद्विग्न हो उठा। उन्होंने परस्पर में विचार किया कि समय बहुत उपयुक्त है, इसलिए बदला लेना ही चाहिए। देखो न, इन्हीं दुष्टों के द्वारा अपने को कितना दुःख उठाना पड़ा था? सबके हम धिक्कार पात्र बने और अपमान के साथ देश से निकाले गए। पर हाँ अपने मार्ग में एक काँटा है। राजा इनका बड़ा भक्त है। वह अपने रहते हुए इनका अनिष्ट कैसे होने देगा? इसके लिए कुछ उपाय सोच निकालना आवश्यक है। नहीं तो ऐसा न हो कि ऐसा अच्छा समय हाथ से निकल जाये? इतने में बलि मंत्री बोल उठा कि, इसकी आप चिन्ता न करें ॥५१-५३॥

अब सिंहबल के पकड़ लाने का पुरस्कार राजा से पाना बाकी है, उसकी ऐवज में उससे सात दिन का राज्य ले लेना चाहिए। फिर जैसा हम करेंगे वही होगा। राजा को उसमें दखल देने का कुछ अधिकार न रहेगा। यह प्रयत्न सबको सर्वोत्तम जान पड़ा। बलि उसी समय राजा के पास पहुँचा और बड़ी विनय से बोला–महाराज, आप पर हमारा एक पुरस्कार बाकी है। आप कृपाकर अब उसे दीजिये। इस समय उससे हमारा बड़ा उपकार होगा। राजा उसका कूट कपट न समझ और यह विचार कर, कि इन लोगों ने मेरा बड़ा उपकार किया था, अब उसका बदला चुकाना मेरा कर्तव्य है, बोला–बहुत अच्छा, जो तुम्हें चाहिए वह माँग लो, मैं अपनी प्रतिज्ञा पूरी करके तुम्हारे ऋण से उऋण होने का यत्न करूँगा। बलि बोला–महाराजा, यदि आप वास्तव में ही हमारा हित चाहते हैं, तो कृपा करके सात दिन के लिए अपना राज्य हमें प्रदान कीजिए ॥५४॥

राजा सुनते ही अवाक् रह गया। उसे किसी बड़े भारी अनर्थ की आशंका हुई पर अब वश ही क्या था? उसे वचनबद्ध होकर राज्य दे देना पड़ा। राज्य के प्राप्त होते ही उनकी प्रसन्नता का कुछ ठिकाना न रहा। उन्होंने मुनियों के मारने के लिए यज्ञ का बहाना बनाकर षड्यंत्र रचा जिससे कि सर्वसाधारण न समझ सकें ॥५५॥

मुनियों को बीच में रखकर यज्ञ के लिए एक बड़ा भारी मंडप तैयार किया गया। उनके चारों

कारयित्वा तृणैः काष्ठैः पापिष्ठैः मण्डपं ततः। वेदवाक्यैः समारब्धो यज्ञकः पशुघातकः ॥५७॥
तदा छागोद्भवैर्धूमै-रुत्थितैः खर्परादभिः। पीडिताः मुनयस्तेऽपि सन्यासं द्विविधं दृढम् ॥५८॥
गृहीत्वा संस्थिताश्चित्ते स्मरन्तः परमात्मनः। शत्रुमित्रसमाः सर्वे निश्चला मेरुवत्तराम् ॥५९॥
मिथिलायामथ ज्ञानी श्रुतसागरचन्द्रवाक्। मुनीन्द्रो व्योम्नि नक्षत्रं श्रवणं श्रमणोत्तमः ॥६०॥
कम्पमानं समालोक्यं हाहाकारं विधाय च। उपसर्गो मुनीन्द्राणां वर्तते महतां महान् ॥६१॥
इति प्राह तदाकर्ण्य पृष्टोसौ क्षुल्लकेन च। पुष्पदन्तेन भो देव कुत्र केषां गुरुर्जगौ ॥६२॥
हस्तिनागपुरेऽकम्प-नाचार्यादिमुनीशिनाम्। उपसर्गं कथं देव संक्षयं याति धीधनः ॥६३॥

ओर काष्ठ ही काष्ठ रखवा दिया गया। हजारों पशु इकट्ठे किए गए। यज्ञ आरम्भ हुआ। वेदों के जानकार बड़े-बड़े विद्वान् यज्ञ कराने लगे। वेदध्वनि से यज्ञमण्डप गूंजने लगा। बेचारे निरपराध पशु बड़ी निर्दयता से मारे जाने लगे। उनकी आहुतियाँ दी जाने लगीं। देखते-देखते दुर्गन्धित धुएँ से आकाश परिपूर्ण हुआ। मानों इस महापाप को न देख सकने के कारण सूर्य अस्त हुआ। मनुष्यों के हाथ से राज्य राक्षसों के हाथों में गया ॥५६-५८॥

सारे मुनिसंघ पर भयंकर उपसर्ग हुआ परन्तु उन शान्ति की मूर्तियों ने इसे अपने किए कर्मों का फल समझकर बड़ी धीरता के साथ सहना आरम्भ किया। वे मेरु समान निश्चल रहकर एक चित्त से परमात्मा का ध्यान करने लगे। सच है-जिन्होंने अपने हृदय को खूब उन्नत और दृढ़ बना लिया है जिनके हृदय में निरन्तर यह भावना बनी रहती है- ॥५९॥

अरि मित्र, महल मसान, कंचन काँच, निन्दन थुतिकरन।
अर्घावतारन असिप्रहारन में सदा समता धरन॥

वे क्या कभी ऐसे उपसर्गों से विचलित होते हैं? पाण्डवों को शत्रुओं ने लोहे के गरम-गरम आभूषण पहना दिये। अग्नि की भयानक ज्वाला उनके शरीर को भस्म करने लगी। पर वे विचलित नहीं हुए। धैर्य के साथ उन्होंने सब उपसर्ग सहा। जैन साधुओं का यही मार्ग है कि वे आए हुए कष्टों को शान्ति से सहे और वे ही यथार्थ साधु हैं, जिनका हृदय दुर्बल है, जो रागद्वेषरूपी शत्रुओं को जीतने के लिए ऐसे कष्ट नहीं सह सकते, दुःखों के प्राप्त होने पर समभाव नहीं रख सकते, वे न तो अपने आत्महित के मार्ग में आगे बढ़ पाते हैं और न वे साधुपद स्वीकार करने के योग्य हो सकते हैं।

मिथिला में श्रुतसागर मुनि को निमित्तज्ञान से इस उपसर्ग का हाल मालूम हुआ। उनके मुँह से बड़े कष्ट के साथ वचन निकले-हाय! हाय!! इस समय मुनियों पर बड़ा उपसर्ग हो रहा है। वहीं एक पुष्पदन्त नामक क्षुल्लक भी उपस्थित थे। उन्होंने मुनिराज से पूछा-प्रभो, यह उपसर्ग कहाँ हो रहा है? उत्तर में श्रुतसागर मुनि बोले-हस्तिनापुर में सात सौ मुनियों का संघ ठहरा हुआ है। उसके संरक्षक अकम्पनाचार्य हैं। उस सारे संघ पर पापी बलि के द्वारा यह उपसर्ग किया जा रहा है ।

गुरुर्जगाद भो वत्स भूमिभूषणपर्वते। मुनिर्विष्णुकुमारोऽस्ति विक्रियर्द्धिप्रमण्डितः ॥६४॥
स तं निवारयत्येव मुनीनामुपसर्गकम्। तच्छ्रुत्वा क्षुल्लको गत्वा सर्वं तस्य मुनेर्जगौ ॥६५॥
ततो विष्णुकुमारेण विक्रियर्द्धिर्ममास्ति च। संचिन्त्येति परिक्षार्थं हस्तः स्वस्य प्रसारितः ॥६६॥
तदासौ भूधरं भित्वा समुद्रे पतितः करः। विक्रियर्द्धि ततो ज्ञात्वा मुनिः सद्धर्मवत्सलः ॥६७॥
गत्वा नागपुरं पद्मं भूपतिं प्रति चोक्तवान्। अहो भ्रातस्त्वया कष्टं किमारब्धं मुनीशिनाम् ॥६८॥
अस्मत्कुले पुरा केन निर्मितं नैव चेदृशम्। मुनीनामुपसर्गं रे कथं कारयसि त्वकम् ॥६९॥
शिष्टानां पालनं दुष्ट-निग्रहं यः करोत्यहो। कथ्यते स महीनाथो न पुनर्मुनिघातकः ॥७०॥
साधूनामत्र सन्तापो कष्टदो भवति ध्रुवम्। सुष्ठु तप्तं यथा तोयं दहत्यङ्गं न संशयः ॥७१॥
कुरु त्वं शान्तिमेतेषां यावत्ते नागतापदा। तदाकर्ण्य प्रभुः प्राह किं करोमि महामुने ॥७२॥
मया सप्त दिनान्येव स्वराज्यं बलिमंत्रिणे। दत्तं ततो भवान्नेव युक्तमुच्चैः करोतु च ॥७३॥

क्षुल्लक ने फिर पूछा–प्रभो, कोई ऐसा उपाय भी है, जिससे यह उपसर्ग दूर हो?

मुनि ने कहा–हाँ उसका एक उपाय है। भूमि भूषण पर्वत पर श्री विष्णुकुमार मुनि को विक्रियाऋद्धि प्राप्त हो गई है, वे अपनी ऋद्धि के बल से उपसर्ग को रोक सकते है ॥६०–६५॥

पुष्पदन्त फिर एक क्षणभर भी वहाँ न ठहरे और जहाँ विष्णुकुमार मुनि तपश्चर्या कर रहे थे, वहाँ पहुँचे। पहुँचकर उन्होंने सब हाल विष्णुकुमार मुनि से कह सुनाया। विष्णुकुमार को ऋद्धि प्राप्त होने की पहले खबर नहीं हुई थी। पर जब पुष्पदन्त के द्वारा उन्हें मालूम हुआ, तब उन्होंने परीक्षा के लिए एक हाथ पसारकर देखा। पसारते ही उनका हाथ बहुत दूर तक चला गया। उन्हें विश्वास हुआ। वे उसी समय हस्तिनापुर आए और अपने भाई से बोले–भाई, आप किस नींद में सोते हुए हो? जानते हो, शहर में कितना बड़ा भारी अनर्थ हो रहा है? अपने राज्य में तुमने ऐसा अनर्थ क्यों होने दिया? क्या पहले किसी ने भी अपने कुल में ऐसा घोर अनर्थ आज तक किया है? हाय! धर्म के अवतार, परम शान्त और किसी से कुछ लेते देते नहीं, उन मुनियों पर यह अत्याचार? और वह भी तुम सरीखे धर्मात्माओं के राज्य में? खेद! भाई, राजाओं का धर्म तो यह कहा गया है कि वे सज्जनों की, धर्मात्माओं की रक्षा करें और दुष्टों को दण्ड दें। पर आप तो बिल्कुल इससे उल्टा कर रहे हैं। समझते हो, साधुओं का सताना ठीक नहीं। ठण्डा जल भी गरम होकर शरीर को जला डालता है इसलिए जब तक आपत्ति तुम पर न आवे, उसके पहले ही उपसर्ग शान्ति करवा दीजिये ॥६६–७१॥

अपने भाई का उपदेश सुनकर पद्मराज बोले–मुनिराज, मैं क्या करूँ? मुझे क्या मालूम था कि ये पापी लोग मिलकर मुझे ऐसा धोखा देंगे? अब तो मैं बिल्कुल विवश हूँ। मैं कुछ नहीं कर सकता। सात दिन तक जैसा कुछ ये करेंगे वह सब मुझे सहना होगा क्योंकि मैं वचनबद्ध हो चुका हूँ। अब तो आप ही किसी उपाय द्वारा मुनियों का उपसर्ग दूर कीजिए। आप इसके लिए समर्थ भी हैं और सब

किं कथ्यते मया तत्र भवतां कार्यशालिनाम्। प्रोल्लसद्भास्करे भाति किं दीपेनाल्पतेजसा ॥७४॥
ततो विष्णुमुनिः सोपि विक्रयर्द्धिप्रभावतः। वामनब्राह्मणस्योच्चै-रूपमादाय लीलया ॥७५॥
कुर्वन्वेदध्वनिं गत्वा यज्ञस्थाने स्थितस्तदा। बलिस्तं वीक्ष्य सन्तुष्टः प्रोवाच वचनं शुभम् ॥७६॥
यत्तुभ्यं रोचते विप्र तन्मया दीयते वद। स प्राह वेदवेदाङ्ग-पारगो वामनो द्विजः ॥७७॥
देहि भो भूपते मह्यं भूमेः पादत्रयं मुदा। किं त्वया याचितं विप्र बहु प्रार्थय वाञ्छितम् ॥७८॥
लोकैः प्रेर्यमाणोपि याचते स्म तदेव सः। दानेनैतेन भो देव पूर्यतामिति साम्प्रतम् ॥७९॥
तदा बलिः प्रभुर्विप्र त्वं गृहाण निजेच्छया। भूमेः पादत्रयं चेति दत्तवांस्तत्करे जलम् ॥८०॥

जानते हैं। उसमें मेरा दखल देना तो ऐसा है जैसा सूर्य को दीपक दिखलाना। शीघ्रता कीजिए। विलम्ब करना उचित नहीं ॥७२-७४॥

विष्णुकुमार मुनि ने विक्रियाऋद्धि के प्रभाव से बामन ब्राह्मण का वेष बनाया और बड़ी मधुरता से वेदध्वनि का उच्चारण करते हुए वे यज्ञमंडप में पहुँचे। उनका सुन्दर स्वरूप और मनोहर वेदोच्चार सुनकर सब बड़े प्रसन्न हुए। बलि तो उन पर इतना मुग्ध हुआ कि उसके आनन्द का कुछ पार नहीं रहा। उसने बड़ी प्रसन्नता से उनसे कहा-महाराज, आपने पधारकर मेरे यज्ञ की अपूर्व शोभा कर दी। मैं बहुत खुश हुआ। आपको जो इच्छा हो, माँगिए। इस समय मैं सब कुछ देने को समर्थ हूँ ॥७५-७७॥

विष्णुकुमार बोले-मैं एक गरीब ब्राह्मण हूँ। मुझे अपनी जैसी कुछ स्थिति है, उसमें सन्तोष है। मुझे धन-दौलत की कुछ आवश्यकता नहीं। पर आपका जब इतना आग्रह हैं, तो आपको असन्तुष्ट करना भी मैं नहीं चाहता। मुझे केवल तीन पग पृथ्वी की आवश्यकता है। यदि आप कृपा करके उतनी भूमि मुझे प्रदान कर देंगे तो मैं उसमें टूटी-फूटी झोंपड़ी बनाकर रह सकूँगा। स्थान की निराकुलता से मैं अपना समय वेदाध्ययनादि में बड़ी अच्छी तरह बिता सकूँगा। बस, इसके सिवा मुझे और कुछ इच्छा नहीं है ॥७८॥

विष्णुकुमार की यह तुच्छ याचना सुनकर और-और ब्राह्मणों को उनकी बुद्धि पर बड़ा खेद हुआ। उन्होंने कहा भी कृपानाथ, आपको थोड़े में ही सन्तोष था, तब भी आप का यह कर्तव्य तो था कि आप बहुत कुछ माँग कर अपने जाति भाईयों का ही उपकार करते? उसमें आपका क्या बिगड़ जाना था?

बलि ने भी उन्हें समझाया और कहा कि आपने तो कुछ भी नहीं माँगा। मैं तो यह समझा था कि आप अपनी इच्छा से माँगते हैं, इसलिए जो कुछ माँगेंगे वह अच्छा ही माँगेंगे; परन्तु आपने तो मुझे बहुत ही हताश किया। यदि आप मेरे वैभव और मेरी शक्ति के अनुसार माँगते तो मुझे बहुत सन्तोष होता। महाराज, अब भी आप चाहें तो और भी अपनी इच्छानुसार माँग सकते हैं। मैं देने को प्रस्तुत हूँ ॥७९॥

विष्णुकुमार बोले-नहीं, मैंने जो कुछ माँगा है, मेरे लिए वही बहुत है। अधिक चाह नहीं। आपको देना ही है तो और बहुत से ब्राह्मण मौजूद हैं; उन्हें दीजिए। बलि ने कहा कि जैसी आपकी

ततः कोपेन तेनोच्चै-रेकः पादः सुराचले। द्वितीयश्चरणो दत्तो मानुषोत्तरपर्वते ॥८१॥
तृतीयश्चरणश्चेति विना स्थानं न चालितः। आकाशे तु तदा क्षोभः संजातो भुवनत्रये ॥८२॥
कम्पिताः पर्वताः सर्वे ससमुद्राः सभूमयः। प्रापुः संघट्टनं व्योम्नि विमानाश्चकिताः सुराः ॥८३॥
क्षम्यतां क्षम्यतां देव भीत्वा चेति सुरासुराः। समागत्य बलिं बध्वा पूजयन्ति स्म तत्क्रमो ॥८४॥
भक्त्या तदा मुनीन्द्राणामुपसर्गं विशिष्टधीः। शीघ्रं निवारयामास मुनिर्विष्णुकुमारवाक् ॥८५॥
स पद्मोपि महाराजो भयादागत्य वेगतः। विष्णोर्मुनेस्तथा तेषां पतितश्चरणद्वये ॥८६॥
मंत्रिणश्चेति चत्वारो मुक्त्वा दुष्टाशयं तदा। विष्णोरकम्पनाचार्य-मुनीनां पादपद्मयोः ॥८७॥
नत्वा सद्भावतस्त्यक्त्वा कष्टं मिथ्यामतं द्रुतम्। संजाताः श्रावकाः सर्वे जैनधर्मपरायणाः ॥८८॥
तथा विष्णुकुमारस्य पादपूजार्थमद्भुतम्। दत्तं वीणात्रयं देवैर्लोकानां शर्मदायकम् ॥८९॥
एवं भव्यात्मना भक्त्या मुन्यादीनां सुखप्रदम्। वात्सल्यं सर्वथा कार्यं स्वर्गमोक्षसुखश्रिये ॥९०॥
इत्थं श्रीजिनपादपङ्कजरतो धर्मानुरागान्वितः कृत्वा श्रीमुनिपुंगवेषु नितरां वात्सल्यमुद्यन्मतिः।
सम्प्राप्तः स्वपदं प्रमोदकलितः श्रीविष्णुनामामुनिर्भूयान्मे भवसिन्धुतारणपरः सन्मोक्षसौख्यश्रिये॥९१॥

इच्छा। आप अपने पाँवों से भूमि माप लीजिए। यह कहकर उसने हाथ में जल लिया और संकल्प कर उसे विष्णुकुमार के हाथ में छोड़ दिया। संकल्प छोड़ते ही उन्होंने पृथ्वी मापना शुरू की। पहला पाँव उन्होंने सुमेरु पर्वत पर रखा, दूसरा मानुषोत्तर पर्वत पर, अब तीसरा पाँव रखने को जगह नहीं। उसे वे कहाँ रक्खें? उनके इस प्रभाव से सारी पृथ्वी काँप उठी, सब पर्वत चलायमान हो गए समुद्रों ने मर्यादा तोड़ दी, देवों और ग्रहों के विमान एक से एक टकराने लगे और देवगण आश्चर्य के मारे भौचक्के से रह गए। वे सब विष्णुकुमार के पास आए और बलि को बाँधकर बोले-प्रभो, क्षमा कीजिए! क्षमा कीजिए!! यह सब दुष्कर्म इसी पापी का है। यह आपके सामने उपस्थित है। बलि ने मुनिराज के पाँवों में गिरकर उनसे अपना अपराध क्षमा कराया और अपने दुष्कर्म पर बहुत पश्चाताप किया ॥८०-८४॥

विष्णुकुमार मुनि ने संघ का उपद्रव दूर किया। सबको शान्ति हुई राजा और चारों मंत्री तथा प्रजा के सब लोग बड़ी भक्ति के साथ अकम्पनाचार्य की वन्दना करने को गए। उनके पाँवों में पड़कर राजा और मंत्रियों ने अपना अपराध उनसे क्षमा कराया और उसी दिन से मिथ्या मत छोड़कर सब अहिंसामयी पवित्र जिनशासन के उपासक बने ॥८५-८८॥

देवों ने प्रसन्न होकर विष्णुकुमार की पूजन के लिए तीन बहुत ही सुन्दर स्वर्गीय वीणायें प्रदान की, जिनके द्वारा उनका गुणानुवाद गा-गाकर लोग बहुत पुण्य उत्पन्न करेंगे। जैसा विष्णुकुमार ने वात्सल्य अंग का पालन कर अपने धर्म बन्धुओं के साथ प्रेम का अपूर्व परिचय दिया, उसी प्रकार और भव्य पुरुषों को भी अपने और दूसरों के हित के लिए समय-समय पर दूसरों के दुःखों में शामिल होकर वात्सल्य, उदार प्रेम का परिचय देना उचित है। इस प्रकार जिनभगवान् के परमभक्त विष्णुकुमार ने धर्म प्रेम के वश हो मुनियों का उपसर्ग दूरकर वात्सल्य अंग का पालन किया और पश्चात् ध्यानाग्नि

इति कथाकोशे वात्सल्याङ्गे विष्णुकुमारमुनेः कथा समाप्ता।

१३. श्रीवज्रकुमारमुनेः कथा

प्रणम्य परमात्मानं श्रीजिनं त्रिजगद्गुरुम्। वक्ष्ये प्रभावनाङ्गेऽहं कथां वज्रकुमारजाम् ॥१॥
हस्तिनागपुरे रम्ये बलनाम्नो महीपतेः। पुरोहितोभवत्तस्य गरुडाख्यो विचक्षणः ॥२॥
तत्पुत्रः सोमदत्तोभून्नाना शास्त्रसरित्पतेः। पारगः परमानन्द-दायकः सज्जनादिषु ॥३॥
अहिच्छत्रपुरं गत्वा त्वेकदासौ विशालधीः। सुभूतिं मातुलं प्राह भो माम् विनयान्वितः ॥४॥
राजानं दुर्मुखाख्यं मे दर्शय त्वं कृपापरः। गर्वितेन प्रभुस्तेन दर्शितो नैव तस्य सः ॥५॥
ततोसौ गृहिलो भूत्वा सभायां भूपतेः स्वयम्। गत्वाशीर्वचनं तस्मै दत्वा पुण्यप्रभावतः ॥६॥
नाना शास्त्रप्रवीणत्वं स्वं प्रकाश्यैकहेलया। प्राप्तो मंत्रिपदं दिव्यं स्वशक्तिः शर्मदायिनी ॥७॥
तथाभूतं तमालोक्य सोमदत्तं स मातुलः। सुभूतिर्विधिना तस्मै यज्ञदत्तां सुतां ददौ ॥८॥
एकदा यज्ञदत्ताया गर्भिण्याया हृदोऽभवत्। आम्रपक्वफलास्वादे प्रावृषि स्त्रीस्वभावतः ॥९॥

द्वारा कर्मों का नाश कर मोक्ष गए। वे ही विष्णुकुमार मुनिराज मुझे भवसमुद्र से पार कर मोक्ष प्रदान करें ॥८९-९१॥

१३. वज्रकुमार की कथा

संसार के परम गुरु जिनभगवान् को नमस्कार कर मैं प्रभावना अंग के पालन करने वाले श्री वज्रकुमार मुनि की कथा लिखता हूँ ॥१॥

जिस समय की यह कथा है, उस समय हस्तिनापुर के राजा थे बल। वह राजनीति के अच्छे विद्वान् थे, बड़े तेजस्वी थे और दयालु थे। उनके मंत्री का नाम था गरुड़। उसका एक पुत्र था। उनका नाम सोमदत्त था। वह सब शास्त्रों का विद्वान् था और सुन्दर भी बहुत था। उसे देखकर सब को बड़ा आनन्द होता था। एक दिन सोमदत्त अपने मामा सुभूति के यहाँ गया, जो कि अहिच्छत्रपुर में रहता था। उसने मामा से विनयपूर्वक कहा–मामाजी, यहाँ के राजा से मिलने की मेरी बहुत उत्कंठा है। कृपाकर आप उनसे मेरी मुलाकात करवा दीजिये न? सुभूति ने अभिमान में आकर अपने महाराज से सोमदत्त की मुलाकात नहीं कराई सोमदत्त को मामा की यह बात बहुत खटकी। आखिर वह स्वयं ही दुर्मुख महाराज के पास गया और मामा का अभिमान नष्ट करने के लिए राजा को अपने पाण्डित्य और प्रतिभाशालिनी बुद्धि का परिचय कराकर स्वयं भी उनका राजमंत्री बन गया। ठीक भी है सबको अपनी ही शक्ति सुख देने वाली होती है ॥२-७॥

सुभूति को अपने भानजे का पाण्डित्य देखकर बड़ी प्रसन्नता हुई उसने उसके साथ अपनी यज्ञदत्ता नाम की पुत्री को ब्याह दिया। दोनों दम्पत्ति सुख से रहने लगे। कुछ दिनों बाद यज्ञदत्ता के गर्भ रहा ॥८-९॥

तान्यालोकितुं विप्रो गतश्चाम्रवनं तदा। अकालेऽपि सुधीरोऽत्र किं करोति न साहसम् ॥१०॥
तत्रान्वेषयता तेन सहकारद्रुमेषु च। एकोह्याम्रतरु-र्दृष्टः सुमित्रमुनिना श्रितः ॥११॥
नाना फलौघसम्पन्नो महद्भिः सेवितो महान्। शोभते स्म तरुः सोपि जैनधर्म इवापरः ॥१२॥
प्रभावोयं मुनेरस्य द्विजो ज्ञात्वेति चेतसि। तान्यादाय फलान्युच्चैः प्रेषयामास योषितः ॥१३॥
स्वयं स्थित्वा मुनेः पाद-मूलेसौ भक्तिनिर्भरः। नत्वा तं त्रिजगत्पूतं पृष्टवान्सोमदत्तवाक् ॥१४॥
भो मुने करुणासिन्धो सारं किं भुवनत्रये। तदहं श्रोतुमिच्छामि श्रीमतां मुखपद्मतः ॥१५॥
तच्छ्रुत्वा मुनिनाथोसौ सुमित्राख्योवदत्तराम्। श्रीमज्जिनेन्द्रचन्द्रोक्त-धर्म एव विचक्षण ॥१६॥
सोपि वत्स द्विधा प्रोक्तः स्वर्गमोक्षसुखप्रदः। मुनिश्रावकभेदेन भवभ्रमणनाशकः ॥१७॥
तत्राद्यो दशधा धर्मो मुनीनां गुणशालिनां। रत्नत्रयादिभिश्चैव जिनेन्द्रैः परिकीर्तितः ॥१८॥
दानपूजादिभिः शील-प्रोषधैश्च शुभश्रिये। भवेत्परोपकाराद्यैः श्रावकाणां वृषोत्तमः ॥१९॥

देवादि के द्वारा पूज्य और अनन्तज्ञान, दर्शनादि आत्मीयश्री से विभूषित जिनभगवान् को नमस्कार कर मैं धनदत्त राजा की पवित्र कथा लिखता हूँ ॥१॥

अन्धदेशान्तर्गत कनकपुर नामक एक प्रसिद्ध और मनोहर शहर था। उसके राजा थे धनदत्त। वे सम्यग्दृष्टि थे, गुणवान् थे और धर्मप्रेमी थे। राजमंत्री का नाम श्रीवन्दक था। वह बौद्ध धर्मानुयायी था परन्तु तब भी राजा अपने मंत्री की सहायता से राजकार्य अच्छा चलाते थे। उन्हें किसी प्रकार की बाधा नहीं पहुँचती थी ॥२-३॥

एक दिन राजा और मंत्री राजमहल के ऊपर बैठे हुए कुछ राज्य सम्बन्धी विचार कर रहे थे कि राजा को आकाशमार्ग से जाते हुए दो चारण ऋद्धिधारी मुनियों के दर्शन हुए। राजा ने हर्ष के साथ उठकर मुनिराज को बड़े विनय से नमस्कार किया और अपने महल में उनका आह्वान किया। ठीक भी है 'साधुसंगः सतां प्रियः' अर्थात्-साधुओं की संगति सज्जनों को बहुत प्रीतिकर जान पड़ती है ॥४-६॥

इसके बाद राजा के प्रार्थना करने पर मुनिराज ने उसे धर्मोपदेश दिया और चलते समय वे श्रीवन्दक मंत्री को अपने साथ लिवा ले गए। ले जाकर उन्होंने उसे समझाया और आत्महित की इच्छा

संघश्रीवन्दकं कृत्वा श्रावकं परमादरात्। स्वस्थानं जग्मतुः पूतौ मुनीन्द्रौ गुणशालिनौ ॥८॥
बुद्धश्रीवन्दकं सोपि संघश्रीः स्वगुरुं सदा। त्रिसन्ध्यं वन्दितुं याति पुरा मिथ्यात्वमोहितः ॥९॥
तस्मिन्दिने गतो नैव वन्दनासमये ततः। बुद्धश्रिया समाहूय स नीतो निजपार्श्वकम् ॥१०॥
नमस्कारमकुर्वन्सन्पृष्टोसौ वन्दकेन च। न प्रणामं करोषीति कथं रे साम्प्रतं मम ॥११॥
मंत्रिणा मुनिवृत्तान्ते कथिते सुमनोहरे। वन्दकेन तदा प्रोक्तं पापिना पलभक्षिणा ॥१२॥
हा हा त्वं वञ्चितोसीति सन्ति नैवात्र चारणाः। मुनयो गगने मूढ गम्यते किं निराश्रये ॥१३॥
राजा ते कपटी लोके दर्शयामास साम्प्रतम्। इन्द्रजालं महाभ्रान्तिं मा गास्त्वं बुद्धभाक्तिकः ॥१४॥
एवं मिथ्यात्वमानीतो वारितो नितरामसौ। प्रभाते त्वं च मा गच्छ भूपतेः सदसि ध्रुवम् ॥१५॥
गत्वापि तत्र मावादी मया दृष्टौ मुनी इति। संघश्रीस्तत्समाकर्ण्य श्रावकत्वमपाकरोत् ॥१६॥
स्वयं ये पापिनो लोके परं कुर्वन्ति पापिनम्। यथा सन्तप्तमानोऽसौ दहत्यग्निर्न संशयः ॥१७॥
धनदत्तो महीभर्त्ता सम्यग्दृष्टिशिरोमणिः। प्रभाते स्वसभामध्ये महाधर्मानुरागतः ॥१८॥

से उसके प्रार्थना करने पर उसे श्रावक के व्रत दे दिये। श्रीवन्दक अपने स्थान लौट आया। इसके पहले श्रीवन्दक अपने बौद्धगुरु की वन्दनाभक्ति करने को प्रतिदिन उनके पास जाया करता था। सो जब उसने श्रावकव्रत ग्रहण कर लिए तब से उसने जाना छोड़ दिया। यह देख बौद्धगुरु ने उसे बुलाया, पर जब श्रीवन्दक ने आकर भी उसे नमस्कार नहीं किया? तब संघश्री ने उससे पूछा–क्यों आज तुमने मुझे नमस्कार नहीं किया। उत्तर में मंत्री ने मुनि के आने, उपदेश करने और अपने व्रत ग्रहण करने का सब हाल संघश्री से कह सुनाया। सुनकर संघश्री बड़े दुःख के साथ बोला–हाय! तू ठगा गया, पापियों ने तुझे बड़ा धोखा दिया। क्या कभी यह संभव है कि निराश्रय आकाश में भी कोई चल सकता है? जान पड़ता है तुम्हारा राजा बड़ा कपटी और ऐन्द्रजालिक है। इसलिए उसने तुम्हें ऐसा आश्चर्य दिखला कर अपने धर्म में शामिल कर लिया। तुम तो भगवान् बुद्ध के इतने विश्वासी थे, फिर भी तुम उस पापी राजा की बहकावे में आ गए? इस तरह उसे बहुत कुछ ऊँचा नीचा समझाकर संघश्री ने कहा अब तुम कभी राजसभा में नहीं जाना और जाना भी पड़े तो यह आज का हाल राजा से नहीं कहना। कारण वह जैनी है। सो बुद्धधर्म पर स्वभाव ही से उसे प्रेम नहीं होगा। इसलिए क्या मालूम कब वह बुद्धधर्म का अनिष्ट करने को तैयार हो जाये? बेचारा श्रीवन्दक फिर संघ श्री की चिकनी चुपड़ी बातों में आ गया। उसने श्रावक-धर्म को भी उसी समय जलांजलि दे दी। बहुत ठीक कहा गया है– ॥७-१६॥

जो स्वयं पापी होते हैं वे औरों को भी पापी बना डालते हैं। यह उनका स्वभाव ही होता है। जैसे अग्नि स्वयं भी गरम होती है और दूसरों को भी जला देती है ॥१७॥

दूसरे दिन धनदत्त ने राजसभा में बड़े आनन्द और धर्मप्रेम के साथ चारणमुनि का हाल सुनाया। उनमें प्रायः लोगों को, जो कि जैन नहीं थे, बहुत आश्चर्य हुआ। उनका विश्वास राजा के

सामन्तादिमहाभव्य-लोकानामग्रतः सुधीः। चक्रे चारणयोगीन्द्र-समागमकथां शुभाम् ॥१९॥
विश्वासहेतवे तत्र समाहूय च मंत्रिणम्। अहो मंत्रिन्नृपः प्राह कीदृशौ तौ मुनीश्वरौ ॥२०॥
तेनोक्तं निन्दकेनेति वन्दकेन सुपापिना। नैव दृष्टं किमप्यत्र मया भो चारणादिकम् ॥२१॥
तदा संघश्रियस्तस्य महापापप्रभावतः। कष्टतः स्फुटिते नेत्रे तत्क्षणाद् दुष्टचेतसः ॥२२॥
प्रभावो जिनधर्मस्य सूर्यस्येव जगत्त्रये। नैव संछाद्यते केन घूकप्रायेण पापिना ॥२३॥
जैनधर्मं प्रशस्योच्चैः सर्वे ते भूमिपादयः। संजाताः श्रावकाचारः चञ्चवो भक्तिनिर्भराः ॥२४॥

इत्थं श्रीजिनशासनेऽतिविमले देवेन्द्रचन्द्रार्चिते
ज्ञात्वा भव्यजनैः प्रभावमतुलं स्वर्गापवर्गप्रदे।
त्यक्त्वा भ्रांतिमतीव शर्मनिलये कार्या मतिर्निर्मला
धर्मे श्रीजिनभाषितेऽत्र नितरां सर्वेष्टसंसाधिनी ॥२५॥

इति कथाकोशे धनदत्तराज्ञः कथा समाप्ता।

कथन पर नहीं जमा। सब आश्चर्य भरी दृष्टि से राजा के मुँह की ओर देखने लगे। राजा को जान पड़ा कि मेरे कहने पर लोगों को विश्वास नहीं हुआ। तब उन्होंने अपनी गंभीरता को हँसी के रूप में परिवर्तित कर झट से कहा, हाँ मैं यह कहना तो भूल ही गया कि उस समय हमारे मंत्री महाशय भी मेरे पास ही थे। यह कहकर उन्होंने मंत्री पर नजर दौड़ाई पर वे उन्हें नहीं दीख पड़े। तब राजा ने उसी समय नौकरों को भेजकर श्रीवन्दक को बुलवाया। उसके आते ही राजा ने अपने कथन की सत्यता प्रमाणित करने के लिए उससे कहा–मंत्री जी, कल दोपहर का हाल तो इन सबको सुनाएँ कि वे चारणमुनि कैसे थे? तब बौद्धगुरु का बहकाया हुआ पापी श्रीवन्दक बोल उठा कि महाराज, मैंने तो उन्हें नहीं देखा और न यह संभव ही है कि आकाश में कोई चल सके? पापी श्रीवन्दक के मुँह से उक्त वाक्यों का निकलना था कि उसी समय उसकी दोनों आँखें मुनिनिन्दा के तीव्र पाप के उदय से फूट गईं ॥१८-२२॥

जैसे संसार में फैले हुए सूर्य के प्रभाव को उल्लू नहीं रोक सकता, ठीक उसी तरह पापी लोग पवित्र जिनधर्म के प्रभाव को कभी नहीं रोक सकते। उक्त घटना को देखकर राजा वगैरह ने जिनधर्म की खूब प्रशंसा की और श्रावक धर्म स्वीकार कर वे उपासक बन गए ॥२३-२४॥

इस प्रकार निर्मल और देवादि के द्वारा पूज्य जिनशासन का प्रभाव देखकर भव्य पुरुषों को उचित है कि वे निर्भ्रान्त होकर सुख के खजाने और स्वर्ग-मोक्ष के देने वाले पवित्र जिनधर्म की ओर अपनी निर्मल और मनोवांछित की देने वाली बुद्धि को लगावें ॥२५॥

१८. ब्रह्मदत्तस्य कथा।

प्रणम्य परया भक्त्या जिनेन्द्रं जगदर्चितम्। ब्रह्मदत्तकथां वक्ष्ये सतां सद्बोधहेतवे ॥१॥
काम्पिल्यनगरेऽत्रैव राजा ब्रह्मरथः सुधीः। राज्ञी रूपगुणोपेता रामिल्या प्राणवल्लभा ॥२॥
तयोर्द्वादशचक्रेशो ब्रह्मदत्तोभवत्सुतः। षट्खण्डमण्डितां पृथ्वीं संसाध्य सुखतः स्थितः ॥३॥
एकदा सूपकारश्च तस्मै विजयसेनवाक्। भोजनावसरे तप्तं पायसं दत्तवांस्ततः ॥४॥
उष्णत्वात्तेन तद्भोक्तु-मसमर्थेन चक्रिणा। तेनैव पायसेनाशु क्रोधान्धेन कुबुद्धिना ॥५॥
मस्तके दाहयित्वा च सूपकारः स मारितः। धिक्कोपं प्राणिनां लोके कष्टकोटिविधायकम् ॥६॥
ततो विजयसेनोसौ सूपकारः सुदुःखितः। मृत्वा क्षारसमुद्रस्थे रत्नद्वीपे सुविस्तृते ॥७॥
भूत्वा व्यन्तरदेवश्च विभंगज्ञानचक्षुषा। ज्ञात्वा पूर्वभवं कष्टं महाकोपेन कम्पितः ॥८॥
परिव्राजकरूपेण पूर्ववैरेण संयुतः। कदल्यादिमहामिष्ट-फलान्यादाय वेगतः ॥९॥
तत्रागत्य ततस्तस्मै ब्रह्मदत्ताय दत्तवान्। स जिह्वालम्पटश्चक्री भक्षित्वा सुफलानि च ॥१०॥

---

१८. ब्रह्मदत्त की कथा

परम भक्ति से संसार पूज्य जिन भगवान् को नमस्कार कर मैं ब्रह्मदत्त की कथा लिखता हूँ। वह इसलिए कि सत्पुरुषों को इसके द्वारा कुछ शिक्षा मिले ॥१॥

कांपिल्य नामक नगर में एक ब्रह्मरथ नाम का राजा रहता था। उसकी रानी का नाम था रामिली। वह सुन्दरी थी, विदुषी थी और राजा को प्राणों से भी कहीं प्यारी थी। बारहवें चक्रवर्ती ब्रह्मदत्त इसी के पुत्र थे। वे छह खण्ड पृथ्वी को अपने वश करके सुखपूर्वक अपना राज्य शासन का काम करते थे ॥२-३॥

एक दिन राजा भोजन करने को बैठे उस समय उनके विजयसेन नाम के रसोइये ने उन्हें खीर परोसी। पर वह बहुत गरम थी, इसलिए राजा उसे खा न सके। उसे इतनी गरम देखकर राजा रसोइये पर बहुत गुस्सा हुए। गुस्से में आकर उन्होंने खीर के उसी बर्तन को रसोइये के सिर पर दे मारा। उसका सिर सब जल गया। साथ ही वह मर गया। हाय! ऐसे क्रोध को धिक्कार है, जिससे मनुष्य अपना हिताहित न देखकर बड़े-बड़े अनर्थ कर बैठता है और फिर अनन्त काल तक कुगतियों में दुःख भोगता रहता है ॥४-६॥

रसोइया बड़े दुःख से मरा सही, पर उसके परिणाम उस समय भी शान्त रहे। वह मरकर लवण समुद्रान्तर्गत विशालरत्न नामक द्वीप में व्यन्तर देव हुआ। विभंगावधिज्ञान से वह अपने पूर्वभव की कष्ट कथा जानकर क्रोध के मारे काँपने लगा। वह एक संन्यासी के वेष में राजा के पास आया और राजा को उसने केला, आम, सेव, सन्तरा आदि बहुत से फल भेंट किए। राजा जीभ की लोलुपता से उन्हें खाकर संन्यासी से बोला—साधुजी, कहिए आप ये फल कहाँ से लाये? और कहाँ

सन्तुष्टः पृष्टवानित्थं परिव्राजक भो वद। ईदृशानि फलान्युच्चैः कुत्र सन्ति प्रियाणि च ॥११॥
तच्छ्रुत्वा सोपि संप्राह समुद्रे भो नरेश्वर। मदीयमठसान्निध्ये वाटिकायां बहून्यलम् ॥१२॥
तदाकर्ण्य नृपस्तत्र गन्तुकामोभवत्तराम्। शुभाशुभं न जानाति हा कष्टं लम्पटः पुमान् ॥१३॥
अन्तःपुरादिसंयुक्तं नीत्वा तं तेन सागरे। मारणार्थं समारब्धस्तथोच्चैरुपसर्गकः ॥१४॥
तदा पञ्चनमस्कारं स्मरन्तं चक्रवर्त्तिनम्। देवो मारयितुं तत्र न समर्थो बभूव च ॥१५॥
ततोसौ प्रकटो भूत्वा देवो दुष्टाशयोवदत्। रे रे दुष्ट त्वया कष्टं मारितोहं पुरा किल ॥१६॥
अतोहं मारयामि त्वां साम्प्रतं बहु दुःखतः। यदि त्वं नास्ति जैनेन्द्र-शासनं भुवनत्रये ॥१७॥
भणित्वेति प्रशस्योच्चैः स्ववाक्यैः परदर्शनम्। लिखित्वा च जले पञ्च-नमस्कारपदानि च ॥१८॥
विनाशयसि पादेन त्वां मुञ्चामि तदा ध्रुवम्। ब्रह्मदत्तस्ततो मिथ्या-दृष्टिश्चक्रे तदीरितम् ॥१९॥
मारितः सिन्धुमध्येऽसौ व्यन्तरेण सुवैरिणा। सप्तमं नरकं प्राप्तो मिथ्यात्वं कष्टकोटिदम् ॥२०॥

मिलेंगे? ये तो बड़े ही मीठे हैं। मैंने तो आज तक ऐसे फल कभी नहीं खाये। मैं आपकी इस भेंट से बहुत खुश हुआ ॥७-११॥

संन्यासी ने कहा, महाराज, मेरा घर एक टापू में है। वहीं एक बहुत सुन्दर बगीचा है। उसी के फल हैं और अनन्त फल उसमें लगे हुए हैं। संन्यासी की रसभरी बात सुनकर राजा के मुँह में पानी भर आया। उसने संन्यासी के साथ जाने की तैयार की। सच है-॥१२-१३॥

जिह्वा लोलुपी पुरुष भला-बुरा नहीं जान पाते, यह बड़े दुःख की बात है। यही हाल राजा का हुआ। जब वह लोलुपता के वश हो उस संन्यासी के साथ समुद्र के बीच में पहुँचा, तब उसने राजा को मारने के लिए बड़ा कष्ट देना शुरू किया। चक्रवर्ती अपने को कष्टों से घिरा देखकर पंचनमस्कार मंत्र की आराधना करने लगा। उसके प्रभाव से कपटी संन्यासी की सब शक्ति रुद्ध हो गई। वह राजा को कुछ कष्ट न दे सका। आखिर प्रकट होकर उसने राजा से कहा-दुष्ट, याद है? मैं जब तेरा रसोइया था, तब तूने मुझे जान से मार डाला था? वहीं आग आज मेरे हृदय को जला रही है और उसी को बुझाने के लिए, अपने पूर्व भव का बैर निकालने के लिए मैं तुझे यहाँ छलकर लाया हूँ और बहुत कष्ट के साथ तुझे जान से मारूँगा, जिससे फिर कभी तू ऐसा अनर्थ न करे। पर यदि तू एक काम करे तो बच भी सकता हैं। वह यह कि तू अपने मुँह से पहले तो यह कह दे कि संसार में जिनधर्म ही नहीं है और जो कुछ है वह अन्य धर्म है। इसके सिवा पंचनमस्कार मंत्र को जल में लिखकर उसे अपने पाँवों से मिटा दे, तब मैं तुझे छोड़ सकता हूँ। मिथ्यादृष्टि ब्रह्मदत्त ने उसके बहकाने में आकर वही किया जैसा उसे देव ने कहा था। उसका व्यन्तर के कहे अनुसार करना था कि उसने चक्रवर्ती को उसी समय मारकर समुद्र में फेंक दिया। अपना वैर उसने निकाल लिया। चक्रवर्ती मरकर मिथ्यात्व के उदय से सातवें नरक गया। सच है मिथ्यात्व अनन्त दुःखों का देने वाला है। जिसका जिनधर्म पर विश्वास नहीं क्या उसे इस अनन्त दुःखमय संसार में कभी सुख हुआ है? नहीं। मिथ्यात्व के समान

यस्य चित्ते न विश्वासो धर्मे श्रीजिनभाषिते। तस्य किं कुशलं लोके महादुष्कर्मकारिणः ॥२१॥
मिथ्यात्वेन समं किंचिन्निन्द्यं न भुवनत्रये। यतोऽसौ चक्रवर्त्ती च सप्तमं नरकं गतः ॥२२॥
तस्मात्तद्दूरतस्त्यक्त्वा मिथ्यात्वं वान्तिवद्बुधाः। स्वर्मोक्षसाधने हेतुं सम्यक्त्वं भावयन्तु वै ॥२३॥
देवोर्हन्भुवनत्रयेऽत्र नितरां दोषौघसङ्गोज्झितो देवेन्द्रार्कनरेन्द्रखेचरशतैर्भक्त्या सदाभ्यर्चितः।
तद्वाक्यं भवसागरप्रवहणप्रायं महाशर्मदं नित्यं चेतसि भावितं च भवतां कुर्याद्वरं मङ्गलम् ॥२४॥

इति कथाकोशे ब्रह्मदत्तचक्रिणः कथा समाप्ता।

१९. श्रीश्रेणिकनृपस्य कथा

नत्वा जिनं जगत्पूज्यं केवलज्ञानलोचनम्। वक्ष्ये श्रीश्रेणिकस्योचैः सत्कथां श्रेयसे नृणाम् ॥१॥
देशेऽत्र मगधे ख्याते पुरे राजगृहे परे। राजा श्रीश्रेणिकस्तत्र राजविद्याविराजितः ॥२॥
तद्राज्ञी चेलिनी नाम्नी सम्यग्दृष्टिर्विचक्षणा। श्रीमज्जिनेन्द्रपादाब्ज-पूजनैकपरायणा ॥३॥
एकदा श्रेणिकेनोक्तं शृणु त्वं देवि वच्म्यहम्। सर्वधर्मप्रधानोयं विष्णुधर्मोऽत्र वर्त्तते ॥४॥
अतस्त्वया रतिः कार्या तत्रैवाशु सुखप्रदे। तदाकर्ण्य प्रभोर्वाक्यं जैनतत्वेषु निश्चला ॥५॥
चेलना विनयोपेता संजगाद प्रियं वचः। भो देव विष्णुभक्तानां भोजनं दीयते मया ॥६॥

संसार में और कोई इतना निन्द्य नहीं है। उसी से तो चक्रवर्ती ब्रह्मदत्त सातवें नरक गया। इसलिए आत्महित के चाहने वाले पुरुषों को दूर से मिथ्यात्व छोड़कर स्वर्ग-मोक्ष की प्राप्ति का कारण सम्यक्त्व ग्रहण करना उचित है ॥१४-२३॥

संसार में सच्चे देव अरहन्त भगवान् हैं, जो क्षुधा, तृषा, जन्म, मरण, रोग, शोक, चिन्ता, भय आदि दोषों से और धन-धान्य, दासी-दास, सोना-चाँदी आदि दस प्रकार के परिग्रह से रहित हैं, जो इन्द्र, चक्रवर्ती, देव, विद्याधरों द्वारा वंद्य हैं, जिनके वचन जीव मात्र को सुख देने वाले और भव समुद्र से तिरने के लिए जहाज समान हैं, उन अर्हन्त भगवान् का आप पवित्र भावों से सदा ध्यान किया कीजिए कि जिससे वे आपके लिए कल्याण पथ के प्रदर्शक हो ॥२४॥

१९. श्रेणिक राजा की कथा

केवलज्ञानरूपी नेत्र के द्वारा समस्त संसार के पदार्थों के देखने, जानने वाले और जगत्पूज्य श्री जिनभगवान् को नमस्कार कर मैं राजा श्रेणिक की कथा लिखता हूँ, जिसके पढ़ने से सर्वसाधारण का हित हो। श्रेणिक मगध देश के अधीश्वर थे। मगध की प्रधान राजधानी राजगृह थी। श्रेणिक कई विषयों के सिवा राजनीति के बहुत अच्छे विद्वान् थे। उनकी महारानी चेलना बड़ी धर्मात्मा, जिनभगवान् की भक्त और सम्यग्दर्शन से विभूषित थी। एक दिन श्रेणिक ने उससे कहा-देखो, संसार में वैष्णव धर्म की बहुत प्रतिष्ठा है और वह जैसा सुख देने वाला है वैसा और धर्म नहीं। इसलिए तुम्हें भी उसी धर्म का आश्रय स्वीकार करना उचित है। सुनकर चेलना देवी, जिसे कि जिनधर्म पर अगाध विश्वास था, बड़े विनय से बोली-नाथ, अच्छी बात है, समय पाकर मैं इस विषय की परीक्षा करूँगी ॥१-६॥

अथैकदा समाहूय भोजनार्थं स्वमण्डपे। गौरवात्स्थापयामास सर्वान्भागवतान्सती ॥७॥
तत्र ते कपटोपेताः शठा ध्यानेन संस्थिताः। पृष्टास्तया भवन्तोऽत्र किं कुर्वन्ति तपस्विनः ॥८॥
इत्याकर्ण्य जगुस्तेऽपि त्यक्त्वा देहं मलैर्भृतम्। जीवं विष्णुपदं नीत्वा तिष्ठामो देवि सौख्यतः ॥९॥
ततस्तया महादेव्या चेलिन्या सोपि मण्डपः। प्रज्वलितोग्निना नष्टाः कष्टास्ते वायसा यथा ॥१०॥
राज्ञा रुष्टेन सा प्रोक्ता भक्तिर्नास्ति यदि ध्रुवम्। किं ते मारयितुं चैतान्युक्तं कष्टात्तपस्विनः ॥११॥
तयोक्तं देव भो त्यक्त्वा कुत्सितं स्ववपुर्द्रुतम्। एते विष्णुपदं प्राप्ताः सारसौख्यसमन्वितम् ॥१२॥
नित्यं तत्रैव तिष्ठन्ति किमत्रागमनेन च। इति ज्ञात्वोपकाराय मयेदं निर्मितं प्रभो ॥१३॥
अस्त्येव मम वाक्यस्य निश्चयार्थं महीपते। सद्दृष्टान्तकथां वक्ष्ये श्रूयतां परमादरात् ॥१४॥
''वत्सदेशे सुविख्याते कौशाम्बीपत्तने प्रभुः। प्रजापालो महाराज्यं करोति स्म स्वलीलया ॥१५॥

इसके कुछ दिनों बाद चेलना ने कुछ भागवत साधुओं का अपने यहाँ निमंत्रण किया और बड़े गौरव के साथ अपने यहाँ उन्हें बुलाया। वहाँ आकर अपना ढोंग दिखलाने के लिए वे कपट मायाचार से ईश्वराराधन करने को बैठे। उस समय चेलना ने उनसे पूछा, आप लोग क्या करते है? उत्तर में उन्होंने कहा–देवी, हम लोग मलमूत्रादि अपवित्र वस्तुओं से भरे हुए शरीर को छोड़कर अपने आत्मा को विष्णु अवस्था में प्राप्त कर स्वानुभवजन्य सुख भोगते हैं। सुनकर देवी चेलना ने उस मंडप में, जिसमें सब साधु ध्यान करने को बैठे थे, आग लगवा दी। आग लगते ही वे सब कौओं की तरह भाग खड़े हुए। यह देखकर श्रेणिक ने बड़े क्रोध के साथ चेलना से कहा–आज तुमने साधुओं के साथ बड़ा अनर्थ किया। यदि तुम्हारी उन पर भक्ति नहीं थी, तो क्या उसका यह अर्थ है कि उन्हें जान से मार डालना? बतलाओ तो उन्होंने तुम्हारा क्या अपराध किया, जिससे तुम उनके जीवन की ही प्यासी हो उठी? ॥७-११॥

रानी बोली–नाथ, मैंने तो कोई बुरा काम नहीं किया और जो किया वह उन्हीं के कहे अनुसार उनके लिए सुख का कारण था। मैंने तो केवल परोपकार बुद्धि से ऐसा किया था। जब वे लोग ध्यान करने को बैठे तब मैंने उनसे पूछा कि आप लोग क्या करते हैं? तब उन्होंने मुझे कहा था कि हम अपवित्र शरीर छोड़कर उत्तम सुखमय विष्णुपद प्राप्त करते हैं तब मैंने सोचा कि ओहो, ये जब शरीर छोड़कर विष्णुपद प्राप्त करते हैं तब तो बहुत अच्छा है और इससे उत्तम यह होगा कि यदि ये निरन्तर विष्णु बने रहें। संसार में बार-बार आना और जाना यह इनके पीछे पचड़ा क्यों? यह विचार कर वे निरन्तर विष्णुपद में रहकर सुखभोग करें, इस परोपकार बुद्धि से मैंने मंडप में आग लगवा दी थी। आप ही अब विचार कर बतलाइए कि इसमें मैंने सिवा परोपकार के कौन बुरा काम किया? और सुनिये मेरे वचनों पर आपको विश्वास हो, इसलिए एक कथा भी आपको सुनाये देती हूँ ॥१२-१४॥

''जिस समय की यह कथा है, उस समय वत्सदेश की राजधानी कौशाम्बी के राजा प्रजापाल थे। वे अपना राज्य शासन नीति के साथ करते हुए सुख से समय बिताते थे। कौशाम्बी में दो सेठ

श्रेष्ठी सागरदत्ताख्यो वसुमत्या स्त्रिया युतः। तत्रैव च समुद्रादि दत्तः श्रेष्ठी परोभवत् ॥१६॥
भार्या समुद्रदत्ताख्या श्रेष्ठिनोश्च तयोर्द्वयोः। महास्नेहवशादुच्चै-र्वाचा बन्धोभवद्ध्रुवम् ॥१७॥
आवयोः पुत्रपुत्र्यौ यौ संजायेते परस्परम्। तयोर्विवाहः कर्त्तव्यो यस्मात्प्रीतिर्भवेत्सदा ॥१८॥
ततः सागरदत्तस्य वसुमत्यां सुतोभवत्। तिष्ठति स्म गृहे चेति वसुमित्रो महाद्भुतम् ॥१९॥
तथा समुद्रदत्तस्य नागदत्ता सुताजनि। तस्यां समुद्रदत्तायां रूपलावण्यमण्डिता ॥२०॥
वसुमित्रेण तेनोच्चैः परिणीता क्रमेण सा। नैव वाचा चलत्वं च सतां कष्टशतैरपि ॥२१॥
ततश्च वसुमित्रोऽसौ निशायां निजलीलया। धृत्वा पिट्टारके शीघ्रं नित्यं सर्पशरीरकम् ॥२२॥
भूत्वा दिव्यनरो नाग-दत्तया सह सौख्यतः। भुङ्क्ते भोगान्मनोभीष्टान्विचित्रा संसृतेः स्थितिः ॥२३॥
एकदा यौवनाक्रान्तां नागदत्तां विलोक्य च। जगौ समुद्रदत्ता सा पुत्री स्नेहेन दुःखिता ॥२४॥
हा विधेश्चेष्टितं कष्टं कीदृशी मे सुतोत्तमा। वरश्च कीदृशो जातो भीतिकारी भुजङ्गमः ॥२५॥
तच्छ्रुत्वा नागदत्ताऽऽसौ भो मातर्माविसूरय। समुद्धीर्येति वृत्तान्तं स्वभर्तुः संजगाद च ॥२६॥

रहते थे। उनके नाम थे सागरदत्त और समुद्रदत्त। दोनों सेठों में परस्पर बहुत प्रेम था। उनका प्रेम सदा दृढ़ बना रहे, इसलिए परस्पर में एक शर्त की। वह यह कि, ''मेरे यदि पुत्री हुई तो मैं उसका ब्याह तुम्हारे लड़के के साथ कर दूँगा और इसी तरह मेरे पुत्र हुआ तो तुम्हें अपनी लड़की का ब्याह उसके साथ करना पड़ेगा ॥१५-१८॥''

दोनों ने उक्त शर्त स्वीकार की। इसके कुछ दिनों बाद सागरदत्त के घर पुत्रजन्म हुआ। उसका नाम वसुमित्र हुआ। पर उसमें एक बड़े भारी आश्चर्य की बात थी। वह यह कि वसुमित्र न जाने किस कर्म के उदय से रात के समय तो एक दिव्य मनुष्य होकर रहता और दिन में एक भयानक सर्प ॥१९॥

उधर समुद्रदत्त के घर कन्या हुई उसका नाम रखा गया नागदत्ता। वह बड़ी खूबसूरत सुन्दरी थी। उसके पिता ने अपनी प्रतिज्ञा के अनुसार उसका ब्याह वसुमित्र के साथ कर दिया। सच है-॥२०-२१॥

सत्पुरुष सैकड़ों कष्ट सह लेते हैं, पर अपनी प्रतिज्ञा से कभी विचलित नहीं होते। वसुमित्र का ब्याह हो गया। वह अब प्रतिदिन दिन में तो सर्प बनकर एक पिटारे में रहता और रात में एक दिव्य पुरुष होकर अपनी प्रिया के साथ सुखभोग करता। सचमुच संसार की विचित्र ही स्थिति होती है। इसी तरह उसे कई दिन बीत गए। एक दिन नागदत्ता की माता अपनी पुत्री को एक ओर तो यौवन अवस्था में पदार्पण करती हुई और दूसरी ओर उसके विपरीत भाग्य को देखकर दुःखी होकर बोली-हाय! कैसी विडम्बना है, जो कहाँ देवबाला सरीखी सुन्दरी मेरी पुत्री और कैसा उसका अभाग्य जो उसे पति मिला एक भयंकर सर्प? उसकी दुःख भरी आह को नागदत्ता ने सुन लिया। वह दौड़ी आकर अपनी माता से बोली-माता, इसके लिए दुःख आप क्यों करती हैं? मेरा जब भाग्य ही ऐसा था, तब उसके लिए दुःख करना व्यर्थ है और अभी मुझे विश्वास है कि मेरे स्वामी का इस दशा से उद्धार हो सकता है। इसके बाद नागदत्ता ने अपनी माता को स्वामी के उद्धार सम्बन्ध की बात समझा दी ॥२२-२६॥

तदाकर्ण्य समुद्रादिदत्ता गत्वा सुतागृहम्। रात्रौ पिट्टारके मुक्त्वा सर्पदेहं सुनिन्दितम् ॥२७॥
धृत्वा मनुष्यसद्रूपं वसुमित्रे च निर्गते। सा प्रच्छन्नं तदा भस्मी-चक्रे पिट्टारकं सती ॥२८॥
दाहिते च तदा तस्मिन्वसुमित्रो गुणोज्ज्वलः। भुञ्जानो विविधान्भोगान्सदाऽऽसौ पुरुषः स्थितः ॥२९॥
तथैते देव तिष्ठन्ति विष्णुलोके निरन्तरम्। एतदर्थं मयारब्धो देहदाहस्तपस्विनाम् ॥३०॥
तन्निशम्य महीनाथः श्रेणिकश्चेलनोदितम्। समर्थो नोत्तरं दातुं कोपान्मौनेन संस्थितः ॥३१॥
अथैकदा नृपाधीशो गतः पापर्द्धिहेतवे। तत्रातापनयोगस्थं यशोधरमहामुनिम् ॥३२॥
समालोक्य महाकोपान्ममेमं विघ्नकारिणम्। मारयामीति संचिन्त्य मुक्तवान्कुक्कुरान्वृथा ॥३३॥
गत्वा पञ्चशतान्युच्चैः कुक्कुरास्तेपि निष्ठुराः। यशोधरमुनेस्तस्य तपोमाहात्म्ययोगतः ॥३४॥
कृत्वा प्रदक्षिणां पाद-मूले तस्थुः सुभक्तितः। क्रोधान्धेन पुनस्तेन बाणा मुक्ताः सुदारुणाः ॥३५॥
तेऽपि बाणा बभूवुश्च पुष्पमालाः सुनिर्मलाः। प्रभावो मुनिनाथस्य महान्केनाऽत्र वर्ण्यते ॥३६॥
तस्मिन्काले महीपालः सप्तमं नरकं प्रति। त्रयस्त्रिंशत्समुद्रायुर्बन्धं चक्रे सुकष्टदम् ॥३७॥
ततः प्रभावमालोक्य मुनेः पादाम्बुजद्वयम्। प्रणम्य परया भक्त्या त्यक्त्वा दुष्टाशयं नृपः ॥३८॥

सदा के नियमानुसार आज भी रात के समय वसुमित्र अपना सर्प का शरीर छोड़कर मनुष्य रूप में आया और अपने शय्या-भवन में पहुँचा। इधर नागदत्ता छुपी हुई आकर वसुमित्र के पिटारे को वहाँ से उठा ले आई और उसे उसी समय उसने जला डाला। तब से वसुमित्र मनुष्यरूप में ही अपनी प्रिया के साथ सुख भोगता हुआ अपना समय आनन्द से बिताने लगा। नाथ! उसी तरह ये साधु भी निरन्तर विष्णुलोक में रहकर सुख भोगें यह मेरी इच्छा थी; इसलिए मैंने वैसे किया था। महारानी चेलना की कथा सुनकर श्रेणिक उत्तर तो कुछ नहीं दे सके, पर वे उस पर बहुत गुस्सा हुए और उपयुक्त समय न देखकर वे अपने क्रोध को उस समय दबा भी गए ॥२७-३१॥

एक दिन श्रेणिक शिकार के लिए गए हुए थे। उन्होंने वन में यशोधर मुनिराज को देखा। वे उस समय आतप योग धारण किए हुए थे। श्रेणिक ने उन्हें शिकार के लिए विघ्नरूप समझकर मारने का विचार किया और बड़े गुस्से में आकर अपने क्रूर शिकारी कुत्तों को उन पर छोड़ दिया। कुत्ते बड़ी निर्दयता के साथ मुनि को मारने को झपटे। पर मुनिराज की तपश्चर्या के प्रभाव से वे उन्हें कुछ कष्ट न पहुँचा सके। बल्कि उनकी प्रदक्षिणा देकर उनके पाँवों के पास खड़े रह गए। यह देख श्रेणिक को और भी क्रोध आया। उन्होंने क्रोधान्ध होकर मुनि पर शर चलाना आरम्भ किया। पर यह कैसा आश्चर्य जो शरों के द्वारा उन्हें कुछ क्षति न पहुँच कर वे ऐसे जान पड़े मानों किसी ने उन पर फूलों की वर्षा की है। सच बात यह है कि तपस्वियों का प्रभाव कह कौन सकता है? श्रेणिक ने मुनि हिंसारूप तीव्र परिणामों द्वारा उस समय सातवें नरक की आयु का बन्ध किया, जिसकी स्थिति तैंतीस सागर की है ॥३२-३७॥

इन सब अलौकिक घटनाओं को देखकर श्रेणिक का पत्थर के समान कठोर हृदय फल सा कोमल हो गया। उनके हृदय की सब दुष्टता निकलकर उसमें मुनि के प्रति पूज्यभाव पैदा हो गए।

पुण्येन पूर्णयोगोसौ यशोधरमहामुनिः। तत्वं जगाद जैनेन्द्रं सुरेन्द्राद्यैः प्रपूजितम् ॥३९॥
तच्छ्रुत्वोपशमं सार-सम्यक्त्वं संगृहीतवान्। तदायुश्चतुराशीति-गुणवर्षसहस्त्रकम् ॥४०॥
संचक्रे प्रथमे शीघ्रं नरके प्रस्तरादिमे। किं न स्याद्भव्यमुख्यानां शुभं सद्दर्शनागमे ॥४१॥
ततः पादान्तिके चित्र-गुप्तनाम महामुनेः। क्षयोपशमिकं प्राप्य सम्यक्त्वं भक्तिनिर्भरः ॥४२॥
वर्द्धमानजिनेन्द्रस्य पादमूले जगद्गुरोः। गृहीत्वा शुद्धसम्यक्त्वं क्षायिकं मुक्तिदायकम् ॥४३॥
स्वीचक्रे तीर्थकृन्नाम त्रैलोक्येशैः समर्चितम्। तस्माच्छ्रेणिको भूपस्तीर्थेशः संभविष्यति ॥४४॥
स जयति जिनदेवः केवलज्ञानदीपः सकलसुरनरेन्द्रैः खेचरेन्द्रैः प्रपूज्यः।
यदुदितवरवाक्यैर्भावितैः स्वच्छचित्ते भवति विमललक्ष्मीनायकोऽसौ मनुष्यः ॥४५॥

इति कथाकोशे श्रीश्रेणिकनृपस्य कथा समाप्ता।

२०. पद्मरथस्य कथा

श्रीजिनं त्रिजगन्नाथैः समर्चितपदद्वयम्। नत्वा पद्मरथस्योच्चै-र्जिनभक्तकथोच्यते ॥१॥
देशेऽत्र मगधे रम्ये मिथिलायां महापुरि। राजा पद्मरथो जातो विख्यातो मुग्धमानसः ॥२॥

वे मुनिराज के पास गए और भक्ति से उन्होंने मुनि के चरणों को नमस्कार किया। यशोधर मुनिराज ने श्रेणिक के हित के लिए उपयुक्त समझकर उन्हें अहिंसामयी पवित्र जिनशासन का उपदेश दिया। उसका श्रेणिक के हृदय पर बहुत ही असर पड़ा। उनके परिणामों में विलक्षण परिवर्तन हुआ। उन्हें अपने कृतकर्म पर अत्यन्त पश्चाताप हुआ। मुनिराज के उपदेशानुसार उन्होंने सम्यक्त्व ग्रहण किया। इसके प्रभाव से, उन्होंने जो सातवें नरक की आयु का बन्ध किया था, वह उसी समय घटकर पहले नरक का रह गया, जहाँ स्थिति चौरासी हजार वर्षों की है। ठीक है सम्यग्दर्शन के प्रभाव से भव्यपुरुषों को क्या प्राप्त नहीं होता? ॥३८-४१॥

इसके बाद श्रेणिक ने श्रीचित्रगुप्त मुनिराज के पास क्षयोपशम सम्यक्त्व प्राप्त किया और अन्त में भगवान् वर्धमान स्वामी के द्वारा शुद्ध क्षायिक-सम्यक्त्व, जो कि मोक्ष का कारण है, प्राप्त कर पूज्य तीर्थंकर नाम प्रकृति का बन्ध किया। श्रेणिक महाराज अब तीर्थंकर होकर निर्वाण लाभ करेंगे। वे केवलज्ञानरूपी प्रदीप श्रीजिनभगवान् संसार में सदाकाल विद्यमान रहें, जो इन्द्र, देव, विद्याधर, चक्रवर्ती द्वारा पूज्य हैं और जिनके पवित्र उपदेश के हृदय में मनन और ग्रहण द्वारा मनुष्य निर्मल लक्ष्मी को प्राप्त करने का पात्र होता है, मोक्षलाभ करता है ॥४२-४५॥

२०. पद्मरथ राजा की कथा

इन्द्र, धरणेन्द्र, विद्याधर, राजा, महाराजाओं द्वारा पूज्य जिनभगवान् के चरणों को नमस्कार कर मैं पद्मरथ राजा की कथा लिखता हूँ, जो प्रसिद्ध जिनभक्त हुआ है ॥१॥

मगध देश के अन्तर्गत एक मिथिला नाम की सुन्दरी नगरी थी। उसके राजा थे पद्मरथ। वे बड़े बुद्धिमान् और राजनीति के अच्छे जानने वाले थे, उदार और परोपकारी थे। सुतरा वे खूब प्रसिद्ध थे ॥२॥

एकदासौ महाटव्यां पापर्द्ध्यै भूपतिर्गतः। दृष्ट्वैकं शशकं पृष्टे तस्याश्वं वाहयद्द्रुतम् ॥३॥
भूत्वैकाकी वने काल-गुहां प्राप्तः स्वपुण्यतः। तत्र दीप्ततपोयोगा-द्विस्फुरत्कान्तिमद्भुतम् ॥४॥
सुधर्ममुनिमालोक्य रत्नत्रयविराजितम्। शान्तो बभूव सन्तप्तो लोहपिण्डो यथाम्भसा ॥५॥
तुरंगादर्वतीर्याशु तं प्रणम्य महामुदा। धर्ममाकर्ण्य जैनेन्द्रं सुरेन्द्राद्यैः समर्चितम् ॥६॥
सम्यक्त्वाणुव्रतान्युच्चैः समादाय सुभक्तितः। सन्तुष्टः पृष्टवानित्थं सुधीः पद्मरथो नृपः ॥७॥
भो मुने भुवनाधार-जैनधर्माम्बुधौ विधो। वक्तृत्वादिगुणोपेत-स्त्वादृशः पुरुषोत्तमः ॥८॥
किं कोपि वर्तते क्वापि परो वा नेति धीधन। सन्देहो मानसे मेऽस्ति ब्रूहि त्वं करुणापरः ॥९॥
तच्छ्रुत्वा स मुनिः प्राह सुधर्मो जैनतत्ववित्। शृणु त्वं भो महीनाथ चम्पायां विबुधार्चितः ॥१०॥
तीर्थकृद्वासुपूज्योस्ति द्वादशो भवशर्मदः। स कोटिभास्करोत्कृष्ट-कान्तिसन्दोहसाधिकः ॥११॥
तस्य श्रीवासुपूज्यस्य ज्ञानदीप्तिगुणोदये। अन्तरं मे तरां चास्ति मेरुसर्षपयोरिव ॥१२॥
तदाकर्ण्य मुनेर्वाक्यं धर्मप्रीतिविधायकम्। तत्पादवन्दनाभक्त्यै संजातः सोत्सवो नृपः ॥१३॥
यावच्चचाल सद्भूत्या प्रभाते प्रीतिनिर्भरः। यावद्धन्वन्तरिर्नाम्ना सुधीर्विश्वानुलोमवाक् ॥१४॥
तौ सखायौ सुरौ भूत्वा समागत्य महीतले। तस्य भक्तेः परीक्षार्थं मार्गे सङ्गच्छतो मुदा ॥१५॥

एक दिन पद्मरथ शिकार के लिए वन में गए हुए थे। उन्हें एक खरगोश दीख पड़ा। उन्होंने उसके पीछे अपना घोड़ा दौड़ाया। खरगोश उनकी नजर से ओझल होकर न जाने कहाँ अदृश्य हो गया। पद्मरथ भाग्य से कालगुफा नाम की एक गुहा में जा पहुँचे। वहाँ एक मुनिराज रहते थे। वे बड़े तपस्वी थे। उनका दिव्य देह तप के प्रभाव से अपूर्व तेज धारण कर रहा था। उनका नाम था सुधर्म। पद्मरथ रत्नत्रय विभूषित और परम शान्त मुनिराज के पवित्र दर्शन से बहुत शान्त हुए। जैसे तपा हुआ लौहपिंड जल से शान्त हो जाता है। वे उसी समय घोड़े पर से उतर पड़े और मुनिराज को भक्तिपूर्वक नमस्कार कर उनके द्वारा धर्म का पवित्र उपदेश सुना। उपदेश उन्हें बहुत रुचा। उन्होंने सम्यक्त्व पूर्वक अणुव्रत ग्रहण किए। इसके बाद उन्होंने मुनिराज से पूछा–हे प्रभो! हे संसार के आधार! इस समय जिनधर्मरूप समुद्र को बढ़ाने वाले आप सरीखे गुणज्ञ चन्द्रमा और भी कोई है या नहीं? और है तो कहाँ हैं? हे करुणासागर! मेरे इस सन्देह को मिटाइए ॥३-९॥

उत्तर में मुनिराज ने कहा–राजन्! चम्पानगरी में इस समय बारहवें तीर्थंकर भगवान् वासुपूज्य विराजमान हैं। उनके भौतिक शरीर के तेज की समानता तो अनेक सूर्य मिलाकर भी नहीं कर सकते और उनके अनन्त ज्ञानादि गुणों के देखते हुए मुझमें और उनमें राई और सुमेरु का अन्तर है। भगवान् वासुपूज्य का समाचार सुनकर पद्मरथ को उनके दर्शनों की अत्यन्त उत्कण्ठा हुई वे उसी समय फिर वहाँ से बड़े वैभव के साथ भगवान् के दर्शनों के लिए चले। यह हाल धन्वन्तरी और विश्वानुलोम नाम के दो देवों को जान पड़ा। सो वे पद्मरथ की परीक्षा के लिए मध्यलोक में आए। उन्होंने पद्मरथ की भक्ति की दृढ़ता देखने के लिए रास्ते में उन पर उपद्रव करना शुरू किया। पहले उन्होंने उन्हें एक

दर्शयामासतु: कष्टं कालसर्पं तिरोगतम्। मायया छत्रभंगं च पुरो दाहादिकं पुन: ॥१६॥
वातोद्धूतमहाधूली-पाषाणपतनादिकम्। अकालेऽपि महावृष्टिं निमग्नं कर्दमे द्विपम् ॥१७॥
मन्त्र्यादिभिस्तदा वार्य-माणोपि बहुधा नृप:। अमङ्गलशते सति गम्यते नैव भूपते: ॥१८॥
नम: श्रीवासुपूज्याय भणित्वेति प्रसन्नधी:। कर्दमे प्रेरयामास भक्तिमान्निजकुंजरम् ॥१९॥
तथाभूतं तमालोक्य जिनभक्तिभरान्वितम्। स्वमायामुपसंहृत्य संप्रशस्य सुरोत्तमौ ॥२०॥
सर्वरोगापहं हारं भेरीं योजननादिनीम्। धर्मानुरागतस्तस्मै दत्वा स्वस्थानकं गतौ ॥२१॥
यस्य चित्ते जिनेन्द्राणां भक्ति: सन्तिष्ठते सदा। सिध्यन्ति सर्वकार्याणि तस्य नैवात्र संशय: ॥२२॥
ततो पद्मरथो राजा प्रहृष्टहृदयाम्बुज:। गत्वा चम्पापुरीं तत्र दृष्ट्वा त्रैलोक्यमङ्गलम् ॥२३॥
समवादिसृतौ संस्थं प्रातिहार्यादिभूषितम्। सुरासुरनराधीश-समर्चितपदद्वयम् ॥२४॥
केवलज्ञाननिर्णीत-विश्वतत्त्वोपदेशकम्। अनन्तभवसम्बद्ध-महामिथ्यात्वनाशकम् ॥२५॥
वासुपूज्यजिनाधीशं समभ्यर्च्य सुभक्तित:। स्तुत्वा स्तोत्रैस्तथा नत्वा श्रुत्वा तत्वं जिनोदितम् ॥२६॥
दीक्षामादाय जैनेन्द्रीं पादमूले जिनेशिन:। संजातो गणभृच्चारु-चतुर्ज्ञानविराजित: ॥२७॥

भयंकर कालसर्प दिखलाया, इसके बाद राज्यछत्र का भंग, अग्नि का लगना, प्रचण्ड वायु द्वारा पर्वत और पत्थरों का गिरना, असमय में भयंकर जलवर्षा और खूब कीचड़मय मार्ग और उसमें फँसा हाथी आदि दिखलाया। यह उपद्रव देखकर साथ के सब लोग भय के मारे अधमरे हो गए। मंत्रियों ने यात्रा अमंगलमय बतलाकर पद्मरथ से पीछे लौट चलने के लिए आग्रह किया परन्तु पद्मरथ ने किसी की बात नहीं सुनी और बड़ी प्रसन्नता के साथ ''नम: श्रीवासुपूज्याय'' कहकर अपना हाथी आगे बढ़ाया। पद्मरथ की इस प्रकार अचल भक्ति देखकर दोनों देवों ने उनकी बहुत-बहुत प्रशंसा की। इसके बाद वे पद्मरथ को सब रोगों को नष्ट करने वाला एक दिव्य हार और एक बहुत सुन्दर वीणा, जिसकी आवाज एक योजन पर्यन्त सुनाई पड़ती है, देकर अपने स्थान चले गए। ठीक कहा है-जिनके हृदय में जिनभगवान् की भक्ति सदा विद्यमान रहती है, उनके सब काम सिद्ध हों, इसमें कोई सन्देह नहीं ॥१०-२२॥

पद्मरथ ने चम्पानगरी में पहुँच कर समवसरण में विराजे हुए, आठ प्रातिहार्यों से विभूषित, देव, विद्याधर, राजा, महाराजाओं द्वारा पूज्य, केवलज्ञान द्वारा संसार के सब पदार्थों को जानकर धर्म का उपदेश करते हुए और अनन्त जन्मों में बाँधे हुए मिथ्यात्व को नष्ट करने वाले भगवान् वासुपूज्य के पवित्र दर्शन किए, उनकी पूजा की, स्तुति की और उपदेश सुना। भगवान् के उपदेश का उनके हृदय पर बहुत प्रभाव पड़ा। वे उसी समय जिनदीक्षा लेकर तपस्वी हो गए। प्रव्रजित होते ही उनके परिणाम इतने विशुद्ध हुए कि उन्हें अवधि और मन:पर्ययज्ञान हो गया। भगवान् वासुपूज्य के वे

अतो भव्यैः सदा कार्या जिनभक्तिः सुशर्मदा। त्यक्त्वा मिथ्यामतं शीघ्रं स्वर्गमोक्षसुखाप्तये ॥२८॥
यथा पद्मरथो राजा जिनभक्तिपरोभवत्। अन्यैश्चापि महाभव्यै-र्भवितव्यं तथा श्रिये ॥२९॥
यद्भक्तिर्भुवनत्रयेऽत्र नितरां निर्वाणसंसाधिनी सामान्येन सुरेन्द्रखेचरनराधीशादिशर्मप्रदा।
स श्रीमान्मुनिपुंगवः शुचितरः सत्केवलोद्योतकोदद्यात्सारसुखं समस्तजगतो पूज्यः सतां सेवितः ॥३०॥

इति कथाकोशे जिनभक्तपद्मरथस्य कथा समाप्ता।

२१. पञ्चनमस्कारमंत्रप्रभावकथा।

नत्वा पंच गुरून्भक्त्या पञ्चमीगतिसिद्धये। कथा पञ्चनमस्कार-फलस्योच्चैर्निगद्यते ॥१॥
अंगदेशे सुविख्याते चम्पायां चारुलोचनः। प्रतापनिर्जितारातिर्जातो राजा नृवाहनः ॥२॥
श्रेष्ठि वृषभदासाख्यो-र्हद्दासी मानसप्रियः। श्रीजिनेन्द्रपदाम्भोज-सेवनैकलसत्क्रियः ॥३॥
श्रेष्ठिनस्तस्य गोपालः कदाचित्पुण्ययोगतः। स्वेच्छया गृहमागच्छन्नरण्ये भुवनोत्तमम् ॥४॥

गणधर हुए। इसलिए भव्य पुरुषों को उचित है कि वे मिथ्यात्व छोड़कर स्वर्ग-मोक्ष को देने वाली जिनभगवान् की भक्ति निरन्तर पवित्र भावों के साथ करें और जिस प्रकार पद्मरथ सच्चा जिनभक्त हुआ, उसी प्रकार वे भी हों ॥२३-२९॥

जिनभक्ति सब प्रकार का सांसारिक सुख देती है और परम्परा से मोक्ष की प्राप्ति का कारण है, जो केवलज्ञान द्वारा संसार के प्रकाशक हैं और सत्पुरुषों द्वारा पूज्य हैं, वे भगवान् वासुपूज्य सारे संसार को मोक्ष सुख प्रदान करें, कर्मों के उदय से घोर दुःख सहते हुए जीवों का उद्धार करें ॥३०॥

२१. पंच नमस्कार मंत्र-माहात्म्य कथा

मोक्षसुख प्रदान करने वाले श्रीअर्हन्त, सिद्ध, आचार्य, उपाध्याय और साधुओं को नमस्कार कर पंच नमस्कार मंत्र की आराधना द्वारा फल प्राप्त करने वाले सुदर्शन की कथा लिखी जाती है ॥१॥

अंगदेश की राजधानी चम्पानगरी में गजवाहन नाम के एक राजा हो चुके हैं। वे बहुत खूबसूरत और साथ ही बड़े भारी शूरवीर थे। अपने तेज से शत्रुओं पर विजय प्राप्त कर सारे राज्य को उन्होंने निष्कण्टक बना लिया था। वहीं वृषभदत्त नाम के एक सेठ रहा करते थे। उनकी गृहिणी का नाम था अर्हद्दासी। अपनी प्रिया पर सेठ का बहुत प्रेम था। वह भी सच्ची पतिभक्ति परायणा थी, सुशीला थी, सती थी, वह सदा जिनभक्ति में तत्पर रहा करती थी ॥२-३॥

वृषभदत्त के यहाँ एक ग्वाल नौकर था। एक दिन वह वन से अपने घर पर आ रहा था। समय शीतकाल का था। जाड़ा खूब पड़ रहा था। उस समय रास्ते में उसे एक ऋद्धिधारी मुनिराज के दर्शन हुए, जो कि एक शिला पर ध्यान लगाये बैठे हुए थे। उन्हें देखकर ग्वाले को बड़ी दया आयी। वह

दृष्ट्वा चारणयोगीन्द्रं यथा स्तिमितमद्भुतम्। अभ्रावकाशिनं शीत-काले तीव्रे शिलास्थितम् ॥५॥
अहो कथं मुनीन्द्रोसौ वस्त्रादिपरिवर्जितः। शिलापीठे स्थितो रात्रिं कष्टतो गमयिष्यति ॥६॥
संचिन्त्य गृहं गत्वा मुनिं स्मृत्वा सुमानसे। तथा पश्चिमरात्रौ च गृहीत्वा महिषीः पुनः ॥७॥
तत्रागत्य समालोक्य तं मुनिं ध्यानसंस्थितम्। तच्छरीरे महाशीतं तुषारं पतितं द्रुतम् ॥८॥
स्फेटयित्वा स्वहस्तेन मुनेः पादादिमर्दनम्। कृत्वा स्वास्थ्यं निधायोच्चैः पुण्यभागी बभूव च ॥९॥
प्रभातेऽसौ महाध्यान-मुपसंहृत्य धीधनः। अयमासन्नभव्योस्ति मत्वेति मुनिनायकः ॥१०॥
''णमो अरिहंताणं''
इति दत्वा महामंत्रं तस्मै स्वर्मोक्षदायकम्। तमेवाशु समुच्चार्य नभोभागे स्वयं गतः ॥११॥
गोपालस्य तदा तस्य तन्मंत्रस्योपरि स्थिरा। संजाता महती श्रद्धा सैव लोके सुखप्रदा ॥१२॥
ततोऽसौ सर्वकार्येषु गोपालः परमादरात्। पूर्वमेव महामंत्रं तमुच्चरति सुस्फुटम् ॥१३॥
एकदा श्रेष्ठिना तेन पठन्मंत्रं स गोपकः। किं रे करोषि चापल्यं वारितश्चेति धीमता ॥१४॥
तेनोक्ते पूर्ववृत्तान्ते श्रेष्ठी सन्तुष्टमानसः। संजगाद त्वमेवात्र धन्यो गोप महीतले ॥१५॥
येन दृष्टौ मुनीन्द्रस्य पादौ त्रैलोक्यपूजितौ। भवन्ति भुवने सन्तः सत्यं धर्मानुरागिणः ॥१६॥
अथैकदा महिष्योस्य वल्लिक्षेत्रं प्रभक्षितुम्। गंगानदीं समुत्तीर्य निर्गता निजलीलया ॥१७॥

यह विचार कर, कि अहा! इनके पास कुछ वस्त्र नहीं है और जाड़ा इतने जोर का पड़ रहा है, तब भी ये इसी शिला पर बैठे हुए ही रात बिता डालेंगे, अपने घर गया और आधी रात के समय अपनी स्त्री को साथ लिए मुनिराज के पास आया। मुनिराज को जिस अवस्था में बैठे हुए वह देख गया था, वे अब भी उसी तरह ध्यानस्थ बैठे हुए थे। उनका सारा शरीर ओस से भीग रहा था। उनकी यह हालत देखकर दयाबुद्धि से उसने मुनिराज के शरीर पर से ओस को साफ किया और सारी रात वह उनके पाँव दाबता रहा, सब तरह उनकी वैयावृत्य करता रहा। सबेरा होते ही मुनिराज का ध्यान पूरा हुआ। उन्होंने आँख उठाकर देखा तो ग्वाले को पास ही बैठा पाया। मुनिराज ने ग्वाले को निकट भव्य समझकर पंच नमस्कार मंत्र का उपदेश दिया, जो कि स्वर्ग-मोक्ष की प्राप्ति का कारण है। इसके बाद मुनिराज भी पंचनमस्कार मंत्र का उच्चारण कर आकाश में विहार कर गए ॥४-११॥

ग्वाले की धीरे-धीरे मंत्र पर बहुत श्रद्धा हो गई। वह किसी भी काम को जब करने लगता तो पहले ही नमस्कार मंत्र का स्मरण कर लिया करता था। एक दिन जब ग्वाला मंत्र पढ़ रहा था, तब उसे उसके सेठ ने सुन लिया। वे मुस्कराकर बोले-क्यों रे, तूने यह मंत्र कहाँ से उड़ाया? ग्वाले ने सब बात अपने स्वामी से कह दी। सेठ ने प्रसन्न होकर ग्वाले से कहा-भाई, क्या हुआ यदि तू छोटे भी कुल में उत्पन्न हुआ? पर आज तू कृतार्थ हुआ, जो तुझे त्रिलोकपूज्य मुनिराज के दर्शन हुए। सच बात है सत्पुरुष धर्म के बड़े प्रेमी हुआ करते हैं ॥१२-१६॥

एक दिन ग्वाला भैंसें चराने के लिए जंगल में गया। समय वर्षा का था। नदी नाले सब पूर थे। उसकी भैंसे चरने के लिए नदी पार जाने लगी। सो इन्हें लौटा लाने की इच्छा से ग्वाला भी उनके पीछे

तां निवर्तयितुं सोपि महिषीर्गोपकस्तदा। तं सुमंत्रं समुच्चार्य नद्यां झंपां प्रदत्तवान् ॥१८॥
तत्रादृश्योरुकाष्ठेन विद्धोसौ जठरे तदा। प्रच्छन्नदुर्जनेनेव तीक्ष्णेन प्राणहारिणा ॥१९॥
मृत्वा निदानतस्तस्य श्रेष्ठिनस्तनयोभवत्। अर्हद्दास्याः शुभे गर्भे पुण्यान्नाम्ना सुदर्शनः ॥२०॥
रूपलावण्यसौभाग्य-धनधान्यसमन्वितः। संजातः कृतपुण्यानां किमप्यत्र न दुर्लभम् ॥२१॥
ततः सागरदत्तस्य पुत्रीं नाम्ना मनोरमाम्। जातां सागरसेनायां युक्त्याऽसौ परिणीतवान् ॥२२॥
एकदासौ महाश्रेष्ठी सुधीर्वृषभदत्तवाक्। त्रिधा वैराग्यमासाद्य धृत्वा तं स्वपदे सुतम् ॥२३॥
मुनेः समाधिगुप्तस्य पादमूले सुभक्तितः। दीक्षामादाय जैनेन्द्रीं मुनिर्जातो विचक्षणः ॥२४॥
तदा सुदर्शनो धीमान्प्राप्य श्रेष्ठीपदं महत्। राजादिपूजितो जातः सुप्रसिद्धो बभूव च ॥२५॥
नित्यं श्रीमज्जिनेन्द्रोक्त-श्रावकाचारतत्परः। दानपूजास्वशीलादि-धर्मकर्मपरोऽभवत् ॥२६॥

ही नदी में कूद पड़ा। जहाँ वह कूदा वहीं एक नुकीला लकड़ा गड़ा हुआ था। सो उसके कूदते ही लकड़े की नोंक उसके पेट में जा घुसी। उससे उसका पेट फट गया। वह उसी समय मर गया। वह जिस समय नदी में कूदा था, उस समय सदा के नियमानुसार पंचनमस्कार मंत्र का उच्चारण कर कूदा था। वह मरकर मंत्र के प्रभाव से वृषभदत्त के यहाँ पुत्र हुआ। वह जाता तो कहीं स्वर्ग में पर, उसने वृषभदत्त के यही उत्पन्न होने का निदान कर लिया था, इसलिए निदान उसकी ऊँची गति का बाधक बन गया। उसका नाम रखा गया सुदर्शन। सुदर्शन बड़ा सुन्दर था। उसका जन्म माता-पिता के लिए खूब उत्कर्ष का कारण हुआ। पहले से कई गुणी सम्पत्ति उनके पास बढ़ गई। सच है-पुण्यवानों के लिए कहीं भी कुछ कमी नहीं रहती ॥१७-२१॥

वहीं एक सागरदत्त सेठ रहता था। उसकी स्त्री का नाम था सागरसेना। उसके एक पुत्री थी। उसका नाम मनोरमा था। वह बहुत सुन्दरी थी। देवकन्यायें भी उसकी रूपमाधुरी को देखकर शर्मा जाती थी। उसका ब्याह सुदर्शन के साथ हुआ। दोनों दम्पत्ति सुख से रहने लगे॥२२॥

एक दिन वृषभदत्त समाधिगुप्त मुनिराज के दर्शन करने के लिए गए। वहाँ उन्होंने मुनिराज द्वारा धर्मोपदेश सुना। उपदेश उन्हें बहुत रुचा और उसका प्रभाव भी उन पर खूब पड़ा। संसार की दशा देखकर उन्हें बहुत वैराग्य हुआ। वे घर का कारोबार सुदर्शन के सुपुर्द कर समाधिगुप्त मुनिराज के पास दीक्षा लेकर तपस्वी बन गए ॥२३-२४॥

पिता के प्रव्रजित हो जाने पर सुदर्शन ने भी खूब प्रतिष्ठा सम्पादन की। राजदरबार में भी उसकी पिता के जैसी ही पूछताछ होने लगी। वह सर्वसाधारण में खूब प्रसिद्ध हो गया। सुदर्शन न केवल लौकिक कामों में ही प्रेम करता था किन्तु वह उस समय एक बहुत धार्मिक पुरुषों में गिना जाता था। वह सदा जिनभगवान् की भक्ति में तत्पर रहता, श्रावक के व्रतों का श्रद्धा के साथ पालन करता, दान देता, पूजन स्वाध्यान करता। यह सब होने पर भी ब्रह्मचर्य में बहुत दृढ़ था ॥२५-२६॥

कदाचिद्भूभुजा सार्द्धं वनक्रीडनहेतवे। गतोऽसौ निजसंभूत्या श्रेष्ठी सर्वगुणान्वितः ॥२७॥
तं दृष्ट्वा श्रेष्ठिनं तत्र निधानं रूपसम्पदः। तद्राज्ञी विह्वलीभूया-ऽभयाख्या प्राह धात्रिकाम् ॥२८॥
कोयं भो धात्रिके धीमान्नरकोटिशिरोमणिः। तयोक्तं देवि विख्यातो राजश्रेष्ठी सुदर्शनः ॥२९॥
तच्छ्रुत्वा सावदद्राज्ञी यद्यमुं पुरुषोत्तमम्। त्वं ददासि समानीय तदाजीवाम्यहं ध्रुवम् ॥३०॥

एक दिन मगधाधीश्वर गजवाहन के साथ सुदर्शन वनविहार के लिए गया। राजा के साथ राजमहिषी भी थी। सुदर्शन सुन्दर तो था ही, सो उसे देखकर राजरानी काम के पाश में बुरी तरह फँसी। उसने अपनी एक परिचारिका को बुलाकर पूछा-क्यों तू जानती है कि महाराज के साथ आगन्तुक कौन है? और ये कहाँ रहते हैं? ॥२७-२८॥

परिचारिका ने कहा-देवी, आप नहीं जानती, ये तो अपने प्रसिद्ध राजश्रेष्ठी सुदर्शन हैं ॥२९॥

राजमहिषी ने कहा-हाँ! तब तो ये अपनी राजधानी के भूषण हैं। अरी, देख तो इनका रूप कितना सुन्दर, कितना मन को अपनी ओर खींचने वाला है? मैंने तो आज तक ऐसा सुन्दर नररत्न नहीं देखा। मैं तो कहती हूँ, इनका रूप स्वर्ग के देवों से भी कही बढ़कर है। तूने भी कभी ऐसा सुन्दर पुरुष देखा है ॥३०॥

वह बोली-महारानी जी, इसमें कोई सन्देह नहीं कि इनके समान सुन्दर पुरुष रत्न तीन लोक में भी नहीं मिलेगा।

राजमहिषी ने उसे अपने अनुकूल देखकर कहा-हाँ तो तुझसे मुझे एक बात कहनी है।

वह बोली-वह क्या, महारानी जी?

महारानी बोली-पर तू उसे पूरा कर दे तो मैं कहूँ, वह बोली-देवी, भला, मैं तो आपकी दासी हूँ फिर मुझे आपकी आज्ञा पालन करने में क्यों इनकार होगा। आप निःसंकोच होकर कहिए।

जहाँ तक मेरा बस चलेगा, मैं उसे पूरा करूँगी। महारानी ने कहा-देख, मुझे तेरे पर पूर्ण विश्वास है, इसलिए मैं अपने मन की बात तुझे कहती हूँ। देखना कहीं मुझे धोखा न देना? तो सुन, मैं जिस सुदर्शन की बात तुझसे कह आई हूँ, वह मेरे हृदय में स्थान पा गया है। उसके बिना तुझे संसार निःसार और सूना जान पड़ता है। तू यदि किसी प्रयत्न से मुझे उससे मिला दे तब ही मेरा जीवन बच सकता है। अन्यथा समझ संसार में मेरा जीवन कुछ ही दिनों के लिए हैं।

वह महारानी की बात सुनकर पहले तो कुछ विस्मित सी हुई, पर थी तो आखिर पैसे की गुलाम न? उसने महारानी की आशा पूरी कर देने के बदले में अपने को आशातीत धन की प्राप्ति होगी, इस विचार से कहा-महारानी जी, बस यही बात है? इसी के लिए आप इतनी निराश हुई जाती है? जब तक मेरे शरीर में दम है तब तक आपको निराश होने का कोई कारण नहीं दिखाई पड़ता। मैं आपकी आशा अवश्य पूरी करूँगी। आप घबराये नहीं। बहुत ठीक लिखा है-

धात्री जगाद भो देवि करिष्यामि तवेप्सितम्। अवश्यं दुष्टनारीभिर्निन्दितं क्रियते न किम् ॥३१॥
स श्रीसुदर्शनः श्रेष्ठी विशिष्टश्रावकव्रती। अष्टम्याञ्च चतुर्दश्यां रात्रौ भीमे श्मशानके ॥३२॥
स्थित्वा वैराग्यभावेन योगं गृह्णाति शुद्धधीः। तन्मत्वा धात्रिका सापि पापकर्मविचक्षणा ॥३३॥
कुंभकारगृहं गत्वा मृत्तिकापुत्तलं तदा। नरप्रमाणकं शीघ्रं कारयित्वा सुवाससा ॥३४॥
वेष्टयित्वा समादाय राज्ञीपार्श्वे चचाल सा। किमेतद्धात्रिके ब्रूहि धृतेति द्वारपालकैः ॥३५॥
कौटिल्येन तया तत्र क्षिप्त्वा पुत्तलकं क्षितौ। भग्नमालोक्य कोपेन प्रोक्तं धात्र्या सुधूर्तया ॥३६॥
रे रे दुष्टाः सुपापिष्ठा भवद्भिः निन्दितं कृतम्। राज्या नरव्रतं चास्ति पूजयित्वा सुपुत्तलम् ॥३७॥

असभ्य और दुष्ट स्त्रियाँ कौन-सा बुरा काम नहीं करती? अभया की धाय भी ऐसी ही स्त्रियों में थी। फिर वह क्यों इस काम में अपना हाथ न डालती? वह अब सुदर्शन को राजमहल में ले आने के प्रयत्न में लग गई ॥३१॥

सुदर्शन एक धर्मात्मा श्रावक था। वह वैरागी था। संसार में रहता तब भी सदा उससे छुटकारा पाने के उपाय में लगा रहता था। इसलिए वह ध्यान का भी अभ्यास किया करता था। अष्टमी और चतुर्दशी को रात्रि में वह भयंकर श्मशान में जाकर ध्यान करता। धाय को सुदर्शन के ध्यान की बात मालूम थी। उसने सुदर्शन को राजमहल में लिवा ले जाने को एक षड्यंत्र रचा। एक दिन वह एक कुम्हार के पास गई और उससे मनुष्य के आकार का एक मिट्टी का पुतला बनवाया और उसे वस्त्र पहनाकर वह राजमहल लिवा ले चली। महल में प्रवेश करते समय पहरेदारों ने उसे रोका और पूछा कि यह क्या है? वह उसका कुछ उत्तर न देकर आगे बढ़ी। पहरेदारों ने उसे नहीं जाने दिया। उसने गुस्से का ढोंग बनाकर पुतले को जमीन पर दे मारा। वह चूर-चूर हो गया। इसके साथ ही उसने अकड़कर कहा-पापियों, दुष्टों, तुमने आज बड़ा अनर्थ किया है। तुम नहीं जानते कि महारानी के नरव्रत था, सो वे इस पुतले की पूजा करके भोजन करती। सो तुमने इसे फोड़ डाला है। अब वे कभी भोजन नहीं करेंगी। देखो, मैं अब महारानी से जाकर तुम्हारी दुष्टता का हाल कहती हूँ। फिर वे सबेरे ही तुम्हारी क्या गति करती हैं? तुम्हारी दुष्टता सुनकर ही वे तुम्हें जान से मरवा डालेंगी। धाय की धूर्यता से बेचारे पहरेदारों के प्राण सूख गए। उन्हें काटो तो खून नहीं। मारे डर के वे थर-थर काँपने लगे। वे उसके पाँवों में पड़कर अपने प्राण बचाने की उससे भीख माँगने लगे। बड़ी आरजू मिन्नत करने पर उसने उनसे कहा-तुम्हारी यह दशा देखकर मुझे दया आती है। खैर, मैं तुम्हारे बचाने का उपाय करूँगी। पर याद रखना अब तुम मुझे कोई काम करते समय मत छेड़ना। तुमने इस पुतले को तो फोड़ डाला, बतलाओ अब महारानी आज अपना व्रत कैसे पूरा करेंगी? और न इसी समय और दूसरा पुतला ही बन सकता है। अस्तु। फिर भी मैं कुछ उपाय करती हूँ। जहाँ तक बन पड़ा वहाँ तक तो दूसरा पुतला ही बनवाकर लाती हूँ और यदि नहीं बन सका तो किसी जिन्दा ही पुरुष को मुझे थोड़ी देर के लिए लाना पड़ेगा। तुम्हें सचेत करती हूँ कि उस समय मैं किसी से नहीं बोलूँगी, इसलिए तुम मुझसे कुछ कहना सुनना नहीं। बेचारे पहरेदारों को तो अपनी जान की पड़ी

पश्चात्तया च कर्त्तव्यं भोजनं नान्यथा ध्रुवम्। अतः प्रभाते मार्यन्ते भवन्तोऽन्यायकारिणः ॥३८॥
तदा भीत्वा जगुस्तेपि भो मातस्त्वं क्षमां कुरु। कदाचित्कोपि नैव त्वां वारयत्यत्र सर्वथा ॥३९॥
एवं सर्वान्वशीकृत्य धात्री तान्द्वारपालकान्। अष्टम्याश्च तथा रात्रौ गत्वा घोरे श्मशानके ॥४०॥
कायोत्सर्गस्थितं दृष्ट्वा श्रेष्ठिनं तं सुदर्शनम्। राज्ञ्याः समर्पयामास तत्रानीय प्रयत्नतः ॥४१॥
आलिङ्गनादिविज्ञानैः सा राज्ञी कामपीडिता। नानोपसर्गकं चक्रेऽभयाख्या तस्य धीमतः ॥४२॥
सः श्रेष्ठी मेरुवद्धीरो गंभीरो जलधेस्तराम्। श्रीमज्जैनेन्द्रपादाब्ज-सेवनैकमधुव्रतः ॥४३॥
एतस्मादुपसर्गान्मे यदि शान्तिर्भविष्यति। पाणिपात्रे तदाहारं करिष्यामि सुनिश्चयात् ॥४४॥
इति प्रतिज्ञामादाय संस्थितः काष्ठवत्तराम्। सन्तः कष्टशतैश्चापि चारित्रान्न चलत्यलम् ॥४५॥
असमर्था तदा भूत्वा राज्ञी तच्छीलखण्डने। संविदार्य नखैर्देहं स्वकीयं दुष्टमानसा ॥४६॥
इदं मे श्रेष्ठिना चक्रे सा चकारेति पूत्कृतिम्। किं न कुर्वन्ति पापिन्यो निन्द्यं दुष्टस्त्रियो भुवि ॥४७॥

हुई थी, इसलिए उन्होंने हाथ जोड़कर कह दिया कि–अच्छा, हम लोग आप से अब कुछ नहीं कहेंगे। आप अपना काम निडर हो कर कीजिए। इस प्रकार वह धूर्त्ता सब पहरेदारों को अपने वश कर उसी समय श्मशान में पहुँची ॥३२-४०॥

श्मशान जलती चिताओं से बड़ा भयंकर बन रहा था उसी भयंकर श्मशान में सुदर्शन कायोत्सर्ग ध्यान कर रहा था। महारानी अभया की परिचारिका ने उसे उठा लाकर महारानी के सुपुर्द कर दिया। अभया अपनी परिचारिका पर बहुत प्रसन्न हुई सुदर्शन को प्राप्त कर उसके आनन्द का कुछ ठिकाना न रहा, मानो उसे अपनी मनमानी निधि मिल गई। वह काम से तो अत्यन्त पीड़ित थी ही, उसने सुदर्शन से बहुत अनुनय विनय किया, इसलिए कि वह उसकी इच्छा पूरी करके उसे सुखी करे, कामाग्नि से जलते हुए शरीर को आलिंगन सुधा प्रदान कर शीतल करें। पर सुदर्शन ने उसकी एक भी बात का उत्तर नहीं दिया। यह देख रानी ने उसके साथ अनेक प्रकार की कुचेष्टाएँ करनी आरंभ की, जिससे वह विचलित हो जाये। पर तब भी रानी की इच्छा पूरी नहीं हुई। सुदर्शन मेरु सा निश्चल और समुद्र सा गंभीर बना रहकर जिनभगवान् के चरणों का ध्यान करने लगा। उसने प्रतिज्ञा की कि यदि मैं इस उपसर्ग से बच गया तो अब संसार में रहकर साधु हो जाऊँगा। प्रतिज्ञा कर वह काष्ठ की तरह निश्चल होकर ध्यान करने लगा। बहुत ठीक लिखा है–

सत्पुरुष सैकड़ों कष्ट सह लेते हैं, पर अपने व्रत से कभी नहीं चलते। अनेक तरह का यत्न, अनेक कुचेष्टाएँ करने पर भी जब रानी सुदर्शन को शील शैल से न गिरा सकी,उसे तिल भर भी विचलित नहीं कर सकी, तब शर्मिन्दा होकर उसने सुदर्शन को कष्ट देने के लिए एक नया ही ढोंग रचा। उसने अपने शरीर को नखों से खूब खुजा डाला, अपने कपड़े फाड़ डाले, भूषण तोड़-फोड़ डाले और यह कहती हुई वह जोर-जोर से हिचकियाँ ले लेकर रोने लगी कि हाय! इस पापी दुराचारी ने मेरी यह हालत कर दी। मैंने तो इसे भाई समझकर अपने महल बुलाया था। मुझे क्या

तदाकर्ण्य महीनाथो महाकोपेन कम्पितः। नीत्वा श्मशानके श्रेष्ठिं मार्यतामिति चोक्तवान् ॥४८॥
ततो राजभटैः सोपि समानीतः श्मशानके। तत्रैकेन गले तस्य खड्गो मुक्तो दुरात्मना ॥४९॥
तदा तच्छीलमाहात्म्यात्स खड्गः सम्पतन्नपि। पुष्पमालाभवत्कण्ठे सुगन्धीकृतदिङ्मुखा ॥५०॥
जय त्वं त्रिजगत्पूज्य-जिनपादाब्जषट्पद। विशिष्टधीरहो श्रेष्ठिन् श्रावकाचारकोविदः ॥५१॥
इत्यादिभिः शुभैर्वाक्यैः पुष्पवृष्ट्यादिभिस्तराम्। देवास्तं पूजयन्ति स्म लसद्धर्मानुरागतः ॥५२॥
अहो पुण्यवतां पुंसां कष्टं चापि सुखायते। तस्माद्भव्यैः प्रयत्नेन कार्यं पुण्यं जिनोदितम् ॥५३॥
पुण्यं श्रीमज्जिनेन्द्राणां भक्त्या यच्चार्चनं सदा। पात्रदानं तथा शीलं सोपवासादिकं मतम् !! ५४॥
श्रुत्वा तद्वृतमाहात्म्यं श्रेष्ठिनो भुवनोत्तमम्। राज्ञा लोकैः समागत्य सत्क्षमां कारितः सुधीः ॥५५॥
ततः सुदर्शनः श्रेष्ठी संसारादेर्विरक्तवान्। दत्वा श्रेष्ठिपदं शीघ्रं सुकान्ताख्यसुताय च ॥५६॥
नत्वा मुनिं जगत्पूतं भक्त्या विमलवाहनम्। दीक्षामादाय जैनेन्द्रीं मुनिर्भूत्वातिनिर्मलः ॥५७॥

मालूम था कि यह इतना दुष्ट होगा? हाय! दौड़ो!! मुझे बचाओ! मेरी रक्षा करो! यह पापी मेरा सर्वनाश करना चाहता है। रानी के चिल्लाते ही बहुत से नौकर-चाकर दौड़े आए और सुदर्शन को बाँधकर वे महाराज के पास लिवा ले गए।

सच है—पापिनी और दुष्ट स्त्रियाँ संसार में कौन-सा बुरा काम नहीं करती? अभया भी ऐसे ही स्त्रियों में एक थी। इसलिए उसने अपना चरित कर बतलाया। महाराज को जब यह हाल मालूम हुआ, तो उन्होंने क्रोध में आकर सुदर्शन को मार डालने का हुकुम दे दिया। महाराज की आज्ञा होते ही जल्लाद लोग उसे श्मशान में लिवा ले गए। उनमें से एक ने अपनी तेज तलवार सुदर्शन के गले पर दे मारी। पर यह हुआ क्या? जो सुदर्शन को उससे कुछ कष्ट नहीं पहुँचा और उलटा उसे वह तलवार का मारना ऐसा जान पड़ा, मानो किसी ने उस पर फूल की माला फेंकी हो। जान पड़ा यह सब उसके अखण्ड शीलव्रत का प्रभाव था। ऐसे कष्ट के समय देवों ने आकर उसकी रक्षा की और स्तुति की कि सुदर्शन, तुम धन्य हो, तुम सच्चे जिनभक्त हो, सच्चे श्रावक हो, तुम्हारा ब्रह्मचर्य अखण्ड है, तुम्हारा हृदय सुमेरु से भी कहीं अधिक निश्चल है। इस प्रकार प्रशंसा कर देवों ने उस पर सुगन्धित फूलों की वर्षा की और धर्मप्रेम के वश होकर उसकी पूजा की। सच है—पुण्यवानों के लिए दुःख भी सुख के रूप में परिणत हो जाता है। इसलिए भव्य पुरुषों को जिनभगवान् के कहे मार्ग से पुण्यकर्म करना चाहिए। भक्तिपूर्वक जिनभगवान् की पूजा करना, पात्रों को दान देना, ब्रह्मचर्य का पालना, अणुव्रतों का पालन करना, अनाथ, अपाहिज दुखियों को सहायता देना, विद्यालय, पाठशाला खुलवाना, उनमें सहायता देना, विद्यार्थियों को छात्र-वृत्तियाँ देना आदि पुण्यकर्म है। सुदर्शन के व्रतमाहात्म्य का हाल महाराज को मालूम हुआ। वे उसी समय सुदर्शन के पास आए और उन्होंने उससे अपने अविचार के लिए क्षमा माँगी ॥४१-५५॥

सुदर्शन को संसार की इस लीला से बड़ा वैराग्य हुआ। वह अपना कारोबार सब सुकान्त पुत्र को सौंपकर वन में गया और त्रिलोकपूज्य विमलवाहन मुनिराज को नमस्कार कर उनके पास प्रव्रजित

दर्शनज्ञानचारित्र-तपोत्यागैः सुशर्मदम्। केवलज्ञानमुत्पाद्य देवेन्द्राद्यैः समर्चितः ॥५८॥
भव्यान्सम्बोध्य पूतात्मा स्वर्गमोक्षसुखप्रदः। निराबाधसुखोपेतां मुक्तिं संप्राप्तवान्सुधीः ॥५९॥
इत्थं ज्ञात्वा महाभव्यैः कर्त्तव्यः परया मुदा। सारपञ्चनमस्कार-विश्वासः शर्मदः सताम् ॥६०॥
स जयति जिनचन्द्रः केवलज्ञानकान्तिर्मुदितसकलभव्योत्कृष्टनेत्रोत्पलौघः।
असुरसुरनरेन्द्रैः खेचरेन्द्रैः सुभक्त्या श्रुतजलधिमुनीन्द्रैः सेवितः शर्मदाता ॥६१॥

इति कथाकोशे पंचनमस्कारमंत्रप्रभावकथा समाप्ता।

२२. श्रीयममुनेः कथा

श्री जिनं भारतीं साधुं प्रणम्य परया मुदा। खण्डश्लोकैः कथा जाता कथ्यते सा सुखप्रदा ॥१॥
औढ्रदेशेऽत्र विख्याते धर्माख्यनगरे वरे। जातो राजा यमो धीमान्सर्वशास्त्रविचक्षणः ॥२॥
तद्राज्ञी धनवत्याख्या गर्दभाख्यः सुतस्तयोः। सुताभूत्कोणिका नाम्ना रूपलावण्यमण्डिता ॥३॥
तस्यैव यमभूपस्य पुत्राः पञ्चशतानि च। अन्यराज्ञीषु संजाता जैनधर्मधुरन्धराः ॥४॥
दीर्घनामाभवन्मंत्री मंत्रकर्मपरायणः। एवं राज्यं प्रकुर्वाणः स राजा सुखतः स्थितः ॥५॥

हो गया। मुनि होकर सुदर्शन ने दर्शन, ज्ञान, चारित्र और तपश्चर्या द्वारा घातिया कर्मों का नाश कर केवलज्ञान प्राप्त किया और अनेक भव्य पुरुषों को कल्याण का मार्ग दिखलाकर तथा देवादि द्वारा पूज्य होकर अन्त में वह निराबाध, अनन्त सुखमय मोक्षधाम में पहुँच गया ॥५६-५९॥

इस प्रकार नमस्कार मंत्र का माहात्म्य जानकर भव्यों को उचित है कि वे प्रसन्नता के साथ उस पर विश्वास करें और प्रतिदिन उसकी आराधना करें ॥६०॥

धर्मात्माओं के नेत्ररूपी कुमुद-पुष्पों के प्रफुल्लित करने वाले, आनन्द देने वाले और श्रुतज्ञान के समुद्र तथा मुनि, देव, विद्याधर, चक्रवर्ती आदि द्वारा पूज्य, केवलज्ञानरूपी कान्ति से शोभायमान भगवान् जिनचन्द्र संसार में सदा काल रहें ॥६१॥

२२. यम मुनि की कथा

मैं देव, गुरु और जिनवाणी को नमस्कार कर यम मुनि की कथा लिखता हूँ, जिन्होंने बहुत ही थोड़ा ज्ञान होने पर भी अपने को मुक्ति का पात्र बना लिया और अन्त में वे मोक्ष गए। यह कथा सब सुख की देने वाली है ॥१॥

उड्रदेश के अन्तर्गत धर्म नाम का प्रसिद्ध और सुन्दर शहर है। उसके राजा थे यम। वे बुद्धिमान् और शास्त्रज्ञ थे। उनकी रानी का नाम धनवती था। धनवती के एक पुत्र और एक पुत्री थी। उनके नाम थे गर्दभ और कोणिका। कोणिका बहुत सुन्दरी थी। धनवती के अतिरिक्त राजा की और भी कई रानियाँ थीं। उनके पुत्रों की संख्या पाँच सौ थी। ये पाँच सौ ही भाई धर्मात्मा थे और संसार से उदासीन रहा करते थे। राजमंत्री का नाम दीर्घ था वह बहुत बुद्धिमान् और राजनीति का अच्छा जानकार था। राजा इन सब साधनों से बहुत सुखी थे और राज्य भी बड़ी शान्ति से करते थे ॥२-५॥

नैमित्तिकेन सम्प्रोक्तमेकदा तस्य भूपतेः। यः कोणिकापतिर्भावी स भावी सर्वभूमिपः ॥६॥
तच्छ्रुत्वा स यमो राजा तां पुत्रीं भूरि यत्नतः। प्रच्छन्नं पालयामास सुधीर्भूमिगृहे सदा ॥७॥
एकदा नगरे तत्र मुनिपञ्चशतैर्युतः। महामुनिः समायातः सुधर्माख्यो जगद्धितः ॥८॥
वन्दनार्थं तदा सर्वे पूजाद्रव्येण संयुताः। प्रचेलुः परया भक्त्या पौराः सन्तुष्टमानसाः ॥९॥
तान् गच्छतो जनान् वीक्ष्य स भूपो ज्ञानगर्वतः। कुर्वन्निन्दां मुनीन्द्राणां तत्रैव गतवांस्तदा ॥१०॥
निन्दया ज्ञानगर्वाच्च तत्कालं तस्य भूपतेः। सर्वबोधक्षयो जातो लक्ष्मीर्वा पापकर्मणा ॥११॥
ततोऽष्टधा महाकष्टं गर्वो दुःखशतप्रदम्। ज्ञानविज्ञानमिच्छन्तो न कुर्युर्भव्यदेहिनः ॥१२॥
निर्मदोसौ ततो भूत्वा गजो वा दन्तवर्जितः। नत्वा मुनीन्महाभक्त्या संस्थितस्तत्र भूपतिः ॥१३॥
धर्ममाकर्ण्य जैनेन्द्रं द्विधा शर्मप्रदायकम्। त्रिधा वैराग्यसम्पन्नो यमो भूत्वा स्वमानसे ॥१४॥

एक दिन एक राज ज्योतिषी ने कोणिका के लक्षण वगैरह देखकर राजा से कहा–महाराज, राजकुमारी बड़ी भाग्यवती है। जो इसका पति होगा वह सारी पृथ्वी का स्वामी होगा। यह सुनकर राजा बहुत खुश हुए और उस दिन से वे उसकी बड़ी सावधानी से रक्षा करने लगे, उन्होंने उसके लिए एक बहुत सुन्दर और भव्य तलग्रह बनवा दिया। वह इसलिए कि उसे और छोटा-मोटा बलवान् राजा न देख पाए ॥६-७॥

एक दिन उसकी राजधानी में पाँच सौ मुनियों का संघ आया। संघ के आचार्य थे महामुनि सुधर्माचार्य। संसार का हित करना उनका एक मात्र व्रत था। बड़े आनन्द उत्साह के साथ शहर के सब लोग अनेक प्रकार के पूजन द्रव्य हाथों में लिए हुए आचार्य की पूजा के लिए गए। उन्हें जाते हुए देख राजा भी अपने पाण्डित्य के अभिमान में आकर मुनियों की निन्दा करते हुए उनके पास गए। मुनि निन्दा और ज्ञान का अभिमान करने से उसी समय उसके कोई ऐसा कर्म का तीव्र उदय आया कि उसकी सब बुद्धि नष्ट हो गई वे महामूर्ख बन गए। इसलिए जो उत्तम पुरुष हैं और ज्ञानी बनना चाहते हैं, उन्हें उचित है कि वे कभी ज्ञान का गर्व न करें और ज्ञानहीन का क्यों? किन्तु कुल, जाति, बल, ऋद्धि, ऐश्वर्य, शरीर, तप, पूजा, प्रतिष्ठा आदि किसी का भी गर्व-अभिमान न करें। इनका अभिमान करना बड़ा ही दुःखदायी है ॥८-१२॥

अपनी यह हालत देखकर राजा का होश ठिकाने आया। वे एक साथ ही दाँत रहित हाथी की तरह गर्व रहित हो गए। उन्होंने अपने कृत कर्मों का बहुत पश्चाताप किया और मुनिराज को भक्तिपूर्वक नमस्कार कर उनसे धर्मोपदेश सुना, जो कि जीव मात्र को सुख का देने वाला है। धर्मोपदेश से उन्हें बहुत शान्ति मिली। उसका असर भी उन पर बहुत पड़ा। वे संसार से विरक्त हो गए। वे उसी समय अपने गर्दभ नाम के पुत्र को राज्य सौंपकर अपने अन्य पाँच सौ पुत्रों के साथ, जो कि बालपन ही से वैरागी रहा करते थे, मुनि हो गए। मुनि होने के बाद उन सबने खूब शास्त्रों का अभ्यास किया। आश्चर्य है कि वे पाँच सौ ही भाई खूब विद्वान् हो गए, पर राजा को (यम मुनि

गर्दभाख्यस्वपुत्राय राज्यं दत्वा सुनिश्चलः। युक्तैः पञ्चशतैः पुत्रैर्मुनिर्भक्त्या बभूव सः ॥१५॥
तत्पुत्रास्ते तदा सर्वे जाताः सर्वश्रुतैर्युताः। मुनेः पञ्चनमस्कार-मात्रं नायाति तस्य तु ॥१६॥
ततो लज्जापरो भूत्वा गुरुं पृष्ट्वा सुभक्तितः। यमो मुनिर्जिनेन्द्राणां तीर्थयात्रासु निर्गतः ॥१७॥
तत्रैकाकी मुनिः सोपि कुर्वन्यात्रां सुखप्रदाम्। एकदा च महामार्गे गच्छन्स्वेच्छाशयो मुदा ॥१८॥
दृष्ट्वा रथं नरोपेतं नीयमानं च गर्दभैः। भक्षणार्थं यवक्षेत्रं हरितं प्रति लोलुपैः ॥१९॥
रथोपरिस्थितेनोच्चैर्ध्रियमाणं च कष्टतः। खण्डश्लोकं तदा चक्रे किंचिद्बुद्धेः प्रसादतः ॥२०॥

''कट्टसि पुण णिक्खेवसि रे गद्दहा जवं पेच्छसि खादितुं।''

तथैकदा सुधीर्मार्गे बालक्रीडां प्रकुर्वताम्। लीलया लोकपुत्राणां बिलेऽगात्काष्ठकोणिका ॥२१॥
तां कोणिकामपश्यन्तो जातास्ते व्यग्रमानसाः। तां विलोक्य मुनिः सोपि खण्डं श्लोकं चकार सः ॥२२॥

''अण्णत्थ किं पलोवह तुम्हे पत्थणिबुद्धिं या छिद्दे अत्थई कोणिआ।''

एकदा पद्मिनीपत्र-छन्नदुःसर्पसम्मुखम्। भीत्या गच्छन्तमालोक्य मण्डूकं च यमोवदत् ॥२३॥

''अह्मादो णत्थि भयं दीहादो दीसदे भयं तुम्हे।''

एतैः खण्डैस्त्रिभिः श्लोकैः स मुनिर्नित्यमेव च। स्वाध्यायं श्रीजिनेन्द्राणां वन्दनादिकमद्भुतम् ॥२४॥

को) पंचनमस्कार मंत्र का उच्चारण करना तब भी नहीं आया। अपनी यह दशा देखकर यम मुनि बड़े शर्मिन्दा और दुःखी हुए उन्होंने वहाँ रहना उचित न समझ अपने गुरु से तीर्थयात्रा करने की आज्ञा ली और अकेले ही वहाँ से निकल पड़े। यम मुनि अकेले ही यात्रा करते हुए एक दिन स्वच्छन्द होकर रास्ते में जा रहे थे। जाते हुए उन्होंने एक रथ देखा। रथ में गधे जुते हुए थे और उस पर आदमी बैठा हुआ था। गधे उसे एक हरे धान के खेत की ओर लिए जा रहे थे। रास्ते में मुनि को जाते हुए देखकर रथ पर बैठे हुए मनुष्य ने उन्हें पकड़ लिया और लगा वह उन्हें कष्ट पहुँचाने। मुनि ने कुछ ज्ञान का क्षयोपशम हो जाने से एक खण्ड गाथा बनाकर पढ़ी। वह गाथा यह थी–॥१३-२०॥

''रे गधों, कष्ट उठाओगे, तो तुम जब भी खा सकोगे।''

इसी तरह एक दिन कुछ बालक खेल रहे थे। वहीं कोणिका भी न जाने किसी तरह पहुँच गई उसे देखकर सब बालक डरे। उस समय कोणिका को देखकर यम मुनि ने एक और खण्ड गाथा बनाकर आत्मा के प्रति कहा। वह गाथा यह थी– ॥२१-२२॥

''दूसरी ओर क्या देखते हो? तुम्हारी पत्थर सरीखी कठोर बुद्धि को छेदने वाली कोणिका तो है।''

एक दिन यम मुनि ने एक मेंढक को एक कमल पत्र की आड़ में छुपे हुए सर्प की ओर आते हुए देखा। देखकर वे मेंढक से बोले– ॥२३॥

''मुझे-मेरे आत्मा को तो किसी से भय नहीं है। भय है तो तुम्हें।''

बस, यम मुनि ने जो ज्ञान सम्पादन कर पाया, वह इतना था। वे इन्हीं तीन खण्ड गाथाओं का स्वाध्याय करते, पाठ करते और कुछ उन्हें आता नहीं था। इसी तरह पवित्रात्मा और धर्मानुयायी यम

कुर्वंस्तीर्थेषु शुद्धात्मा महाधर्मानुरागतः। गत्वा धर्मपुरोद्याने कायोत्सर्गेण संस्थितः ॥२५॥
तमायातं समाकर्ण्य गर्दभो दीर्घकश्च तौ। राज्य गृहीतुमायातो यमोऽयमिति भीवशौ ॥२६॥
अर्धरात्रौ मुनेस्तस्य मारणार्थं दुराशयौ। तत्रागत्य वने शस्त्रो-पेतौ तत्पृष्ठतः स्थितौ ॥२७॥
धिक्राज्यं धिङ्मूर्खत्वं कातरत्वं च धिक्तराम्। निस्पृहाच्च मुनेर्येन शङ्का राज्येभवत्तयोः ॥२८॥
तदा गर्दभदीर्घौ च मुनेर्हत्याभयं गतौ। खड्गस्याकर्षणं कष्टं चक्रतुस्तु पुनः पुनः ॥२९॥
तस्मिन्नेव क्षणे तेन स्वाध्यायं गृह्णता मुदा। श्लोकार्धं पठितं पूर्वं यमेन मुनिनेति च ॥३०॥
''कड्डसि पुण णिक्खेवसि रे गद्दहा जवं पेच्छसि खादिदुं''
तच्छ्रुत्वा गर्दभेनोक्तं मंत्रिणं प्रति भो सुधीः। आवां द्वौ लक्षितौ दुष्टौ मुनीन्द्रेण महाधिया ॥३१॥
पठिते द्वितीयार्धे च गर्दभो हि पुनर्जगौ। अहो दीर्घ मुनीन्द्रोऽसौ राज्यार्थं नागतो ध्रुवम् ॥३२॥
कोणिका भगिनी मे च या स्थिता भूमिसद्गृहे। महास्नेहेन तां वक्तुं समायातो विचक्षणः ॥३३॥
तृतीयार्द्धं मुनिः प्राह तच्छ्रुत्वा गर्दभेन वै। स्वचित्ते चिन्तितं चेति दृष्टोयं दीर्घकः कुधीः ॥३४॥
मां हंतुमिच्छति क्रूरस्तद्गुप्तं स्नेहतो मम। बुद्धिं दातुं समायातः पिता मे मुनिसत्तमः ॥३५॥
ततस्तौ परया भक्त्या त्यक्त्वा दुष्टाशयं द्रुतम्। तं प्रणम्यं मुनिं पूतं शुद्धचारित्रमण्डितम् ॥३६॥

मुनि ने अनेक तीर्थों की यात्रा करते हुए धर्मपुर की ओर आ निकले। वे शहर के बाहर एक बगीचे में कायोत्सर्ग ध्यान करने लगे। उनके पीछे लौट आने का हाल उनके पुत्र गर्दभ और राजमंत्री दीर्घ को ज्ञात हुआ। उन्होंने समझा कि ये हमसे राज्य लेने को आए हैं। सो वे दोनों मुनि के मारने का विचार कर आधी रात के समय वन में गए और तलवार खींचकर उनके पीछे खड़े हो गए। आचार्य कहते हैं कि– ॥२४-२७॥

ऐसे राज्य को, ऐसी मूर्खता और ऐसे डरपोकपने को धिक्कार है, जिससे एक निस्पृह और संसार त्यागी मुनि के द्वारा राज्य के छिन जाने का उन्हें भय हुआ। गर्दभ और दीर्घ, मुनि की हत्या करने को तो आए पर उनकी हिम्मत उन्हें मारने की नहीं पड़ी। वे बार-बार अपनी तलवारों को म्यान में रखने लगे और बाहर निकालने लगे। उसी समय यम मुनि ने अपनी स्वाध्याय की पहली गाथा पड़ी, जो कि ऊपर लिखी जा चुकी है। उसे सुनकर गर्दभ ने अपने मंत्री से कहा–जान पड़ता है मुनि ने हम दोनों को देख लिया। पर साथ ही जब मुनि ने दूसरी गाथा पड़ी तब उसने कहा–नहीं जी, मुनिराज राज्य लेने को नहीं आए हैं। मैंने जो वैसा समझा वह मेरा भ्रम था। मेरी बहिन कोणिका को प्रेम के वश कुछ कहने को ये आए हुए जान पड़ते हैं। इसके बाद जब मुनिराज ने तीसरी आधी गाथा भी पढ़ी तब उसे सुनकर गर्दभ ने अपने मन में उसका यह अर्थ समझा कि ''मंत्री दीर्घ बड़ा कूट है और मुझे मारना चाहता है'' यही बात पिताजी, प्रेम के वश हो तुझे कहकर सावधान करने को आए हैं परन्तु थोड़ी देर बाद ही उसका यह सन्देह भी दूर हो गया। उन्होंने अपने हृदय की सब दुष्टता छोड़कर बड़ी भक्ति के साथ पवित्र चारित्र के धारक मुनिराज को प्रणाम किया

धर्ममाकर्ण्य जैनेन्द्रं स्वर्गमोक्षप्रदायकम्। तुष्टौ गर्दभदीर्घौ च संजातौ श्रावकोत्तमौ ॥३७॥
ततो यमो मुनीन्द्रोऽसौ महावैराग्यमण्डितः। जिनोक्तैः शुद्धचारित्रैर्जातः सप्तर्द्धिसंयुतः ॥३८॥
यतोऽसौ ज्ञानलेशेन संजातो गुणभाजनम्। यतो भव्यैः सदाराध्यं जैनं ज्ञानं जगद्धितम् ॥३९॥

स्तोकं ज्ञानमपि प्रसिद्धमहिमा भक्त्या समाराध्य च
जातोऽसौ मुनिसत्तमो गुणनिधिः सप्तर्द्धियुक्तो महान्।
ज्ञात्वेत्थं त्रिजगत्प्रपूज्यजिनपैः प्रोक्तं सुशर्मप्रदं
ज्ञानं निर्वृतिसाधनं शुचितरं सन्तः श्रयन्तु श्रिये ॥४०॥

इति कथाकोशे श्री यममुनेः कथा समाप्ता।

२३. श्रीदृढसूर्यस्य कथा

नत्वा जिनं जगत्पूज्यं लोकालोकप्रकाशकम्। वक्ष्येहं दृढसूर्यस्य वृत्तं विश्वासदायकम् ॥१॥
उज्जयिन्यां महाराजो नगर्यां धनपालवाक्। तद्राज्ञी धनवत्याख्या सैकदा निजलीलया ॥२॥

और उनसे धर्म का उपदेश सुना, जो कि स्वर्ग-मोक्ष का देने वाला है। उपदेश सुनकर वे दोनों बहुत प्रसन्न हुए। इसके बाद वे श्रावकधर्म ग्रहण कर अपने स्थान लौट गए ॥२८-३७॥

इधर यमधर मुनि भी अपने चारित्र को दिन दूना निर्मल करने लगे, परिणामों को वैराग्य की ओर खूब लगाने लगे। उसके प्रभाव से थोड़े ही दिनों में उन्हें सातों ऋद्धियाँ प्राप्त हो गई ॥३८॥

अहा! नाममात्र ज्ञान द्वारा भी यम मुनिराज बड़े ज्ञानी हुए, उन्होंने अपनी उन्नति को अन्तिम सीढ़ी पर पहुँचा दिया। इसलिए भव्य पुरुषों को संसार का हित करने वाले जिन भगवान् के द्वारा उपदिष्ट सम्यग्ज्ञान की सदा आराधना करना चाहिए। देखो, यम मुनिराज को बहुत थोड़ा ज्ञान था, पर उसकी उन्होंने बड़ी भक्ति और श्रद्धा के साथ आराधना की। उसके प्रभाव से वे संसार में प्रसिद्ध हुए मुनियों में प्रधान और मान्य हुए और सातों ऋद्धियाँ उन्हें प्राप्त हुई इसलिए सज्जन धर्मात्मा पुरुषों को उचित है कि वे त्रिलोकपूज्य जिनभगवान् द्वारा उपदिष्ट, सब सुखों का देने वाला और मोक्ष-प्राप्ति का कारण अत्यन्त पवित्र सम्यग्ज्ञान प्राप्त करने का यत्न करें ॥३९-४०॥

२३. दृढ़सूर्य की कथा

लोकालोक के प्रकाश करने वाले, केवलज्ञान द्वारा संसार के सब पदार्थों को जानकर उनका स्वरूप कहने वाले और देवेन्द्रादि द्वारा पूज्य श्री जिनभगवान् को नमस्कार कर मैं दृढ़सूर्य की कथा लिखता हूँ, जो कि जीवों को विश्वास दिलाने वाली है ॥१॥

उज्जयिनी के राजा जिस समय धनपाल थे, उस समय की यह कथा है। धनपाल उस समय के राजाओं में एक प्रसिद्ध राजा थे। उनकी महारानी का नाम धनवती था। एक दिन धनवती अपनी

वसन्तर्तौ वनं प्राप्ता क्रीडार्थं सुजनैर्वृता। तत्र तस्या गले हारं धनवत्या मनोहरम् ॥३॥
दृष्ट्वा बसन्तसेनाख्या गणिका धनलम्पटा। किं हारेण विनाऽनेन जीवितं निष्फलं मम ॥४॥
सञ्चिन्त्येति गृहं गत्वा संस्थिता दुःखमानसा। तदा रात्रौ समागत्य चोरोसौ दृढसूर्यकः ॥५॥
तां जगाद तदासक्तः किं प्रिये दुःखतः स्थिता। तयोक्तं चेत्समानीय राज्ञीहारं ददासि मे ॥६॥
तदा जीवाम्यहं धीर नान्यथा त्वं च मे प्रियः। तच्छ्रुत्वा दृढसूर्योसौ तां समुद्धीर्य वल्लभाम् ॥७॥
राजगेहं प्रविश्योच्चैर्गृहीत्वा हारमुत्तमम्। निशायां निर्गतः शीघ्रं किं न कुर्वन्ति लम्पटाः ॥८॥
हारोद्योतेन चोरोसौ यमपाशेन संधृतः। कष्टतः कोट्टपालेन शूले प्रोतो नृपाज्ञया ॥९॥
प्रभाते धनदत्ताख्यं संगच्छन्तं जिनालये। दृष्ट्वा कण्ठगतः प्राणस्तस्करः श्रेष्ठिनं जगौ ॥१०॥
त्वं दयालुर्महाधीर जिनपादाब्जषट्पद। महातृषातुरस्योच्चैस्तोयं देहि मम द्रुतम् ॥११॥
श्रेष्ठी तस्योपकारार्थं संजगादेति शुद्धधीः। वर्षैर्द्वादशभिर्दत्ता विद्या मे गुरुणा मुदा ॥१२॥
जलार्थं गच्छतः सा मे विस्मृतिं याति साम्प्रतम्। तां धृत्वा यत्नतो विद्या-मागताय ददासि चेत् ॥१३॥

सखियों के साथ वसन्तश्री देखने को उपवन में गई। उसके गले में एक बहुत कीमती रत्नों का हार पड़ा हुआ था। उसे वहीं आई हुए एक वसन्तसेना नाम की वेश्या ने देखा। उसे देखकर उसका मन उसकी प्राप्ति के लिए आकुलित हो उठा। उसके बिना उसे अपना जीवन निष्फल जान पड़ने लगा। वह दुःखी होकर अपने घर लौटी। सारे दिन वह उदास रही। जब रात के समय उसका प्रेमी दृढ़सूर्य आया तब उसने उसे उदास देखकर पूछा–प्रिये, कहो! कहो!! तुम आज अप्रसन्न कैसी? बसन्तसेना ने उसे अपने लिए इस प्रकार खेदित देखकर कहा–आज मैं उपवन में गई हुई थी। वहाँ मैंने राजरानी के गले में एक हार देखा हैं। वह बहुत ही सुन्दर है। उसे आप लाकर दें तब ही मेरा जीवन रह सकता है और तब ही आप मेरे सच्चे प्रेमी हो सकते हैं ॥२-४॥

दृढ़सूर्य हार के लिए चला। वह सीधा राजमहल पहुँचा। भाग्य से हार उसके हाथ पड़ गया। वह उसे लिए हुए राजमहल से निकला। सच है लोभी, लंपटी कौन काम नहीं करते? उसे निकलते ही पहरेदारों ने पकड़ लिया। सबेरा होने पर राजसभा में पहुँचाया गया। राजा ने उसे शूली पर चढ़ाने की आज्ञा दी। वह शूली पर चढ़ाया गया। इसी समय धनदत्त नाम के एक सेठ दर्शन करने को जिनमन्दिर जा रहे थे। दृढ़सूर्य ने उनके चेहरे और चाल-ढाल से उन्हें दयालु समझ कर उनसे कहा–सेठजी, आप बड़े जिनभक्त और दयावान् हैं, इसलिए आपसे प्रार्थना है कि मैं इस समय बड़ा प्यासा हूँ, सो आप कहीं से थोड़ा सा जल लाकर मुझे पिला दें, तो आपका बड़ा उपकारी रहूँगा। धनदत्त ने उसकी भलाई की इच्छा से कहा–''भाई, मैं जल तो लाता हूँ, पर इस बीच में तुम्हें एक बात करनी होगी। वह यह कि–मैंने कोई बारह वर्ष के कठिन परिश्रम द्वारा अपने गुरु महाराज की कृपा से एक विद्या सीखी है, सो मैं तुम्हारे लिए जल लेने को जाते समय कदाचित् उसे भूल जाऊँ तो उससे मेरा सब श्रम व्यर्थ जायेगा और मुझे बहुत हानि भी उठानी पड़ेगी, इसलिए उसे मैं तुम्हें सौंप जाता हूँ।

तदा तोयं समानीय मया तुभ्यं प्रदीयते। एवं करोमि तेनोक्ते स श्रेष्ठी धर्मतत्त्ववित् ॥१४॥
तस्मै पञ्चनमस्कारं स्वर्गमोक्षसुखप्रदम्। कथयित्वा गतो धीमान्सर्वेषां हितकारकः ॥१५॥
स चोरो दृढसूर्यश्च श्रेष्ठिवाक्येषु निश्चलः। तं मंत्रं त्रिजगत्पूतं स्मरन्नुच्चारयन्नपि ॥१६॥
मृत्वा सौधर्मकल्पेभू-द्देवो नानर्द्धिमण्डितः। अहो पञ्चनमस्कारैर्जायते किं न देहिनाम् ॥१७॥
तदा केनापि सम्प्रोक्तं दुर्जनेन महीपतेः। भो देव धनदत्ताख्यः श्रेष्ठी ते न्यायकारकः ॥१८॥
गत्वा चोरसमीपं च मंत्रं तेन समं व्यधात्। अतोऽस्य मन्दिरे तस्य धनं तिष्ठति निश्चितम् ॥१९॥
धिग्दुर्जनं दुराचारं वृथा प्राणप्रहारिणम्। सर्वलोकहितानां च सतां यो वक्ति दुर्वचः ॥२०॥
तच्छ्रुत्वा धनपालाख्यः स भूपः कोपकम्पितः। बन्धनार्थं गृहे तस्य प्रेषयामास किङ्करान् ॥२१॥
तस्मिन्नेव क्षणे सोपि देवो ज्ञात्वाऽवधीक्षणात्। श्रेष्ठिनो गृहरक्षार्थं शीघ्रमागत्य भक्तितः ॥२२॥
द्वारपालः स्वयं भूत्वा संस्थितो यष्टिमंडितः। तद्गृहं विशतः क्रूरान्वारयामास किंकरान् ॥२३॥
कुर्वन्तश्च हठं तत्र भटास्ते दुष्टमानसाः। मायया मारिताः सर्वे तदाऽनेन स्वशक्तितः ॥२४॥
तत्समाकर्ण्य भूपेन प्रेषिताः बहवो भटाः। तेन तेऽपि तथा सर्वे मारिताः क्षणतस्तराम् ॥२५॥

मैं जब जल लेकर आऊँ तब तुम मुझे वह लौटा देना। यह कहकर परोपकारी धनदत्त स्वर्ग-मोक्ष का सुख देने वाला पंच नमस्कार मंत्र उसे सिखाकर जल लेने को चला गया। वह जल लेकर वापस लौटा, इतने में दृढ़सूर्य की जान निकल गई, वह मर गया। पर वह मरा नमस्कार मंत्र का ध्यान करता हुआ, उसे सेठ के इस कहने पर पूर्ण विश्वास हो गया था कि वह विद्या महाफल के देने वाली है। नमस्कार मंत्र के प्रभाव से वह सौधर्मस्वर्ग जाकर देव हुआ। सच है-पंच नमस्कारमंत्र के प्रभाव से मनुष्य को क्या प्राप्त नहीं होता? इसी समय किसी एक दुष्ट ने राजा से धनदत्त की शिकायत कर दी कि, महाराज, धनदत्त ने चोर के साथ कुछ गुप्त मंत्रणा की है, इसलिए उसके घर में चोरी का धन होना चाहिए। नहीं तो एक चोर से बातचीत करने का उसे क्या मतलब? ऐसे दुष्टों को और उनके दुराचारों को धिक्कार है, जो व्यर्थ ही दूसरों के प्राण लेने के यत्न में रहते हैं और परोपकार करने वाले सज्जनों को भी जो दुर्वचन कहते रहते हैं ॥५-२०॥

राजा सुनते ही क्रोध के मारे आग बबूला हो गए। उन्होंने बिना कुछ सोचे विचारे धनदत्त को बाँध ले आने के लिए अपने सैनिक को भेजा। इसी समय अवधिज्ञान द्वारा यह हाल देव को, जो कि दृढ़सूर्य का जीव था, मालूम हो गया। अपने उपकारी को, कष्ट में फँसा देखकर वह उसी समय उज्जयिनी में आया और स्वयं ही द्वारपाल बनकर उसके घर के दरवाजे पर पहरा देने लगा। जब सैनिक धनदत्त को पकड़ने के लिए घर में घुसने लगे तब देव ने उन्हें रोका। पर जब वे हठ करने लगे और जबरन घर में घुसने लगे तब देव ने भी अपनी माया से उन सब को एक क्षण भर में धराशायी कर दिया। राजा ने यह हाल सुनकर और भी बहुत से अपने अच्छे-अच्छे शूरवीरों को भेजा, देव ने उन्हें

तदा रुष्टो महीनाथस्तत्रायातो बलान्वितः। एकेन तेन तच्छीघ्रं बलं सर्वं तथा हतम् ॥२६॥
नष्टो राजा भयग्रस्तो देवेन भणितस्त्विति। श्रेष्ठिनः शरणं यासि तदा ते जीवितं ध्रुवम् ॥२७॥
ततो राजा जिनेन्द्राणां मन्दिरे शर्ममन्दिरे। रक्ष रक्षेति संजल्पन् श्रेष्ठिनः शरणं व्रजः ॥२८॥
श्रेष्ठी तदा विशिष्टात्मा संजगाद सुरं प्रति। कस्त्वं धीर किमर्थं च त्वयेदं निर्मितं वद ॥२९॥
दृढसूर्यचरो देवः श्रेष्ठिनं तं प्रणम्य च। स्वरूपं प्रकटीकृत्य प्रोवाच मधुरं वचः ॥३०॥
अहो श्रेष्ठिन् जिनाधीश-चरणार्चनकोविदः। अहं चोरो महापापी दृढसूर्याभिधानकः ॥३१॥
त्वत्प्रसादेन भो स्वामिन्स्वर्गे सौधर्मसंज्ञके। देवो महर्द्धिको जातो ज्ञात्वा पूर्वभवं सुधीः ॥३२॥
महोपकारिणस्तेऽत्र रक्षार्थं च समागतः। मयेदं सेवकेनोच्चैः कार्यं सर्वं विनिर्मितम् ॥३३॥
एवं प्रोक्त्वा महाभक्त्या श्रेष्ठिनं गुणशालिनम्। रत्नादिभिः समभ्यर्च्य स देवः स्वर्गमाप्तवान् ॥३४॥
स श्रेष्ठी धनदत्ताख्यो जिनभक्तिपरायणः। पूजितश्च नरेन्द्राद्यैर्धार्मिकः कैर्न पूज्यते ॥३५॥

सर्वे ते धनपालभूपतिमुखा दृष्ट्वा प्रभावं शुभं
श्रीमत्पञ्चनमस्कृतेश्च नितरां सन्तुष्टसच्चेतसः।

भी धराशायी कर दिया। इससे राजा का क्रोध अत्यन्त बढ़ गया। तब वे स्वयं अपनी सेना को लेकर धनदत्त पर आ चढ़े। पर उस एक ही देव ने उनकी सारी सेना को तीन तेरह कर दिया। यह देखकर राजा भय के मारे भगाने लगे। उन्हें भागते हुए देखकर देव ने उनका पीछा किया और वह उनसे बोला– आप कहीं नहीं भाग सकते। आपके जीने का एक उपाय है, आप धनदत्त के आश्रय में जायें और उससे अपने प्राणों की भीख माँगें। बिना ऐसा किए आपकी कुशल नहीं। सुनकर ही राजा धनदत्त के पास जिनमन्दिर गए और उन्होंने सेठ से प्रार्थना की कि–धनदत्त, मेरी रक्षा करो! मुझे बचाओ! मैं तुम्हारे शरण में हूँ। सेठ ने देव को पीछे ही आया हुआ देखकर कहा–तुम कौन हो? और क्यों हमारे महाराज को कष्ट दे रहे हो? देव ने अपनी माया समेटी और सेठ को प्रणाम करके कहा हे जिनभक्त सेठ! मैं वही पापी चोर का जीव हूँ, जिसे तुमने नमस्कार मंत्र उपदेश दिया था। उसी के प्रभाव से मैं सौधर्मस्वर्ग में महर्द्धिक देव हुआ हूँ। मैंने अवधिज्ञान द्वारा जब अपना पूर्वभव का हाल जाना तब मुझे ज्ञात हुआ कि इस समय मेरे उपकारी पर बड़ी आपत्ति आ रही है, इसलिए मैं आया हूँ। यह सब कर्तव्य पूरा करने के लिए और आपकी रक्षा के लिए मैं आया हूँ। यह सब माया मुझ सेवक की ही की हुई है। इस प्रकार सब हाल सेठ से कहकर और रत्नमय भूषणादि से उसका यथोचित सत्कार कर देव स्वर्ग में चला गया। जिनभक्त धनदत्त की परोपकार बुद्धि और दूसरों के दुःख दूर करने की कर्तव्यपरता देखकर राजा वगैरह ने उसका खूब आदर सम्मान किया। सच है–

''**धार्मिकः कैर्न पूज्यते**'' अर्थात् धर्मात्मा का कौन सत्कार नहीं करता? ॥२१-३५॥

राजा और प्रजा के लोग इस प्रकार नमस्कार मंत्र का प्रभाव देखकर बहुत खुश हुए और

श्रीमज्जैनविशुद्धशासनरता जाताः सुभक्त्या श्रिये
भव्यैश्चापि परैर्जिनेन्द्रकथिते धर्मेऽत्र कार्या मतिः ॥३६॥

इति कथाकोशे दृढसूर्यचोरस्य कथा समाप्ता।

२४. यमपालचाण्डालस्य कथा

प्रणम्य श्रीजिनाधीशं शर्मदं धर्महेतवे। मातङ्गः पूजितो देवैस्तच्चरित्रं सतां ब्रुवे ॥१॥
वाणारस्यां महापुर्यां राजाभूत्पाकशासनः। एकदासौ निजे देशे पीडां श्रुत्वातिदारुणाम् ॥२॥
शान्त्यर्थं कार्तिके मासे शुक्ले नन्दीश्वरोत्सवे। अष्टम्यादिदिनान्यष्टौ जीवामारिप्रघोषणाम् ॥३॥
दापयामास भूभर्ता प्रजानां हितकारकः। तदा श्रेष्ठिसुतः पापी सप्तव्यसनतत्परः ॥४॥
धर्मनामा महोद्याने राजकीयं च मेढ्रकम्। हत्वा प्रच्छन्नतः शीघ्रं भक्षयित्वा च तत्पलम् ॥५॥

पवित्र जिनशासन के श्रद्धानी हुए। इसी तरह धर्मात्माओं को भी उचित है कि वे अपने आत्महित के लिए भक्तिपूर्वक जिनभगवान् द्वारा उपदिष्ट धर्म में अपनी बुद्धि को स्थिर करें ॥३६॥

२४. यमपाल चाण्डाल की कथा

मोक्ष सुख के देने वाले श्री जिनभगवान् धर्म प्राप्ति के लिए नमस्कार कर मैं एक ऐसे चाण्डाल की कथा लिखता हूँ, जिसकी कि देवों तक ने पूजा की है ॥१॥

काशी के राजा पाकशासन ने एक समय अपनी प्रजा को महामारी से पीड़ित देखकर ढिंढोरा पिटवा दिया कि ''नन्दीश्वरपर्व में आठ दिन पर्यन्त किसी जीव का वध न हो। इस राजाज्ञा का उल्लंघन करने वाला प्राणदंड का भागी होगा।'' वही एक सेठ पुत्र रहता था। उसका नाम तो था धर्म, पर असल में वह महा अधर्मी था। वह सात व्यसनों का सेवन करने वाला था। उसे मांस खाने की बुरी आदत पड़ी हुई थी। एक दिन भी बिना मांस खाये उससे नहीं रहा जाता था। एक दिन वह गुप्त रीति से राजा के बगीचे में गया। वहाँ एक राजा का खास मेढ़ा बँधा करता था। उसने उसे मार डाला और उसके कच्चे ही मांस को खाकर वह उसकी हड्डियों को एक गड्ढे में गाड़ गया। सच है– व्यसनी मनुष्य नियम में पाप में सदा तत्पर रहा करते है॥२–६॥

दूसरे दिन जब राजा ने बगीचे में मेढ़ा नहीं देखा और उसके लिए बहुत खोज करने पर भी जब उसका पता नहीं चला, तब उन्होंने उसका शोध लगाने को अपने बहुत से गुप्तचर नियुक्त किए। एक गुप्तचर राजा के बाग में भी चला गया। वहाँ का बागमाली रात को सोते समय सेठ पुत्र के द्वारा मेंढे के मारे जाने का हाल अपनी स्त्री से कह रहा था, उसे गुप्तचर ने सुन लिया। सुनकर उसने महाराज से जाकर सब हाल कह दिया। राजा को इससे सेठ पुत्र पर बड़ा गुस्सा आया। उन्होंने कोतवाल को बुलाकर आज्ञा की कि, पापी धर्म ने एक तो जीव हिंसा की और दूसरे राजाज्ञा का

तदस्थीनि च गर्तायां निक्षिप्य गतवान्कुधीः। व्यसनेन युतो जीवः सत्यं पापपरो भवेत् ॥६॥
मेढ्रकादर्शने तत्र पाकशासनभूभुजा। सर्वत्र स्वपुरीमध्ये चराः शीघ्रं निरूपिताः ॥७॥
उद्यानपालको रात्रौ तदा गेहे स्वकामिनीम्। जगौ मेढ्रकवृत्तान्तं श्रेष्ठिपुत्रेण निर्मितम् ॥८॥
तां वार्तां च समाकर्ण्य चरः प्राह महीपतिम्। स राजा यमदण्डाख्यं कोट्टपालं क्रुधावदत् ॥९॥
धर्मकः श्रेष्ठिनः पुत्रः पापी धर्मपराङ्मुखः। कोट्टपाल त्वया शूला-रोहणं कार्यतामिति ॥१०॥
कोट्टपालेन तं नीत्वा शूलाभ्यर्णे च धर्मकम्। मातंगो यमपालाख्यः समाहूतः स्वकिंकरैः ॥११॥
सर्वौषधिमुनेः पार्श्वे मातङ्गेनैकदा मुदा। धर्ममाकर्ण्य जैनेन्द्रं लोकद्वयसुखप्रदम् ॥१२॥
चतुर्दशीदिने जीवं मारयामि न सर्वथा। एतद्व्रतं जगत्पूतं गृहीतं वर्तते पुरा ॥१३॥
यतश्चागच्छतो वीक्ष्य कोट्टपालस्य किंकरान्। मातंगो व्रतरक्षार्थं संजगाद स्वकामिनीम् ॥१४॥
प्रिये ग्रामं गतश्चेति वद त्वं किंकरान्प्रति। इति प्रोक्त्वा द्रुतं गेह-कोणेऽसौ संस्थितः सुधीः ॥१५॥
सा मातंगी तदा प्राह गतो ग्रामं मम प्रियः। तच्छ्रुत्वा सुभटैरुक्तं हा पापी दैववञ्चितः ॥१६॥
अद्यैवाभरणोपेतः श्रेष्ठिपुत्रस्य मारणे। गतो ग्रामं तदाकर्ण्य मातंग्या स्वर्णलोभतः ॥१७॥
गतो ग्राममिति व्यक्तं पूत्कुर्वत्या च मायया। हस्तस्य संज्ञया शीघ्रं मातंगो दर्शितस्तया ॥१८॥

उल्लंघन किया है, इसलिए उसे ले जाकर शूली चढ़ा दो। कोतवाल राजाज्ञा के अनुसार धर्म को शूली के स्थान पर लिवा ले गया और नौकरों को भेजकर उसने यमपाल चाण्डाल को इसलिए बुलाया कि वह धर्म को शूली पर चढ़ा दें क्योंकि यह काम उसी के सुपुर्द था। पर यमपाल ने एक दिन सर्वोषधिऋद्धिधारी मुनिराज के द्वारा जिनधर्म का पवित्र उपदेश सुनकर, जो कि दोनों भवों में सुख का देने वाला है, प्रतिज्ञा कि थी कि– ॥७-१२॥

मैं चतुर्दशी के दिन कभी जीवहिंसा नहीं करूँगा। इसलिए उसने राज नौकरों को आते हुए देखकर अपने व्रत की रक्षा के लिए अपनी स्त्री से कहा–प्रिये, किसी को मारने के लिए मुझे बुलाने को राज-नौकर आ रहे हैं, सो तुम उनसे कह देना कि घर में वे नहीं हैं, दूसरे ग्राम गए हुए हैं। इस प्रकार वह चांडाल अपनी प्रिया को समझाकर घर के एक कोने में छुप रहा। जब राज-नौकर उसके घर पर आए और उनसे चाण्डालप्रिया ने अपने स्वामी के बाहर चले जाने का समाचार कहा, तब नौकर ने बड़े खेद के साथ कहा–हाय! वह बड़ा अभागा है। दैव ने उसे धोखा दिया। आज ही तो एक सेठ पुत्र के मारने को मौका आया था और आज ही वह चल दिया। यदि वह आज सेठ पुत्र को मारता तो उसे उसके सब वस्त्राभूषण प्राप्त होते। वस्त्राभूषण का नाम सुनते ही चाण्डालिनी के मुँह में पानी भर आया। वह अपने लोभ के सामने अपने स्वामी का हानि-लाभ कुछ नहीं सोच सकी। उसने रोने को ढोंग बनाकर और यह कहते हुए, कि हाय वे आज ही गाँव को चले गए, आती हुई लक्ष्मी को उन्होंने पाँव से ठुकरा दी, हाथ के इशारे से घर के भीतर छुपे हुए अपने स्वामी को बता दिया। सच है– ॥१३-१८॥

स्त्रीणां स्वभावतो माया किं पुनर्लोभकारणे। प्रज्वलन्नपि दुर्वह्निः किं वाते वाति दारुणे ॥१९॥
गृहान्निःसारितः सोपि चाण्डालः सुवचो जगौ। प्राणत्यागेऽपि जीवोऽद्य मार्यते न मया ध्रुवम् ॥२०॥
राजाग्रेऽपि भटैर्नीतो मातंगो धीरमानसः। जीवघाते चतुर्दश्याम् नियमोस्ति मम प्रभो ॥२१॥
मारयामि हि ततो नैव जीवमद्यैवमब्रवीत्। यस्य धर्मे सुविश्वासः क्वापि भीतिं न याति सः ॥२२॥
श्रेष्ठिपुत्रमहादोषात्ततो रुष्टेन भूभुजा। क्षिप्येते द्वावपि प्रोक्तं शिशुमारह्रदे द्रुतम् ॥२३॥
ततस्तौ कोट्टपालेन यमदण्डेन तेन च। निक्षिप्तौ द्वावपि क्रूरैर्जन्तुभिः संकुले ह्रदे ॥२४॥
धर्महीनः स धर्माख्यो भक्षितः शिशुमारकैः। मातंगो यमपालोसौ निश्चलो व्रतरक्षणे ॥२५॥
तदा तद्व्रतमाहात्म्यात्महाधर्मानुरागतः। सिंहासने समारोप्य देवताभिः शुभैर्जलैः ॥२६॥
अभिषिंच्य प्रहर्षेण दिव्यवस्त्रादिभिः सुधीः। नाना रत्नसुवर्णाद्यैः पूजितः परमादरात् ॥२७॥
तं प्रभावं समालोक्य राजाद्यैः परया मुदा। अभ्यर्चितः स मातंगो यमपालो गुणोज्ज्वलः ॥२८॥
इत्थं ज्ञात्वा महाभव्यैः स्वर्गमोक्षसुखप्रदे। धर्मे श्रीमज्जिनेन्द्रोक्ते मतिः कार्या सदा मुदा ॥२९॥

स्त्रियाँ एक तो वैसे ही मायाविनी होती है, और फिर लोभादि का कारण मिल जाये तब तो उनकी माया का कहना ही क्या? जलती हुई अग्नि वैसे ही भयानक होती है और यदि ऊपर से खूब हवा चल रही हो तब फिर उसकी भयानकता का क्या पूछना? ॥१९॥

यह देख राज-नौकरों ने उसे घर से बाहर निकाला। निकलते ही निर्भय होकर उसने कहा–आज चतुर्दशी है और मुझे आज अहिंसाव्रत है, इसलिए मैं किसी तरह, चाहे मेरे प्राण ही क्यों न जायें कभी हिंसा नहीं करूँगा। यह सुन नौकर लोग उसे राजा के पास लिवा ले गए। वहाँ भी उसने वैसा ही कहा। ठीक है–जिसका धर्म पर दृढ़ विश्वास है, उसे कहीं भी भय नहीं होता ॥२०-२२॥

राजा सेठ पुत्र के अपराध के कारण उस पर अत्यन्त गुस्सा हो ही रहे थे कि एक चाण्डाल की निर्भयपने की बातों ने उन्हें और भी अधिक क्रोधी बना दिया। एक चाण्डाल को राजाज्ञा का उल्लंघन करने वाला और इतना अभिमानी देखकर उनके क्रोध का कुछ ठिकाना न रहा। उन्होंने उसी समय कोतवाल की आज्ञा की कि जाओ, इन दोनों को ले जाकर अपने मगरमच्छादि क्रूर जीवों से भरे हुए तालाब में डाल आओ। वही हुआ। दोनों को कोतवाल ने तालाब में डलवा दिया। तालाब में डालते ही पापी धर्म को तो जल जीवों ने खा लिया। रहा यमपाल, सो वह अपने जीवन की कुछ परवाह न कर अपने व्रतपालन में निश्चल बना रहा। उसके उच्च भावों और व्रत के प्रभाव से देवों ने आकर उसकी रक्षा की। उन्होंने धर्मानुराग से तालाब में ही एक सिंहासन पर यमपाल चाण्डाल को बैठाया, उसका अभिषेक किया और उसे खूब स्वर्गीय वस्त्राभूषण प्रदान किए, खूब उसका आदर सम्मान किया। जब राजा प्रजा को यह हाल सुन पड़ा, तो उन्होंने भी उस चाण्डाल का बड़े आनन्द और हर्ष के साथ सम्मान किया। उसे खूब धन दौलत दी। जिनधर्म का ऐसा अचिन्त्य प्रभाव देखकर और भव्य पुरुषों को उचित है कि वे स्वर्ग-मोक्ष का सुख देने वाले जिनधर्म में

चाण्डालोऽपि व्रतोपेतः पूजितो देवतादिभिः। तस्मादन्यैर्न विप्राद्यैर्जातिगर्वो विधीयते ॥३०॥
मातंगो यमपालको गुणरतैर्देवादिभिः पूजितो नाना वस्त्रसुवर्णरत्नविकसत्पुष्पोत्करैः सादरम्।
यद्धर्मस्य हि लेशतोपि भुवने स श्रीजिनः संक्रियाद्भक्त्या देवनिकायपूजितपदद्वन्दो महाश्रेयसे ॥३१॥

इति कथाकोशे यमपालचाण्डालस्य कथा समाप्ता।

समाप्तः प्रथमो भागः।

अपनी बुद्धि को लगावें स्वर्ग के देवों ने भी एक अत्यन्त नीच चाण्डाल का आदर किया, यह देखकर ब्राह्मण, क्षत्रिय और वेश्यों को अपनी-अपनी जाति का कभी अभिमान नहीं करना चाहिए क्योंकि पूजा जाति की नहीं होती किन्तु गुणों की होती है ॥२३-३०॥

यमपाल जाति का चाण्डाल था, पर उसके हृदय में जिनधर्म की पवित्र वासना थी, इसलिए देवों ने उसका सम्मान किया, उसे रत्नादिकों के अलंकार प्रदान किए; अच्छे-अच्छे वस्त्र दिये, उस पर फूलों की वर्षा की। यह जिनभगवान् के उपदिष्ट धर्म का प्रभाव है, वे ही जिनेन्द्रदेव, जिन्हें कि स्वर्ग के देव भी पूजते हैं, मुझे मोक्षश्री प्रदान करें। यह मेरी उनसे प्रार्थना है ॥३१॥

॥ इति आराधना कथाकोश प्रथम खण्ड॥

द्वितीयखण्डम्

२५. मृगसेनधीवरस्य कथा

नत्वा श्रीमज्जिनं भक्त्या केवलज्ञानलोचनम्। वक्ष्येऽहिंसाफलप्राप्त-धीवरस्य कथानकम् ॥१॥
जयत्वत्रार्हती वाणी सर्वसन्देहहारिणी। प्राणिनां प्राणवत्प्रीत्या सेविता शर्मकारिणी ॥२॥
सन्तु मे गुरवो नित्यं मानसे बोधसिन्धवः। घोरसंसारवार्राशे-र्भव्यानां यत्र सेतवः ॥३॥
इत्यर्हद्भारतीसाधु-पादस्मरणमंगलम्। कृत्वा करोमि कर्मारि-शान्तये सत्कथामहम् ॥४॥
या हिंसा सर्वजन्तूनां नामतोपि भयप्रदा। सा त्रेधा त्यज्यते सद्भिर्हिंसा सांकल्पिकी सदा ॥५॥
पित्रर्थं देवतार्थं वा शान्त्यर्थं वात्र निर्मिता। शर्मणे न भवेद्धिंसा किन्तु दुष्कर्मणे मता ॥६॥
शृण्वन्तु सुधियो भव्या भवभ्रमणनाशनम्। अहिंसाव्रतमाहात्म्यं श्रेयसे शर्मकारणम् ॥७॥
अवन्तिविषये रम्ये सम्पदासारसंभृते। शिरीषग्रामवास्तव्यो धीवरो मृगसेनवाक् ॥८॥

---

२५. मृगसेन धीवर की कथा

केवलज्ञानरूपी नेत्र के धारक श्री जिनेन्द्र भगवान् को भक्तिपूर्वक प्रणाम कर मैं अहिंसाव्रत का फल पाने वाले एक धीवर की कथा लिखता हूँ ॥१॥

सब सन्देहों को मिटाने वाली, प्रीतिपूर्वक आराधना करने वाले प्राणियों के लिए सब प्रकार के सुखों को प्रदान करने वाली, जिनेन्द्र भगवान् की वाणी संसार में सदैव बनी रहे ॥२॥

संसाररूपी अथाह समुद्र से भव्य पुरुषों को पार कराने के लिए पुल के समान ज्ञान के सिन्धु मुनिराज निरन्तर मेरे हृदय में विराजमान रहें ॥३॥

इस प्रकार पंचपरमेष्ठी का स्मरण और मंगल करके कर्मरूपी शत्रुओं को नष्ट करने के लिए मैं अहिंसाव्रत की पवित्र कथा लिखता हूँ। जिस अहिंसा का नाम ही जीवों को अभय प्रदान करने वाला है, उसका पालन करना तो निस्सन्देह सुख का कारण है। अतः दयालु पुरुषों को मन, वचन और काय से संकल्पी हिंसा का परित्याग करना उचित है। बहुत से लोग अपने पितरों आदि की शान्ति के लिए श्राद्ध वगैरह में हिंसा करते हैं, बहुत से देवताओं को सन्तुष्ट करने के लिए उन्हें जीवों की बलि देते हैं और कितने ही महामारी, रोग आदि के मिट जाने के उद्देश्य से जीवों की हिंसा करते है परन्तु यह हिंसा सुख के लिए न होकर दुःख के लिए ही होती है। हिंसा द्वारा जो सुख की कल्पना करते हैं, यह उनका अज्ञान ही है। पाप कर्म कभी सुख का कारण हो ही नहीं सकता। सुख है अहिंसाव्रत के पालन करने में। भव्य जन! मैं आपको भव भ्रमण का नाश करने वाला तथा अहिंसाव्रत का माहात्म्य प्रकट करने वाली एक कथा सुनाता हूँ; आप ध्यान से सुनें ॥४-७॥

अपनी उत्तम सम्पत्ति से स्वर्ग को नीचा दिखाने वाले सुरम्य अवन्ति देश के अन्तर्गत शिरीष

स्कन्धावलम्बितस्फार-पापकृद्गलजालकः। गच्छन्सिप्रां नदीं मत्स्यान्समानेतुं कदाचन ॥९॥
मार्गे भूपादिभिर्भव्यैः समर्चितपदद्वयम्। इन्द्रनागेन्द्रचन्द्रार्क-सेवनीयं मुनीश्वरम् ॥१०॥
श्रीमज्जिनेन्द्रचन्द्रोक्त-स्याद्वादनयकोविदम्। सर्वजन्तून्समुद्धर्तुं बद्धकक्षं भटोत्तमम् ॥११॥
धर्मोपदेशपीयूष-सन्तर्पितजगत्त्रयम्। स्ववाक्यकिरणैर्ध्वस्त-मिथ्यात्वतिमिरोत्करम् ॥१२॥
दिगम्बरं महारत्न-त्रयालंकृतविग्रहम्। दृष्ट्वा यशोधरं नाम तारहारयशोभरम् ॥१३॥
आसन्नसुकृतोत्संगो दूरं त्यक्त्वा गलादिकम्। चक्रे दीर्घतरं भक्त्या प्रणामं तत्पदाम्बुजे ॥१४॥
अहो महामुने स्वामिन् कामद्विपमृगाधिप। केनचिद्व्रतदानेन जनोयमनुगृह्यताम् ॥१५॥
इत्युक्त्वा संस्थितोप्यग्रे विनयानम्रमस्तकः। तदा यशोधरः स्वामी स्वचित्ते संविचारयन् ॥१६॥
कथं भो हिंसकस्यास्य मनोवृत्तिर्व्रतेऽभवत्। युक्तं स्यात्प्राणिनां भावि-शुभाशुभनिभं मनः ॥१७॥
प्रयुक्तावधिबोधेन ज्ञात्वा तुच्छायुषं च तम्। संजगाद दयायुक्तो भो सुधीरद्य वासरे ॥१८॥

नाम के एक छोटे से सुन्दर गाँव में मृगसेन नाम का एक धीवर रहा करता था। अपने कन्धों पर एक बड़ा भारी जाल लटकाए हुए एक दिन वह मछलियाँ पकड़ने के लिए क्षिप्रा नदी की ओर जा रहा था। रास्ते में उसे यशोधर नामक मुनिराज के दर्शन हुए। उस समय अनेक राजा महाराजा आदि उनके पवित्र चरणों की पर्युपासना कर रहे थे, मुनिराज जैन सिद्धान्त के मूल रहस्य स्याद्वाद के बहुत अच्छे विद्वान् थे, जीवमात्र का उद्धार करने हेतु वे सदा कमर कसे तैयार रहते थे, जीवमात्र का उपकार करना ही एक मात्र उनका व्रत था, धर्मोपदेश रूपी अमृत से सारे संसार को उन्होंने सन्तुष्ट कर दिया था, अपने वचनरूपी प्रखर किरणों के तेज से उन्होंने मिथ्यात्वरूपी गाढ़ान्धकार को नष्ट कर दिया था, उनके पास वस्त्र वगैरह कुछ नहीं थे किन्तु सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूपी इन तीन मौलिक रत्नों से वे अवश्य अलंकृत थे। मुनिराज को देखते ही उसके ऐसा पुण्य का उदय आया, जिससे हृदय में कोमलता ने अधिकार कर लिया। अपने कन्धों पर से जाल हटाकर वह मुनिराज के समीप पहुँचा, बहुत भक्तिपूर्वक उनके चरणों में प्रणाम कर उसने उनसे प्रार्थना की कि हे स्वामी! कामरूपी हाथी को नष्ट करने वाले हे केसरी! मुझे भी ऐसा व्रत दीजिए, जिससे मेरा जीवन सफल हो। ऐसी प्रार्थना कर विनय-विनीत मस्तक से वह मुनिराज के चरणों में बैठ गया। मुनिराज ने उसकी ओर देखकर विचार किया कि देखो! कैसे आज इस महाहिंसक के परिणाम कोमल हो गए हैं और इसकी मनोवृत्ति व्रत लेने की हुई है। सत्य है-आगे जैसा अच्छा या बुरा होना होता है, जीवों का मन भी उसी अनुसार पवित्र या अपवित्र बन जाता है अर्थात् जिसका भविष्य अच्छा होता है उसका मन पवित्र हो जाता है और जिसका बुरा होनहार होता है उसका मन भी बुरा हो जाता है ॥८-१७॥

इसके बाद मुनिराज ने अवधिज्ञान द्वारा मृगसेन के भावी जीवन पर जब विचार किया तो उन्हें ज्ञात हुआ कि इसकी आयु अब बहुत कम रह गई है। यह देख उन्होंने करुणा बुद्धि से उसे समझाया कि हे भव्य! मैं तुझे एक बात कहता हूँ, तू जब तक जीए तब तक उसका पालन करना वह यह कि

आदौ जाले समायातो मीनः सन्त्यज्यते त्वया। जीवन्नेव महाभाग पालनीयं हि मद्वचः ॥१९॥
यावत्स्वकीयहस्तेन मारितप्राणिजंगमम्। नैव प्राप्नोषि तावत्ते तन्निवृत्तिश्च सर्वथा ॥२०॥
तथा पञ्चनमस्कार-मंत्रोयं त्रिजगद्धितः। सुस्थितेन त्वया ध्येयो दुःस्थितेनाथवा सुधीः ॥२१॥
इति श्रुत्वा मुनेर्वाक्यं स्वर्गमोक्षसुखप्रदम्। मत्स्यबन्धोपि सन्तुष्टः सर्वं स्वीकृतवान्भृशम् ॥२२॥
ये कुर्वन्ति गुरोर्वाक्यं प्रमाणं भक्तिनिर्भराः। तेषां स्वर्गापवर्गोत्थं सौख्यमायाति लीलया ॥२३॥
तं नत्वा मृगसेनोसौ गत्वा सिप्रां नदीं द्रुतम्। मुक्त्वा जालं समासाद्य महामत्स्यं व्रतस्मृतेः ॥२४॥
अहो मे सर्वदा पाप-कर्मणे मत्स्यघातिने। दैवयोगाद्व्रतं दत्तं गुरुणा शर्मकारिणा ॥२५॥
तस्मादयं न हन्तव्यो मयेति व्रतशुद्धधीः। सारिणस्तस्य चिह्नाय कर्णे चीरीं स्ववाससः ॥२६॥
बद्ध्वा नद्यां तमत्याक्षीन्निर्विघ्नं हि सतां व्रतम्। भवेदामृत्युपर्यन्तं सारसम्पद्विधायकम् ॥२७॥
पुनस्तत्तीरणीतीरे दूरं गत्वा स्वकर्मकृत्। लब्ध्वा तमेव पाठीनं सोमुचद्भाविसद्गतिः ॥२८॥
एवं तस्मिन्महामत्स्ये मोहजालोपमे तते। जाले लग्ने विमुक्ते च पञ्चशो व्रतरक्षणात् ॥२९॥
तदाऽस्तं भुवनोद्भासी भास्करो गतवान्भृशम्। निर्गुणाः सगुणाश्चापि के के नास्तं गताः क्षितौ ॥३०॥

तेरे जाल में पहली बार जो मछली आए उसे तू छोड़ देना और इस तरह जब तक तेरे हाथ से मरे हुए जीव का मांस तुझे प्राप्त न हो, तब तक तू पाप से मुक्त ही रहेगा। इसके अतिरिक्त मैं तुझे पंचनमस्कार मंत्र सिखाता हूँ जो प्राणी मात्र का हित करने वाला है, उसका तू सुख में, दुःख में, सरोग या नीरोग अवस्था में सदैव ध्यान करते रहना। मुनिराज के स्वर्ग-मोक्ष के देने वाले इस प्रकार के वचनों को सुनकर मृगसेन बहुत प्रसन्न हुआ और उसने यह व्रत स्वीकार कर लिया। जो भक्तिपूर्वक अपने गुरुओं के वचनों को मानते हैं, उन पर विश्वास लाते हैं, उन्हें सब सुख मिलता है और वे परम्परा से मोक्ष भी प्राप्त करते हैं ॥१८-२३॥

व्रत लेकर मृगसेन नदी पर गया। उसने नदी में जाल डाला। भाग्य से एक बड़ा भरी मत्स्य उसके जाल में फँस गया। उसे देखकर धीवर ने विचारा हाय! मैं निरन्तर ही तो महापाप करता हूँ और आज गुरु महाराज ने मुझे व्रत दिया है, भाग्य से आज ही इतना बड़ा मच्छ जाल में आ फँसा। पर जो कुछ हो, मैं तो इसे कभी नहीं मारूँगा। यह सोचकर व्रती मृगसेन ने अपने कपड़े की एक चिन्दी फाड़कर उस मत्स्य के कान में इसलिए बाँध दी कि यदि वही मच्छ दूसरी बार जाल में आ जाय तो मालूम हो जाये। इसके बाद वह उसे बहुत दूर जाकर नदी में छोड़ आया। सच है, मृत्यु पर्यन्त निर्विघ्न पालन किया हुआ व्रत सब प्रकार की उत्तम सम्पत्ति को देने वाला होता है ॥२४-२७॥

वह फिर दूसरी ओर जाकर मछलियाँ पकड़ने लगा। पर भाग्य से इस बार भी वही मच्छ उसके जाल में आया। उसने उसे फिर छोड़ दिया। इस तरह उसने जितनी बार जाल डाला, उसमें वही-वही मत्स्य आया पर उससे वह क्षुब्ध नहीं हुआ अपितु अपने व्रत की रक्षा के लिए खूब दृढ़ हो गया। उसे वहाँ इतना समय हो गया कि सूर्य भी अस्त हो चला, पर उसके जाल में उस मत्स्य को छोड़कर और

ततोसौ मृगसेनस्तु स्वव्रते प्रीतमानसः। संस्मरन्स्वगुरोर्वाक्यं चचाल स्वगृहं प्रति ॥३१॥
आगच्छन्तं तमालोक्य रिक्तं ज्ञात्वा च कारणम्। घंटाख्या यमघंटा वा कुपिता तस्य कामिनी ॥३२॥
रे रे मूढ कथं रिक्तः समायातोसि मद्गृहे। भक्ष्यते किं दृषच्चेति जल्पन्ती निष्ठुरं वचः ॥३३॥
कुटीरान्तः प्रविश्याशु दत्वा द्वारं दृढं स्थिता। सत्यं सामान्यनारीणां लाभेऽलाभे पतिः प्रियः ॥३४॥
तदासौ धीवरो बाह्ये स्मरन्पंच नमस्कृतीः। उच्छीर्षके निधायोच्चै-र्जीर्णकाष्ठं च सुप्तवान् ॥३५॥
रात्रौ तस्माद्विनिर्गत्य दुर्जनेनैव पापिना। दष्टः सर्पेण निर्मुक्तः प्राणैर्दशभिरुत्सुकैः ॥३६॥
प्रातःकाले तमःकाले दष्ट्वा तं घण्टया मृतः। पश्चातापं तदा कृत्वा रुदित्वा च पुनः पुनः ॥३७॥
यदेवास्य व्रतं पूतं तदेवं स्यान्ममापि च। अयं जन्मान्तरे भर्त्ता भूयान्मे मानसप्रियः ॥३८॥
कृत्वा निदानकं चेति सार्द्धं तेनैव साहसात्। संचक्रे चतुरैर्निन्द्यं तया वह्निप्रवेशनम् ॥३९॥
अथास्त्येव विशालायां पुर्यां विश्वंभरः प्रभुः। राज्ञ्या विश्वगुणाख्याया-श्चित्तरत्नमलिम्लुचः ॥४०॥
श्रेष्ठी श्रीगुणपालाख्यः परमेष्ठिप्रसन्नधीः। धनश्रीः श्रेष्ठिनी तस्याः सुबन्धुस्तनुजा शुभा ॥४१॥

कोई मत्स्य नहीं आया। अन्त में मृगसेन निरुपाय होकर घर की ओर लौट पड़ा। उसे अपने व्रत पर खूब श्रद्धा हो गई। वह रास्ते भर गुरु महाराज द्वारा सिखाए पंचनमस्कार मंत्र का स्मरण करता हुआ चला आया। जब वह अपने घर के दरवाजे पर पहुँचा तो उसकी स्त्री उसे खाली हाथ देखकर आग बबूला हो उठी उसने गुस्से से पूछा-रे मूर्ख! घर पर खाली हाथ तो चला आया, पर बतला तो सही कि खायेगा क्या पत्थर? इतना कहकर वह घर के भीतर चली गई और गुस्से में उसने भीतर से किवाड़ बन्द कर लिए। सच हैं-छोटे कुल की स्त्रियों का अपने पति पर प्रेम, लाभ होते रहने पर ही अधिक होता है। अपनी स्त्री का इस प्रकार दुर्व्यवहार देखकर बेचारा मृगसेन किंकर्त्तव्यविमूढ़ हो गया। उसकी कुछ नहीं चली। उसे घर के बाहर ही रह जाना पड़ा। बाहर एक पुराना बड़ा भारी लकड़ा पड़ा हुआ था। मृगसेन निरुपाय होकर पंचनमस्कार मंत्र का ध्यान करता हुआ उसी पर सो गया। दिनभर के श्रम के कारण रात में वह नींद में सोया हुआ था कि उस लकड़े में से एक भयंकर और जहरीले सर्प ने निकल कर उसे काट खाया। वह तत्काल मृत्यु को प्राप्त हुआ ॥२८-३६॥

प्रातःकाल होने पर जब उसकी पत्नी ने मृगसेन की यह दुर्दशा देखी तो उसके दुःख का कोई ठिकाना नहीं रहा। वह रोने लगी, छाती कूटने लगी और अपने नीच कर्म का बार-बार पश्चाताप करने लगी। उसका दुःख बढ़ता ही गया। उसने भी यह प्रतिज्ञा ली कि जो व्रत मेरे स्वामी ने ग्रहण किया था वही मैं भी ग्रहण करती हूँ और निदान किया कि ''ये ही मेरे अन्य जन्म में भी स्वामी हों।'' अनन्तर साहस करके वह भी अपने स्वामी के साथ अग्नि प्रवेश कर गई इस प्रकार अपघात से उसने अपनी जान गँवा दी ॥३७-३९॥

विशाला नाम की नगरी में विश्वम्भर राजा राज्य करते थे। उनकी प्रिया का नाम विश्वगुणा था। वही एक सेठ रहते थे। गुणपाल उनका नाम था। उनकी स्त्री का नाम धनश्री था। धनश्री के सुबन्धु

तस्या धनश्रियश्चैव गर्भे पूर्वस्वपुण्यतः। मृगसेनः समागत्य संस्थितो गुणमण्डितः ॥४२॥
तदा विश्वंभरो राजा विटसंगप्रणष्टधीः। नर्मभर्माख्यसचिव-सूनवे नर्मधर्मणे ॥४३॥
श्रेष्ठिनं गुणपालं तं सुतां याचितवान् भृशम्। सुबन्धुं बन्धुराकारां कुलोद्योतनदीपिकाम् ॥४४॥
अहो नष्टधिया राज्ञा याचितोहं भयाकुलः। चेद्ददामि सुतां निंद्य-कर्मणे नर्मधर्मणे ॥४५॥
कुलक्रमक्षयो लोकेऽ-पवादस्तु भवेन्मम। नो चेत्सर्वस्वनाशः स्यात्प्राणापायोपि मानसे ॥४६॥
इत्याकलय्य स श्रेष्ठी श्रीदत्तस्य वणिक्पतेः। स्वमित्रस्य गृहे धृत्वा गर्भिणीं निजकामिनीम् ॥४७॥
स्वापतेयं सुतां चापि गृहीत्वा गूढवृत्तितः। कौशाम्बीविषयं प्राप्तो देशत्यागो हि दुर्जनात् ॥४८॥
अत्रान्तरे मुनी पूतौ श्रीदत्तावाससन्निधौ। वासिनोपासकेनोच्चैः समायातौ स्वमन्दिरे ॥४९॥
शिवादिगुप्तमुन्यादि-गुप्तौ सद्वृत्तमण्डितौ। यथाविधि प्रतीक्ष्याशु ताभ्यां दत्वा शुभश्रिये ॥५०॥
अन्नदानं जगत्सारं नाना सम्पद्विधायकम्। दुःखदारिद्र्यनिर्नाशि स्वीचक्रे पुण्यमद्भुतम् ॥५१॥

नाम की एक अतिशय सुन्दरी और गुणव्रती कन्या थी। पुण्योदय से मृगसेन धीवर का जीव धनश्री के गर्भ में आया ॥४०-४२॥

अपने नर्मधर्म नामक मंत्री के अत्यन्त आग्रह और प्रार्थना से राजा ने सेठ गुणपाल से आग्रह किया कि वह मंत्री नर्मधर्म के साथ अपनी पुत्री सुबन्धु का ब्याह कर दे। यह जानकर गुणपाल को बहुत दुःख हुआ। उसके सामने एक अत्यन्त कठिन समस्या उत्पन्न हुई उसने विचारा कि पापी राजा मेरी प्यारी सुन्दरी सुबन्धु का, जो कि मेरे कुलरूपी बगीचे पर प्रकाश डालने वाली है, नीच कर्म करने वाले नर्मधर्म के साथ ब्याह कर देने को कहता है। उसने इस समय मुझे बड़ा संकट में डाल दिया। यदि सुबन्धु का नर्मधर्म के साथ ब्याह कर देता हूँ, तो मेरे कुल का क्षय होता है और साथ ही अपयश होता है और यदि नहीं करता हूँ, तो सर्वनाश होता है। राजा न जाने क्या करेगा? प्राण भी बचे या नहीं बचे? आखिर उसने निश्चय किया जो कुछ हो, पर मैं ऐसे नीचों के हाथ तो कभी अपनी प्यारी पुत्री का जीवन नहीं सौपूँगा-उसकी जिन्दगी बरबाद नहीं करूँगा। इसके बाद वह अपने श्रीदत्त मित्र के पास गया और उससे सब हाल कह कर तथा उसकी सम्मति से अपनी गर्भिणी स्त्री को उसी के घर पर छोड़कर रात के समय अपना कुछ धन और पुत्री को साथ लिए वहाँ गुपचुप से निकल खड़ा हुआ। वह धीरे-धीरे कौशाम्बी आ पहुँचा। सच है, दुर्जनों के सम्बन्ध से देश भी छोड़ देना पड़ता है ॥४३-४८॥

श्रीदत्त के घर के पास ही एक श्रावक रहता था। एक दिन उसके यहाँ पवित्र चारित्र के धारक शिवगुप्त और मुनिगुप्त नाम के दो मुनिराज आहार के लिए आए ॥४९-५०॥

उन्हें श्रावक महाशय ने अपने कल्याण की इच्छा से विधिपूर्वक आहार दिया जो कि सर्वोत्तम सम्पत्ति की प्राप्ति का कारण है। मुनिराज को आहार देकर उसने बहुत पुण्य उत्पन्न किया, जो कि दुःख दरिद्रता आदि का नाश करने वाला है। मुनिराज आहार के बाद जब वन में जाने लगे तब उनमें से

ततस्तत्प्राङ्गणे वीक्ष्य मुनिगुप्तो धनश्रियम्। पतिस्वपुत्रिकासार-कुटुम्बविरहाश्रितम् ॥५२॥
परावासनिवासोत्थ-महादु:खेन दु:खिताम्। अलंकारविनिर्मुक्तां दुष्कृतिं कुकवेरिव ॥५३॥
गर्भभारभराक्रान्तां दुर्व्यवस्थां समाश्रिताम्। ज्येष्ठं मुनीश्वरं प्राह पश्यतां भो महामुने: ॥५४॥
कोपि कष्टप्रद: पुत्र: कुक्षिमस्या: समाश्रित:। येनासौ दृश्यते नारी वराकी च मलीमसा ॥५५॥
तच्छ्रुत्वा शिवगुप्तोसौ मुनीन्द्रो ज्ञानलोचन:। श्रीमज्जिनेन्द्रचन्द्रोक्त-सप्ततत्त्वविशारद: ॥५६॥
संजगौ मुनिगुप्तस्त्व मैवं ब्रूहि वृथा वच:। यद्यपि श्रेष्ठिनीदृक्च दु:खिता दृश्यते सती ॥५७॥
गतेषु कतिचिद्दु:ख-वासरेषु शुभोदयात्। अस्या: पुत्र: पवित्रात्मा जिनधर्मधुरंधर: ॥५८॥
राजश्रेष्ठिपदाधीशो विश्वंभरमहीपते:। कन्यापतिर्वणिग्वृन्द-सेवित: संभविष्यति ॥५९॥
तन्निशम्य निजावास-कोष्ठस्थो दुष्टमानस:। श्रीदत्तो हन्तुकामोऽभूत्तदातद्भाविबालके ॥६०॥
तिष्ठति स्म गृहे चैव स पापी बकवत्तराम्। कारणेन विना वैरी दुर्जन: सुजनो भवेत् ॥६१॥
धनश्री: श्रेष्ठिनी प्राप्य प्रसूतिदिवसं सती। सासूत तनयं साक्षात्पुण्यपुञ्जमिवापरम् ॥६२॥

मुनिगुप्त की नजर धनश्री पर पड़ी, जो कि श्रीदत्त के आँगन में खड़ी हुई थी। उस समय उसकी दशा अच्छी नहीं थी। बेचारी पति और पुत्री वियोग से दु:खी थी, पराये घर पर रह कर अनेक दु:खों को सहती थी, आभूषण वगैरह सब उसने उतार डालकर शरीर को शोभाहीन बना डाला था, कुकवि की रचना के समान उसका सारा शरीर रुक्ष और श्रीहीन हो रहा था और इन सब दु:खों के होने पर भी वह गर्भिणी थी, इससे और अधिक दुर्व्यवस्था में वह फँसी थी। उसे इस हालत में देखकर मुनिगुप्त ने शिवगुप्त मुनिराज से कहा–प्रभो, देखिये तो इस बेचारी की कैसी दुर्दशा हो रही है, कैसे भयंकर कष्ट का इसे सामना करना पड़ा है? जान पड़ता है। इसके गर्भ में किसी अभागे जीव ने जन्म लिया है, इसी से इसकी यह दीन-हीन दशा हो रही है। सुनकर जैनसिद्धान्त के विद्वान् और अवधिज्ञानी श्री शिवगुप्त मुनि बोले–मुनिगुप्त, तुम यह न समझो कि इसके गर्भ में कोई अभागा आया है किन्तु इतना अवश्य है कि इस समय उसकी अवस्था ठीक नहीं है और यह दु:खी है परन्तु थोड़े ही दिनों के बाद-इसके दिन फिरेंगे और पुण्य का उदय आएगा। इसके यहाँ जिसका जन्म होगा, वह बड़ा महात्मा, जिनधर्म का पूर्ण भक्त और राजसम्मान का पात्र होगा। होगा तो वह वैश्यवंश में पर उसका ब्याह इन्हीं विश्वंभर राजा की पुत्री के साथ होगा, राजवंश भी उसकी सेवा करेगा ॥५१-५९॥

मुनिराज की भविष्य वाणी पापी श्रीदत्त ने भी सुनी। वह था तो धनश्री के पति गुणपाल का मित्र, पर अपने एक जातीय बंधु का उत्कर्ष होना उसे सह्य नहीं हुआ। उसका पापी हृदय मत्सरता के द्वेष से अधीर हो उठा। उसने बालक को जन्मते ही मार डालने का निश्चय किया। अब से वह बाहर कहीं न जाकर बगुले की तरह सीधा साधा बनकर घर ही में रहने लगा। सच है–दुर्जन-शत्रु बिना कारण के भी सुजन-मित्र बन जाया करते हैं ॥६०-६१॥

पहले तो श्रीदत्त बेचारी धनश्री को कष्ट दिया करता था और अब उसके साथ बड़ी सज्जनता

प्रसूतिदु:खतो मूर्च्छां संगतां तां धनश्रियम्। ज्ञात्वा श्रीदत्तकः पापी स्वचित्ते कृतचिन्तनः ॥६३॥
वह्निवद्बालकोप्येष स्वाश्रयक्षयकारकः। इत्यालोच्य मृतो जातो बालको जरतीजनैः ॥६४॥
कृत्वोद्घोषं समाकार्य चाण्डालं चण्डकर्मकृत्। बालं तस्यार्पयामास वधार्थी स वणिक्कुधीः ॥६५॥
शत्रुजोपि न हन्तव्यो बालकः किं पुनर्वृथा। हा कष्टं किं न कुर्वन्ति दुर्जनाः फणिनो यथा ॥६६॥
मातंगोपि तमादाय गत्वैकान्ते लसत्प्रभम्। तदाकारं समालोक्य शर्मकोटिविधायकम् ॥६७॥
संजातकरुणासार-सुधासंपूरिताशयः। तत्रार्भकं सुखं धृत्वा स्वयं च गतवान् गृहम् ॥६८॥
श्रीदत्तकस्य तस्यैव भगिन्याः पतिरुत्तमः। इन्द्रदत्तो वणिग्वर्यो विक्रयाय विनिर्गतः ॥६९॥
गोष्टीने च समायातः श्रुत्वा गोपालजल्पनैः। चन्द्रकान्तोत्पलोत्पीठे गोवत्साद्यैश्च सेविते ॥७०॥
सुखासीनं समालोक्य बालं वा बालभास्करम्। नीत्वा पुत्रविहीनत्वात्पुत्रबुद्ध्या प्रहर्षतः ॥७१॥
हे राधे गूढगर्भोत्थं पुत्रं ते त्वं गृहाण वै। इत्युक्त्वा निजभार्यायै राधायै परमादरात् ॥७२॥

का बर्ताव करने लगा। धनश्री सेठानी ने समय पाकर पुत्र को प्रसव किया। वास्तव में बालक बड़ा भाग्यशाली हुआ। वह उत्पन्न होते ही ऐसा तेजस्वी जान पड़ता था, मानो पुण्यसमूह हो। धनश्री पुत्र की प्रसव वेदना से मूर्छित हो गई उसे अचेत देखकर पापी श्रीदत्त ने अपने मन में सोचा- बालक प्रज्ज्वलित अग्नि की तरह तेजस्वी है, अपने को आश्रय देने वाले का ही क्षय करने वाला होगा, इसलिए इसका जीता रहना ठीक नहीं। यह विचार कर उसने अपने घर की बड़ी बूढ़ी स्त्रियों द्वारा यह प्रकट करवा कर, कि बालक मरा हुआ पैदा हुआ था, बालक को एक दुर्जन के हाथ सौंप दिया और उससे कह दिया कि इसे ले जाकर मार डालना। उचित तो यह था कि–

शत्रु का भी यदि बच्चा हो, तो उसे नहीं मारना चाहिए, तब दूसरों के बच्चों के सम्बन्ध में तो क्या कहें? परन्तु खेद है कि सर्प के समान दुष्ट पुरुष कोई भी बुरा काम करते नहीं हिचकते। चाण्डाल बच्चे को एकान्त में मारने को ले गया, पर जब उसने उजेले में उसे देखा तो उसकी सुन्दरता को देखकर उसे भी दया आ गई करुणा से उसका हृदय भर आया। सो वह उसे न मारकर वहीं एक अच्छे स्थान पर रखकर अपने घर चला गया ॥६२-६८॥

श्रीदत्त की एक बहिन थी। उसका ब्याह इन्द्रदत्त सेठ के साथ हुआ था। भाग्य से उसके सन्तान नहीं हुई थी। बालक के पूर्व पुण्य के उदय से इन्द्रदत्त माल बेचता हुआ इसी ओर आ निकला। जब वह ग्वाल लोगों के मुहल्ले में आया तो उसने ग्वालों को परस्पर बातें करते हुए सुना कि ''एक बहुत सुन्दर बालक को न जाने कोई अमुक स्थान की सिला पर लेटा गया है, वह बहुत तेजस्वी है, उसके चारों ओर अपनी गायों के बच्चे खेल रहे हैं और वह उनके बीच में बड़े सुख से खेल रहा है।'' उनकी बातें सुनकर ही इन्द्रदत्त बालक के पास आया। वह एक दूसरे बाल सूर्य को देखकर बहुत ही प्रसन्न हुआ। उसके कोई सन्तान तो थी ही नहीं, इसलिए बच्चे को उठाकर वह अपने घर ले आया और अपनी प्रिया से बोला–प्यारी राधा? तुम्हें इसकी खबर भी नहीं कि तुम्हारे गूढ़गर्भ से अपने कुल का प्रकाशक

दत्वा स्तनंधयोत्पत्तेः संचक्रेऽसौ महोत्सवम्। प्राणिनां पूर्वपुण्याना-मापदा सम्पदायते ॥७३॥
श्रीदत्तेन तमाकर्ण्य वृत्तान्तं दुष्टचेतसा। तत्रागत्येन्द्रदत्तस्य गेहे भो स्नेहवत्सल ॥७४॥
भागिनेयोयमत्यन्त-भाग्यभाग् मन्दिरे मम। वर्धतामिति कूटोक्त्या नीतोसौ भगिनीयुतः ॥७५॥
अहो दुष्टाशयः प्राणी चित्तेऽन्यद्वचनेऽन्यथा। कायेनान्यत्करोत्येव परेषां वंचनं महत् ॥७६॥
पूर्ववद्धन्तुकामोसौ तं शिशुं शुभलक्षणम्। अन्तावसायिने शीघ्रं ददौ निर्दयमानसः ॥७७॥
गृहीत्वा श्वपचः सोपि बालकं भुवनोत्तमम्। तद्रूपसम्पदां वीक्ष्य सञ्जातः सदयो भृशम् ॥७८॥
क्वचित्स गह्वरे देशे प्रोल्लसद्द्रुमसंकुले। सत्तोयतीरणीतीरे तं निधाय गतो गृहम् ॥७९॥
गुणपालसुतः सोपि पूर्वोपार्जितपुण्यतः। तत्रायाताभिरानन्द-ध्वनिभिर्धेनुभिस्तराम् ॥८०॥

पुत्र हुआ है? और देखो वह यह है इसे ले लो और पालो। आज अपना जीवन कृतार्थ हुआ। यह कहकर उसने बालक को अपनी प्रिया की गोद में रख दिया है। बालक की खुशी के उपलक्ष में इन्द्रदत्त ने खूब उत्सव किया। खूब दान किया। सच है–पुण्यवानों के लिए विपत्ति भी सम्पत्ति के रूप में परिणत हो जाती है॥६९-७३॥

पापी श्रीदत्त को यह सारा हाल मालूम हो गया। इससे वह इन्द्रदत्त के घर आया और मायाचार से अपने बहनोई से कहा–देखो जी, हमारा भानजा बड़ा तेजस्वी है, बड़ा भाग्यवान् है, इसलिए उसे हम अपने घर पर ही रखेंगे। आप हमारी बहिन को भेज दीजिये। बेचारा इन्द्रदत्त उसके पापी हृदय की बात नहीं जान पाया। इसलिए उसने अपने सीधे स्वभाव से अपनी प्रिया को पुत्र सहित उसके साथ कर दिया। बहुत ठीक लिखा है–

जिन लोगों का हृदय दुष्ट होता है, उनके चित्त में कुछ और रहता है, वचनों से वे कुछ और ही कहते और शरीर से कुछ और ही करते हैं। दूसरों को ठगना, उन्हें धोखा देना ही एक मात्र ऐसे पुरुषों का उद्देश्य रहता है। पापी श्रीदत्त भी एक ऐसा ही दुष्ट मनुष्य था। इसीलिए तो वह निरपराध बालक के खून का प्यासा हो उठा। उसने पहले की तरह फिर भी उसे मार डालने की इच्छा से एक चाण्डाल को बहुत कुछ लोभ देकर उसके हाथ सौंप दिया। चाण्डाल ने भी बालक को ले तो लिया पर जब उसने उसकी स्वर्गीय सुन्दरता देखी तो उसके हृदय में भी दया आ गई। उसने मन ही मन निश्चय कर लिया कि कुछ भी हो, मैं कभी इस बच्चे को न मारूँगा और इसे बचाऊँगा। वह अपना विचार श्रीदत्त से नहीं कहकर बच्चे को लिवा ले गया। कारण श्रीदत्त की पाप वासना उसे कभी जिन्दा रहने न देगी, यह उसे उसकी बातचीत से मालूम हो गया था। चाण्डाल बच्चे को एक नदी के किनारे पर लिवा ले गया। वहीं एक सुन्दर गुहा थी, जिसके चारों ओर वृक्ष थे। वह बालक को उस गुहा में रखकर अपने घर पर लौट आया ॥७४-७९॥

संध्या का समय था। ग्वाल लोग अपनी-अपनी गायों को घर पर लौटा कर ला रहे थे। उनमें

तद्वीक्षणात्क्षरत्क्षीर-स्तनीभिरुपसेवितः। धात्रिकाभिरिव प्रीत्या स्थितो वा जननीकरे ॥८१॥
गोपालकैस्तथाभूतं दृष्ट्वा तं लीलया स्थितम्। सन्ध्याकाले समायातैः प्रोल्लसन्मुखपंकजम् ॥८२॥
सर्वगोष्टप्रधानाय गोविन्दाय प्रवेगतः। महाविस्मयतां प्राप्तैः प्रोक्तं तद्बालचेष्टितम् ॥८३॥
गोपालाधिपतिः सोपि गोविन्दस्तं सुतेच्छया। समानीय सुनन्दायाः स्वकान्तायाः समर्प्य च ॥८४॥
धनकीर्त्तिरिति व्यक्तं कृत्वा नामास्य संभ्रमात्। पालयामास यत्नेन प्रोल्लसत्प्रीतिमण्डितः ॥८५॥
सोपि गोपाङ्गनानेत्र-नीलोत्पलसुधाकरः। सर्वलक्षणसम्पूर्णो जनयन्प्रीतिमद्भुताम् ॥८६॥
रूपेण कामदेवो वा कान्त्या वा मृगलाञ्छनः। तेजसा नूतनार्को वा वृद्धिं प्राप गुणैः सह ॥८७॥
आज्यार्थमेकदा तेन तत्रायातेन दुर्धिया। श्रीदत्तेन तमालोक्य ज्ञात्वा तद्वृत्तकं महत् ॥८८॥
प्रोक्तं गोविन्द मद्गेहे कार्यमस्त्येव सत्वरम्। इमं लेखं करे दत्वा प्रेषणीयोयमङ्गजः ॥८९॥
गोविन्दः प्राह शुद्धात्मा भो श्रेष्ठिन्नेवमस्तु च। अहो दुष्टस्य दुष्टत्वं लक्ष्यते केन वेगतः ॥९०॥

से कुछ गायें इस गुहा की ओर आ गई थीं, जहाँ गुणपाल का पुत्र अपने पूर्वपुण्य के उदय से रक्षा पा रहा था। धाय के समान उन गायों ने आकर उस बच्चे को घेर लिया। मानों बच्चा प्रेम से अपनी माँ की ही गोद में बैठा हो। बच्चे को देखकर गायों के थनों में से दूध झरने लग गया। ग्वाल लोग प्रसन्नमुख बच्चे को गायों से घिरा हुआ और निर्भय खेलता हुआ देखकर बहुत आश्चर्य करने लगे। उन्होंने जाकर अपनी जाति के मुखिया गोविन्द से यह सब हाल कह सुनाया। गोविन्द के कोई सन्तान नहीं थी, इसलिए वह दौड़ा गया और बालक को उठा लाकर उसने अपनी सुनन्दा नाम की प्रिया को सौंप दिया। उसका नाम उसने धनकीर्ति रखा। वहाँ बड़े यत्न और प्रेम से उसका पालन व संरक्षण होने लगा। धनकीर्ति भी दिनों दिन बढ़ने लगा। वह ग्वाल महिलाओं के नेत्ररूपी कुमुद पुष्पों को प्रफुल्लित करने वाला चन्द्रमा था। उसे देखकर उनके नेत्रों को बड़ी शान्ति मिलती थी। वह सब सामुद्रिक लक्षणों से युक्त था। उसे देखकर सबको बड़ा प्रेम होता था। वह अपनी रूप मधुरिमा से कामदेव जान पड़ता था, कान्ति चन्द्रमा और तेज से एक दूसरा सूर्य से जैसे-जैसे उसकी सुन्दरता बढ़ती जाती थी, वैसे-वैसे ही उसमें अनेक उत्तम-उत्तम गुण भी स्थान पाते चले जाते थे ॥८०-८७॥

एक दिन पापी श्रीदत्त घी की खरीद करता हुआ इधर आ गया। उसने धनकीर्ति को देखकर पहचान लिया। अपना सन्देह मिटाने को और भी दूसरे लोगों से उसने उसका हाल जान लिया। उसे निश्चय हो गया कि यह गुणपाल ही का पुत्र है। तब उसने फिर उसके मारने का षड्यंत्र रचा। उसने गोविन्द से कहा–भाई, मेरा एक बहुत जरूरी काम हैं, यदि तुम अपने पुत्र द्वारा उसे करा दो तो बड़ी कृपा हो। मैं अपने घर पर भेजने के लिए एक पत्र लिख देता हूँ, उसे यह पहुँचा आवे। बेचारे गोविन्द ने कह दिया कि मुझे आपके काम से कोई इनकार नहीं है। आप लिख दीजिये, यह उसे दे आयेगा। सच बात है–दुष्टों की दुष्टता का पता जल्दी से कोई नहीं पा सकता। पापी श्रीदत्त ने पत्र में लिखा ॥८८-९०॥

पापिना लिखितस्तेन लेखं पुत्रमहाबलः। अस्मत्कुलद्रुमध्वंसी-ज्वलत्कालानलोप्ययम् ॥९१॥
हन्तव्यो ब्रह्मपुत्रेण मद्वाक्यैर्मुसलेन वा। तं गृहीत्वा कुमारोपि धनकीर्त्तिर्गुणोज्ज्वलः ॥९२॥
कण्ठालंकारसान्निध्ये बध्वा लेखं भटाग्रणीः। तातश्रेष्ठिनिदेशेन निःशंङ्कश्चलितो मुदा ॥९३॥
उज्जयिन्यां प्रवेशेऽसौ प्राप्तश्चाम्रमहावनम्। मार्गश्रमविनाशाय सुप्तो वृक्षतले सुखम् ॥९४॥
अत्रान्तरे समायाता तद्वने सपरिच्छदा। नाना प्रसूनसन्दोह-चुण्टने प्रीतिमानसा ॥९५॥
भूरिविद्याविनोदाढ्याऽनंगसेनाभिधानिका। पण्याङ्गनाम्रवृक्षस्य मूले सुप्तं निरीक्ष्य तम् ॥९६॥
पूर्वजन्मोपकारेण जातस्नेहा महादरात्। शनैर्लेखं समादाय ज्ञात्वा तच्छ्रेष्ठिचेष्टितम् ॥९७॥
तान्यक्षराण्युपायेन परामृश्य विचक्षणा। तस्मिन्नेव तदा पत्रे लोचनाञ्जनभाजनात् ॥९८॥
गृहीतकज्जलेनोच्चै-र्वल्लीनिर्यासशालिना। संलिखित्वेति मद्भार्या मन्यते मां यदि प्रियम् ॥९९॥

पुत्र महाबल, जो तुम्हारे पास पत्र लेकर आ रहा है, वह अपने कुल का नाश करने के लिए भयंकरता से जलता हुआ मानों प्रलय काल की अग्नि है, समर्थ होते ही यह अपना सर्वनाश कर देगा। इसलिए तुम्हें उचित है कि इसे गुप्तरीति से तलवार द्वारा वा मूसले से मार डालकर अपना कांटा साफ कर दो। काम बड़ी सावधानी से हो, जिसे कोई जान न पावे ॥९१-९२॥

पत्र को अच्छी तरह बन्द करके उसने कुमार धनकीर्ति को सौंप दिया। धनकीर्ति ने उसे अपने गले में पड़े हुए हार से बाँध लिया और सेठ की आज्ञा लेकर उसी समय वह वहाँ से निडर होकर चल दिया। वह धीरे-धीरे उज्जयिनी के उपवन में आ पहुँचा। रास्ते में चलते-चलते वह थक गया था इसलिए थकावट मिटाने के लिए वह वहीं एक वृक्ष की ठंडी छाया में सो गया। उसे वहाँ नींद आ गई ॥९३-९५॥

इतने ही में वहाँ एक अनंगसेना नाम की वेश्या फूल तोड़ने के लिए आई, वह बहुत सुन्दरी थी अनेक तरह के मौलिक भूषण और वस्त्र वह पहने थी। उससे उसकी सुन्दरता भी बेहद बढ़ गई थी। वह अनेक विद्या कलाओं की जानने वाली और बड़ी विनोदिनी थी। उसने धनकीर्ति को एक वृक्ष के नीचे सोता देखा। पूर्वजन्म में अपना उपकार करने के कारण से उस पर उसका बहुत प्रेम हुआ। उसके वश होकर ही उसे न जाने क्या बुद्धि उत्पन्न हुई जो उसने उसके गले में बँधे हुए श्रीदत्त के कागज को खोल लिया। पर जब उसने उसे बाँचा तो उसके आश्चर्य का कुछ ठिकाना न रहा। एक निर्दोष कुमार के लिए श्रीदत्त का ऐसा घोर पैशाचिक अत्याचार का हाल पढ़कर उसका हृदय काँप उठा। वह उसकी रक्षा के लिए घबरा उठी। वह भी थी बड़ी बुद्धिमती सो झट एक युक्ति सूझ गई। उसने उस लिखावट को बड़ी सावधानी से मिटाकर उसकी जगह अपनी आँखों में अंजे हुए काजल को पत्तों के रस से गीली की हुई सलाई से निकाल-निकाल कर उसके द्वारा लिख दिया कि-''प्रिये! यदि तुम मुझे सच्चा अपना स्वामी समझती हो और पुत्र महाबल! तुम यदि वास्तव में मुझे अपना पिता समझते हो तो इस पत्र लाने वाले के साथ श्रीमती का ब्याह शीघ्र कर देना। अपने को बड़े भाग्य से ऐसे वर की प्राप्ति हुई

पुत्रो महाबलश्चापि चेन्मां जानाति तातकम्। तदा सर्वप्रकारेण कन्यास्मै धनकीर्त्तये ॥१००॥
शाखासप्तकपर्यन्तं शोधिताय महात्मने। ममापेक्षां विना शीघ्रं दानमानादिपूर्वकम् ॥१०१॥
दातव्या श्रीमतिश्चेति पूर्ववत्पत्रमुत्तमम्। कण्ठे तस्य निबध्योच्चै-र्जीवितं वा हि सागमत् ॥१०२॥
ततः श्रीधनकीर्त्तिस्तु चिरेणोत्थाय शुद्धधीः। श्रीदत्तस्य गृहं गत्वा दत्वा लेखं तयोर्द्वयोः ॥१०३॥
मातृपुत्रकयोः शीघ्रं श्रीमत्या वल्लभोभवत्। संभवेत्कृतपुण्यानां महापायेऽपि सत्सुखम् ॥१०४॥
तां वार्तां च समाकर्ण्य श्रीदत्तो व्यग्रमानसः। प्रत्यागत्य पुरीबाह्ये चण्डिकामन्दिरे पुनः ॥१०५॥
संकेतपुरुषं धृत्वा तद्वधाय दुराशयः। समागत्य गृहं प्राह प्रच्छन्नं तनुजापतिम् ॥१०६॥
धनकीर्तेः शृणु व्यक्तं मदीयेप्यस्ति वंशके। आचारोयं सुधी रात्रि-मुखे कात्यायनीगृहे ॥१०७॥
गृहीत्वा माषनिर्माणं कीरकाकबलिं द्रुतम्। संछाद्य रक्तवस्त्रेण पुत्रीकान्तेन सादरम् ॥१०८॥
हस्तस्थकंकणेनोच्चै-र्गन्तव्यं सर्वशान्तये। तच्छ्रुत्वा धनकीर्त्तिस्तु यथादेशस्तथास्तु वै ॥१०९॥

है। मैंने इसकी साखें वगैरह सब अच्छी तरह देख ली है। कहीं कोई बाधा आती है। इस काम के लिए तुम मेरी भी अपेक्षा नहीं करना। कारण, सम्भव है मुझे आने में कुछ विलम्ब हो जाए। फिर ऐसा योग मिलना कठिन है। वर के मान-सम्मान में तुम लोग किसी प्रकार की कमी मत रखना।''

इस प्रकार पत्र लिखकर अनंगसेना ने पहले की तरह उसे धनकीर्ति के गले में बाँध दिया अथवा यों कह लीजिए कि उसने धनकीर्ति को मानों जीवन प्रदान किया। इसके बाद वह अपने घर पर लौट आई ॥९६-१०२॥

अनंगसेना के चले जाने के बाद धनकीर्ति की भी नींद खुली। वह उठा और श्रीदत्त के घर पहुँचा। उसने पत्र निकाल कर श्रीदत्त की स्त्री के हाथ में सौंपा। पत्र को उसके पुत्र महाबल ने भी पढ़ा। पत्र पढ़कर उन्हें बहुत खुशी हुई। धनकीर्ति का उन्होंने बहुत आदर-सम्मान किया तथा शुभ मुहूर्त में श्रीमती का ब्याह उसके साथ कर दिया। सच कहा है-

पुण्यवान् जीवों को महासंकट के समय भी जीवन के नष्ट होने के कारणों के मिलने पर भी सुख प्राप्त होता है। यह हाल जब श्रीदत्त को ज्ञात हुआ, तो वह घबराकर उसी समय दौड़ा हुआ आया। उसने रास्ते में ही धनकीर्ति को मार डालने की युक्ति सोचकर अपनी नगरी के बाहर पार्वती के मन्दिर में एक मनुष्य को इसलिए नियुक्त कर दिया कि मैं किसी बहाने से धनकीर्ति को रात के समय यहाँ भेजूँगा, सो उसे तुम मार डालना। इसके बाद वह अपने घर आया और एकान्त में अपने जमाई को बुलाकर उसने कहा-देखो जी, मेरी कुल परम्परा में एक रीति चली आ रही है, उसका पालन तुम्हें भी करना होगा। वह यह है कि नवविवाहित वर रात्रि के आरम्भ में उड़द के आटे के बनाए हुए तोता, काक, मुर्गा आदि जानवरों को लाल वस्त्र से ढककर और कंकण पहने हुए हाथ में रखकर बड़े आदर के साथ शहर के बाहर पार्वती के मन्दिर में ले जाए और शान्ति के लिए उनकी बलि दे ॥१०३-१०९॥

यह सुनकर धनकीर्ति बोला-जैसी आपकी आज्ञा। मुझे शिरोधार्य है। इसके बाद वह बलि लेकर

गदित्वेति समादाय तं बलिं भद्रमानसः। निर्गतस्तु पुरीबाह्ये दृष्टोऽसौ शालकेन च ॥११०॥
महाबलेन पृष्टस्तु हंहो त्वं यासि कुत्रचित्। एकाकी तमसि व्याप्ते तन्निशम्य जगाद सः ॥१११॥
महाबल बलिं दातुं दुर्गायै गम्यते मया। मातुलस्य निदेशेन तदाकर्ण्य महाबलः ॥११२॥
प्राहैवं तत्र गच्छामि याहि त्वं निजमन्दिरम्। तातो रोशिष्यति व्यक्तं सर्वं जानेऽहकं तदा ॥११३॥
इत्युच्चैस्तन्निषिद्धोसौ धनकीर्त्तिः स्वपुण्यतः। निर्विघ्नं गृहमायातः स च प्राप्तो यमालयम् ॥११४॥
पूर्वपुण्येन जन्तूनां कालवह्निर्जलायते। स्थलायते समुद्रोपि शत्रुर्मित्रायते भृशम् ॥११५॥
हालाहलं सुधाभावं यात्यापत्सम्पदा भवेत्। विघ्ना नश्यन्ति निःशेषा महाभीत्येव सत्वरम् ॥११६॥
तस्मात्पुण्यं बुधैः कार्यं स्वर्मोक्षसुखबीजकम्। श्रीमज्जिनेन्द्रचन्द्रोक्तं सर्वदुःखौघनाशकम् ॥११७॥
तत्सुपुण्यं जिनेन्द्रार्चा महाभक्तिभरान्विता। पात्रदानं व्रतं शीलं सोपवासं क्रियादिकम् ॥११८॥
पुत्रशोकाकुलः श्रेष्ठी श्रीदत्तो धर्मवर्जितः। एकान्ते कामिनीं प्राह विशाखां प्रति हे प्रिये ॥११९॥

घर से निकला। शहर के बाहर पहुँचते ही उसे उसका साला महाबल मिला। महाबल ने उससे पूछा–क्यों जी! ऐसे अन्धकार में अकेले कहाँ जा रहे हो? उत्तर में धनकीर्ति ने कहा–आपके पिताजी की आज्ञा से मैं पार्वती के मन्दिर बलि देने के लिए जा रहा हूँ। यह सुनकर महाबल बोला–आप बलि मुझे दे दीजिए, मैं चला जाता हूँ। आपके वहाँ जाने की कोई आवश्यकता नहीं है। आप घर पधारिए। धनकीर्ति ने कहा–देखिए, इससे आपके पिताजी बुरा मानेंगे। इसलिए आप मुझे ही जाने दीजिए। महाबल ने कहा–नहीं, मुझे बलि देने की सब विधि वगैरह मालूम है, इसलिए मैं ही जाता हूँ–यह कहकर उसने धनकीर्ति को तो घर लौटा दिया और आप दुर्गा के मन्दिर जाकर काल के घर का पाहुना बना। सच है– ॥११०-११४॥

पुण्यवानों के लिए कालरूपी अग्नि जल हो जाती है, समुद्र स्थल हो जाता है, शत्रु मित्र बन जाता है, विष अमृत के रूप में परिणत हो जाता है, विपत्ति सम्पत्ति हो जाती है और विघ्न डर के मारे नष्ट हो जाते हैं। इसलिए बुद्धिमानों को सदा पुण्यकर्म करते रहना चाहिए। पुण्य उत्पन्न करने के कारण ये हैं–भक्ति से भगवान् की पूजा करना, पात्रों को दान देना, व्रत पालना, उपवासादि के द्वारा इंद्रियों को जीतना, ब्रह्मचर्य रखना, दुखियों की सहायता करना, विद्या पढ़ाना, पाठशाला खोलना अर्थात् अपने से जहाँ तक बन पड़े तन से, मन से और धन से दूसरों की भलाई करना ॥११५-११८॥

अपने पुत्र के मारे जाने की जब श्रीदत्त को खबर हुई, तब वह बहुत दुःखी हुआ। पर फिर भी उसे सन्तोष नहीं हुआ। उसका हृदय अब प्रतिहिंसा से और अधिक जल उठा। उसने अपनी स्त्री को एकान्त में बुलाकर कहा–प्रिये, बतलाओ तो हमारे कुलरूपी वृक्ष को जड़मूल से उखाड़ फेंकने वाले इस दुष्ट की हत्या कैसे हो? कैसे यह मारा जा सके? मैंने इसके मारने को जितने उपाय किए, भाग्य से वे सब व्यर्थ गए और उलटा उनसे मुझे ही अत्यन्त हानि उठानी पड़ी। सो मेरी बुद्धि तो बड़े असमंजस में फँस गई है। देखो, कैसे अचंभे की बात है जो इसके मारने के लिए जितने उपाय किए,

अस्मद्वंशतरुच्छेदी हन्यतेऽयं कथं खलः। नाना पापपरित्यक्तो व्यक्तो वैरी गृहे स्थितः ॥१२०॥
श्रेष्ठिन्यालपितं श्रेष्ठिन्वृद्धत्वान्नैव वेत्सि च। तस्मात्तूष्णीं समास्व त्वं कुर्वेहं वाञ्छितं तव ॥१२१॥
इत्याभाष्य परेद्युश्च विषं संचार्य मोदकान्। कृत्वा तां तनुजां प्राह विशाखा पापमण्डिता ॥१२२॥
श्रीमते भो सुते ये च चन्द्रकान्तिवदुज्ज्वलाः। ते मोदकाः स्वकान्ताय श्यामवर्णास्तु ये ध्रुवम् ॥१२३॥
दीयन्ते त्वया मुग्धे स्वताताय गुणोज्ज्वले। इत्युक्त्वा श्रेष्ठिनी शीघ्रं गता स्नानाय सा नदीम् ॥१२४॥
सा पुत्री श्रीमतिश्चेति यच्छुभं भुवनत्रये। तद्वेयं स्वपितुर्भक्त्या किं पती रागकारणम् ॥१२५॥
अज्ञातमातृदुश्चेष्टा संविचार्येति मोदकान्। विपर्ययेण दत्ते स्म विचित्रा कर्मणां गतिः ॥१२६॥
तद्भक्षणात्तदा श्रेष्ठी श्रीदत्तो मृत्युमाप्तवान्। दुष्कर्मकारिणां लोके कुतः श्रेयो भवत्यहो ॥१२७॥
सा विशाखा समागत्य नाथशून्यं निजालयम्। दृष्ट्वा शोकं विधायोच्चै रुदित्वा च सुतां जगौ ॥१२८॥

उन सबसे रक्षा पाकर और अपना ही बैरी बना हुआ यह अपने घर में बैठा है ॥११९-१२०॥

श्री दत्त की स्त्री ने कहा–बात यह है कि अब आप बूढ़े हो गए है। आपकी बुद्धि अब काम नहीं देती। अब जरा आप चुप होकर बैठे रहें। मैं आपकी इच्छा बहुत जल्दी पूरी करूँगी। यह कहकर उस पापिनी ने दूसरे दिन विष मिले हुए लड्डू बनाये और अपने पुत्री से कहा–बेटी श्रीमती, देख मैं तो अब स्नान करने जाती हूँ और तू इतना ध्यान रखना कि ये जो उजले लड्डू हैं, उन्हें तो अपने स्वामी को परोसना और जो मैले हैं, उन्हें अपने पिता को परोसना। यह कहकर श्रीमती की माँ नहाने को चली गई। श्रीमती अपने पिता और पति को भोजन कराने को बैठी। बेचारी श्रीमती भोली-भाली लड़की थी और न उसे अपनी माता का कूट-कपट ही मालूम था; इसलिए उसने अच्छे लड्डू अपने पिता के लिए ही परोसना उचित समझा, जिससे कि उसके पिता को अपने सामने श्रीमती का बरताव बुरा न जान पड़े और यही एक कुलीन कन्या के लिए उचित भी था, क्योंकि अपने माता-पिता या बड़ों के सामने ऐसा बेहयापन काम अच्छी स्त्रियाँ नहीं करती। इसलिए जो लड्डू उसके पति के लिए उसकी माँ ने बनाये थे, उन्हें उसने पिता की थाली में परोस दिया। सच है–

''विचित्रा कर्मणां गतिः'' अर्थात् कर्मों की गति विचित्र ही हुआ करती है ॥१२१-१२६॥

विष मिले हुए लड्डुओं के खाते ही श्रीदत्त ने अपने किए कर्म का उपयुक्त प्रायश्चित पा लिया, वह तत्काल मृत्यु को प्राप्त हुआ। ठीक ही कहा है कि पाप कर्म करने वालों का कभी कल्याण नहीं होता ॥१२७॥

श्रीमती की माँ जब नहाकर लौटी और उसने अपने स्वामी को इस प्रकार मरा पाया तो उसके दुःख का कोई पार नहीं रहा। वह बहुत विलाप करने लगी परन्तु अब क्या हो सकता था! जो दूसरों के लिए कुआँ खोदते हैं, उसमें पहले वे स्वयं ही गिरते हैं, यह संसार का नियम है। श्रीमती की माँ और पिता उसके उदाहरण है। इसलिए जो अपना बुरा नहीं चाहते उन्हें दूसरों का बुरा करने का कभी

हे सुते तव तातेन मयापि क्रूरचेतसा। स्वान्वयक्षयकारीति सर्वं दुश्चेष्टितं वृथा ॥१२९॥
पूर्णं बहुप्रलापेन स्वकान्तेन समं मुखम्। तिष्ठ त्वमेव गेहेस्मिञ्छक्रेणेव शची यथा ॥१३०॥
इत्याशीर्वचनं दत्वा तं समासाद्य मोदकम्। प्राप्ता यमालयं सापि दुर्धियामीदृशी गतिः ॥१३१॥
परेषां येऽत्र कुर्वन्ति विघ्नं दुष्टाशयाः खलाः। ते स्वयं विघ्नमासाद्य पश्चाद्यान्त्येव दुर्गतिम् ॥१३२॥
ततः श्रीधनकीर्त्तिस्तु पूर्वपुण्यप्रभावतः। उल्लंघितमहाघोर-पंचापत्सुखतः स्थितः ॥१३३॥
एकदा शुभयोगेन विश्वंभरमहीभुजा। महोत्सवशतैस्तस्मै दत्वा कन्यां निजां शुभाम् ॥१३४॥
नाना रत्नादिसन्दोहैः पूजितो धनकीर्त्तिवाक्। महाश्रेष्ठिपदे शीघ्रं स्थापितो जयघोषणैः ॥१३५॥
अहो भव्या न कर्त्तव्य-माश्चर्यं भुवनत्रये। जैनधर्मप्रसादेन किं शुभं यन्न जायते ॥१३६॥
तत्प्रतापं समाकर्ण्य स श्रेष्ठी गुणपालवाक्। कौशाम्बीदेशतः शीघ्र-मुज्जयिन्यां समागतः ॥१३७॥

स्वप्न में भी विचार नहीं करना चाहिए। अन्त में श्रीमती की माता ने अपनी पुत्री से कहा–हे पुत्री! तेरे पिता ने और मैंने निर्दय होकर अपने हाथों ही अपने कुल का सर्वनाश किया। हमने दूसरे का अनिष्ट करने के जितने प्रयत्न किए वे सब व्यर्थ गए और अपने नीच कर्मों का फल भी हमें हाथों हाथ मिल गया। अब जो तेरे पिताजी की गति हुई वही मेरे लिए भी इष्ट है। अन्त में मैं तुझे आशीर्वाद देती हूँ कि तू और तेरे पति इस घर में सुख शान्ति से रहें जैसे इन्द्र अपनी प्रिया के साथ रहता है। इतना कहकर उसने भी जहर के लड्डुओं को खा लिया। देखते–देखते उसकी आत्मा भी शरीर को छोड़कर चली गई। ठीक है-दुर्बुद्धियों की ऐसी ही गति हुआ करती है। जो लोग दुष्ट हृदय बनकर दूसरों का बुरा कर सोचते हैं, उनका बुरा करते हैं, वे स्वयं अपना बुरा अन्त में कुगतियों में जाकर अनन्त दुःख उठाते हैं। इस प्रकार धनकीर्ति पुण्य के प्रभाव से अनेक बड़ी–बड़ी आपत्तियों से भी सुरक्षित रहकर सुखपूर्वक जीवनयापन करने लगा ॥१२८–१३३॥

जब महाराज विश्वम्भर को धनकीर्ति के पुण्य, उसकी प्रतिष्ठा तथा गुणशालीनता का परिचय मिला तो वे उससे बहुत खुश हुए और उन्होंने अपनी राजकुमारी का विवाह भी शुभ दिन देखकर बड़े ठाटबाट सहित उसके साथ कर दिया। धनकीर्ति को उन्होंने दहेज में बहुत धन सम्पत्ति दी, उसका खूब सम्मान किया तथा 'राज्य सेठ' के पद पर भी उसे प्रतिष्ठित किया। इस पर किसी को आश्चर्य नहीं करना चाहिए क्योंकि संसार में ऐसी कोई शुभ वस्तु नहीं जो जिनधर्म के प्रभाव से प्राप्त न होती हो ॥१३४–१३६॥

गुणपाल को जब अपने पुत्र का हाल ज्ञात हुआ तो उसे बड़ी प्रसन्नता हुई वह उसी समय कौशाम्बी से उज्जयिनी के लिए चला और बहुत शीघ्र अपने पुत्र से आ मिला। सबका फिर पुण्य मिलाप हुआ। धनकीर्ति पुण्योदय से प्राप्त हुए भोगों को भोगता हुआ अपना समय सुख से बिताने लगा। इससे कोई यह न समझ ले कि वह अब दिन–रात विषयभोगों में ही फँसा रहता था, नहीं; उसका अपने आत्मकल्याण की ओर भी पूरा ध्यान था वह बड़ी सावधानी के साथ सुख देने वाले जिनधर्म

एवं श्रीधनकीर्त्तिस्तु प्राप्ततातादिसंगमः। सुस्थितो निजपुण्येन सम्पदासारमण्डितः ॥१३८॥
भुञ्जानो विविधान्भोगान्मुधीः पञ्चेन्द्रियोचितान्। धर्मशर्माकरे जैने सावधानो विचक्षणः ॥१३९॥
श्रीजिनेन्द्रपदाम्भोजं नित्यं भक्त्या समर्चयन्। ज्ञानविज्ञानसम्पन्नः पात्रदानेषु तत्परः ॥१४०॥
नित्यं परोपकारादि-सत्कर्मस्थितिमाचरत्। बह्वालापेन किं कार्यं यत्फलं सुकृतोदयात् ॥१४१॥
तत्तत्सर्वं समासाद्य पूर्वपुण्यप्रभावतः। अन्वभूत्सुचिरं सौख्यं जगच्चेतोनुरञ्जयन् ॥१४२॥
अथैकदा महाश्रेष्ठी गुणपालो गुणोज्वलः। सुधीः श्रीधनकीर्त्यादि-पुत्रमित्रादिसंयुतः ॥१४३॥
दर्शनार्थं समायाता-नंगसेनायुतोपि च। श्रीयशोध्वजनामानं मुनीन्द्रं त्रिजगद्धितम् ॥१४४॥
अभिवन्द्य महाभक्त्या प्रीत्याप्रच्छच्च तं गुरुम्। स्वामिन्ननेन पुत्रेण पुण्यं श्रीधनकीर्त्तिना ॥१४५॥
किं पुरोपार्जितं येन बालत्वेऽपि महानसौ। नाना दुष्टोपसर्गौघं हेलया जयति स्म च ॥१४६॥
कीर्त्तिमान्सारलक्ष्मीशः संजातः सारसौख्यभाक्। महाविज्ञानसम्पन्नो दाता भोक्ता दयापरः ॥१४७॥
तत्सर्वं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि। तदा यशोध्वजः स्वामी चतुर्ज्ञानविराजितः ॥१४८॥
स जगौ करुणासिन्धुः श्रूयतां भो वणिक्पते। अवन्तिविषये पूर्वं शिरीषग्रामवासकः ॥१४९॥
मृगादिसेनको मत्स्य-बन्धकः किल त्वेकदा। यशोधरमुनेर्वाक्या-देकस्मिन्वासरे मुदा ॥१५०॥

की सेवा करता था, भगवान् की प्रतिदिन पूजा करता था, पात्रों को दान देता था, दुःखी अनाथों की सहायता करता था और सदा स्वाध्याय-अध्ययन करता था, मतलब यह कि धर्म-सेवा और परोपकार करना ही उसके जीवन का एक मात्र लक्ष्य हो गया था। पुण्य के उदय से जो प्राप्त होना चाहिए वह सब धनकीर्ति को इस समय प्राप्त था। इस प्रकार धनकीर्ति ने बहुत दिनों तक खूब सुख भोगा और सबको प्रसन्न रखने की वह सदा चेष्टा करता रहा ॥१३७-१४२॥

एक दिन धनकीर्ति का पिता गुणपाल सेठ अपनी स्त्री, पुत्र, मित्र, बन्धु-बान्धव को साथ लिए यशोध्वज मुनिराज की वन्दना करने को गया। भाग्य से अनंगसेना भी इस समय पहुँच गई संसार का उपकार करने वाले उन मुनिराज की सभी ने बड़ी भक्ति के साथ वन्दना की। इसके बाद गुणपाल ने मुनिराज से पूछा-प्रभो, कृपाकर बतलाइए कि मेरे इस धनकीर्ति पुत्र ने ऐसा कौन महापुण्य पूर्व जन्म में किया है, जिससे इसने इस बालपन में ही भयंकर से भयंकर कष्टों पर विजय प्राप्त कर बहुत कीर्ति कमाई, खूब धन कमाया और अच्छे-अच्छे पवित्र काम किए, सुख भोगा और यह बड़ा ज्ञानी हुआ, दानी हुआ तथा दयालु हुआ। भगवन्, इन सब बातों को मैं सुनना चाहता हूँ ॥१४३-१४८॥

करुणा समुद्र और चार ज्ञान के धारी यशोध्वज मुनिराज ने, मृगसेन धीवर के अहिंसाव्रत ग्रहण करने, जाल में एक ही एक मच्छ के बार-बार आने, घर पर सूने हाथ लौट आने, स्त्री के नाराज होकर घर में न आने देने आदि की सब कथा गुणपाल से कहकर कहा-वह मृगसेन तो अहिंसाव्रत के प्रभाव से यह धनकीर्ति हुआ, जो कि सर्वश्रेष्ठ सम्पत्ति का मालिक और महाभव्य है और मृगसेन की जो घण्टा नाम की स्त्री थी, वह निदान करके इस जन्म में भी धनकीर्ति की श्रीमती नाम की गुणवती स्त्री हुई

अहिंसाव्रतमाराध्य जातोसौ धनकीर्त्तिभाक्। महाभव्यो जगत्सार-सम्पदाप्रमदापतिः ॥१५१॥
या घण्टा कामिनी पूर्वं निदानवशवर्त्तिनी। सा श्रीमती प्रिया जाता सती सद्गुणमण्डिता ॥१५२॥
पञ्चकृत्वो विमुक्तस्तु यो मत्स्यः स क्रमेण वै। अभूदनंगसेनेयं परोपकृतितत्परा ॥१५३॥
एतत्सर्वमहिंसायाः फलं श्रेष्ठिन् विजृंभते। जैनधर्मेण जन्तूनां किं न स्याद्भुवनत्रये ॥१५४॥
इत्याकर्ण्य मुनेर्वाक्यं स्वर्गमोक्षसुखप्रदम्। श्रीमज्जिनेन्द्रसद्धर्मे बभुवुस्ते तरां रताः ॥१५५॥
श्रुत्वा भवान्तरं श्रीमान् धनकीर्त्तिः प्रसन्नधीः। श्रीमती कामिनी सापि गणिकानंगसेनिका ॥१५६॥
त्रयो जातिस्मृतिं प्राप्य त्रिधा वैराग्यमाश्रिताः। धर्मं धर्मफलं ज्ञात्वा संजातास्तुष्टमानसाः ॥१५७॥
तस्यैव सद्गुरोः पाद-मूले सेवापरायणः। श्रेष्ठी श्रीधनकीर्त्तिस्तु कीर्त्त्या व्याप्तजगत्त्रयः ॥१५८॥
केशपाशं समुन्मूल्य मोहपाशमिवापरम्। दीक्षामादाय जैनेन्द्रीं जगत्तापनिवारिणीम् ॥१५९॥
निर्मलं सुतपस्तप्त्वा भव्यान्सम्बोध्य युक्तितः। श्रीमज्जिनेन्द्रचन्दोक्त-धर्मे कृत्वा प्रभावनाम् ॥१६०॥
रत्नत्रयं समाराध्य संन्यासविधिना सुधीः। सर्वार्थसिद्धिसत्सौख्यं प्राप्तवान्भाविकेवली ॥१६१॥

अन्यग्रन्थे—

पञ्चकृत्वः किलैकस्य मत्सस्याहिंसनात्पुरा। अभूत्पञ्चापदोतीत्य धनकीर्त्तिः पतिः श्रियः॥

है और जो मच्छ पाँच बार पकड़कर छोड़ दिया गया था, वह यह अनंगसेना हुई है, जिसने कि धनकीर्ति को जीवनदान देकर अत्यन्त उपकार किया है, सेठ महाशय, यह सब एक अहिंसाव्रत के धारण करने का फल है और परम अहिंसामयी जिनधर्म के प्रसाद से सज्जनों को क्या प्राप्त नहीं होता। मुनिराज के द्वारा इस सुखदाई कथा को सुनकर सब ही बहुत प्रसन्न हुए, जिनधर्म पर उनकी गाढ़ श्रद्धा हो गई। अपने पूर्व भव का हाल सुनकर धनकीर्ति, श्रीमती और अनंगसेना को जातिस्मरण हो गया। उससे उन्हें संसार की क्षणस्थायी दशा पर बड़ा वैराग्य हुआ। धर्माधर्म का फल भी उन्हें जान पड़ा। उनमें धनकीर्ति तो, जिसका कि सुयश सारे संसार में विस्तृत है, यशोध्वज मुनिराज के पास ही एक दूसरे मोहपाश की तरह जान पड़ने वाले अपने केशकलाप को हाथों से उखाड़ कर जिनदीक्षा ग्रहण कर ली, जो कि संसार के जीवों का उद्धार करने वाली है। साधु हो जाने के बाद धनकीर्ति ने खूब निर्दोष तपस्या की, अनेक जीवों को कल्याण के मार्ग पर लगाया, जिनधर्म की प्रभावना की, पवित्र रत्नत्रय प्राप्त किया और अन्त में समाधि सहित मरकर सर्वार्थसिद्धि का श्रेष्ठ सुख लाभ किया ॥१४९-१६१॥

धनकीर्ति आगे केवली होकर मुक्ति प्राप्त करेगा और ऋषियों ने भी अहिंसाव्रत का फल लिखते समय धनकीर्ति की प्रशंसा में लिखा है—''धनकीर्ति ने पूर्व भव में एक मच्छ को पाँच बार छोड़ा था, उसके फल से वह स्वर्गीयश्री का स्वामी हुआ।'' इसलिए आत्महित की इच्छा करने वालों को यह व्रत मन, वचन, काय की पवित्रतापूर्वक निरन्तर पालते रहना चाहिए।

धनकीर्ति दीक्षित हुआ देखकर श्रीमती और अनंगसेना ने भी हृदय से विषय-वासनाओं को दूरकर अपने योग्य जिनदीक्षा ग्रहण कर ली, जो कि सब दुःखों की नाश करने वाली है। इसके बाद

श्रीमतिस्तु तथानंग-सेनासौ भोगनिस्पृहे। यथायोग्यं समादाय दीक्षां दु:खौघनाशिनीम् ॥१६२॥
स्वस्वभावानुसारेण स्वर्गलोकं समाश्रिते। आराध्य शासनं जैनं प्रापु: के के न सत्सुखम् ॥१६३॥
इत्थं श्रीजिनसूत्रतो विरचिताहिंसाकथा शर्मणे संक्षेपेण मयाल्पबुद्धिवशिना धर्मानुरागेण च।
नाना सारसुखप्रमोदजननी विघ्नौघनिर्नाशिनी भव्यानां भवशान्तये भवतु वै संभाविता मानसे ॥१६४॥
जात: श्रीमति मूलसंघतिलके श्रीकुन्दकुन्दान्वये श्रीभट्टारकमल्लिभूषणगुरु: सद्बोधिसिन्धुर्महान्।
तच्छिष्य: परमार्थपंडितनुत: श्रीसिंहनन्दीमुनिर्भव्यानां भवतारकोतिचतुर: सूरिश्चिरं नन्दतु ॥१६५॥

इति कथाकोशेऽहिंसाव्रते मृगसेनधीवरस्य कथा समाप्ता।

२६. वसुनृपस्य कथा

नत्वा जिनं जगद्बन्धुं सुरासुरसमर्चितम्। वक्ष्ये सत्यवचोदोषी चरित्रं वसुभूपते: ॥१॥
नगर्यां स्वस्तिकावत्यां राजा विश्वावसु: सुधी:। तद्राज्ञी श्रीमती तस्यां वसुनामा सुतोभवत् ॥२॥

अपनी शक्ति के अनुसार तपस्या कर उन दोनों ने भी मृत्यु के अन्त में स्वर्ग प्राप्त किया। सच है-जिनशासन की आराधना कर किस किसने सुख प्राप्त न किया अर्थात् जिसने जिनधर्म ग्रहण किया उसे नियम से सुख मिला है ॥१६२-१६३॥

इस प्रकार मुझ अल्पबुद्धि ने धर्म-प्रेम के वश हो यह अहिंसाव्रत की पवित्र कथा जैनशास्त्र के अनुसार लिखी है। यह सब सुखों की देने वाली माता है और विघ्नों को नाश करने वाली है। इसे आप लोग हृदय में धारण करें। वह इसलिए कि इसके द्वारा आपको शान्ति प्राप्त होगी ॥१६४॥

मूलसंघ के प्रधान प्रवर्तक श्रीकुन्दकुन्दाचार्य की परम्परा में मल्लिभूषण गुरु हुए। वे ज्ञान के समुद्र थे। उनके शिष्य श्रीसिंहनन्दी मुनि हुए। वे बड़े आध्यात्मिक विद्वान् थे। उन्हें अच्छे-अच्छे परमार्थवित्-अध्यात्मशास्त्र के जानकार विद्वान् नमस्कार करते थे। वे सिंहनन्दी मुनि आपके लिए संसार-समुद्र से पार करने वाले होकर संसार में चिरकाल तक बढ़े। उनका यश:शरीर बहुत समय तक प्रकाशित रहे ॥१६५॥

२६. वसुराजा की कथा

संसार के बन्धु और देवों द्वारा पूज्य श्रीजिनेन्द्रदेव को नमस्कार कर झूठ बोलने से नष्ट होने वाले वसुराजा का चरित्र मैं लिखता हूँ ॥१॥

स्वस्तिकावती नाम की एक सुन्दर नगरी थी। उसके राजा का नाम विश्वावसु था। विश्वावसु की रानी श्रीमती थी। उसके एक वसु नाम का पुत्र था ॥२॥

वहीं एक क्षीरकदम्ब नामक उपाध्याय रहता था। वह बड़ा सुचरित्र और सरल स्वभावी था। जिनभगवान् का वह भक्त था और होम, शान्तिविधान आदि जैन क्रियाओं द्वारा गृहस्थों के लिए

तत्र क्षीरकदम्बाख्यः क्षीरवन्निर्मलाशायः। उपाध्यायो महाधीमान् विप्रवंशशिरोमणिः ॥३॥
श्रीजिनेन्द्रपदाम्भोज-महापूजाविधायकः। जैनहोमक्रियामंत्रै-र्भव्यानां शान्तिदायकः ॥४॥
तद्भार्या स्वस्तिमत्याख्या तयोः पुत्रश्च पर्वतः। पापी दुष्कर्मकर्त्ताभूद्विचित्रा संसृतेः स्थितिः ॥५॥
एको वैदेशिको विप्रो नारदो निर्मदो महान्। जिनेन्द्रपादपद्मेषु चञ्चरीकोतिनिश्चलः ॥६॥
स वसुः पर्वतः सोपि नारदश्च गुणोज्वलः। त्रयः क्षीरकदम्बस्य पार्श्वे शास्त्रं पठन्ति ते ॥७॥
वसुनारदनामानौ सञ्जातौ शास्त्रकोविदौ। पर्वतस्य स्वपापेन शास्त्रं नायाति निर्मलम् ॥८॥
एकदा स्वपतिं प्राह कोपात्स्वस्तिमती प्रिया। स्वपुत्रं भो त्वकं नैव व्यक्तं पाठयसीति च ॥९॥
प्रोक्तं क्षीरकदम्बेन पुत्रस्ते मूढमानसः। किञ्चिन्न वेत्ति पापात्मा मया किं क्रियते प्रिये ॥१०॥
विश्वासार्थं ततस्तेन त्रयश्छात्राः स्वबुद्धितः। प्रोक्ता भो पुत्रका यूयं शीघ्रमेतैः कपर्दकैः ॥११॥
भक्षयित्वापणं गत्वा चणकांश्च कपर्दकान्। समादाय स्वचातुर्यात्समागच्छथ मन्दिरम् ॥१२॥
ततस्ते तान्समादाय निर्गता गुरुवाक्यतः। गत्वापणं स निर्बुद्धिः पर्वतस्तैः कपर्दकैः ॥१३॥

शान्ति-सुखार्थ अनुष्ठान करना उसका काम था। उसकी स्त्री का नाम स्वस्तिमती था। उसे पर्वत नाम का एक पुत्र था। भाग्य से वह पापी और दुर्व्यसनी हुआ। कर्मों की कैसी विचित्र स्थिति है पिता तो कितना धर्मात्मा और सरल और उसका पुत्र दुराचारी। इसी समय एक विदेशी ब्राह्मण नारद, जो कि निरभिमानी और सच्चा जिनभक्त था, क्षीरकदम्ब के पास पढ़ने के लिए आया। राजकुमार वसु, पर्वत और नारद ये तीनों एक साथ पढ़ने लगे। वसु और नारद की बुद्धि अच्छी थी, सो वे थोड़े ही समय में अच्छे विद्वान् हो गए। रहा पर्वत सो एक तो उसकी बुद्धि ही खराब और पाप के उदय से उसे कुछ नहीं आता जाता था। अपने पुत्र की यह हालत देखकर उसकी माता ने एक दिन अपने पति से गुस्सा होकर कहा—जान पड़ता है, आप बाहर के लड़कों को तो अच्छी तरह पढ़ाते हैं और खास अपने पुत्र पर आपका ध्यान नहीं है, उसे आप अच्छी तरह नहीं पढ़ाते। इसीलिए उसे इतने दिन तक पढ़ते रहने पर भी कुछ नहीं आया। क्षीरकदम्ब ने कहा—इसमें मेरा कुछ दोष नहीं है। मैं तो सबके साथ एक सा श्रम करता हूँ। तुम्हारा पुत्र ही मूर्ख है, पापी है, वह कुछ समझता ही नहीं। बोलो, अब इसके लिए मैं क्या करूँ? स्वस्तिमती को इस बात पर विश्वास हो, इसलिए उसने तीनों शिष्यों को बुलाकर कहा—पुत्रों, देखो तुम्हें यह एक-एक पाई दी जाती है, इसे लेकर तुम बाजार जाओ; और अपने बुद्धिबल से इसके द्वारा चने लेकर खा आओ और पाई पीछे वापस भी लौटा लाओ। तीनों गए ॥३-१२॥

उनमें पर्वत एक जगह से चने मोल लेकर और वहीं खा पीकर सूने हाथ घर लौट आया। अब रहे वसु और नारद, सो इन्होंने पहले तो चने मोल लिए और फिर उन्हें इधर-उधर घूमकर बेचा, जब उनकी पाई वसूल हो गई तब बाकी बचे चनों को खाकर वे लौट आए। आकर उन्होंने गुरुजी को अमानत वापस सौंप दी। इसके बाद क्षीरकदम्ब ने एक दिन तीनों को आटे के बने हुए तीन बकरे देकर उनसे कहा—देखो, इन्हें ले जाकर और जहाँ कोई न देख पाए ऐसे एकान्त स्थान में इनके कानों को छेद

चणकान्भक्षयित्वा च रिक्तः स्वगृहमागतः। अहो पुण्यं विना जन्तोः क्व बुद्धिः प्रीतिदायिनी ॥१४॥
तौ द्वौ विचक्षणौ गत्वा बहुस्थानेषु तान्मुदा। अर्थव्याजेन भुक्त्वोच्चै-रागतौ सकपर्दकौ ॥१५॥
तथा पिष्टमयांश्छागान्दत्वा तेन त्रयोपि ते। यत्र कोपि न भो पुत्राः पश्यत्येषां च तत्र वै ॥१६॥
कर्णच्छेदो विधातव्यः प्रोक्त्वेति प्रेषिताः पुनः। ततस्ते गुरुवाक्येन तान्गृहीत्वा विनिर्ययुः ॥१७॥
पर्वतस्तु क्वचिद्देशे तत्कृत्वा गृहमागतः। गत्वा सर्वत्र तौ द्वौ च वनादौ निजमानसे ॥१८॥
अहो सर्वे प्रपश्यन्ति चन्द्रार्कग्रहतारकाः। व्यन्तराश्चामरा धीराः पक्षिणः पशवस्तथा ॥१९॥
ज्ञानिनो मुनयश्चापि वार्यते तन्तु केन च। इति ज्ञात्वा न तत्कृत्वा गृहीत्वा तौ तथैव च ॥२०॥
समागत्य गृहं भक्त्या नत्वा क्षीरकदम्बकम्। स्ववृत्तं प्राहतुः सर्वं बुद्धिः कर्मानुसारिणी ॥२१॥
उपाध्यायस्तदावीक्ष्य चातुरीं छात्रयोस्तयोः। जगौ स्वस्तिमतीं भार्यां दृष्टं रे सर्वचेष्टितम् ॥२२॥
एकदा तेन विप्रेण स वसुः कृतदोषकः। यष्ट्या संकुट्यमानस्तु स्वस्तिमत्या सुरक्षितः ॥२३॥
तस्यै तेन वरो दत्तस्तयोक्तं पुत्र मे यदा। कार्यं भविष्यति व्यक्तं तदायं दीयते त्वया ॥२४॥
अथैकदा सुधीः क्षीर-कदम्बोसौ विचक्षणः। सेव्यमानस्त्रिभिच्छात्रै-रटव्यां पठने गतः ॥२५॥

लाओ। गुरु की आज्ञानुसार तीनों फिर इस नये काम के लिए गए। पर्वत ने तो एक जंगल में जाकर बकरे का कान छेद डाला। वसु और नारद बहुत जगह गए, सर्वत्र उन्होंने एकान्त स्थान ढूँढ डाला, पर उन्हें कहीं उनके मन योग्य स्थान नहीं मिला अथवा यों कहिए कि उनके विचारानुसार एकान्त स्थान कोई था ही नहीं। वे जहाँ पहुँचते और मन में विचार करते वहीं उन्हें चन्द्र, सूर्य, तारा, देव, व्यन्तर, पशु, पक्षी और अवधिज्ञानी मुनि आदि जान पड़ते। वे उस समय यह विचार कर, कि ऐसा कोई स्थान ही नहीं जहाँ कोई न देखता हो, वापस घर लौट आए। उन्होंने उन बकरों के कानों को नहीं छेदा। आकर उन्होंने गुरुजी को नमस्कार किया और अपना सब हाल उनसे कह सुनाया। सच है–बुद्धि कर्म के अनुसार ही हुआ करती है। उनकी बुद्धि की इस प्रकार चतुरता देखकर उपाध्याय जी ने अपनी प्रिया से कहा–क्यों देखी सबकी बुद्धि और चतुरता? अब कहा, दोष मेरा या पर्वत के भाग्य का? ॥१३-२२॥

एक दिन की बात है कि वसु से कोई ऐसा अपराध बन गया, जिससे उपाध्याय ने उसे बहुत मारा। उस समय स्वस्तिमती ने बीच में पड़कर वसु को बचा लिया। वसु ने अपनी बचाने वाली गुरु माता से कहा–माता, तुमने मुझे बचाया इससे मैं बड़ा उपकृत हुआ। कहिए तुम्हें क्या चाहिए? वहीं लाकर मैं तुम्हें प्रदान करूँ। स्वस्तिमती ने उत्तर में राजकुमार से कहा–पुत्र, इस समय तो मुझे कुछ आवश्यकता नहीं है, पर जब होगी तब मागूँगी। तू मेरे इस वर को अभी अपने ही पास रख ॥२३-२४॥

एक दिन क्षीरकदम्ब के मन में प्रकृति की शोभा देखने के लिए उत्कंठा हुई वह अपने साथ तीनों शिष्यों को भी इसलिए लिवा ले गया कि उन्हें वहीं पाठ भी पढ़ा दूँगा। वह एक सुन्दर बगीचे में पहुँचा। वहाँ कोई अच्छा पवित्र स्थान देखकर वह अपने शिष्यों को बृहदारण्य का पाठ पढ़ाने लगा। वहीं पर

तत्र ते स्वच्छभूभागे चत्वारो निजलीलया। बृहदारण्यकं शास्त्रं पठन्ति स्म प्रयुक्तितः ॥२६॥
तत्रैकस्मिन्प्रदेशे तु महान्तौ चारणौ मुनी। स्वस्वाध्यायं गृहीतुं च संस्थितौ भुवनोत्तमौ ॥२७॥
तान्दृष्ट्वा लघुना प्रोक्तं मुनिना विनयेन भो। पश्य स्वामिन्कथं चैते संपठन्ति शुचि क्षितौ ॥२८॥
तच्छ्रुत्वा स गुरु प्राह मुनीन्द्रो ज्ञानलोचनः। एतेषु द्वौ प्रवर्त्तेते स्वपुण्यादूर्ध्वगामिनौ ॥२९॥
द्वौ नरौ निजपापेन निन्द्यौ नरकगामिनौ। स्यात्स्वकर्मवशाज्जन्तुः सुखदुःखैकभाजनम् ॥३०॥
मुनेर्वाक्यं समाकर्ण्य सुधीः क्षीरकदम्बवाक्। छात्रान्गृहं विसृज्याशु स्वयं नत्वा मुनीश्वरम् ॥३१॥
पृष्टवान्भो मुने ब्रूहि जैनतत्त्वविदांवर। कौ भाविसुखिनौ देव कौ द्वौ संभाविनारकौ ॥३२॥
ततोऽसौ मदनद्वेषी संजगाद महामुनिः। सुधीर्विप्रकुलाधीश त्वं जिनेन्द्रप्रभक्तिमान् ॥३३॥
नारदश्चोर्ध्वगामी स्यात्स्वपुण्योत्करसम्बलः। द्वौ छात्रौ ते ध्रुवं भावि-नारकौ वसुपर्वतौ ॥३४॥
तत्समाकर्ण्य विप्रोसौ नत्वा मुनिपदद्वयम्। पुत्रखेदात्सखेदस्तु चिन्तयन्निजचेतसि ॥३५॥
काले कल्पशते चापि नान्यथा मुनिभाषितम्। ततः स्वगृहमायातः सर्वशास्त्रविचक्षणः ॥३६॥
एकदा स महाराजः सुधीर्विश्वावसुस्तराम्। वसुं राज्ये समारोप्य सम्प्राप्तः सुतपोवनम् ॥३७॥
तदा राज्यं प्रकुर्वाणो वसुश्चैकदिने मुदा। क्रीडां कर्त्तुं वनं गत्वा तत्राकाशाच्च पक्षिणः ॥३८॥
प्रस्खल्य पतितान्वीक्ष्य विस्मयाक्रान्तमानसः। अत्रास्ति कारणं किञ्चि-दिति ज्ञात्वा स्वचेतसि ॥३९॥

दो ऋद्धिधारी महामुनि स्वाध्याय कर रहे थे। उनमें से छोटे मुनि ने क्षीरकदम्ब को पाठ पढ़ाते देखकर बड़े मुनिराज से कहा–प्रभो, देखिए कैसे पवित्र स्थान में उपाध्याय अपने शिष्यों को पढ़ा रहे है। गुरु ने कहा–अच्छा है, पर देखो, इनमें से दो तो पुण्यात्मा है और वे स्वर्ग में जाएँगे और दो पाप के उदय से नरकों के दुःख सहेंगे। सच है– ॥२५-३०॥

कर्मों के उदय से जीवों को सुख या दुःख भोगना ही पड़ता है। मुनि के वचन क्षीरकदम्ब ने सुन लिए। वह अपने विद्यार्थियों को घर भेजकर मुनिराज के पास गया। उन्हें नमस्कार कर उसने पूछा–हे भगवन्! हे जैन सिद्धान्त के उत्तम विद्वान्! कृपाकर मुझे कहिए कि हममें से कौन दो स्वर्ग जाकर सुखी होंगे और कौन दो नरक जाएँगे? काम के शत्रु मुनिराज ने क्षीरकदम्ब से कहा–भव्य, स्वर्ग जाने वालों में एक तो तू जिनभक्त और दूसरा धर्मात्मा नारद है और वसु तथा पर्वत पाप के उदय से नरक जाएँगे। क्षीरकदम्ब मुनिराज को नमस्कार कर अपने घर आया। उसे इस बात का बड़ा दुःख हुआ कि उसका पुत्र नरक में जायेगा क्योंकि मुनियों का कहा अनन्तकाल में भी झूठा नहीं होता ॥३१-३६॥

एक दिन कोई ऐसा कारण देख पड़ा, जिससे वसु के पिता विश्वावसु अपना राज-काज वसु को सौंपकर आप साधु हो गए। राज्य अब वसु करने लगा। एक दिन वसु वन-विहार के लिए उपवन में गया हुआ था। वहाँ उसने आकाश से लुढ़क कर गिरते हुए एक पक्षी को देखा। देखकर उसे आश्चर्य हुआ। उसने सोचा पक्षी के लुढ़कते हुए गिरने का कोई कारण यहाँ अवश्य होना चाहिए। उसकी शोध लगाने को जिधर से पक्षी गिरा था उधर ही लक्ष्य बाँधकर उसने बाण छोड़ा। उसका लक्ष्य व्यर्थ न गया। यद्यपि उसे यह नहीं जान पड़ा कि क्या गिरा, पर इतना उसे विश्वास हो गया कि उसके बाण के साथ

मुक्त्वा बाणं परीक्षार्थं तत्प्रदेशं प्रति ध्रुवम्। तथा तं स्खलितं दृष्ट्वा गत्वा तत्र स्वयं पुनः ॥४०॥
मत्वा प्रभुः करस्पर्शा-दाकाशस्फटिकोद्भवम्। महास्तंभं तमानीय स्वगेहं गूढवृत्तितः ॥४१॥
तेन स्तंभेन निर्माप्य महापादचतुष्टयम्। सिंहासनं समारुह्य स्वयं लोके स धूर्तकः ॥४२॥
सत्यवाक्यप्रभावेन वसोः सिंहासनं महत्। आकाशे संस्थितं चेति कृत्वा स्फीतिं प्रपञ्चतः ॥४३॥
सेव्यमानो जनैर्नित्यं संस्थितः कपटाश्रितः। जन्तुर्मायारतो मूढः किंः करोति् न वञ्चनम् ॥४४॥
अथ क्षीरकदम्बोसौ सद्दृष्टिर्जिनभक्तिभाक्। विरक्तः संसृतेर्भूत्वा मुनिर्जातो गुणोज्ज्वलः ॥४५॥
तपः कृत्वा जिनन्द्रोक्तं स्वर्गमोक्षसुखप्रदम्। प्रान्ते विधाय संन्यासं स्वर्गलोकं सुधीर्ययौ ॥४६॥
पर्वतस्तु पितुः स्थाने स्थित्वा छात्रान्स्वबुद्धितः। शास्त्रं पाठयतिस्मोच्चैः स्ववृत्तिस्थितिहेतवे ॥४७॥
नारदोपि सुधीः श्रीम-ज्जिनपादाब्जषट्पदः। तदा देशान्तरं प्राप्तो लीलया शुद्धमानसः ॥४८॥
ततो भूरि दिनैः सोपि नारदः सर्वशास्त्रवित्। पर्वतस्य समीपं तु समायातो विनोदतः ॥४९॥
तत्प्रस्तावे दुरात्मासौ पर्वतः पापमण्डितः। अजैर्यष्टव्यमित्येतद्वाक्ये शाखे समागते ॥५०॥

ही कोई भारी वस्तु गिरी जरूर है। जिधर से किसी वस्तु के गिरने की आवाज उसे सुनाई पड़ी थी वह उधर ही गया पर तब भी उसे कुछ नहीं देख पड़ा। यह देख उसने उस भाग को हाथों से टटोलना शुरू किया। हस्तस्पर्श से उसे बहुत निर्मल खम्भा, जो कि स्फटिकमणि का बना था, जान पड़ा। वसुराजा उसे गुप्तरीति से अपने महल पर ले आया। वसु ने उस खम्भे के चार पाए बनवाएँ और उन्हें अपने न्याय-सिंहासन में लगवा दिये। उन पायों के लगने से सिंहासन ऐसा जान पड़ने लगा मानों वह आकाश में ठहरा हुआ हो। वसु अब उसी पर बैठकर राज्यशासन करने लगा। उसने सब जगह यह प्रकट कर दिया कि ''राजा वसु बड़ा ही सत्यवादी है, उसकी सत्यता के प्रभाव से उसका न्याय-सिंहासन आकाश में ठहरा हुआ है।'' इस प्रकार कपट की आड़ में वह सर्वसाधारण के बहुत ही आदर का पात्र हो गया। सच है– ॥३७-४४॥

मायावी पुरुष संसार में क्या ठगाई नहीं करते! इधर सम्यग्दृष्टि, जिनभक्त क्षीरकदम्ब संसार से विरक्त होकर तपस्वी हो गया और अपनी शक्ति के अनुसार तपस्या कर अन्त में समाधिमरण द्वारा उसने स्वर्ग लाभ लिया। पिता का उपाध्याय पद अब पर्वत को मिला। पर्वत की जितनी बुद्धि थी, जितना ज्ञान था, उसके अनुकूल वह पिता के विद्यार्थियों को पढ़ाने लगा। उसी वृत्ति के द्वारा उसका निर्वाह होता था। क्षीरकदम्ब के साधु हुए बाद ही नारद भी वहाँ से कहीं अन्यत्र चल दिया। वर्षों तक नारद विदेशों में घूमा, घूमते फिरते वह फिर भी एक बार स्वस्तिपुरी की ओर आ निकला। वह अपने सहाध्यायी और गुरुपुत्र पर्वत से मिलने को गया। पर्वत उस समय अपने शिष्यों को पढ़ा रहा था। साधारण कुशल प्रश्न के बाद नारद वहीं बैठ गया और पर्वत का अध्यापन कार्य देखने लगा। प्रकरण कर्मकाण्ड का था। वहाँ एक श्रुति थी–''अजैर्यष्टव्यमिति।'' दुराग्रही पापी पर्वत ने उसका अर्थ किया कि ''अजैश्छागैः प्रयष्टव्यमिति'' अर्थात् बकरों की बलि देकर होम करना चाहिए। उसमें बाधा देकर नारद ने कहा–नहीं, इस श्रुति का यह अर्थ नहीं है। गुरुजी ने तो हमें इसका अर्थ बतलाया था कि

अजैश्छागैः प्रयष्टव्यं व्याख्यानं कृतवानिति। तच्छ्रुत्वा नारदेनोक्त-मजैर्धान्यैस्त्रिवार्षिकैः ॥५१॥
उपाध्यायेन सम्प्रोक्तं तदस्माकमिति स्फुटम्। त्वया किं लपितं मूढ महापापविधायकम् ॥५२॥
पापात्मा पर्वतः प्राह यष्टव्यं छागकैर्ध्रुवम्। अहो जानन्नपि प्राणी वक्त्येवं भाविदुर्गतिः ॥५३॥
तौ विवादे तदा कृत्वा जिह्वाच्छेदस्थितिं ध्रुवम्। वचः प्रमाणीकृत्योच्चैः संस्थितौ वसुभूपतेः ॥५४॥
तदा स्वस्तिमती प्राह पर्वतं रे दुराशयम्। विरूपकं त्वया चक्रे व्याख्यानं पापकारणम् ॥५५॥
पिता ते जैनधर्मज्ञो नित्यं पूतैस्त्रिवार्षिकैः। धान्यैरेव करोति स्म यज्ञं पुण्याशयः सुधीः ॥५६॥
इत्यादिकं क्रुधा प्रोक्त्वा पुनः पुत्रस्य मोहतः। ब्राह्मणी सा द्रुतं गत्वा वसोः पार्श्वं जगाद च ॥५७॥
देहि मे तं वरं देव प्रस्तावश्चाद्य विद्यते। त्वया प्रमाणीकर्त्तव्यं पर्वतस्य वचः स्फुटम् ॥५८॥

''अजैस्त्रिवार्षिकैर्धान्यैः प्रयष्टव्यम्' अर्थात्–तीन वर्ष के पुराने धान से, जिसमें उत्पन्न होने की शक्ति न हो, होम करना चाहिए। तू यह क्या अनर्थ करता है जो उलटा ही अर्थ कर दिया? उस पर पापी पर्वत ने दुराग्रह के वश हो यही कहा कि नहीं तुम्हारा कहना सर्वथा मिथ्या है। असल में 'अज' शब्द का अर्थ बकरा होता है और उसी से होम करना चाहिए। ठीक कहा है–जिसे दुर्गति में जाना होता है, वही पुरुष जानकर भी ऐसा झूठ बोलता है ॥४५–५३॥

तब दोनों में सच्चा कौन है, इसके निर्णय के लिए उन्होंने राजा वसु को मध्यस्थ चुना। उन्होंने परस्पर में प्रतिज्ञा की कि जिसका कहना झूठ हो उसकी जबान काट दी जाए। पर्वत की माँ को जब इस विवाद का और परस्पर की प्रतिज्ञा का हाल मालूम हुआ तब उसने पर्वत को बुलाकर बहुत डाँटा और गुस्से में आकर कहा–पापी, तूने यह क्या अनर्थ किया? क्यों उस श्रुति का उलटा अर्थ किया? तुझे नहीं मालूम कि तेरा पिता जैनधर्म का पूर्ण श्रद्धानी था और वह 'अजैर्यष्टव्यम्' इसका अर्थ तीन वर्ष के पुराने धान से होम करने को कहता था और स्वयं भी वह पुराने धान ही से सदा होमादिक किया करता था। स्वस्तिमती ने उसे और भी बहुत फटकारा, पर उसका फल कुछ नहीं निकला। पर्वत अपनी प्रतिज्ञा पर दृढ़ बना रहा। पुत्र का इस प्रकार दुराग्रह देखकर वह अधीर हो उठी। एक ओर पुत्र के अन्याय पक्ष का समर्थन होकर सत्य की हत्या होती है और दूसरी ओर पुत्र–प्रेम उसे अपने कर्तव्य से विचलित करता है। अब वह क्या करे? पुत्र–प्रेम में फँसकर सत्य की हत्या करे या उसकी रक्षा कर अपना कर्तव्य पालन करे? वे बड़े संकट में पड़ी। आखिर दोनों शक्तियों का युद्ध होकर पुत्र–प्रेम ने विजय प्राप्त कर उसे अपने कर्तव्य पथ से गिरा दिया, सत्य की हत्या करने को उसे सन्नद्ध किया। वह उसी समय वसु के पास पहुँची और उससे बोली–पुत्र, तुम्हें याद होगा कि मेरा एक वर तुमसे पाना बाकी है। आज उसकी मुझे जरूरत पड़ी है। इसलिए अपनी प्रतिज्ञा का निर्वाह कर मुझे कृतार्थ करो। बात यह है पर्वत और नारद का किसी विषय पर झगड़ा हो गया है। उसके निर्णय के लिए उन्होंने तुम्हें मध्यस्थ चुना है। इसलिए मैं तुम्हें कहने को आई हूँ कि तुम पर्वत के पक्ष का समर्थन करना। सच है– ॥५४–५८॥

स्वयं पापीजनश्चैवं सपापान्कुरुते परान्। विषोपेतो यथा सर्पः करोति सविषाञ्जनान् ॥५९॥
प्रभाते च तयोर्वादे पापात्मा वसुभूपतिः। उपाध्यायोदितं वाक्यं जानन्नपि हृदि स्फुटम् ॥६०॥
पर्वतस्य वचः सत्यं सम्प्रोक्त्वेति क्षितौ तदा। कष्टादाकण्ठपर्यन्तं प्रविष्टो विष्टरान्वितः ॥६१॥
नारदः प्राह भो भूप यथार्थं गुरुभाषितम्। अद्यापि च द्रुतं ब्रूहि मा गास्त्वं दुर्गतिं वृथा ॥६२॥
इत्युच्चैर्भणितः सोपि वसुभूपः स्वपापतः। पर्वतोक्तं भवेत्सत्यं प्रोक्त्वा भूमिं तरां श्रितः ॥६३॥
ततो मृत्वातिकष्टेन सप्तमं नरकं गतः। पापिनां दुष्टचित्ताना-मीदृशी कुमतिर्भवेत् ॥६४॥
तस्मात्प्राणक्षये चापि कष्टकोटिविधायकम्। असत्यवचनं सद्भिर्न वाच्यं शुभमिच्छुभिः ॥६५॥

जो स्वयं पापी होते हैं वे दूसरों को भी पापी बना डालते हैं। जैसे सर्प जहरीला होता है और जिसे काटता है उसे भी विषयुक्त कर देता है। पापियों का यह स्वभाव ही होता है ॥५९॥

राजसभा लगी हुई थी। बड़े-बड़े कर्मचारी यथास्थान बैठे हुए थे। राजा वसु भी एक बहुत सुन्दर रत्न-जड़े सिंहासन पर बैठा हुआ था। इतने में पर्वत और नारद अपना न्याय कराने के लिए राजसभा में आए। दोनों ने अपना-अपना कथन सुनाकर अन्त में किसका कहना सत्य है और गुरुजी ने अपने को ''अजैर्यष्टव्यम्'' इसका क्या अर्थ समझाया था, इसका खुलासा करने का भार वसु पर छोड़ दिया। वसु उक्त वाक्य का ठीक अर्थ जानता था और यदि वह चाहता तो सत्य की रक्षा कर सकता था, पर उसे अपनी गुराणी जी के माँगे हुए वर ने सत्यमार्ग से ढकेल कर आग्रही और पक्षपाती बना दिया। मिथ्या आग्रह के वश हो उसने अपनी मान-मर्यादा और प्रतिष्ठा की कुछ परवाह न कर नारद के विरुद्ध फैसला दिया। उसने कहा कि जो पर्वत कहता है वही सत्य है और गुरुजी ने हमें ऐसा ही समझाया था कि ''अजैर्यष्टव्यम्'' इसका अर्थ बकरों को मारकर उनसे होम करना चाहिए। प्रकृति को उसका यह महा अन्याय सहन नहीं हुआ। उसका परिणाम यह हुआ कि राजा वसु जिस स्फटिक के सिंहासन पर बैठकर प्रतिदिन राजकार्य करता था और लोगों को यह कहा करता था कि मेरे सत्य के प्रभाव से मेरा सिंहासन आकाश में ठहरा हुआ है, वही सिंहासन वसु की असत्यता से टूट पड़ा और पृथ्वी में घुस गया। उसके साथ ही वसु भी पृथ्वी में जा धँसा। यह देख नारद ने उसे समझाया-महाराज, अब भी सत्य-सत्य कह दीजिए, गुरुजी ने जैसा अर्थ कहा था वह प्रकट कर दीजिए। अभी कुछ नहीं गया। सत्यव्रत आपकी इस संकट से अवश्य रक्षा करेगा। कुगति में व्यर्थ अपने आत्मा को न ले जाइए। अपनी इस दुर्दशा पर भी वसु को दया नहीं आयी। वह और जोश में आकर बोला-नहीं, जो पर्वत कहता है वही सत्य है। उसका इतना कहना था कि उसके पाप के उदय ने उसे पृथ्वीतल में पहुँचा दिया। वसु काल के सुपुर्द हुआ। मरकर वह सातवें नरक में गया। सच है जिसका हृदय दुष्ट और पापी होता है उनकी बुद्धि नष्ट हो जाती है और अन्त में उन्हें कुगति में जाना पड़ता है। इसलिए जो अच्छे पुरुष हैं और पाप से बचना चाहते हैं उन्हें प्राणों पर कष्ट आने पर भी कभी झूठ न बोलना

तदा तं पर्वतं दुष्टं बहिः कृत्वा खरादिभिः। नारदः पूजितः सर्वैः सज्जनैर्भक्तिभारतः ॥६६॥
नारदोपि सुधीस्तत्र जैनधर्मधुरन्धरः। सर्वशास्त्रप्रवीणोऽसौ सारधर्मोपदेशतः ॥६७॥
राज्यं गिरितटाख्याया नगर्याः प्राप्य पुण्यतः। दीर्घकालं सुखं भुक्त्वा दानपूजाव्रतान्वितः ॥६८॥
प्रान्ते वैराग्यभावेन जैनीं दीक्षां सुखप्रदाम्। समादाय मुनिर्भूत्वा भव्यान्सम्बोध्य शुद्धधीः ॥६९॥
स्वयं रत्नत्रयं पूतं समाराध्य विचक्षणः। कृत्वा सारतपः स्वामी जिनपादाब्जभक्तिमान् ॥७०॥
प्राप्तः सर्वार्थसिद्धिं हि प्रोल्लसच्छर्मदायिनीम्। जैनधर्मप्रसादेन किं न स्याद्भव्यदेहिनाम् ॥७१॥
जित्वा सर्वकुवादिनो दृढतरः श्रीनारदो निर्मदः श्रीमत्सारजिनेन्द्रशासनमहासिन्धोर्लसच्चन्द्रमाः।
धृत्वा सारतपः प्रसिद्धमहिमा सर्वार्थसिद्धिं श्रितः स श्रीमान्द्विजवंशमण्डनमणिः कुर्यात्सतां मंगलम् ॥७२॥

इति कथाकोशेऽनृतदोषाख्याने वसुराज्ञः कथा समाप्ता।

२७. श्रीभूतेःकथा।

श्रीजिनं शर्मदं नत्वा सुरासुरसमर्चितम्। स्तेयदोषोद्भवं वृत्तं वक्ष्ये श्रीभूतिसंश्रितम् ॥१॥
सुधीः सिंहपुरे राजा सिंहसेनोतिधार्मिकः। रामदत्ता महाराज्ञी सर्वकार्यविचक्षणा ॥२॥

चाहिए। पर्वत की यह दुष्टता देखकर प्रजा के लोगों ने उसे गधे पर बैठा कर शहर से निकाल बाहर किया और नारद का बहुत आदर-सत्कार किया। नारद अब वहीं रहने लगा। वह बड़ा बुद्धिमान् और धर्मात्मा था। सब शास्त्रों में उसकी गति थी। वह वहाँ रहकर लोगों को धर्म का उपदेश दिया करता, भगवान् की पूजा करता, पात्रों को दान देता। उसकी यह धर्मपरायणता देखकर वसु के बाद राज्य-सिंहासन पर बैठने वाला राजा उस पर बहुत खुश हुआ। उस खुशी में उसने नारद को गिरितट नामक नगरी का राज्य भेंट में दे दिया। नारद ने बहुत समय तक उस राज्य का सुख भोगा। अन्त में संसार से उदासीन होकर उसने जिनदीक्षा ग्रहण कर ली। मुनि होकर उसने अनेक जीवों को कल्याण के मार्ग में लगाया और तपस्या द्वारा पवित्र रत्नत्रय की आराधना कर आयु के अन्त में वह सर्वार्थसिद्धि गया, जो कि सर्वोत्तम सुख का स्थान है। सच है, जैनधर्म की कृपा से भव्य पुरुषों को क्या प्राप्त नहीं होता ॥६०-७१॥

निरभिमानी नारद अपने धर्म पर बड़ा दृढ़ था। उसने समय-समय पर और धर्म वालों के साथ शास्त्रार्थ में विजय प्राप्त कर जैनधर्म की खूब प्रभावना की। यह जिनशासन रूप महान् समुद्र के बढ़ाने वाला चन्द्रमा था। ब्राह्मणवंश का एक चमकता हुआ रत्न था। अपनी सत्यता के प्रभाव से उसने बहुत सिद्धि प्राप्त कर ली थी। अन्त में वह तपस्या कर सर्वार्थसिद्धि गया। वह महात्मा नारद सबका कल्याण करे ॥७२॥

२७. श्रीभूति-पुरोहित की कथा

जिन्हें स्वर्ग के देवता बड़ी भक्ति के साथ पूजते हैं, उन सुख के देने वाले जिनभगवान् को नमस्कार कर मैं श्रीभूत-पुरोहित का उपाख्यान कहता हूँ, जो चोरी करके दुर्गति में गया है। सिंहपुर नाम

अभूत्पुरोहितस्तस्य श्रीभूतः सोपि विप्रकः। सत्यवक्ताहमित्युच्चैः स्वस्फीतिं मायया व्यधात् ॥३॥
पद्मखंडपुरे चाथ सुमित्राख्यो वणिग्वरः। पुत्रः समुद्रदत्तोस्य सुमित्राकुक्षिसंभवः ॥४॥
वाणिज्येनैकदासौ च सुधीः सिंहपुरं गतः। तत्र श्रीभूतिविप्रस्य पार्श्वे सद्रत्नपञ्चकम् ॥५॥
धृत्वा समुद्रदत्तोगा-द्रत्नद्वीपं धनार्जनम्। कृत्वा यावत्समायाति समुद्रे पापकर्मतः ॥६॥
याने संस्फुटिते मृत्युं सम्प्राप्ता बहवो जनाः। अहो पुण्यं विना लोके कार्यैसिद्धिर्न देहिनाम् ॥७॥
कष्टात्समुद्रदत्तोसौ प्राप्य सिंहपुरं परम्। पार्श्वे श्रीभूतिविप्रस्य रत्नार्थी निर्धनो गतः ॥८॥
आगच्छन्तं तमालोक्य दूरतो दुष्टमानसः। लोकानामग्रतो पापी श्रीभूतिर्लोभसंचयः ॥९॥
शृण्वन्त्वंहो अयं कोपि श्रूयते भग्नयानकः। धनक्षयात्समायाति भूत्वा च ग्रहिलस्तराम् ॥१०॥

का सुन्दर नगर था। उसका राजा सिंहसेन था। सिंहसेन की रानी का नाम रामदत्ता था। राजा बुद्धिमान् और धर्मपरायण था। रानी भी बड़ी चतुर थी। सब कामों को वह उत्तमता के साथ करती थी। राजपुरोहित श्रीभूति था। उसने मायाचारी से अपने सम्बन्ध में यह बात प्रसिद्ध कर रक्खी थी कि मैं बड़ा सत्य बोलने वाला हूँ। बेचारे भोले लोग उस कपटी के विश्वास में आकर अनेक बार ठगे जाते थे। पर उसके कपट का पता किसी को नहीं पड़ पाता था। ऐसे ही एक दिन एक विदेशी उसके चंगुल में फँसा। इसका नाम समुद्रदत्त था। यह पद्मखण्डपुर का रहने वाला था। इसके पिता सुमित्र और माता सुमित्रा थी। समुद्रदत्त की इच्छा एक दिन व्यापारार्थ विदेश जाने की हुई। इसके पास पाँच बहुत कीमती रत्न थे। पद्मखण्डपुर में कोई ऐसा विश्वस्त पुरुष इसके ध्यान में नहीं आया, जिसके पास यह अपने रत्नों को रखकर निश्चिंत हो सकता था। इसने श्रीभूति की प्रसिद्धि सुन रखी थी। इसलिए उसके पास रत्न रखने का विचार कर यह सिंहपुर आया। यहाँ श्रीभूति से मिलकर इसने अपना विचार उसे कह सुनाया। श्रीभूति ने इसके रत्नों का रखना स्वीकार कर लिया। समुद्रदत्त को इससे बड़ी खुशी हुई और साथ ही वह उन रत्नों को श्रीभूति को सौंपकर आप रत्नद्वीप के लिए रवाना हो गया। वहाँ कई दिनों तक ठहरकर इसने बहुत घन कमाया। जब वह वापस लौटकर जहाज द्वारा अपने देश की ओर आ रहा था तब पापकर्म के उदय से इसका जहाज टकराकर फट गया। बहुत से आदमी डूब मरे। बहुत ठीक लिखा है कि **बिना पुण्य के कभी कोई कार्य सिद्ध नहीं होता।** समुद्रदत्त इस समय भाग्य से मरते-मरते बच गया। इसके हाथ जहाज का एक छोटा-सा टुकड़ा लग गया। यह उस पर बैठकर बड़ी कठिनता के साथ किसी तरह किनारे आ गया। यहाँ से यह सीधा श्रीभूति पुरोहित के पास पहुँचा। श्रीभूति इसे दूर से देखकर ही पहचान गया। वह धूर्त तो था ही, सो उसने अपने आसपास बैठे हुए लोगों से कहा-देखिये, वह कोई दरिद्र भिखमंगा आ रहा है अब यहाँ आकर व्यर्थ सिर खाने लगेगा। जिसके पास थोड़ा बहुत पैसा होता है या जिनकी मान मर्यादा लोगों में अधिक होती है तो उन्हें इन भिखारियों के मारे चैन नहीं। एक न एक हर समय सिर पर खड़ा ही रहता है। हम लोगों ने जो सुना था कि कल एक जहाज फटकर डूब गया है, मालूम

मन्येहं मां वृथा नत्वा महादुःखेन पीडितः। संयाचिष्यति रत्नानी-त्युक्त्वासौ ब्राह्मणः स्थितः ॥११॥
तदा समुद्रदत्तोसौ तं प्रणम्य जगाद च। देहि मे पञ्च रत्नानि श्रीभूते ब्राह्मणोत्तम ॥१२॥
इत्याकर्ण्य तदा तेन किं भो लोका मयोदितम्। सत्यं जातमिति प्रोक्त्वा ग्रहिलोयं बहिः कृतः ॥१३॥
ये पापिनो भवन्त्यत्र परेषां धनलम्पटाः। ते दुष्टा निन्दितं कर्म किं न कुर्वन्ति लोभतः ॥१४॥
ततो वणिग्वरः सोपि वञ्चितस्तेन पापिना। न दत्ते पञ्च रत्नानि श्रीभूतिर्मे द्विजः कुधीः ॥१५॥

होता है। यह उसी पर का कोई यात्री है और इसका सब धन नष्ट हो जाने से यह पागल हो गया जान पड़ता है। इसकी दुर्दशा से ज्ञान होता है कि यह इस समय बड़ा दुःखी है और इसी से संभव है कि यह मुझसे कोई बड़ी भारी याचना करे। श्रीभूति तो इस तरह लोगों को कह ही रहा था कि समुद्रदत्त उसके सामने जा खड़ा हुआ। श्रीभूति को नमस्कार कर अपनी हालत सुनाना आरम्भ करता है कि इतने में श्रीभूति बोल उठा कि मुझे इतना समय नहीं कि मैं तुम्हारी सारी दुःख कथा सुनूँ। हाँ तुम्हारी इस हालत से जान पड़ता है कि तुम पर कोई बड़ी भारी आफत आई है। अस्तु, मुझे तुम्हारे दुःख में संवेदना है। अच्छा जाइए, मैं नौकरों से कहे देता हूँ कि वे तुम्हें कुछ दिनों के लिए खाने का सामान दिलवा दें। यह कहकर ही उसने नौकरों की ओर मुँह फेरा और आठ दिन तक का खाने का सामान समुद्रदत्त को दिलवा देने के लिए उनसे कह दिया। बेचारा समुद्रदत्त तो श्रीभूति की बातें सुनकर हत-बुद्धि हो गया। उसे काटो तो खून नहीं। उसने घबराते-घबराते कहा-महाराज, आप यह क्या करते है? मेरे जो आपके पास पाँच रत्न रक्खे हैं, मुझे तो वे ही दीजिए। मैं आपका समान-वामान नहीं लेता ॥१-१२॥

श्रीभूति ने रत्न का नाम सुनते ही अपने चेहरे पर का भाव बदला और त्यौरी चढ़ाकर जोर के साथ कहा-रत्न! अरे दरिद्र! तेरे रत्न और मेरे पास? यह तू क्या बक रहा है? कह तो सही वास्तव में तेरी मंशा क्या है? क्या मुझे तू बदनाम करना चाहता है? तू कौन, और कहाँ का रहने वाला है? मैं तुझे जानता तक नहीं, फिर तेरे रत्न मेरे पास आए कहाँ से? जा-जा, पागल तो नहीं हो गया है? ठीक ध्यान से विचार कर। किसी और के यहाँ रखकर उसके भ्रम से मेरे पास आ गया जान पड़ता है। इसके बाद ही उसने लोगों की ओर नजर फेरकर कहा-देखिये साहब, मैंने कहा था न? कि यह मेरे से कोई बड़ी भारी याचना करेगा। ठीक वही हुआ। बतलाइए, इस दरिद्र के पास रत्न कहाँ से आ सकते हैं? धन नष्ट हो जाने से जान पड़ता है यह बहक गया है। यह कहकर श्रीभूति ने नौकरों द्वारा समुद्रदत्त को घर से बाहर निकलवा दिया। नीतिकार ने ठीक लिखा है-जो लोग पापी होते है और जिन्हें दूसरों के धन की चाह होती है, वे दुष्ट पुरुष ऐसा कौन बुरा काम है जिसे लोभ के वश हो न करते हों? श्रीभूति ऐसे ही पापियों में से एक था, तब वह कैसे ऐसे निंद्य कर्म से बचा रह सकता था? पापी श्रीभूति से ठगा जाकर बेचारा समुद्रदत्त सचमुच पागल हो गया? वह श्रीभूति के मकान से निकलते ही यह चिल्लाता हुआ कि पापी श्रीभूति मेरे रत्न नहीं देता है, सारे शहर में घूमने लगा। पर उसे एक

सर्वत्र नगरीमध्ये कृत्वेत्याक्रोशकं सदा। तथा पश्चिमरात्रौ च राजमन्दिरसन्निधौ ॥१६॥
पूत्कारं संकरोत्येवं षण्मासेषु गतेषु च। रामदत्ता तदा राज्ञी सिंहसेनं नृपं जगौ ॥१७॥
नायं देव ग्रहग्रस्तो नित्यमेवैकवाक्यतः। इत्युक्त्वा च ततो द्यूते तया राज्ञ्या स्वबुद्धितः ॥१८॥
पृष्टः पुरोहितश्चेति ब्रूहि भो द्विजसत्तम। अद्यः किं भोजनं भुक्तं भवद्भिः सोशनं जगौ ॥१९॥
साभिज्ञानेन तेनोच्चैः श्रीभूतस्त्रीसमीपके। धात्री निपुणमत्याख्या प्रेषिता रत्नहेतवे ॥२०॥

भिखारी के वेश में देखकर किसी ने उसकी बात पर विश्वास नहीं किया। उल्टा उसे ही सब पागल बताने लगे। समुद्रदत्त दिन भर तो इस तरह चिल्लाता हुआ सारे शहर में घूमता-फिरता और जब रात होती तब राजमहल के पीछे एक वृक्ष पर चढ़ जाता और सारी रात उसी तरह चिल्लाया करता। ऐसा करते-करते उसे ठीक छह महीना बीत गये। समुद्रदत्त का इस तरह रोज-रोज चिल्लाना सुनकर एक दिन महारानी रामदत्ता ने सोचा कि बात वास्तव में क्या है, इसका जरूर पता लगाना चाहिए। तब एक दिन उसने अपने स्वामी से कहा-प्राणनाथ, मैं रोज एक गरीब की पुकार सुनती हूँ। मैं तो यह समझती रही कि वह पागल हो गया है और इसी से दिन-रात चिल्लाया करता है, कि श्रीभूति मेरे रत्न नहीं देता। पर प्रतिदिन उसके मुँह से एक ही वाक्य सुनकर मेरे मन में कुछ खटका पैदा होता है। इसलिए आप उसे बुलाकर पूछिये तो कि वास्तव में रहस्य क्या है? रानी के कहे अनुसार राजा ने समुद्रदत्त को बुलाकर सब बातें पूछी। समुद्रदत्त ने जो यथार्थ घटना थी, वह राजा से कह सुनाई सुनकर राजा ने रानी से कहा कि इसके चेहरे पर से तो इसकी बात ठीक जँचती है। पर इसका भेद खुलने के लिए क्या उपाय है? रानी ने थोड़ी देर तक विचार कर कहा-हाँ, इसकी आप चिन्ता न करें। मैं सब बातें जान लूँगी ॥१३-१८॥

दूसरे दिन रानी ने पुरोहित जी को अपने अन्तःपुर में बुलाया। आदर-सत्कार होने के बाद रानी ने उनसे कहा-मेरी इच्छा बहुत दिनों से आपसे मिलने की थी, पर कोई ठीक समय ही नहीं मिल पाता था। आज बड़ी खुशी हुई कि आपने यहाँ आने की कृपा की। इसके बाद रानी ने पुरोहित से कुछ इधर-उधर की बातें करके उनसे भोजन का हाल पूछा। उनके भोजन का सब हाल जानकर उसने अपनी एक विश्वस्त दासी को बुलाया और उसे कुछ बातें समझा-बुझाकर जाने को कह दिया। दासी के जाने के बाद रानी ने पुरोहित जी से एक नई ही बात का जिकर उठाया। वह बोली-पुरोहित जी, सुनती हूँ कि आप पासे खेलने में बड़े चतुर और बुद्धिमान् है। मेरी बहुत दिनों से इच्छा होती थी कि आपके साथ खेलकर मैं भी एक बार देखूँ कि आप किस चतुराई से खेलते हैं। यह कहकर रानी ने एक दासी को बुलाकर चौपड़ ले आने की आज्ञा की ॥१९॥

पुरोहितजी रानी की बात सुनकर दंग रह गए। वे घबराकर बोले-हैं! हैं! महारानीजी, यह आप क्या करती हैं? मैं एक भिक्षुक ब्राह्मण और आपके साथ मेरी यह धृष्टता। यदि महाराज सुन पावें तो

नैव दत्तानि रत्नानि तया श्रीभूतभार्यया। रामदत्ता ततो राज्ञी द्यूते जित्वा प्रपञ्चतः ॥२१॥
पुनः संप्रेषयामास तन्नामाङ्कितमुद्रिकाम्। ब्राह्मणी सा तदा नैव ददौ रत्नानि लोभतः ॥२२॥
पुनर्यज्ञोपवीतेन धात्र्या संयाचिता सती। सा तस्यै तानि रत्नानि संददाति स्म भीतितः ॥२३॥
ततो राज्ञ्या स्वनाथस्य दर्शितानि तया मुदा। तेन श्रीसिंहसेनेन रत्नान्यादाय धीमता ॥२४॥

वे मेरी क्या गति बनायेंगे?

रानी ने कहा—पुरोहित जी, आप इतने घबराइए मत। मेरे साथ खेलने में आपको किसी प्रकार के गहरे विचार में पड़ने की कोई आवश्यकता नहीं। महाराज इस विषय में आपसे कुछ नहीं कहेंगे। आप डरिए मत।

बेचारे पुरोहितजी बड़े पशोपेश में पड़े। रानी की आज्ञा भी वे नहीं टाल सकते और इधर महाराज का उन्हें भय। वे तो इस उधेड़-बुन में लगे हुए थे कि दासी ने चौपड़ लाकर रानी के सामने रख दी। आखिर उन्हें खेलना ही पड़ा। रानी ने पहली ही बाजी में पुरोहित जी की अँगूठी, जिस पर कि उसका नाम खुदा हुआ था, जीत ली। दोनों फिर खेलने लगे। इतने में पहली दासी ने आकर रानी से कुछ कहा। रानी ने अब की बार पुरोहित जी से जीती हुई अँगूठी चुपके से उसे देकर चले जाने को कह दिया। दासी घण्टे भर बाद फिर आई उसे कुछ निराश सी देखकर रानी ने इशारे से अपने कमरे के बाहर ही रहने को कह दिया और आप अपने खेल में लग गई। अब की बार उसने पुरोहित जी का जनेऊ जीत लिया और किसी बहाने से उस दासी को बुलाकर चुपके से जनेऊ देकर भेज दिया। दासी के वापस आने तक रानी और पुरोहित जी को खेल में लगाये रही। इतने में दासी भी आ गई उसे प्रसन्न देखकर, रानी ने अपना मनोरथ पूर्ण हुआ समझा। उसने उसी समय खेल बन्द किया और पुरोहित जी की अँगूठी और जनेऊ उन्हें वापस देकर वह बोली—आप सचमुच खेलने में बड़े चतुर हैं। आपकी चतुरता देखकर मैं बहुत प्रसन्न हुई आज मैंने सिर्फ इस चतुरता को देखने के लिए ही आपको यह कष्ट दिया था। आप इसके लिए मुझे क्षमा करें। अब आप खुशी के साथ जा सकते है।

बेचारे पुरोहित जी रानी के महल से बिदा हुए। उन्हें इसका कुछ भी पता नहीं पड़ा कि रानी मेरी आँखों में दिन दहाड़े धूल झोंककर मुझे कैसा उल्लू बनाया है।

बात असल में यह थी कि रानी ने पहले पुरोहित जी की जीती हुई अँगूठी देकर दासी को उनकी स्त्री के पास समुद्रदत्त के रत्न लेने को भेजा, पर जब पुरोहित जी की स्त्री ने अँगूठी देखकर भी उसे रत्न नहीं दिये तब यज्ञोपवीत जीता और उसे दासी के हाथ देकर फिर भेजा। अब की बार रानी का मनोरथ सिद्ध हुआ। पुरोहित की स्त्री ने दासी की बातों से डरकर झटपट रत्नों को निकाल दासी के हवाले कर दिया। दासी ने रत्न लाकर रानी को दे दिये। रानी प्रसन्न हुई। पुरोहित जी तो खेलते रहे और उधर उनका भाग्य फट गया, इसकी उन्हें रत्तीभर भी खबर नहीं पड़ी।

क्षिप्त्वा स्वकीयरत्नानां मध्येऽसौ भणितो वणिक्। यानि ते त्वं गृहाणेति तानि भो ग्रहिल ध्रुवम् ॥२५॥
ततो समुद्रदत्तोसौ स्वरत्नान्येव शुद्धधीः। संजग्राह सतां चित्ते परद्रव्यं विषोपमम् ॥२६॥
सिंहसेनो महीनाथस्तदा सन्तुष्टमानसः। तस्मै वणिग्वरायोच्चै-र्दिव्यं श्रेष्ठिपदं ददौ ॥२७॥
ततो भूपेन रुष्टेन पृष्टा धर्माधिकारिणः। ब्रूत भो रत्नचोरस्य किं कार्यं चास्य पापिनः ॥२८॥
तैरुक्तं देव दण्डोस्य महादोषविधायिनः। सर्वस्वहरणं मल्ल-त्रिंशत्सन्मुष्टयोथवा ॥२९॥
कांस्यपात्रत्रयापूर्ण-नवगोमयभक्षणम्। इति त्रिविधदण्डेन दण्डितः पुररक्षकैः ॥३०॥

रानी ने रत्नों को ले जाकर महाराज के सामने रख दिया और साथ ही पुरोहित जी के महल से रवाना होने की खबर दी। महाराज ने उसी समय उनके गिरफ्तार करने की सिपाहियों को आज्ञा दी। बेचारे पुरोहित जी अभी महल के बाहर भी नहीं हुए थे कि सिपाहियों ने जाकर उनके हाथों में हथकड़ी डाल दी और उन्हें दरबार में लाकर उपस्थित कर दिया।

पुरोहित जी देखकर भौचक से रह गए। उनकी समझ में नहीं आया कि यह एकाएक क्या हो गया और कौन सा मैंने ऐसा भारी अपराध किया जिससे मुझे एक शब्द तक न बोलने देकर मेरी यह दशा की गई वे हतबुद्धि हो गए। उन्हें इस बात का और अधिक दुःख हुआ कि मैं एक राजपुरोहित, ऐसा वैसा गैर आदमी नहीं और मेरी यह दशा? और वह बिना किसी अपराध के? क्रोध, लज्जा और आत्मग्लानि से उनकी एक विलक्षण ही दशा हो गई ॥२०-२४॥

रानी ने जैसे ही रत्नों को महाराज के सामने रखा, महाराज ने उसी समय उन्हें अपने और बहुत से रत्नों में मिलाकर समुद्रदत्त को बुलाया और उससे कहा—अच्छा, देखो तो इन रत्नों में तुम्हारे रत्न है क्या? और हो तो उन्हें निकाल लो। महाराज की आज्ञा पाकर समुद्रदत्त ने उन सब रत्नों में से अपने रत्नों को पहचान कर निकाल लिया। सच है, सज्जन पुरुष अपनी ही वस्तु को लेते हैं। दूसरों की वस्तु उन्हें विष समान जान पड़ती हैं। समुद्रदत्त ने अपने रत्न पहचान लिए, यह देख महाराज उस पर इतने प्रसन्न हुए कि उसे उन्होंने अपने राज सेठ बना लिया ॥२५-२७॥

महाराज तुरन्त ही दरबार में आए। जैसे ही उनकी दृष्टि पुरोहित जी पर पड़ी, उन्होंने बड़ी ग्लानि की दृष्टि से उनकी ओर देखकर गुस्से के साथ कहा—पापी, ठग! ॥२८॥

मैं नहीं जानता था कि तू हृदय का इतना काला हो गया और ऊपर से ऐसा ढोंगी का वेष लेकर मेरी गरीब और भोली प्रजा को इस तरह धोखे में फँसायेगा? न मालूम तेरी इस कपटवृत्ति ने मेरे कितने बन्धुओं को घर-घर का भिखारी बनाया होगा? ऐ पाप के पुतले, लोभ के जहरीले सर्प, तुझे देखकर हृदय चाहता तो यह है कि तुझे इसकी कोई ऐसी भयंकर सजा दी जाए, जिससे तुझे भी इसका ठीक प्रायश्चित मिल जाए और सर्व साधारण को दुराचारियों के साथ मेरे कठिन शासन का ज्ञान हो जाए; उससे फिर कोई ऐसा अपराध करने का साहस न करे। परन्तु तू ब्राह्मण है, इसलिए तेरे कुल के लिहाज से तेरी सजा के विचार का भार मैं अपने मंत्री-मण्डल पर छोड़ता हूँ। यह कहकर ही राजा ने अपने

आर्त्तध्यानेन मृत्वासौ श्रीभूतः पापपण्डितः। कष्टतो दुर्गतिं प्राप विप्रको धनलम्पटः ॥३१॥
इति ज्ञात्वा महाभव्यैः स्तेयत्वं कष्टकोटिदम्। त्यक्त्वा श्रीमज्जिनेन्द्रोक्ते धर्मे कार्या मतिः सदा ॥३२॥

धर्माधिकारियों की ओर देखकर कहा–''इस पापी ने एक विदेशी यात्री के, जिसका कि नाम समुद्रदत्त है और वह यहीं बैठा हुआ भी है, कीमती पाँच रत्नों को हड़प कर लिया है, जिनको कि यात्री ने समुद्र यात्रा करने के पहले श्रीभूति को एक विश्वस्त और राजप्रतिष्ठित समझकर धरोहर के रूप में रक्खे थे। दैव की विचित्र गति से यात्रा से लौटते समय यात्री का जहाज एकाएक फट गया और साथ ही उसका सब माल असबाब भी डूब गया। यात्री किसी तरह बच गया। उसने जाकर पुरोहित श्रीभूति से अपनी धरोहर वापस लौटा देने के लिए प्रार्थना की।

पुरोहित के मन में पाप का भूत सवार हुआ। बेचारे गरीब यात्री को उसने धक्के देकर घर से बाहर निकलवा दिया। यात्री अपनी इस हालत से पागल-सा होकर सारे शहर में यह पुकार मचाता हुआ महिनों फिरा कि श्रीभूति ने मेरे रत्न चुरा लिए, पर उस पर किसी का ध्यान न जाकर उल्टा सबने उसे ही पागल कह दिया। उसकी यह दशा देखकर महारानी को बड़ी दया आई। यात्री को बुलाया कर उससे सब बातें दर्याफ्त की गई बाद में महारानी ने उपाय द्वारा वे रत्न अपने हस्तगत कर लिए। वे रत्न समुद्रदत्त के हैं या नहीं इसकी परीक्षा करने के आशय से उन पाँचों रत्नों को मैंने बहुत से और रत्नों में मिला दिया। पर आश्चर्य है कि यात्री ने अपने रत्नों को पहचान कर निकाल लिए। श्रीभूति के जिस्में धरोहर हड़पकर जाने को गुरुत्तर अपराध है। इसके सिवा धोखेबाजी, ठगाई आदि और भी बहुत से अपराध हैं। इसकी इसे क्या सजा दी जाए, इसका आप विचार करें।

धर्माधिकारियों ने आपस में सलाहकर कहा–महाराज, श्रीभूति पुरोहित का अपराध बड़ा भारी है। इसके लिए हम तीन प्रकार की सजायें नियत करते हैं। उनमें से फिर जिसे यह पसन्द करे, स्वीकार करे। या तो इसका सर्वस्व हरण कर लिया जाए और इसे देश बाहर कर दिया जाए, या पहलवानों की बत्तीस मुक्कियाँ इस पर पड़े या तीन थाली में भरे हुए गोबर को यह खा जाए। श्री भूति से सजा पसन्द करने को कहा गया। पहले उसने गोबर खाना चाहा, पर खाया नहीं गया, तब मुक्कियाँ खाने को कहा। मुक्कियाँ पड़ना शुरू हुई कोई दस पन्द्रह मुक्कियाँ पड़ी होंगी कि पुरोहित जी अकल ठिकाने आ गई आप एकदम चक्कर खाकर जमीन पर ऐसे गिरे कि उठे ही नहीं। महा आर्त्तध्यान से उनकी मृत्यु हुई वे दुर्गति में गए। धन में अत्यन्त लम्पटता का उन्हें उपयुक्त प्रायश्चित्त मिला। इसलिए जो भव्य पुरुष हैं, उसे उचित है कि वे चोरी को अत्यन्त दुःख का कारण समझकर उसका परित्याग करें और अपनी बुद्धि को पवित्र जैनधर्म की ओर लगावें, जो ऐसे महापापों से बचाने वाला है ॥२९-३२॥

असुरसुरनरेन्द्रैः खेचरेन्द्रैः प्रपूज्यो जिनपतिरिह भक्त्या सर्वसन्देहहर्ता।
तदुदितवरवाणी सारसौख्यस्य खानिर्दिशतु मम शिवानि श्रीप्रभाचन्द्रदेवः ॥३३॥

इति कथाकोशे स्तेयदोषस्य श्रीभूतिकथा समाप्ता।

२८. नीली-कथा

अथ श्रीजिननाथस्य नत्वा पादद्वयं हितम्। चतुर्थाणुव्रताख्यानं वक्ष्ये नीलीसमाश्रितम् ॥१॥
क्षेत्रेऽस्मिन् भारते पूते लाटदेशे मनोहरे। श्रीमत्सर्वज्ञनाथोक्त-धर्मकार्यैरनुत्तरे ॥२॥
पत्तने भृगुकच्छाख्ये सर्ववस्तुशतैर्भृते। राजाभूद्वसुपालाख्यो सावधानः प्रजाहिते ॥३॥
श्रेष्ठी श्रीजिनदत्तोभू-द्वणिक्सन्दोहसुन्दरः। श्रीमज्जिनेन्द्रचन्द्राणां चरणार्चनतत्परः ॥४॥
तत्प्रिया जिनदत्ताख्या साध्वी सज्ज्ञानमण्डिता। नीली नाम्नी तयोः पुत्री मुनीनामिव शीलता ॥५॥

वे जिनभगवान्, जो सब सन्देहों के नाश करने वाले और स्वर्ग के देवों और विद्याधरों द्वारा पूज्य हैं, वह जिनवाणी जो सब सुखों की खान है और मेरे गुरु श्रीप्रभाचन्द्र ये सब मुझे मंगल प्रदान करें, मुझे कल्याण का मार्ग बतलावें ॥३३॥

२८. नीली की कथा

जिनभगवान् के चरणों को, जो कि कल्याण के करने वाले हैं, नमस्कार कर श्रीमती नीली सुन्दरी की मैं कथा कहता हूँ। नीली ने चौथे अणुव्रत ब्रह्मचर्य की रक्षा कर प्रसिद्धि प्राप्त की है ॥१॥

पवित्र भारतवर्ष में लाटदेश एक सुन्दर और प्रसिद्ध देश था। जिनधर्म का वहाँ खूब प्रचार था। वहाँ की प्रजा अपने धर्म कर्म पर बड़ी दृढ़ थी। इससे इस देश की शोभा को उस समय कोई देश नहीं पा सकता था। जिस समय की यह कथा है, तब उसकी प्रधान राजधानी भृगुकच्छ नगर था। वह नगर बहुत सुन्दर और सब प्रकार की योग्य और कीमती वस्तुओं से पूर्ण था। इसका राजा वसुपाल था और वह जिससे अपनी प्रजा सुखी हो, धनी हो, सदाचारी हो, दयालु हो इसके लिए कोई बात का कष्ट न हो इसका सदा प्रयत्नशील रहता था ॥२-३॥

यहीं एक सेठ रहता था। उसका नाम जिनदत्त था। जिनदत्त की शहर के सेठ साहूकारों में बड़ी इज्जत थीं वह धर्मशील और जिनभगवान् का भक्त था। दान, पूजा, स्वाध्याय आदि पुण्यकर्मों को वह सदा नियमानुसार किया करता था। उसकी धर्मप्रिया का नाम जिनदत्ता था। जैसा जिनदत्त धर्मात्मा और सदाचारी था, उसकी गुणवती साध्वी स्त्री भी उसी के अनुरूप थी और इसी से इनके दिन बड़े ही सुख के साथ बीतते थे। अपने गार्हस्थ्य सुख को स्वर्ग सुख से भी कहीं बढ़कर इन्होंने बना लिया था। जिनदत्ता बड़ी उदार प्रकृति की स्त्री थी। वह जिसे दुःखी देखती उसकी सब तरह सहायता करती और उनके साथ प्रेम करती। इसके सन्तान में केवल एक पुत्री थी। उसका नाम नीली था। अपने माता-पिता के अनुरूप ही इसमें गुण और सदाचार की सृष्टि हुई थी। जैसे सन्तों का स्वभाव पवित्र होता है, नीली भी उसी प्रकार बड़े पवित्र स्वभाव की थी ॥४-५॥

करने का कोई अधिकार नहीं। हमारे पिताजी यदि इस बात को स्वीकार कर लें तो फिर हमें कोई परेशानी नहीं रहेगी। कुल बालिकाओं का यह उत्तर देना उचित ही था। उनका उत्तर सुनकर मुनि ने उन्हें उनके वस्त्र वगैरह दे दिये। उन बालिकाओं ने घर आकर यह सब घटना अपने पिता से कह सुनाई देवदारु ने तब अपने एक विश्वस्त कर्मचारी को मुनि के पास कुछ बातें समझाकर भेजा। उसने जाकर देवदारु की ओर से कहा–आपकी इच्छा देवदारु महाराज को जान पड़ी। उसके उत्तर में उन्होंने यह कहा है कि हाँ मैं अपनी लड़कियों को आपको अर्पण कर सकता हूँ, पर इस शर्त पर कि ''आप विद्युज्जिह को मारकर मेरा राज्य मुझे दिलवा दें।'' रुद्र ने यह स्वीकार किया। सच है, कामी पुरुष कौन पाप नहीं करता। रुद्र को अपनी इच्छा के अनुकूल देख देवदारु उसे अपने घर पर लिवा लाया और बहुत ठीक है, राज्य-भ्रष्ट राजा राज्य प्राप्ति के लिए क्या काम नहीं करता ॥३९-५२॥

इसके बाद रुद्र विजयार्द्ध पर्वत पर गया और विद्याओं की सहायता से उसने विद्युज्जिह्व को मारकर उसी समय देवदारु को राज्य सिंहासन पर बैठा दिया। राज्य प्राप्ति के बाद ही देवदारु ने भी अपनी प्रतिज्ञा पूरी की। अपनी सब लड़कियों का ब्याह आनन्द-उत्सव के साथ उसने रुद्र से कर दिया। इसके सिवा उसने और भी बहुत सी कन्याओं को उसके साथ ब्याह दिया। रुद्र तब बहुत ही कामी हो गया। उसके इस प्रकार तीव्र कामसेवन का नतीजा यह हुआ कि सैकड़ों बेचारी राजबालिकाएँ अकाल में मर गई पर यह पापी तब भी सन्तुष्ट नहीं हुआ। इसने अब की बार पार्वती के साथ ब्याह किया। उसके द्वारा इसकी कुछ तृप्ति जरूर हुई ॥५३-५७॥

कामी होने के सिवा इसे अपनी विद्याओं का भी बड़ा घमंड हो गया था। इसने सब राजाओं को विद्याबल से बड़ा कष्ट दे रखा था, बिना ही कारण यह सबको तंग किया करता था। और सच भी है दुष्ट से किसे शान्ति मिल सकती है। इसके द्वारा बहुत तंग आकर पार्वती के पिता तथा और भी

ततस्तस्याश्च पार्वत्यास्ताताद्यैर्दुःखतो भृशम्। कामसेवाक्षणे तस्य विद्यास्तिष्ठन्ति दूरतः ॥५९॥
इति ज्ञात्वा स संभोगसमये क्रूरमानसः। सस्त्रीको मारितः कष्टं पापिनां सुहृदोरयः ॥६०॥
तदा तस्य महाविद्याः स्वनाथमरणक्षणे। प्रजानां पीडनं चक्रुर्नाना व्याधिशतैस्तराम् ॥६१॥
ततो ज्ञानिमुनेर्वाक्यात्कस्यचित्ते पुनर्जनाः। एकवारं स्वशान्त्यर्थं कृत्वा लिङ्गः क्षमां जगुः ॥६२॥
इदं तस्मान्महामूढो गड्डुरीणां प्रवाहवत्। देवत्वं मानसे ज्ञात्वा मानयन्ति स्म दुर्दृशः ॥६३॥
देवोर्हन्दोषनिर्मुक्तो देवेन्द्राद्यैः प्रपूजितः। केवलज्ञानसाम्राज्यो नान्यो रागादिदूषितः ॥६४॥

सकलभुवननाथैः पूजितो भक्तिभारैः विमलतरगुणौघः केवलज्ञानचन्द्रः।
निखिलसुखसुदाता सर्वसन्तापहर्त्ता स जयतु जगदेकः श्रीजिनो मे प्रशान्त्यै ॥६५॥

इति कथाकाशे सात्यकिरुद्रयोः कथा समाप्ता।

बहुत से राजाओं ने मिलकर इसे मार डालने का विचार किया। पर इसके पास था विद्याओं का बल, सो उसके सामने होने की किसी की हिम्मत न पड़ती और पड़ती भी तो वे कुछ कर नहीं सकते थे। तब उन्होंने इस बात का शोध लगाया कि विद्याएँ इससे किस समय अलग रहती हैं। इस उपाय से उन्हें सफलता प्राप्त हुई। उन्हें यह ज्ञात हो गया कि कामसेवन के समय बल विद्याएँ रुद्र से पृथक् हो जाती है। सो मौका देखकर पर्वती के पिता वगैरह ने खड्ग द्वारा रुद्र को सस्त्रीक मार डाला। सच है–पापियों के मित्र भी शत्रु हो जाया करते हैं ॥५८-६०॥

विद्याएँ अपने स्वामी की मृत्यु देखकर बड़ी दुःखी हुई और साथ ही उन्हें क्रोध भी अत्यन्त आया। उन्होंने तब प्रजा को दुःख देना शुरू किया और अनेक प्रकार की बीमारियाँ प्रजा में फैला दीं। उससे बेचारी गरीब प्रजा त्राह-त्राह कर उठी। इसी समय एक ज्ञानी मुनि इस ओर आ निकले। प्रजा के कुछ लोगों ने जाकर मुनि से इस उपद्रव का कारण और उपाय पूछा। मुनि ने सब कथा कहकर कहा–जिस अवस्था में रुद्र मारा गया है, उसकी एक बार स्थापना करके उससे क्षमा कराओ। वैसा ही किया गया। प्रजा का उपद्रव शान्त हुआ, पर तब भी लोगों की मूर्खता देखो जो एक बार कोई काम किसी कारण को लेकर किया गया सो उसे अब तक भी गडरिया प्रवाह की तरह करते चले आते हैं और देवता के रूप में उसकी सेवा-पूजा करते हैं। पर यह ठीक नहीं। सच्चा देव वही हो सकता है जिसमें राग-द्वेष नहीं जो सबका जानने और देखने वाला हो सकता है और जिसे स्वर्ग के देव, चक्रवर्ती, विधाधर, राजा, महाराजा आदि सभी बड़े-बड़े लोग मस्तक झुकाते हैं और ऐसे देव एक अर्हन्त भगवान् ही हैं ॥६१-६४॥

वे जिन भगवान् मुझे शान्ति दें, जो अनन्त उत्तम-उत्तम गुणों के धारक हैं, सब सुखों के देने वाले हैं, दुःख, शोक, सन्ताप के नाश करने वाले हैं, केवलज्ञान के रूप में जो संसार का आताप हर कर उसे शीतलता देने वाले चन्द्रमा हैं और तीनों लोकों के स्वामियों द्वारा जो भक्तिपूर्वक पूजे जाते हैं ॥६५॥

३८. ब्रह्मण: कथा

नत्वा जिनं जगत्पूज्यमाद्यब्रह्माणमद्भुतम्। ब्रह्मेति देवपुत्रोसौ वक्ष्येऽहं लौकिकीं कथाम् ॥१॥
एवं मूढा: प्रजल्पन्ति ब्रह्मासावेकदामुदा। इन्द्रादीनां पदं जित्वा सर्वोत्कृष्टो भवाम्यहम् ॥२॥
इत्यास्थया महाटव्यामूर्द्धबाहु: प्रकष्टत:। देवतार्द्धचतुर्वर्षसहस्त्राणि महातप: ॥३॥
कुर्वन्नेकपदेनोच्चैर्भुञ्जान: पवनं स्थित:। तप:शक्त्या तदेन्द्रादेर्जातमासनकम्पनम् ॥४॥
इन्द्रनागेन्द्ररुद्राद्या: स्वराजक्षयभीतित:। अप्सरोरूपमादाय कृत्वा देवीं तिलोत्तमाम् ॥५॥
नाना गन्धर्वसद्गान-पेटकाद्यै: समन्विताम्। तत्पार्श्वे प्रेषयामासु: सत्तप:क्षयहेतवे ॥६॥
सापि स्वर्गात्समागत्य तत्ससीपे सुरांगना। हावैर्भावैर्विलासाद्यै: संचक्रे नर्त्तनं महत् ॥७॥
सोपि तद्रूपसंसक्तो भूत्वा ब्रह्मा स्वमानसे। प्रोत्फुल्ललोचनस्तां च पश्यति स्म स्मरोहत: ॥८॥
तच्चित्तं सा परिज्ञात्वा विद्धं कन्दर्पसायकै:। ब्रह्मणो वामपार्श्वं च गत्वा नृत्यं चकार च ॥९॥
दिव्यवर्षसहस्त्रोत्थतपसा दारुणेन च। तत्रापि वामपार्श्वेऽसौ चक्रे वक्त्रं द्वितीयकम् ॥१०॥

---

३८. लौकिक ब्रह्मा की कथा

संसार के द्वारा पूजे गए भगवान् आदि ब्रह्मा (आदिनाथ स्वामी) को नमस्कार कर, देवपुत्र ब्रह्मा की कथा लिखी जाती है ॥१॥

कुछ असमझ लोग ऐसा कहते हैं कि एक दिन ब्रह्माजी के मन में आया कि मैं इन्द्रादिक का पद छीनकर सर्वश्रेष्ठ हो जाऊँ और इसके लिए उन्होंने एक भयंकर वन में हाथ ऊँचा किए बड़ी घोर तपस्या की। वे कोई साढ़े चार हजार वर्ष पर्यन्त (यह वर्ष संख्या देवों के वर्ष के हिसाब से हैं, जो कि मनुष्यों के वर्षों से कई गुणी होती है।) एक ही पाँव से खड़े होकर तप करते रहे और केवल वायु का आहार करते रहे। ब्रह्माजी की यह कठिन तपस्या निष्फल न गई इन्द्रादि का आसन हिल गया। उन्हें अपने राज्य नष्ट होने का बड़ा भय हुआ। तब उन्होंने ब्रह्माजी का तप भ्रष्ट करने के लिए स्वर्ग की एक तिलोत्तमा नाम की वेश्या को, जो कि गन्धर्व देवों के समान गाने और बड़ी सुन्दर नाचने वाली थी, भेजा। तिलोत्तमा उनके पास आई और अनेक प्रकार के हाव-भाव विलास बतला-बतलाकर नाचने लगी। तिलोत्तमा का नृत्य, तिलोत्तमा की भुवन मनोहारिणी रूपराशि और उसका हाव-भाव-विलास देखकर ब्रह्माजी तपसे डगमगे। उन्होंने हजारों वर्षों की तपस्या को एक क्षण भर में नष्ट कर अपने को काम के हाथ सौंप दिया। वे आँखें फाड़-फाड़कर तिलोत्तमा की रूप राशि को बड़े चाव से देखने लगे। तिलोत्तमा ने जब देखा कि हाँ योगिराज अब अपने आपमें नहीं है और आँखें फाड़-फाड़कर मेरी ही ओर देख रहे हैं, तब उनकी इच्छा को और जागृत करने के लिए वह उनकी बायीं ओर आकर नाचने लगी। ब्रह्मा जी ने तब अपनी हजारों वर्षों की तपस्या के प्रभाव से अपना दूसरा मुँह बाँयी ओर बना लिया। तिलोत्तमा जब उनकी पीठ पीछे आकर नाचने लगी। ब्रह्माजी ने तब तीसरा मुँह पीछे की ओर बना लिया ॥२-१०॥

एवं क्रमात्तदासक्तो जातोसौ चतुराननः। ऊर्ध्वे च गर्दभाकारं स्वतुण्डं कृतवान्पुनः ॥११॥
सा नर्त्तकी तपो भ्रष्टं तं विधायेति धूर्त्तिका। स्वर्गं गत्वा सुरेन्द्राणां नत्वा तद्वृत्तकं जगौ ॥१२॥
भो स्वामिनः सुखं नित्यं यूयं तिष्ठथ लीलया। कन्दर्पमूर्च्छितो ब्रह्मा सम्पपात महीतले ॥१३॥
इन्द्रेणोक्तं तदाकर्ण्य तत्र किं त्वं स्थिता न हि। सा जगादेति भो देव वृद्धोसौ नैव रोचते ॥१४॥
ततः कारुण्यभावेन देवेन्द्रेण महाधिया। उर्वशी प्रेषिता वेश्या तत्समीपे मनोहरा ॥१५॥
सापि तत्र समागत्य शक्रादेशेन भक्तितः। कृत्वा तत्पादसंस्पर्श चक्रे तं च सचेतनम् ॥१६॥
तदा तामुर्वशीं प्राप्य गृहं कृत्वा निजेच्छया। नाना भोगान्प्रभुञ्जानः स ब्रह्मा लौकिकः स्थितः ॥१७॥
अहो मूढा न जानन्ति देवं देवस्वरूपकम्। जल्पन्ति मत्तवन्नित्यं स्वेच्छया सत्यवर्जितम् ॥१८॥
इन्द्रादीनां पदं दिव्यं गृह्यते केन तद्धठात्। किं दुराचारमित्युच्चैः कुर्वन्ति सुरयोषितः ॥१९॥
यो ब्रह्मा त्रिजगद्देवः किं करोति कुकर्म सः। सर्वमेतदसत्यं हि ज्ञातव्यं नीतिवेदिभिः ॥२०॥

तिलोत्तमा फिर उनकी दाहिनी ओर जाकर नाचने लगी, ब्रह्माजी ने उस ओर भी मुँह बना लिया। अन्त में तिलोत्तम आकाश में जाकर नाचने लगी। तब ब्रह्माजी ने अपना पाँचवाँ मुँह गधे के मुख के आकार का बनाया। कारण अब उनकी तपस्या का फल बहुत थोड़ा बच रहा था। मतलब यह कि तिलोत्तमा ने जिस प्रकार ब्रह्माजी को नचाया वे उसी प्रकार नाचे। इस प्रकार उन्हें तप से भ्रष्ट कर और उनके हृदय में काम की आग धधका कर चालाक तिलोत्तमा अछूती की अछूती स्वर्ग को चली गई और बेचारे ब्रह्माजी काम के तीव्र वेग से मूर्च्छा खाकर पृथ्वी पर आ गिरे। तिलोत्तमा ने सब हाल इन्द्र से कहकर कहा–प्रभो, अब आप अनन्त काल तक सुख से रहे। मैं ब्रह्माजी की खूब गति बना आई हूँ। तब इन्द्र ने बहुत खुश होकर उससे पूछा–हाँ तिलोत्तमा, तू ब्रह्माजी के पास ठहरी नहीं? तिलोत्तमा बोली–वाह! प्रभो, भली उस बूढ़े की और मेरी आपने जोड़ी मिलाई! मैं तो कभी उसके पास खड़ी तक नहीं रह सकती। यह सुन इन्द्र को ब्रह्माजी की हालत पर बड़ी दया आई उसने फिर सुन्दर वेश्या को उनके पास भेजा। इन्द्र की आज्ञा सिर पर चढ़ा उर्वशी ब्रह्माजी के पास आई उनके पाँवों को छूकर उन्हें उसने सचेत किया। ब्रह्माजी पाँव तले एक स्वर्गीय सुन्दरी को बैठी देखकर बहुत प्रसन्न हुए। उन्हें मानों आज उनकी कड़ी तपस्या का फल मिल गया। ब्रह्माजी अब घर बनाकर उर्वशी के साथ रहने लगे और मनमाने भोग भोगने लगे; तब से लौकिक ब्रह्मा कहलाने लगे ॥११-१७॥

बड़े दुःख की बात है कि असमझ लोग देव या देव के सच्चे स्वरूप को जानते नहीं और जैसी अपनी इच्छा में आता है उन्मत्त की तरह झूठा ही कह दिया करते हैं क्या कोई हठ करके इन्द्रादि का का पद छीन सकता है? और क्या स्वर्ग की देवांगनाएँ व्यभिचार कर सकती है? और जो ब्रह्मा तीन लोक का स्वामी देव कहा जाता है वह क्या ऐसा नीच कर्म करेगा? समझदारों को ये बातें झूठी समझना चाहिए और जिसमें ऐसी बातें हैं वह कभी ब्रह्मा नहीं हो सकता। जैन शास्त्रों में ब्रह्मा उसे कहा है, जो मोक्षमार्ग का बताने वाला, सच्चे ज्ञान और सच्चे चारित्र की प्राप्ति कराने वाला और

श्रीमज्जिनागमे प्रोक्तो ब्रह्मासौ पञ्चधा ध्रुवम्। मोक्षे तथाऽऽत्मनिज्ञाने चारित्रे वृषभप्रभुः ॥२१॥
अन्यथा न परो ब्रह्मा विद्यते भुवनत्रये। रागादिदूषितः कामी कथं देवो भवेद्भुवि ॥२२॥
यस्तु रागादिभिर्मुक्तो लोकालोकप्रकाशकः। केवलज्ञानसच्चक्षु स मे ब्रह्मा वृषध्वजः ॥२३॥
यो जानात्यखिलं जगत्त्रयमिदं सत्केवलज्ञानभाक् भव्याम्भोरुहभास्करोतिचतुर संसारनिस्तारकः।
ब्रह्मा श्रीवृषभेश्वरो गुणनिधिः स्वर्गापवर्गप्रदः स स्यान्मे भवशान्तये शुचितरो देवेन्द्रवर्यैः स्तुतः ॥२४॥

इति कथाकोशे लौकिकस्य ब्रह्मणः कथा समाप्ता।

३९. परिग्रहाद्भीतस्य धनदत्तस्य कथा

नत्वा निर्ग्रन्थनाथेशं श्रीजिनं परमेश्वरम्। ग्रन्थोत्पन्नं भयं प्राप्तौ भ्रातरौ तत्कथां ब्रुवे ॥१॥
दशार्णविषये रम्ये पुरे चैकरथाभिधे। धनदत्तोभवच्छ्रेष्ठी धनदत्ता प्रिया तयोः ॥२॥
संजातौ धनदेवाख्यधनमित्रौ सुतोत्तमौ। धनमित्राभवत्पुत्री स्वरूपगुणमण्डिता ॥३॥
धनदत्ते मृते तस्मिन्तौ पुत्रौ पापकर्मणा। दारिद्र्येण महाकष्टं पीडितौ शर्महारिणा ॥४॥

आत्मा को निजस्वरूप में स्थिर करने वाला है। वह अर्हन्त, सिद्ध, आचार्य, उपाध्याय और साधु इन अवस्थाओं से पाँच प्रकार का है। इनके सिवा संसार में कोई ब्रह्मा नहीं है क्योंकि राग, द्वेष, क्रोध, मान, माया लोभ आदि दोषों से युक्त कभी ब्रह्मा-देव हो ही नहीं सकता किन्तु जो इन रागादि दोषों से रहित हैं, लोक और अलोक जानने वाले हैं और केवलज्ञानरूपी नेत्र से युक्त हैं वे ही ऋषभ भगवान् मेरे सच्चे ब्रह्मा हैं ॥१८-२३॥

वे परम पवित्र आदिनाथ जिनेन्द्र मुझे संसार के दुःखों से छुड़ाकर शांति प्रदान करें, जो भव्यजनरूपी कमलों को प्रफुल्लित करने के लिए सूरज के समान हैं, संसार-समुद्र पार करने वाले हैं, गुणों के समुद्र हैं, स्वर्ग और मोक्ष का पवित्र सुख देने वाले हैं, इंद्रादि देवों द्वारा पूज्य हैं और केवलज्ञान द्वारा सारे संसार के जानने और देखने वाले हैं ॥२४॥

३९. परिग्रह से डरे हुए दो भाइयों की कथा

धन, धान्य, दास, दासी, सोना, चाँदी आदि जो संसार के जीवों को तृष्णा के जाल में फँसाकर कष्ट पर कष्ट देने वाले हैं ऐसे परिग्रह से माया, ममता छोड़ने वाले जो साधु-सन्त हैं, उनसे भी जो ऊँचा हैं, जिनके त्याग से आगे त्याग की कोई सीमा नहीं, ऐसे सर्वश्रेष्ठ जिनेन्द्र भगवान् को नमस्कार कर परिग्रह से डरे हुए दो भाइयों की कथा लिखी जाती है ॥१॥

दशार्ण देश में बहुत सुन्दर एकरथ नाम का एक शहर था। उसमें धनदत्त नाम का सेठ रहता था। इसकी स्त्री का नाम धनदत्ता था। इसके धनदेव और धनमित्र ऐसे दो पुत्र और धनमित्रा नाम की सुन्दर लड़की थी ॥२-३॥

धनदत्त की मृत्यु के बाद इन दोनों भाइयों के कोई ऐसा पापकर्म का उदय आया, जिससे

कौशाम्बीं नगरीं गत्वा प्रणम्य निजमातुलम्। ऊचतुः साश्रुपातं च स्वपितुर्मरणं तदा ॥५॥
मातुलोपि ततो धीमान् श्रुत्वा तद्वृत्तकं तयोः। समुद्धीर्य शुभैर्वाक्यैरष्टानर्घ्यमणीन्ददौ ॥६॥
बन्धुत्वं तद्दयालुत्वं गम्भीरत्वं तदेव च। अर्थिनां यन्निजैर्वित्तैर्भवेदाशाप्रपूरणम् ॥७॥
तौ तान्मणीन्समादाय मार्गे तल्लोभतस्तराम्। चिन्तयामासतुश्चित्ते मारणं च परस्परम् ॥८॥
ततः स्वपुरसानिध्यं समागत्य स्वमानसे। पश्चातापं विधायोच्चैस्तौ प्रकाश्य मनोमलम् ॥९॥
क्षिप्त्वा वेत्रवतीनद्यां तान्मणीन्गृहमागतौ। मत्स्येन गिलितास्ते तु मांसं मत्वा सुपापिना ॥१०॥
ततोसौ धीवरेणैव हतस्तोयचरः पुनः। तयोर्मातुः करे प्राप्ता मणयः कर्मयोगतः ॥११॥
तदासौ धनदत्तोपि मणीनादाय मानसे। पुत्रपुत्रीमहाघातं चिन्तयामास लोभतः ॥१२॥
पुनर्निन्दां निजां कृत्वा स्वपुत्र्यै संददौ मणीन्। गृहीत्वा धनमित्रा च महापापप्रमोहिता ॥१३॥
सापि स्वभ्रातृमातृणां चित्ते धत्ते स्म मारणम्। अहो कष्टं कुधीर्लोभो जन्तूनां पापकारणम् ॥१४॥
ततस्तया निजे चित्ते पश्चातापं विधाय च। भ्रातृभ्यां मणयो दत्ता कष्टकोटिविधायकाः ॥१५॥

इनका सब धन नष्ट हो गया, ये महा दरिद्र बन गए। कुछ सहायता मिलेगी इस आशा से ये दोनों भाई अपने मामा के यहाँ कौशाम्बी गए और इन्होंने बड़े दुःख के साथ पिता की मृत्यु का हाल मामा को सुनाया। मामा भी इनकी हालत देखकर बड़ा दुःखी हुआ। उसने अनेक प्रकार समझा-बुझाकर इन्हें धीरज दिया और साथ ही आठ कीमती रत्न दिये, जिससे कि ये अपना संसार चला सकें। सच है, यही बन्धुपना है, यही दयालुपना है और यही गम्भीरता है जो अपने धन द्वारा याचकों की आशा पूरी की जाए ॥४-७॥

दोनों भाई रत्नों को लेकर अपने घर की ओर रवाना हुए। रास्ते में आते-आते इन दोनों की नियत उन रत्नों के लोभ से बिगड़ी। दोनों ही के मन में परस्पर के मार डालने की इच्छा हुई इतने में गाँव पास आ जाने से इन्हें सुबुद्धि सूझ गई। दोनों ने अपने-अपने नीच विचारों पर बड़ा ही पश्चाताप किया और परस्पर में अपना विचार प्रकट कर मन का मैल निकाल डाला। ऐसे पाप विचारों के मूल कारण इन्हें वे रत्न ही जान पड़े। इसलिए उन रत्नों को वेत्रवती नदी में फेंककर ये अपने घर पर चले आए। उन रत्नों को मांस समझकर एक मछली निगल गई यही मछली एक धीवर के जाल में आ फँसी। धीवर ने मछली को मारा। उसमें से वे रत्न निकले। धीवर ने उन्हें बाजार में बेच दिया। धीरे-धीरे कर्मयोग से वही रत्न इन दोनों भाईयों की माँ के हाथ पड़े। माता ने उनके लोभ से अपने लड़के-लड़की को ही मार डालना चाहा परन्तु तत्काल सुबुद्धि उपज जाने से उसने बहुत पश्चाताप किया और रत्नों को अपनी लड़की को दे दिये। धनमित्रा की भी यही दशा हुई उसकी भी लोभ के मारे नियत बिगड़ गई उसने माता, भाई आदि की जान लेनी चाही। सच है-**संसार में सबसे बड़ा भारी पाप का मूल लोभ है।** अन्त में धनमित्रा को भी अपने विचार पर बड़ी घृणा हुई और उसने फिर उन रत्नों को अपने भाइयों के हाथ दे दिया। वे उन्हें पहचान गए। उन्हें रत्नों के प्राप्त होने का हाल जानकर बड़ा ही वैराग्य हुआ। उसी समय वे संसार की सब माया-ममता छोड़कर, जो कि

तौ तान्मणीन्परिज्ञात्वा महावैराग्ययोग्यतः। त्यक्त्वा परिग्रहं सर्वं महाक्लेशस्य कारकम् ॥१६॥
स्वमातृभगिनीयुक्तौ नत्वा दमधराभिधम्। मुनीन्द्रं परया भक्त्या स्वर्गमोक्षसुखप्रदम् ॥१७॥
दीक्षामादाय जैनेन्द्रीं सुरेन्द्राद्यैः समर्चिताम्। जातौ मुनी जगत्पूज्यौ निजात्मपरतारकौ ॥१८॥
मत्वैवं भवभूरिदुःखजनकं लोभं महापापदं मातृभ्रातृकुटुम्बवञ्चनगृहं त्यक्त्वा त्रिधा धार्मिकैः।
श्रीमज्जैनमते जगत्त्रयहिते धर्मे सुशर्मप्रदे कर्त्तव्यं सुमनो दृढं प्रतिदिनं शुद्धं महाश्रेयसे ॥१९॥

इति कथाकोशे परिग्रहाद्भयमिति कथा समाप्ता।

४०. धनाद्भीतस्य सागरदत्तस्य कथा

प्रणम्य परमात्मानं श्रीजिनं केवलेक्षणम्। जातं भयं धनाच्चेति कथयामि कथानकम् ॥१॥
कौशाम्ब्यां धनमित्राख्यधनदत्तादयो मुदा। वाणिज्येन वणिक्पुत्रा निर्गता राजगेहकम् ॥२॥
तस्करैश्च महाटव्यां पापिष्ठैस्तद्धनं हृतम्। हानिर्लोके विपुण्यानामुद्यमेऽपि भवेद्ध्रुवम् ॥३॥
चौरास्तेऽपि धनार्थं च मारणार्थं परस्परम्। रात्रौ चक्रुर्विषाहारं हा कष्टं दुष्ट चेष्टितम् ॥४॥
दस्यवस्ते तदाहारं भुक्त्वाशु प्राणनाशकम्। मृत्युं प्रापुः प्रकष्टेन क्व भवेन्पापिनां शुभम् ॥५॥

महा दुःख का कारण है, दमधर मुनि के पास दीक्षा के लिए गए। इन्हें साधु हुए देखकर इनकी माता और बहिन भी आर्यिका हो गई आगे चलकर ये दोनों भाई बड़े तपस्वी महात्मा हुए। अपना और दूसरों का संसार के दुःखों से उद्धार करना ही एक मात्र इनका कर्तव्य हो गया। स्वर्ग के देवता और प्रायः सब ही बड़े-बड़े राजा-महाराजा इनकी सेवा-पूजा करने को आने लगे ॥८-१८॥

यह लोभ संसार के दुःखों का मूल कारण और अनेक कष्टों का देने वाला है, जो माता, पिता, भाई, बहिन, बन्धु, बान्धव आदि के परस्पर में ठगने और बुरे विचारों के उत्पन्न करने की इच्छा करते हैं, उन्हें चाहिए कि वे इस पाप के बाप लोभ को मनसा, वाचा, कर्मणा छोड़कर संसार का हित करने वाले और स्वर्ग तथा मोक्ष का सुख देने वाले जिनेन्द्र भगवान् के उपदेश किए परम पवित्र धर्म में अपने मन को दृढ़ करने का यत्न करें ॥१९॥

४०. धन से डरे हुए सागरदत्त की कथा

केवलज्ञानरूपी उज्ज्वल नेत्र और तीनों लोक को देखने और जानने वाले ऐसे जिनेन्द्र भगवान् को नमस्कार कर धन के लोभ से डरकर मुनि हो जाने वाले सागरदत्त की कथा लिखी जाती है ॥१॥

किसी समय धनमित्र, धनदत्त आदि बहुत से सेठों के पुत्र व्यापार के लिए कौशाम्बी से चलकर राजगृह की ओर रवाना हुए। रास्ते में एक गहन वन में चोरों ने इन्हें लूट-लिया। इनका सब माल-असबाब छीन-छानकर वे चलते हुए। सच है, जिनके पल्ले में कुछ पुण्य नहीं होता। वे कोई भी काम करें, उन्हें नुकसान ही उठाना पड़ता है ॥२-३॥

उधर धन पाकर चोरों की नियत बिगड़ी। सब परस्पर में यह चाहने लगे कि धन मेरे ही हाथ पड़े और किसी को कुछ न मिले और इसी लालसा से एक-एक के विरुद्ध जान लेने की कोशिश करने

तेषां मध्ये वणिक्पुत्रः सुधीः सागरदत्तवाक्। रात्रिभुक्तिव्रतात्तेन न भुक्तं तद्विषान्नकम् ॥६॥
समालोक्य तदा सोपि तेषां मृत्युं विरक्तवान्। संत्यक्त्वा तद्धनं त्रेधा मुनिर्जातो जगद्धितः ॥७॥
एकेनापि जिनेन्द्रदेवकथिते नोच्चैर्व्रतेन स्वयं ज्ञात्वा संसृतिचेष्टितं च हृदये विद्युच्चलं जीवितम्।
त्यक्त्वा तच्च धनं विशिष्टचरणो ज्ञातो मुनिः शुद्धधीः स श्रीसागरदत्तवाग्गुणनिधिः कुर्यात्सतां मंगलम् ॥८॥

इति कथाकोशे धनाद्भीतस्य सागरदत्तस्य कथा समाप्ता।

४१. धनाद्भ्रमबुद्धिकुबेरदत्त-कथा

श्रीजिनं त्रिजगत्पूज्यं भारतीं भुवनोत्तमाम्। नमस्कृत्य गुरुन् भक्त्या वक्ष्ये संगकथानकम् ॥१॥
देशे मणिवते ख्याते पुरे मणिवताभिधे। राजा मणिवतो नाम्ना तद्राज्ञी पृथिवीमती ॥२॥
तत्पुत्रो मणिचन्द्राख्यः संजातो गुणसंयुतः। शूरो धीरोतिगंभीरो राजविद्याविराजितः ॥३॥
स राजा पूर्वपुण्येन कुर्वनराज्यं निजेच्छया। संस्थितः श्रीजिनेन्द्रोक्त-धर्मकर्मपरायणः ॥४॥
दानं भक्त्या सुपात्रेषु पूजां श्रीमज्जिनेशिनाम्। नित्यं परोपकारं च करोति स्म स भूपतिः ॥५॥
एकदा पृथिवीदेवी कुर्वती केशसंस्कृतिम्। मस्तके स्वपतेः केशं पलितं वीक्ष्य सा ददौ ॥६॥

लगे। रात को जब वे सब खाने को बैठे तो किसी ने भोजन में विष मिला दिया और उसे खाकर सब के सब परलोक सिधार गए। यहाँ तक कि जिसने विष मिलाया था, वह भी भ्रम से उसे खाकर मर गया। उसमें एक सागरदत्त नामक वैश्यपुत्र बच गया। वह इसलिए कि उसे रात्रि में खाने-पीने की प्रतिज्ञा थी। धन के लोभ में फँसने से एक साथ सबको मरा देखकर सागरदत्त को बड़ा वैराग्य हुआ। वह उस धन को वहीं छोड़-छाड़कर चल दिया और एक साधु के पास जाकर आप मुनि बन गया ॥४-७॥

रात्रिभुक्तत्यागव्रती सागरदत्त ने संसार की सब लीलाओं को दुःख का कारण और जीवन को बिजली की तरह जानकर पलभर में नाश होने वाला सब धन वहीं पर पड़ा छोड़कर आप एक ऊँचा आचरण का धारक साधु हो गया। वह सागरदत्त मुनि आप सज्जनों का कल्याण करें ॥८॥

४१. धन के लोभ से भ्रम में पड़े कुबेरदत्त की कथा

जिनेन्द्र भगवान् को, जो कि सारे संसार द्वारा पूज्य हैं और सबसे उत्तम गिनी जाने वाली जिनवाणी तथा गुरुओं को भक्तिपूर्वक नमस्कार कर परिग्रह के सम्बन्ध की कथा लिखी जाती है ॥१॥

मणिवत देश में मणिवत नाम का एक शहर था। उसके राजा का नाम भी मणिवत था। मणिवत की रानी पृथ्वीमति थी। इसके मणिचन्द्र नाम एक पुत्र था। मणिवत विद्वान्, बुद्धिमान् और अच्छा शूरवीर था। राजकाज में उसकी बहुत अच्छी गति थी ॥२-३॥

राजा पुण्योदय से राजकाज योग्यता के साथ चलाते हुए सुख से अपना समय बिताते थे। धर्म पर उनकी पूरी श्रद्धा थी वे सुपात्रों को प्रतिदिन दान देते, भगवान् की पूजा करते और दूसरों की भलाई करने में भरसक यत्न करते। एक दिन रानी पृथ्वीमति महाराज के बालों को सँवार रही थीं कि उनकी

दृष्ट्वा मणिवतो राजा केशं वा यमपाशकम्। त्रिधा वैराग्यमापन्नो जैनतत्वविदाम्वरः ॥७॥
स्वराज्यं मणिचन्द्राय दत्वा पुत्राय धीमते। कृत्वा पूजां जिनेन्द्राणां महास्नपनपूर्वकम् ॥८॥
दानं दत्वा यथायोग्यमर्थिभ्यो विनयान्वितः। जिनदीक्षां समादाय मुनिर्जातो जगद्धितः ॥९॥
एकदासौ विशुद्धात्मा संस्मरञ्जिनपादयोः। एकाकी विहरन्धीमानुज्जयिन्याः श्मशानके ॥१०॥
समागत्य स्थितो रात्रौ धीरो मृतकशय्यया। ध्यायंश्चित्ते महाशान्त्यै परमात्मानमुत्तमम् ॥११॥
तदा कापालिकः पापी तत्रागत्य श्मशानके। मृतकद्वयं समानीय मुनेः पार्श्वे सुनिर्घृणः ॥१२॥
तन्मस्तकत्रयेणाशु कृत्वा चुल्लीं निजेच्छया। तत्र वेतालिकीविद्यासाधनार्थं नरस्य च ॥१३॥
कपाले चरुकं कर्त्तुं प्रवृत्तो वह्निना तदा। मुनेस्तस्य नसादाहात्पतिते च कपालके ॥१४॥
नष्टः कापालिकः सोपि भयाच्चकितमानसः। मुनीन्द्रो मेरुवद्धीरो तथैवोच्चैः स संस्थितः ॥१५॥
प्रभाते तं मुनिं दृष्ट्वा केनचित्कर्मयोगतः। श्रेष्ठिनो जिनदत्तस्य प्रोक्तं तद्वृत्तकं तदा ॥१६॥
श्रेष्ठिना तेन तच्छ्रुत्वा गत्वा शीघ्रं श्मशानके। तं विलोक्य मुनिं धीरं हाहाकारं विधाय च ॥१७॥
समानीय निजं गेहं महायत्नेन धीमता। पृष्टो वैद्यो मुनेस्तस्य शान्त्यर्थं सोपि संजगौ ॥१८॥
अहो श्रेष्ठिन्सुधीः सोमशर्मभट्टगृहेस्ति च। लक्षपाकं शुभं तैलं तेन स्यादग्निशान्तिता ॥१९॥

नजर एक सफेद बाल पर पड़ी। रानी ने उसे निकालकर राजा के हाथ में रख दिया। राजा उस सफेद बाल को काल का भेजा दूत समझ कर संसार और विषयभोगों से बड़े विरक्त हो गए। उन्होंने अपने मणिचन्द्र पुत्र को राज्य का सब कारोबार सौंप दिया और आप भगवान् की पूजा, अभिषेक कर तथा याचकों को दान दे जंगल की ओर रवाना हो गए और दीक्षा लेकर तपस्या करने लगे। वे अब दिनों-दिन आत्मा को पवित्र बनाते हुए परमात्म-स्मरण में लीन रहने लगे ॥४-९॥

मणिवत मुनि नाना देशों में धर्मोपदेश करते हुए एक दिन उज्जैन के बाहर श्मसान में आए। रात के समय वे मृतक शय्या द्वारा ध्यान करते हुए शान्ति के लिए परमात्मा का स्मरण-चिन्तन कर रहे थे। इतने में वहाँ एक कापालिक बैताली विद्या साधने के लिए आया। उसे चूल्हा बनाने के लिए तीन मुर्दों की जरूरत पड़ी। सो एक तो उसने मुनि को समझ लिया और दो मुर्दों को वह और घसीट लाया। उन तीनों के सिर पर चूल्हा बनाकर उस पर उसने एक कपाल रखा और आग सुलगाकर कुछ नैवेद्य पकाने लगा। थोड़ी देर बाद जब आग जोर से चेती और मुनि की नसें जलने लगीं तब एकदम मुनि का हाथ ऊपर की ओर उठ जाने से सिर पर का कपाल गिर पड़ा। कापालिक उससे डर कर भागकर खड़ा हुआ। मुनिराज मेरु समान वैसे के वैसे ही अचल बने रहे। सबेरा होने पर किसी आते-जाते मनुष्य ने मुनि की यह दशा देख जिनदत्त को यह हाल सुनाया। जिनदत्त उसी समय दौड़ा-दौड़ा श्मसान में गया। मुनि की दशा देखकर उसे बेहद दुःख हुआ। मुनि को अपने घर पर लाकर उसने एक प्रसिद्ध वैद्य से उनके इलाज के लिए पूछा। वैद्य महाशय ने कहा-सोमशर्मा भट्ट के यहाँ लक्षपाक नाम का बहुत ही अच्छा तैल है, उसे लाकर लगाओ। उससे बहुत जल्दी आराम होगा, आग का जला उससे फौरन आराम होता है। सेठ सोमशर्मा के घर दौड़ा हुआ गया। घर पर

श्रेष्ठिना तत्समाकर्ण्य गत्वा विप्रगृहं तदा। तुंकारी नामतद्भार्या तत्तैलं याचिता सती ॥२०॥
तया प्रोक्तं गृहाणैकं भो श्रेष्ठिंस्तैलसद्घटं। केचिल्लोकेऽर्थिनां सन्ति दानिनो वा सुरद्रुमाः ॥२१॥
ततस्तद्घटमादाय निर्गतो यावदेव सः। भग्नो घटस्ततस्तेन पुनस्तस्या निरूपितम् ॥२२॥
सा जगाद सुधीरन्यो घटः संगृह्यते त्वया। चित्तं सतां भवेन्नित्यं गंभीरं सागरादपि ॥२३॥
स्फुटिते च द्वितीयेऽस्मिन्कर्मतस्तृतीयेऽपि च। सा तुंकारी सती प्राह भो श्रेष्ठिन्मा भयं कुरु ॥२४॥
यावत्ते कार्यसिद्धिः स्यात्तावत्तैलं गृहाण मे। तच्छ्रुत्वा जिनदत्तेन श्रेष्ठिना निजमानसे ॥२५॥
अस्याः क्षमा महाश्चर्यमद्वितीयात्र दृश्यते। संविचार्येऽति सा पृष्टा भो मातः केन हेतुना ॥२६॥
कृते महापराधेऽस्मिन् कोपो न क्रियते त्वया। तया प्रोक्तं मया प्राप्तं भो सुधीः कोपजं फलम् ॥२७॥
तत्कथं श्रूयतां तात पुरे चानन्दनामनि। विप्रोभूच्छिवशर्माख्यो धनवान्नृपः पूजितः ॥२८॥
कमलश्रीः प्रिया पुत्राः शिवभूत्यादयोऽभवन्। अष्टाहं नवमी पुत्री भट्टा नाम्नी मता जनैः ॥२९॥
रूपलावण्यसौभाग्यमहामानविराजिता। तुंकर्त्तुं मां समर्थो न विद्यते कोपि भीतितः ॥३०॥

भट्ट महाशय नहीं थे, इसलिए उसने उनकी तुंकारी नाम की स्त्री से तैल के लिए प्रार्थना की। तैल के कई घड़े उसके यहाँ भरे रखे थे। तुंकारी ने उनमें से एक घड़ा ले जाने को जिनदत्त से कहा। जिनदत्त ऊपर जाकर एक घड़ा उठाकर लाने लगा। भाग्य से सीढ़ियाँ उतरते समय पाँव फिसल जाने से घड़ा उसके हाथों से छूट पड़ा। घड़ा फूट गया और तैल सब रेलम-ठेल हो गया। जिनदत्त को इससे बहुत भय हुआ। उसने डरते-डरते घड़े के फूट जाने का हाल तुकारी से कहा। तब तुंकारी ने दूसरा घड़ा ले आने को कहा। उसे पहले घड़े के फूट जाने का कुछ भी ख्याल नहीं हुआ। सच है-सज्जनों का हृदय समुद्र से भी कहीं अधिक गम्भीर हुआ करता है। जिनदत्त दूसरा घड़ा लेकर आ रहा था। अब की बार तैल से चिकनी जगह पर पाँव पड़ जाने से फिर भी वह फिसल गया और घड़ा फूटकर उसका सब तैल बह गया। इसी तरह तीसरा घड़ा भी फूट गया। अब तो जिनदत्त के देवता कूँच कर गए। भय के मारे वह थर-थर काँपने लगा। उसकी यह दशा देखकर तुंकारी ने उससे कहा कि घबराने और डरने की कोई बात नहीं। तुमने कोई जानकर थोड़े ही फोड़े हैं। तुम किसी तरह की चिन्ता-फिकर मत करो। जब तक तुम्हें जरूरत पड़े तुम प्रसन्नता के साथ तैल ले जाया करो देने से मुझे कोई उजर न होगा। कोई कैसा ही सहनशील क्यों न हो, पर ऐसे मौके पर उसे भी गुस्सा आये बिना नहीं रहता। फिर इस स्त्री में इतनी क्षमा कहाँ से आई? इसका जिनदत्त को बड़ा आश्चर्य हुआ। जिनदत्त ने तुकारी से पूछा भी, कि माँ मैंने तुम्हारा इतना भारी अपराध किया, उस पर भी तुमको रत्तीभर क्रोध नहीं आया, इसका क्या कारण है? तुकारी ने कहा-भाई, क्रोध करने का फल जैसा चाहिए वैसा मैं भुगत चुकी हूँ ॥१०-२७॥

इसलिए क्रोध के नाम से ही मेरा जी काँप उठता है। यह सुनकर जिनदत्त का कौतुक और बढ़ा, तब उसने पूछा यह कैसे? तुकारी कहने लगी-चन्दनपुर में शिवशर्मा ब्राह्मण रहता है। वह धनवान् और राजा का आदरपात्र है। उसकी स्त्री का नाम कमलश्री है। उसके कोई आठ तो पुत्र और

एकदा मे पिता पुर्यां दापयामास घोषणाम्। तुंकारं मे सुतां कोपि माकरोत्विति सर्वथा ॥३१॥
तदा तुंकारिका चेति संजातं मम नामकम्। महामानो भवत्यत्र श्रेयसे नैव देहिनाम् ॥३२॥
कदाचिन्न करोम्यस्य तुंकारमिति निश्चयात्। सोमशर्मद्विजेनाहं परिणीता कुलक्रमात् ॥३३॥
अत्रैवोज्जयिनीमध्ये समानीता विभूतिभिः। यावत्स्थिता सुखं गेहे सारसम्पद्विराजिते ॥३४॥
तावच्चैकं दिने सोमशर्मा मे प्राणवल्लभः। रात्रौ नाट्यकलां दृष्ट्वा दीर्घकाले समागतः ॥३५॥
द्वारे स्थित्वा जगादोच्चैरुद्घाट्य कपाटकम्। मया तदा प्रकोपेन मौनेनावस्थितं गृहे ॥३६॥
बृहद्वेला गता याव-त्तावत्तेन क्रुधा मम। तुंकारितं तदा चित्ते कोपेनाहं प्रकम्पिता ॥३७॥
वह्निज्वालेव मूढात्मा कृत्वा द्वारं निरर्गलम्। त्यक्त्वा गेहं पुरं चापि बहिर्यावद्विनिर्गता ॥३८॥

एक लड़की है। लड़की का नाम भट्टा है और वह मैं ही हूँ। मैं थी बड़ी सुन्दरी, पर मुझमें एक बड़ा दुर्गुण था। वह यह कि मैं अत्यन्त मानिनी थी। मैं बोलने में बड़ी ही तेज थी और इसलिए मेरे भय का सिक्का लोगों के मन पर ऐसा जमा हुआ था कि किसी की हिम्मत मुझे 'तू' कहकर पुकारने की नहीं होती थी। मुझे ऐसी अभिमानी देखकर मेरे पिता ने एक बार शहर में डौंडी पिटवा दी कि मेरी बेटी को कोई 'तू' कहकर न पुकारे क्योंकि जहाँ मुझसे किसी ने 'तू' कहा कि मैं उससे लड़ने-झगड़ने को तैयार ही रहा करती थी और फिर जहाँ तक मुझमें शक्ति जोर होता मैं उसकी हजारों पीढ़ियों को एक पलभर में अपने सामने ला खड़ा करती और पिताजी इस लड़ाई-झगड़े से सौ हाथ दूर भागने की कोशिश करते। जो हो, पिताजी ने अच्छा ही काम किया था, पर मेरे खोटे भाग्य से उनका डौंडी पिटवाना मेरे लिए बहुत ही बुरा हुआ। उस दिन से मेरा नाम ही 'तुंकारी' पड़ गया और सब ही मुझे इस नाम से पुकार-पुकार कर चिढ़ाने लगे। सच है-अधिक मान भी कभी अच्छा नहीं होता और इसी चिड़ के मारे मुझसे कोई ब्याह करने तक के लिए तैयार न होता था। मेरे भाग्य से इन सोमशर्मा जी ने इस बात की प्रतिज्ञा की कि मैं कभी इसे 'तू' कहकर न पुकारूँगा। तब इनके साथ मेरा ब्याह हो गया। मैं बड़े उत्साह के साथ उज्जैन में लाई गई। सच कहूँगी कि इस घर में आकर मैं बड़े सुख से रही। भगवान् की कृपा से घर सब तरह हरा भरा है। धन सम्पत्ति भी मनमानी है ॥२८-३४॥

पर **''पड़ा स्वभाव जाए जीव से''** इस कहावत के अनुसार मेरा स्वभाव भी सहज में थोड़े ही मिट जाने वाला था। सो एक दिन की बात है कि मरे स्वामी नाटक देखने गए। नाटक देखकर आते हुए उन्हें बहुत देर लग गई उनकी इस देरी से मुझे अत्यन्त गुस्सा आया। मैंने निश्चय कर लिया कि आज जो कुछ भी हो, मैं दरवाजा नहीं खोलूँगी और मैं सो गई थोड़ी देर बाद वे आए और दरवाजे पर खड़े रहकर बार-बार मुझे पुकारने लगे। मैं चुप्पी साधे पड़ी रही, पर मैंने किवाड़ न खोले। बाहर से चिल्लाते-चिल्लाते वे थक गए, पर उसका मुझ पर कुछ असर न हुआ। आखिर उन्हें भी बड़ा क्रोध हो आया। क्रोध में आकर वे अपनी प्रतिज्ञा तक भूल बैठे। सो उन्होंने मुझे 'तू' कहकर पुकार लिया। बस, उनका 'तू' कहना था कि मैं सिर से पाँव तक जल उठी और क्रोध से अन्धी बनकर

तावच्चोरैः समालोक्य गृहीत्वाभरणादिकम्। नाम्ना विजयसेनस्य भिल्लस्याहं समर्पिता ॥३९॥
पल्लिकायां स पापिष्ठः कुर्वन्मे शीलखण्डनम्। वारितो वनदेव्योच्चैः कृत्वा नानोपसर्गकम् ॥४०॥
भिल्लो भीत्वा तदा सोपि सार्थवाहाय मां ददौ। सार्थवाहोपि मे शीलं कालं कर्त्तुं क्षमो न हि ॥४१॥
ततो रुष्ट्वा स पापात्मा नीत्वा मां परतीरकम्। दत्तवान्कृमिरागेण रक्तकम्बलकारिणे ॥४२॥
तदा तेन जलूकाभिः कष्टतो रक्तकं मम। कम्बलानां निमित्तेन स्वीकृतं भूरिवासरैः ॥४३॥
महाकोपेन जन्तूनां मादृशानां स्वपापतः। भो श्रेष्ठिन्संभवत्येव दुष्टापच्च पदे पदे ॥४४॥
उज्जयिन्या महीभर्त्रा तत्र पारसभूपतेः। पार्श्वे सम्प्रेषितो दूतो मद्भ्राता धनदेवभाक् ॥४५॥
कृतकार्येण तेनाहं दृष्ट्वा भ्रात्रा शुभोदयात्। प्रोक्त्वा तद्भूपतेः सर्व-मत्रानीय च भक्तितः ॥४६॥
सोमशर्मद्विजस्यास्य भर्तृकस्य समर्पिता। बान्धवास्ते भवन्त्येव ये कष्टे शर्मदायिनः ॥४७॥
रक्तक्षयात्तदा कष्टं वातेनाहं प्रपीडिता। लक्ष्यपाकेन तैलेन वैद्येन सुखिनी कृता ॥४८॥
ततो मया मुनीन्द्रेभ्यो धर्मं श्रुत्वा जिनेशिनाम्। सम्यक्त्वं त्रिजगत्पूतं व्रतं चादाय शर्मदम् ॥४९॥

किवाड़ खोलती हुई घर से निकल भागी। मुझे उस समय कुछ न सूझा कि मैं कहाँ जा रही हूँ। मैं शहर के बाहर होकर जंगल की ओर चल धरी। रास्ते में चोरों ने मुझे देख लिया।

उन्होंने मेरे सब गहने-दागी ने और वस्त्र छीन-छानकर विजयसेन नाम के एक भील को सौंप दिया। मुझे खूबसूरत देखकर इस पापी ने मेरा धर्म बिगाड़ना चाहा, पर उस समय मेरे भाग्य से किसी दिव्य स्त्री ने आकर मुझे बचाया, मेरे धर्म की उसने रक्षा की। भील ने उस दिव्य स्त्री से डरकर मुझे एक सेठ के हाथ में सौंप दिया। उसकी नियत भी मुझ पर बिगड़ी। मैंने उसे खूब ही आड़े हाथों लिया। इससे वह मेरा कर तो कुछ न सका, पर गुस्से में आकर उस नीच ने मुझे एक ऐसे मनुष्य के हाथ सौंप दिया जो जीवों के खून से रँगकर कम्बल बनाया करता था। वह मेरे शरीर पर जौंके लगा-लगाकर मेरा रोज-रोज बहुत सा खून निकाल लेता था और उसमें फिर कम्बल को रँगा करता था। सच है, एक तो वैसे ही पाप कर्म का उदय और उस पर ऐसा क्रोध, तब उससे मुझ सरीखी हत-भागिनियों को यदि पद-पद पर कष्ट उठाना पड़े तो उसमें आश्चर्य ही क्या? ॥३५-४४॥

इसी समय उज्जैन के राजा ने मेरे भाई को यहाँ के राजा पारस के पास किसी कार्य के लिए भेजा। मेरा भाई अपना काम पूराकर उज्जैन की ओर जा रहा था कि अचानक मेरी उसकी भेंट हो गई मैंने अपने कर्मों पर बड़ा पश्चाताप किया। जब मैंने अपना सब हाल उससे कहा तो उसे भी बहुत दुःख हुआ। उसने मुझे धीरज दिया। इसके बाद वह उसी समय राजा के पास गया और सब हाल उनसे कहकर उस कम्बल बनाने वाले पापी से उसने मेरा पंजा छुड़ाया। वहाँ से लाकर बड़ी आरजू-मिन्नत के साथ उसने फिर मुझे अपने स्वामी के घर ला रखा। सच है, सच्चे बन्धु वे ही हैं जो कष्ट के समय काम आवें। यह तो तुम्हें मालूम ही है कि मेरे शरीर का प्रायः खून निकल चुका था। इसी कारण घर पर आते ही मुझे लकवा मार गया। तब वैद्य ने यह लक्षपाक तैल बनाकर मुझे जिलाया।

नैव कस्योपरि श्रेष्ठिन्कर्तव्यः कोपको ध्रुवम्। स्वीचक्रे सद्व्रतं चेति शर्मकोटिविधायकम् ॥५०॥
तस्माद्भो तात कुत्रापि कोपो न क्रियते मया। सारं तैलं गृहीत्वोच्चैः समाधानं मुनेः कुरु ॥५१॥
श्रेष्ठिना तां प्रणम्याशु तैलमादाय वेगतः। गत्वा गृहं मुनेस्तस्य शरीरे भूरि यत्नतः ॥५२॥
तत्तैलेन दिनैः कैश्चित्कृत्वा सम्मर्दनादिकम्। महाशान्तिं विधायोच्चैः सारपुण्यमुपार्जितम् ॥५३॥
ततः श्रेष्ठी महाभक्त्या तस्यैव जिनमन्दिरे। जगत्पूज्यो मुनीन्द्रोसौ प्रावृट्योगं गृहीतवान् ॥५४॥
श्रेष्ठिनानर्घ्यरत्नौघैः पूरितस्ताम्रसद्घटः। सप्तव्यसनसंसक्तस्वपुत्रस्य दुरात्मनः ॥५५॥
तदा कुबेरदत्तस्य भयात्तत्र जिनालये। निखन्य स्थापितो गूढं मुनेः शयनसन्निधौ ॥५६॥
तदा कुबेरदत्तोसौ प्रच्छन्नं पापमण्डितः। तत्सर्वं पश्यतिस्मोच्चैश्चेष्टितं स्वपितुः कुधीः ॥५७॥
एकदा तेन पुत्रेण तस्मादुत्खन्य वेगतः। प्रासादं प्रांगणे सोपि निखन्य स्थापितो घटः ॥५८॥
मुनिर्विशुद्धचारित्रो जानन्पश्यन्नपि ध्रुवम्। तदा मध्यस्थभावेन संस्थितो मेरुवत्तराम् ॥५९॥
पूर्णयोगे तु योगीन्द्रः पृष्ट्वा तं श्रेष्ठिनं सुखम्। विहाराय विनिर्गत्य स्थितो ध्याने पुराद्बहिः ॥६०॥

इसके बाद मैंने एक वीतरागी साधु द्वारा धर्मोपदेश सुनकर सर्वश्रेष्ठ और सुख देने वाला सम्यक्त्व व्रत ग्रहण किया और साथ ही यह प्रतिज्ञा की कि आज से मैं किसी पर क्रोध नहीं करूँगी। यही कारण है कि मैं अब किसी पर क्रोध नहीं करती। अब आप जाइए और इस तैल द्वारा मुनिराज की सेवा कीजिए। अधिक देरी करना उचित नहीं है ॥४५-५१॥

जिनदत्त भट्टारक को नमस्कार कर घर गया और तेल की मालिश वगैरह से बड़ी सावधानी के साथ मुनि की सेवा करने लगा। कुछ दिन तक बराबर मालिश करते रहने से आराम हो गया। सेठ ने भी अपनी इस सेवा भक्ति द्वारा बहुत पुण्यबंध किया। चौमासा आ गया था इसलिए मुनिराज ने कहीं अन्यत्र जाना ठीक न समझ यहीं जिनदत्त सेठ के जिनमंदिर में वर्षायोग ले लिया और यहीं वे रहने लगे ॥५२-५५॥

जिनदत्त का एक लड़का था, नाम इसका कुबेरदत्त था। इसका चाल-चलन अच्छा न देखकर जिनदत्त इस के डर से कीमती रत्नों का भरा अपना एक घड़ा जहाँ मुनि सोया करते थे वहाँ खोद कर गाड़ दिया। जिनदत्त ने यह कार्य किया तो था बड़ी दुपका-चोरी से, पर कुबेरदत्त को इसका पता पड़ गया। उसने अपने पिता का सब कर्म देख लिया और मौका पाकर वहाँ से घड़े को निकाल मंदिर के आँगन में दूसरी जगह गाड़ दिया। कुबेरदत्त को ऐसा करते मुनि ने देख लिया था परन्तु तब भी वह चुपचाप रहे और उन्होंने किसी से कुछ नहीं कहा और कहते भी कहाँ से जब कि उनका यह मार्ग ही नहीं है ॥५६-५७॥

जब योग पूरा हुआ तब मुनिराज जिनदत्त को सुख-साता पूछकर वहाँ से बिहार कर गए। शहर बाहर जाकर वे ध्यान करने बैठे। इधर मुनिराज के चले जाने के बाद सेठ ने वह रत्नों का घड़ा घर ले जाने के लिए जमीन खोद कर देखा तो वहाँ घड़ा नहीं। घड़े को एकाएक गायब हो जाने का उसे बड़ा अचंभा हुआ और साथ ही उसका मन व्याकुल भी हुआ। उसने सोचा कि घड़े का हाल

श्रेष्ठी कुम्भमनालोक्य संजातो व्यग्रमानसः। तं जानाति मुनिश्चैव नान्यः कोपीति चेतसि ॥६१॥
संविचार्य मुनेः पार्श्वं गत्वा देव मम ध्रुवम्। त्वां विना न रतिश्चित्ते तस्मादागच्छ भो पुरम् ॥६२॥
इत्यादि मायया पश्चात्तं समानीय सन्मुनिम्। पृच्छति स्म मुने ब्रूहि काञ्चिद्धर्मकथामिति ॥६३॥
तच्छ्रुत्वा स मुनिः प्राह भो श्रेष्ठिंस्त्वं महानपि। चिरश्रावकतो दिव्यं कथयात्र कथानकम् ॥६४॥
ततोऽसौ जिनदत्ताख्यः श्रेष्ठी स्वाभिमतार्थकम्। सूचयन्समुवाचैवं ख्याते पद्मरथे पुरे ॥६५॥
वसुपालो महाराजस्तेनायोध्यापतिं प्रति। जितशत्रुं द्रुतं दूतः प्रेषितः कार्यहेतवे ॥६६॥
स दूतस्तु महाटव्यां तृषितो मूर्च्छयान्वितः। वृक्षाधः पतितः कष्टं गतप्राणधनोथवा ॥६७॥
दूतं कण्ठगतप्राणं तमालोक्यैकवानरः। निमज्य सरसि स्वच्छे तत्रागत्य दयापरः ॥६८॥
तस्योपरि स्वकीयं च संविधूय शरीरकम्। अग्रे भूत्वा जलं तस्य दर्शयामास निर्मलम् ॥६९॥
सोपि पापी पयः पीत्वा हत्वा तं वानरं पुनः। तच्चर्ममस्त्रिकां कृत्वा ततो गमनहेतवे ॥७०॥
तोयमादाय दुष्टात्मा निर्गतो धर्मवर्जितः। किं स्वामिंस्तस्य दूतस्य युक्तं मर्कटमारणम् ॥७१॥

केवल मुनि ही जानते थे, फिर बड़े अचंभे की बात है कि उनके रहते यहाँ से घड़ा गायब हो जाए? उसे घड़ा गायब करने का मुनि पर कुछ सन्देह हुआ। तब वह मुनि के पास गया और उनसे उसने प्रार्थना की कि प्रभो, आप पर मेरा बड़ा ही प्रेम है, आप जब से चले आए है तब से मुझे सुहाता ही नहीं, इसलिए चलकर आप कुछ दिनों तक और वहीं ठहरें तो बड़ी कृपा हो। इस प्रकार मायाचारी से जिनदत्त मुनिराज को अपने मन्दिर पर लौटा लाया। इसके बाद उसने कहा, स्वामी, कोई ऐसी धर्म-कथा सुनाए, जिससे मनोरंजन हो। तब मुनि बोले-हम तो रोज ही सुनाया करते है, आज तुम ही कोई ऐसी कथा कहो। तुम्हें इतने दिन शास्त्र पढ़ते हो गए, देखें तुम्हें उसका सार कैसा याद रहता है? तब जिनदत्त अपने भीतरी कपट-भावों को प्रकट करने के लिए एक ऐसी ही कथा सुनाने लगा। वह बोला- ॥५८-६४॥

एक दिन पद्मरथपुर के राजा वसुपाल ने अयोध्या के महाराज जितशत्रु के पास किसी काम के लिए अपना एक दूत भेजा। एक तो गर्मी का समय और ऊपर से चलने की थकावट सो इसे बड़े जोर की प्यास लग आई पानी इसे कहीं नहीं मिला। आते-आते यह एक घने वन में आकर वृक्ष के नीचे गिर पड़ा। इसके प्राण कण्ठगत हो गए। इसको यह दशा देखकर एक बन्दर दौड़ा-दौड़ा तालाब पर गया और उसमें डूबकर यह उस वृक्ष के नीचे पड़े पथिक के पास आया। आते ही इसने अपने शरीर को उस पर झिड़का दिया। जब जल उस पर गिरा और उसकी आँखें खुली तब बन्दर आगे होकर उसे इशारे से तालाब के पास ले गया। जल पीकर इसे बहुत शान्ति मिली। अब इसे आगे के लिए जल की चिन्ता हुई पर इसके पास कोई बरतन वगैरह न होने से यह जल ले जा नहीं सकता था। तब इसे एक युक्ति सूझी। इसने उस बेचारे जीवदान देने वाले बन्दर को बन्दूक से मारकर उसके चमड़े की थैली बनाई और उसमें पानी भर चल दिया। अच्छा प्रभो, अब आप बतलाइए कि उस

तदाकर्ण्य मुनीन्द्रोसौ प्रोक्त्वा युक्तं न तद्भुवि। निर्दोषत्वं स्वकीयं च सूचयन्सत्कथां जगौ ॥७२॥
कौशाम्बीपत्तने विप्रः शिवशर्माभिधानकः। ब्राह्मणी कपिला तस्य संजाता पुत्रवर्जिता ॥७३॥
एकदा शिवशर्मासौ दृष्ट्वाटव्यां द्विजोत्तमः। पिल्लकं नकुलस्योच्चैः समानीय स्वयोषितः ॥७४॥
इमं पुत्रं गृहाणेति कपिलायाः समर्पयत्। किं करोति न मोहान्धः प्राणी तत्त्वपराङ्मुखः ॥७५॥
ततोसौ पालितः सौख्यं शिक्षितो गृहकर्मकम्। करोति नकुलः किंचित्स्वशक्त्या प्रेषणं तदा ॥७६॥
ततश्च कपिला कुक्षौ पुत्रोद्भूत्कर्मयोगतः। तं सुप्तं मञ्चके पुत्रं सैकदा कपिला द्रुतम् ॥७७॥
नकुलस्य समर्प्योच्चैस्तण्डुलान्खण्डितुं गता। तदा सर्पेण पुत्रोसौ भक्षितो मृत्युमाप्तवान् ॥७८॥
कोपतो नकुलः सोपि हत्वा सर्पं सुदारुणम्। रक्तलिप्तमुखः पश्चात्संप्राप्तः कपिलान्तिकम् ॥७९॥
अनेन मारितः पुत्रः इत्याशंक्य स्वमानसे। मारितो नकुलः कष्टं ब्राह्मण्या मुशलेन सः ॥८०॥
पश्चात्स्वगेहमागत्य मृतं दृष्ट्वा भुजंगमम्। पश्चातापस्तया चक्रे धिङ्मूढानां विचेष्टितम् ॥८१॥

नीच, निर्दयी, अधर्मी को अपने उपकारी बन्दर को मार डालना क्या उचित था? मुनि बोले तुम ठीक कहते हो। उस दूत का यह अत्यन्त कृतघ्नता भरा नीच काम था। इसके बाद अपने को निर्दोष सिद्ध करने के लिए मुनिराज ने भी एक कथा कहना आरम्भ किया। वे कहने लगे– ॥६५-७२॥

कौशाम्बी में किसी समय एक शिवशर्मा ब्राह्मण रहता था। उसकी स्त्री का नाम कपिला था। इसके कोई लड़का नहीं था। एक दिन शिवशर्मा किसी दूसरे गाँव से अपने शहर की ओर लौट रहा था। रास्ते में एक जंगल में उसने एक नेवला के बच्चे को देखा। शिवशर्मा ने उसे घर उठा लाकर अपनी प्रिया से कहा–ब्राह्मणी जी आज मैं तुम्हारे लिए एक लड़का लाया हूँ। यह कहकर उसने नेवले को कपिला की गोद में रख दिया। सच है–मोह से अन्धे हुए मनुष्य क्या नहीं करते? ब्राह्मणी ने उसे ले लिया और पाल-पोस कर उसे कुछ सिखा-विखा भी दिया। नेवले में जितना ज्ञान और जितनी शक्ति थी वह उसके अनुसार ब्राह्मणी का बताये कुछ काम भी कर दिया करता था ॥७३-७६॥

भाग्य से अब ब्राह्मणी के भी एक पुत्र हो गया। सो एक दिन ब्राह्मणी बच्चे को पालने में सुलाकर आप धान खाँडने को चली गई और जाते समय पुत्ररक्षा का भार वह नेवले को सौंपती गई इतने में एक सर्प ने आकर इस बच्चे को काट लिया बच्चा मर गया। क्रोध में आकर नेवले ने सर्प के टुकड़े-टुकड़े कर डाले। इसके बाद वह खून भरे मुँह से ही कपिला के पास गया। कपिला उसे खून से लथ-पथ भरा देखकर काँप गई उसने समझा कि इसने मेरे बच्चे को खा लिया। उसे अत्यन्त क्रोध आया। क्रोध के वेग में उसने न कुछ सोचा-विचारा और न जाकर देखा ही कि असल में बात क्या है किन्तु एक साथ ही पास में पड़े हुए मूसले को उठा कर नेवले पर दे मारा। नेवला तड़फड़ा कर मर गया। अब वह दौड़ी हुई बच्चे के पास गई देखती है तो वहाँ एक काला भुजंग सर्प मरा हुआ पड़ा है। फिर उसे बहुत पछतावा हुआ। ऐसे मूर्ख को धिक्कार है जो बिना विचारे जल्दी में आकर हर एक काम कर बैठते हैं। अच्छा सेठ महाशय, कहिए तो सर्प के अपराध पर बेचारे नेवले को इस प्रकार

भो श्रेष्ठिन्सर्पदोषेण किं तस्या विप्रयोषितः। युक्तं निरपराधस्य नकुलस्यैव मारणम् ॥८२॥
न युक्तमिति भो देव श्रेष्ठी प्राह कथानकम्। वाराणस्यां महाराजो जितशत्रुर्विचक्षणः ॥८३॥
तद्वैद्यो धनदत्ताख्यो धनदत्ता प्रियाभवत्। तयोर्धनादिमित्राख्यधनचन्द्रौ सुतौ मतौ ॥८४॥
पठितौ न भिषक्शास्त्रं मृते वैद्ये स्वकर्मतः। तज्जीवनं तदान्यस्मै ददौ वैद्याय भूपतिः ॥८५॥
वैद्यपुत्रौ तु चम्पायाः शिवभूतिभिषग्वरम्। नत्वा वैद्यमहाशास्त्रं ज्ञात्वा व्याघुटितौ पुनः ॥८६॥
ततोऽटव्यां समालोक्य व्याघ्रं चक्षुःप्रपीडितम्। ज्येष्ठेन वारितश्चापि धनचन्द्रो लघुर्भिषक् ॥८७॥
औषधं नेत्रयोस्तस्य परीक्षार्थं ददौ मुदा। नीरोगेण तदा तेन लघुरेव प्रभक्षितः ॥८८॥
किं मुने पापिनस्तस्य युक्तं वैद्यप्रभक्षणम्। इत्यादि श्रेष्ठिनो वाक्यं समाकर्ण्य सकारणम् ॥८९॥
मुनिः प्राह विशुद्धात्मा शृणु त्वं भो वणिग्वर। चम्पायां सोमशर्माख्यो ब्राह्मणोऽस्य प्रिया द्वयम् ॥९०॥
सोमिल्या सोमशर्मा च सोमिल्यायाः सुतोभवत्। तत्रैव पत्तने चास्ति भद्राख्यो वृषभोत्तमः ॥९१॥
गृहे गृहे पशुः सोपि ग्रासं च लभते तृणम्। शान्तत्वात्कस्यचिन्नैव स बाधां कुरुते कदा ॥९२॥
वन्ध्या सा सोमशर्मा च ब्राह्मणी दुष्टमानसा। सपत्नी पुत्रकं हत्वाऽऽरोपयद्भद्रशृंगके ॥९३॥

निर्दयता से मार देना ब्राह्मणी को योग्य था क्या? जिनदत्त ने कहा–नहीं। यह उसकी बड़ी गलती हुई। यह कहकर उसने फिर एक कथा कहना आरम्भ की– ॥७७-८२॥

बनारस के राजा जितशत्रु के यहाँ धनदत्त राज्यवैद्य था। इसकी स्त्री का नाम धनदत्ता था। वैद्य महाशय के धनमित्र और धनचन्द्र नाम के दो लड़के थे। लाड़-प्यार में रहकर इन्होंने अपनी कुलविद्या भी न पढ़ पाई कुछ दिनों बाद वैद्यराज काल कर गए। राजा ने दोनों भाइयों को मूर्ख देख इनके पिता की जीविका पर किसी दूसरे को नियुक्त कर दिया। तब इनकी बुद्धि ठिकाने आई ये दोनों भाई अब वैद्यशास्त्र पढ़ने की इच्छा से चम्पापुरी में शिवभूति वैद्य के पास गए। इन्होंने वैद्य से अपनी सब हालत कहकर उनसे वैद्यक पढ़ने की इच्छा जाहिर की। शिवभूति बड़ा दयावान् और परोपकारी था, इसलिए उसने इन दोनों भाइयों को अपने ही पास रखकर पढ़ाया और कुछ ही वर्षों में इन्हें अच्छा होशियार कर दिया। दोनों भाई गुरु महाशय के अत्यन्त कृतज्ञ होकर बनारस की ओर रवाना हुए। रास्ते में आते हुए इन्होंने जंगल में आँख की पीड़ा से दुःखी एक सिंह को देखा। धनचन्द्र को उस पर दया आई अपने बड़े भाई के बहुत कुछ मना करने पर भी धनचन्द्र ने सिंह की आँखों का इलाज किया। उससे सिंह को आराम हो गया। आँख खोलते ही उसने धनचन्द्र को अपने पास खड़ा पाया। वह अपने जन्म स्वभाव को न छोड़कर क्रूरता के साथ उसे खा गया। मुनिराज उस दुष्ट सिंह को बेचारे वैद्य को खा जाना क्या अच्छा काम हुआ? मुनि ने 'नहीं' कहकर एक और कथा कहना शुरू की ॥८३-८९॥

चम्पापुरी में सोमशर्मा ब्राह्मण की दो स्त्रियाँ थी। एक का नाम सोमिल्या और दूसरी का सोमशर्मा था। सोमिल्या बाँझ थी और सोमशर्मा के एक लड़का था। यहीं एक बैल रहता था। लोग उसे 'भद्र' नाम से बुलाया करते थे। बेचारा बड़ा सीधा था। कभी किसी को मारता नहीं था। वह सबके घर पर घूमा-फिरा करता था। उसे इस तरह जहाँ थोड़ी बहुत घास खाने को मिलती वह उसे

अनेन मारितो बालो विप्रघातीति पत्तने। त्यक्तः सर्वजनैर्भद्रवृषोऽयं क्षुत्प्रपीडितः ॥९४॥
प्रवेशं लभते नैव कदा क्वापि सुदुःखितः। एकदा जिनदत्ताख्यश्रेष्ठिनो वल्लभा प्रिया ॥९५॥
संजाते परगोधोरुदोषे सा चात्मशुद्धये। कर्त्तुकामोज्वलद्दिव्यं संस्थिता जनसंगमे ॥९६॥
तदा प्रस्तावमासाद्य वृषोयं तप्तफालकम्। संजग्राह सुखेनादु निर्दोषो भणितो जनैः ॥९७॥
किं भो श्रेष्ठिन्वृथा तस्य जनानां मूढचेतसाम्। दोषं निरपराधस्य दातुं युक्तं भवेद्भुवि ॥९८॥
जिनदत्तो जगादैवं गंगातीरे मनोहरे। गर्त्तायां पतितः कष्टं हस्तिबालः कदाचन ॥९९॥
तापसो विश्वभूतिस्तु तं विलोक्य तदा द्रुतम्। नीत्वा स्वपल्लिकायां च पोषयामास यत्नतः ॥१००॥
कैश्चिद्दिनैस्ततो सोपि संजातः सुमहान् गजः। तच्छ्रुत्वा श्रेणिकेनोच्चै-र्गृहीतस्तापसात्सुखम्॥१०१॥
बन्धनाङ्कुशघातादिकष्टं दृष्ट्वा द्विपोपि सः। भक्त्वा स्तंभं समायातस्तदा तापससन्निधौ ॥१०२॥
तत्पृष्ठतः समायाता राजकीयनृणां पुनः। तेषां समर्प्यमानेन सम्बोध्य मधुरैः स्वनैः ॥१०३॥
पापिना हस्तिना तेन तापसः सोपि मारितः। युक्तं किं भो मुनेस्तस्य महातापसमारणम् ॥१०४॥

खाकर रह जाता था। एक दिन उस बाँझ पापिनी ने डाह के मारे अपनी सौत के बच्चे को निर्दयता से मार कर उसका अपराध बेचारे बैल पर लगा दिया। उसे ब्राह्मण बालक का मारने वाला समझ कर सब लोगों ने घास खिलाना छोड़ दिया और शहर से निकाल बाहर कर दिया। बेचारा भूख-प्यास के मारे बड़ा दुःख पाने लगा। बहुत ही दुबला पतला हो गया। पर तब भी किसी ने उसे शहर के भीतर नहीं घुसने दिया। एक दिन जिनदत्त सेठ की स्त्री पर व्यभिचार का अपराध लगा। वह अपनी निर्दोषता बतलाने के लिए चौराहे पर जाकर खड़ी हुई, जहाँ बहुत से मनुष्य इकट्ठे हो रहे थे उसने कोई भयंकर दिव्य लेने के इरादे से एक लोहे के टुकड़े को अग्नि में खूब तपाकर लाल सुर्ख किया। इस मौके को अपने लिए बहुत अच्छा समझ उस बैल ने झट वहाँ पहुँच कर जलते हुए उस लोहे के टुकड़े को मुँह से उठा लिया। उसका यह भयंकर दृश्य देखकर सब लोगों ने उसे निर्दोष समझ लिया। अच्छा सेठ महाशय, बतलाइए तो क्या उन मूर्ख लोगों को बिना समझे-बूझे एक निरपराध पशु पर दोष लगाना ठीक था क्या? जिनदत्त ने 'नहीं' कहकर फिर एक कथा छेड़ी ॥९०-९८॥

वह बोला-''गंगा के किनारे कीचड़ में एक बार एक हाथी का बच्चा फँस गया। विश्वभूति तापस ने उसे तड़फते हुए देखा। वह कीचड़ से उस हाथी के बच्चे को निकालकर अपने आश्रम में लिवा ले आया। उसने उसे बड़ी सावधानी के साथ पाला-पोसा भी। धीरे-धीरे वह बड़ा होकर एक महान् हाथी के रूप में आ गया। श्रेणिक ने इसकी प्रशंसा सुनकर इसे अपने यहाँ रख लिया। हाथी जब तक तापस के यहाँ रहा तब तक बड़ी स्वतंत्रता से रहा। वहाँ इसे कभी अंकुश वगैरह का कष्ट नहीं सहना पड़ा। पर जब यह श्रेणिक के यहाँ पहुँचा तबसे इसे बन्धन, अंकुश आदि का बहुत कष्ट सहना पड़ता था। इस दुःख के मारे एक दिन यह सांकल तोड़-ताड़ कर तापस के आश्रम में भाग आया। इसके पीछे-पीछे राजा के नौकर भी इसे पकड़ने को आए। तापसी मीठे-मीठे शब्दों से हाथी को समझा कर उसे नौकरों के सुपुर्द करने लगा। हाथी को इससे अत्यन्त गुस्सा आया। सो इसने उस

ततो मुनिः कथां प्राह हस्तिनागपुरे शुभे। पूर्वस्यां दिशि भात्युच्चैर्विश्वसेनेन कारितम् ॥१०५॥
भूभुजा सहकाराणां वनं तत्रैकदा पुरा। सौलिका सर्पमादाय स्थिता चाम्रतरूपरि ॥१०६॥
तदा सर्पविषेणाशु पक्वमेकं फलं च तत्। गृहीत्वा वनपालोपि दर्शयामास भूपतेः ॥१०७॥
स्वराज्ञ्यै धर्मसेनायै ददौ राजा च तत्फलम्। तद्भक्षणात्तदा सापि राज्ञी प्राप्ता यमालयम् ॥१०८॥
रुष्टो राजा ततः सर्व-तदुद्यानस्य खण्डनम्। कारयामास भो श्रेष्ठिन्तत्किं युक्तं महीपते ॥१०९॥
नैव युक्तमिति प्रोक्त्वा ततः श्रेष्ठी कथां जगौ। कश्चिन्नरो महाटव्यां गच्छन्सिंहं विलोक्य च ॥११०॥
शीघ्रं सिंहभयान्नष्ट्वाऽऽसन्नपल्लीमहाद्रुमम्। समारुह्य स्थितः सौख्यं ततः सिंहे गते सति ॥१११॥
अवतीर्य तरोर्मार्गे गच्छता तेन पापिना। तदान्वेषयतां काष्ठं महद्भूमिपतेर्नृणाम् ॥११२॥
सारभेरीनिमित्तं च दर्शितः सोपि पादपः। तैस्तु संखंडितो वृक्षः सुच्छायः सुमनोहरः ॥११३॥
रक्षाविधायिनस्तस्य सुजनस्येव सत्तरोः। तत्किं कारयितुं युक्तं भो मुने तस्य पापिनः ॥११४॥
तच्छ्रुत्वा मुनिनाथोसौ संजगाद कथानकम्। कौशीम्बीपत्तेन राजा गन्धर्वानीक संज्ञकः ॥११५॥
स्वर्णकारोभवत्तत्र सज्जातिः पत्तने तराम्। नामतोङ्गारदेवोसौ रत्नसंस्कारकोविदः ॥११६॥

बेचारे तापस की ही जान ले ली। तो क्या मुनिराज, हाथी को यह उचित था कि वह अपने को बचाने वाले को ही मार डाले? इसके उत्तर में मुनि 'ना' कहकर और एक कथा कहने लगे। उन्होंने कहा–

हस्तिनागपुर की पूरब दिशा में विश्वसेन राजा का बनाया आमों का एक बगीचा था। उसमें आम खूब लग रहे थे। एक दिन एक चील मरे साँप को चोंच में लिए आम के झाड़ पर बैठ गई उस समय साँप के जहर से एक आम पक गया, पीला-सा पड़ गया। माली ने उस पके फल को ले जाकर राजा को भेंट किया। राजा ने उसे 'प्रेमोपहार' के रूप में अपनी प्रिय रानी धर्मसेना को दिया। रानी उसे खाते ही मर गई राजा को बड़ा गुस्सा आया और उसने एक फल के बदले सारे बगीचे को ही कटवा डाला। मुनिराज ने कहा, तो क्या सेठ महाशय, राजा का यह काम ठीक हुआ ? सेठ ने भी 'ना' कहकर और एक कथा कहना शुरू की ॥९९-११०॥

वह बोला–एक मनुष्य जंगल से चला जा रहा था। रास्ते में वह सिंह को देखकर डर के मारे एक वृक्ष पर चढ़ गया। जब सिंह चला गया, तब यह नीचे उतरा और जाने लगा। रास्ते में इसे राजा के बहुत से आदमी मिले, जो कि भेरी के लिए अच्छे और बड़े झाड़ की तलाश में आये थे। सो इस दुष्ट मनुष्य ने वह वृक्ष इन लोगों को बता दिया, जिस पर चढ़कर कि इसने अपनी जान बचाई थी। राजा के आदमी उस घनी छाया वाले सुन्दर वृक्ष को काटकर ले गये। मुनिराज, जिसने बन्धु की तरह अपनी रक्षा की, मरने से बचाया, उस वृक्ष के लिए इस दुष्ट को ऐसा करना योग्य था क्या? मुनिराज 'नहीं' कहकर और एक कथा कही ॥१११-११४॥

वे बोले–गन्धर्वसेन राजा की कौशाम्बी नगरी में एक अंगारदेव सुनार रहता था। जाति का यह ऊँच था। यह रत्नों की जड़ाई का काम बहुत ही बढ़िया करता था। एक दिन अंगारदेव राजमुकुट के एक बहुमूल्य मणि को उजाल रहा था। इसी समय उसके घर पर मेदज नाम के एक मुनि आहार

एकदा राजकीयोरुमुकुटाग्रहामणिम्। तेनोज्वालयता गेहे समायातो मुनीश्वरः ॥११७॥
चर्यार्थं संप्रणम्याशु भक्त्या मेदजसंज्ञकः। स्थापितः कर्मशालायां स मुनिस्तु सुखं स्थितः ॥११८॥
तत्समीपे मणिं धृत्वा भार्याग्रे स गतो यदा। मणिः संगलितस्तावद्रक्तत्वात्क्रौञ्चपक्षिणा ॥११९॥
आगतेन ततस्तेन मणिं चापश्यता द्रुतम्। सम्पृष्टोसौ मुनीन्द्रोपि जानन्मौनेन संस्थितः ॥१२०॥
स्वर्णकारः पुनः प्राह ब्रूहि त्वं भो मणिं मुने। अन्यथा सकुटुम्बस्य संक्षयो मे भविष्यति ॥१२१॥
तथैव संस्थितः सोपि मुनीन्द्रः करुणापरः। ततो रुष्टेन तेनाशु चोरोयं चेति मानसे ॥१२२॥
ज्ञात्वा बध्वा महाकाष्ठै-राहतोसौ मुनीश्वरः। धिग्धनं धिक्च मूढत्वं वेत्ति किंचिन्न यज्जनः ॥१२३॥
एककाष्ठे तदा क्रौञ्च-गले लग्ने लसद्द्युतिः। पद्मरागमणिः सोपि निर्गतो वा यशस्ततिः ॥१२४॥
तं विलोक्य मणिं सोपि स्वर्णकारः सुदुःखितः। हाहाकारं विधायोच्चैर्लग्नस्तन्मुनिपादयोः ॥१२५॥
अहो श्रेष्ठिन्यथा तेन जानता मुनिना मणिः। प्रोक्तो नैव दयालुत्वा-त्तथाहं ते च सद्घटम् ॥१२६॥
जानन्नपि ध्रुवं धीर कथयामि न संयमी। कुरु त्वं यच्च जानासि साम्प्रतं त्वन्मनोगतम् ॥१२७॥
तदा कुबेरदत्तोसौ प्रच्छन्नं तन्निशम्य च। समानीय घटं शीघ्रं प्रोल्लसद्रत्नसंभृतम् ॥१२८॥

के लिए आये। वह मुनि को एक ऊँची जगह बैठाकर और उनके सामने उस मणि को रखकर आप भीतर स्त्री के पास चला गया। इधर मणि को मांस के भ्रम से कूँज पक्षी निगल गया। जब सुनार सब विधि ठीक-ठाक कर आया तो देखता है वहाँ मणि नहीं। मणि न देखकर उसके तो होश उड़ गये। उसने मुनिराज से पूछा-मुनिराज, मणि को मैं आपके पास अभी रखकर गया हूँ, इतने में वह कहाँ चला गया? कृपा करके बतलाइए। मुनि चुप रहे। उन्हें चुप्पी साधे देखकर अंगारदेव का उन्हीं पर कुछ शक गया। उसने फिर पूछा-स्वामी, मणि का क्या हुआ? जल्दी कहिये। राजा को मालूम हो जाने से वह मेरा और मेरे बाल-बच्चों तक का बुरा हाल कर डालेगा। मुनि तब भी चुप ही रहे। अब तो अंगारदेव से न रहा गया। क्रोध से उसका चेहरा लाल सुर्ख पड़ गया। उसने जान लिया कि मणि को इसी ने चुराया है। सो मुनि को बाँधकर उसने उन पर लकड़े की मार मारना शुरू की। उन्हें खूब मारा-पीटा सही, पर तब भी मुनि उसी तरह स्थिर बने रहे। ऐसे धन को, ऐसी मूर्खता को धिक्कार है जिससे मनुष्य कुछ भी सोच-समझ नहीं पाता और हर एक काम को जोश में आकर कर डालता है। अंगारदेव मुनि को लकड़े से पीट रहा था तब एक चोट कूँज पक्षी के गले पर भी जाकर लगी। उससे वह मणि बाहर आ गिरा। मणि को देखते ही अंगारदेव आत्मग्लानि, लज्जा और पश्चाताप के मारे अधमरा-सा हो गया। उसे काटो तो खून नहीं। वह मुनि के पाँवों में गिर पड़ा और रो-रोकर उनसे क्षमा माँगने लगा। इतना कह कर मुनिराज बोले-क्यों सेठ महाशय, अब समझे? मेदज मुनि को उस मणि का हाल मालूम था, पर तब भी दया के वश हो उन्होंने पक्षी का मणि निगल जाना न बतलाया। इसलिए कि पक्षी की जान न जाय और न मुनियों का ऐसा मार्ग ही है। इसी तरह मैं भी यद्यपि तुम्हारे घड़े का हाल जानता हूँ, तथापि कह नहीं सकता। इसलिए कि संयमी का यह मार्ग नहीं है कि वे किसी को कष्ट पहुँचावे। अब जैसा तुम जानते हो और जो तुम्हारे

कियन्तमुपसर्गं भो करिष्यति भवान्मुनेः। इत्युक्त्वा कोपतः पित्रे जिनदत्ताय तं ददौ ॥१२९॥
ततोसौ जिनदत्ताख्यः श्रेष्ठी लज्जाभरान्वितः। कुबेरदत्तोपि पुत्रः पश्चातापं विधाय च ॥१३०॥
नत्वा तं मेरुवद्धीरं मुनीन्द्रं सत्तपोनिधिम्। भक्त्या क्षमापयित्वा च तस्यैव चरणान्तिके ॥१३१॥
त्रिधा वैराग्यमासाद्य जैनीं दीक्षां सुखप्रदाम्। गृहीत्वा तौ मुनी जातौ निजात्मपरतारकौ ॥१३२॥
श्रीमज्जिनेन्द्रचन्द्रोक्त-प्रोल्लसद्बोधसिंधवः। सारसम्यक्त्वरत्नाढ्या लसच्छीलोर्मिराजिताः ॥१३३॥
ये ते मुनये नित्यं सुरेन्द्राद्यैः समर्चिताः। अस्माकं वन्दिता भक्त्या शान्तये सन्तु शर्मदाः ॥१३४॥
जातः श्रीमतिमूलसंघतिलके श्रीकुन्दकुन्दान्वये विद्यानन्दिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः।
श्रीभट्टारकमल्लिभूषणगुरू रत्नत्रयालंकृतः कुर्यात्सूरिमतल्लिको गुणनिधिर्नित्यं सतां मङ्गलम् ॥१३५॥

इति कथाकोशे भट्टारक-श्रीमल्लिभूषण-शिष्य-ब्रह्मनेमिदत्तविरचिते सगभयाधिकारे मणिवतमुनि-तुंकारी-कथावर्णनायां द्वितीयः परिच्छेदः।

४२. पिण्याकगन्धस्य कथा

प्रणम्य त्रिजगन्नाथं श्रीजिनं सारशर्मदम्। वक्ष्ये पिण्याकगन्धस्य चरित्रं धनलोभिनः ॥१॥
कांपिल्यनगरे राजा नाम्ना रत्नप्रभोभवत्। राज्ञी विद्युत्प्रभा जाता रूपसौभाग्यमण्डिता ॥२॥

मन में हो उसे करो। मुझे उसकी परवा नहीं। घड़े का छुपाने वाला कुबेरदत्त अपने पिता और मुनि का यह परस्पर का कथोपकथन छुपा सुन रहा था। मुनि का अन्तिम निश्चय सुन उसकी उन पर बड़ी भक्ति हो गई वह दौड़ा जाकर झट से घड़े को निकाल लाया और अपने पिता के सामने उसे रखकर जरा गुस्से से बोला–हाँ देखता हूँ आप मुनिराज पर अब कितना उपसर्ग करते हैं? यह देखकर जिनदत्त बड़ा शर्मिन्दा हुआ। उसने अपने भ्रम भरे विचारों पर बड़ा ही पछतावा किया। अन्त में दोनों पिता–पुत्रों ने उन मेरु के समान स्थिर और तप के खजाने मुनिराज के पाँवों में पड़कर अपने अपराध की क्षमा कराई और संसार से उदासीन होकर उन्हीं के पास उन्होंने दीक्षा भी ले ली, जो कि मोक्ष–सुख की देने वाली है। दोनों पिता–पुत्र मुनि होकर अपना कल्याण करने लगे और दूसरों को भी आत्मकल्याण का मार्ग बतलाने लगे। वे साधुरत्न मुझे सुख–शान्ति दें, जो भगवान् के उपदेश किये सम्यग्ज्ञान के उमड़े हुए समुद्र हैं, सम्यक्त्वरूपी रत्नों को धारण किये हैं और पवित्र शील जिसकी लहरें हैं। ऐसे मुनिराजों को मैं भक्तिपूर्वक नमस्कार करता हूँ। मूलसंघ के मुख्य चलाने वाले श्रीकुन्दकुन्दाचार्य की परम्परा में भट्टारक मल्लिभूषण हुए हैं। वे मेरे गुरु हैं, रत्नत्रय–सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र को धारण किये हैं और गुणों की खान हैं। वे आप लोगों का कल्याण करें ॥११५–१३५॥

४२. पिण्याकगन्ध की कथा

सुख देने वाले और सारे–संसार के प्रभु श्रीजिनेन्द्र भगवान् को नमस्कार कर धन लोभी पिण्याकगन्ध की कथा लिखी जाती है ॥१॥

रत्नप्रभ कांपिल्य नगर के राजा थे। उनकी रानी विद्युत्प्रभा थी। वह सुन्दर और गुणवती थी।

श्रेष्ठी श्रीजिनदत्ताख्यो जिनपादाब्जषट्पदः। राजादिपूजितो धीमान् श्रावकाचारकोविदः ॥३॥
तत्रैव नगरे श्रेष्ठी परः पिण्याकगन्धवाक्। द्वात्रिंशत्कोटिसुद्रव्यो लोभाद्भुङ्क्ते खलं खलः ॥४॥
द्रव्यं लब्ध्वा कुधीर्यस्तु दातुं भोक्तुं क्षमो न हि। पापतः कृपणत्वाच्च स भुङ्क्ते दुःखमेव च ॥५॥
तस्य स्त्री सुन्दरी नाम्नी विष्णुदत्तः सुतोजनि। एकदा राजकीयं च तडागं खनता तदा ॥६॥
उडुनैकेन संलब्ध्वा सुवर्णकुशिकाभृता। मञ्जूषा कर्मयोगेन चिरकालस्थिता ततः ॥७॥
महाकिट्टिप्रलिप्तत्वा-देका लोहस्य मूल्यतः। दत्ता श्रीजिनदत्ताख्यश्रेष्ठिने कुशिका मुदा ॥८॥
सोपि श्रेष्ठी सुधीर्ज्ञात्वा पश्चात्स्वर्णमनोहरम्। पापभीरुस्तदा तेन सुवर्णेन सुखप्रदाम् ॥९॥
जिनेन्द्रप्रतिमां कृत्वा तत्प्रतिष्ठां जगद्धिताम्। कारयामास सद्दृष्टि-र्धर्मिणामीदृशी मतिः ॥१०॥
द्वितीया च कुशी तेन जिनदत्तेन धीमता। परद्रव्यमिति ज्ञात्वा गृहीता नैव तद्व्रतात् ॥११॥
ततः पिण्याकगन्धस्तां गृहीत्वा लोहमूल्यतः। ज्ञात्वा सुवर्णमयीं तां च पुनर्देहीति संजगौ ॥१२॥
तथाष्टानवतिः कुश्यः प्रच्छन्नं चोडुकेन हि। तस्य तावद्भिनैर्दत्ता लोहमूल्यादजानता ॥१३॥

यहीं एक जिनदत्त सेठ रहता था। जिनधर्म पर इनकी गाढ़ श्रद्धा थी। अपने योग्य आचार-विचार इसके बहुत अच्छे थे। राजदरबार में भी इसकी अच्छी पूछ थी, मान-मर्यादा थी। यहीं एक और सेठ था। जिसका नाम पिण्याकगन्ध था। इसके पास कई करोड़ का धन था, पर तब भी वह मूर्ख और बड़ा लोभी था, कृपण था। वह न किसी को कभी एक कौड़ी देता और न स्वयं आप ही अपने धन को खाने-पीने, पहनने में खर्च करता और न ही खाया करता था। इसके पास सब सुख की सामग्री थी, पर अपने पाप के उदय से या यों कहो कि अपनी कंजूसी से वह सदा ही दुःख भोगा करता था। उसकी स्त्री का नाम सुन्दरी था। उसके एक विष्णुदत्त नाम का लड़का था ॥२-६॥

एक दिन राजा के तालाब को खोदते वक्त उडु नाम के मजूर को सोने के सलाइयों की भरी हुई लोहे की सन्दूक मिल गई। वह सन्दूक वहाँ हजारों वर्षों से गड़ी हुई होगी। यही कारण था कि उसे खूब कीटों ने खा लिया था। उसके भीतर की सलाइयों पर भी बहुत मैल जमा हो गया। मैल से यह नहीं जान पड़ता था कि वे सोने की हैं। उडु ने उसमें से एक सलाई लाकर जिनदत्त सेठ को लोहे के भाव बेचा। सेठ ने उस समय तो उसे ले लिया, पर जब वह ध्यान से धो-धाकर देखी गई तो जान पड़ा कि वह एक सोने की सलाई है। सेठ ने उसे चोरी का माल समझ अपने घर में उसका रखना उचित नहीं समझा। उसने उसकी एक जिनप्रतिमा बनवा ली और प्रतिष्ठा कराकर उसे मंदिर में विराजमान कर दिया। सच है, धर्मात्मा पुरुष पाप से बड़े डरते हैं। कुछ दिनों बाद उडु फिर एक सलाई लिए जिनदत्त के पास आया। पर अब की बार सेठ ने उसे नहीं खरीदा। इसलिए कि वह धन दूसरे का है। तब उडु ने उसे पिण्याकगन्ध को बेच दिया। पिण्याकगन्ध को भी मालूम हो गया कि वह सलाई सोने की है, पर तब भी लोभ में आकर उसने उडु से कहा कि यदि तेरे पास ऐसी सलाइयाँ और हों तो उन्हें यहाँ दे जाया करना ॥७-१२॥

मुझे इन दिनों लोहे की कुछ अधिक जरूरत है। मतलब यह कि पिण्याकगन्ध ने उडु से कोई

ततः पिण्याकगन्धाख्यः स श्रेष्ठी धनलम्पटः। भागिनेयविवाहार्थं भगिन्याग्रहतो द्रुतम् ॥१४॥
कुशीनां ग्रहणे पुत्रं तं निरूप्य प्रलोभतः। संप्राप्तः पिप्पलग्रामं प्रेरितः पापकर्मणा ॥१५॥
तेनोड्डुना समानीतां विष्णुदत्तस्तु तां कुशीम्। किं कार्यमनया चेति तदासौ न गृहीतवान् ॥१६॥
ततो राजभटेनाशु खननार्थं हठेन ताम्। गृहीत्वा खनता तेन सुवर्णकुशिका शतम् ॥१७॥
इत्यक्षराणि संवीक्ष्य दर्शिता सा महीपतेः। उड्डुश्चाकारितो राज्ञा पृष्टोसौ संजगाविति ॥१८॥
एका श्रीजिनदत्ताय कुश्योष्टानवतिर्ध्रुवम्। अन्याः पिण्याकगन्धाय मया दत्ता महीपते ॥१९॥
आहूतो जिनदत्तोसौ प्रोक्त्वा तद्वृत्तकं पुनः। दर्शयामास जैनेन्द्रीं प्रतिमां पापनाशिनीम् ॥२०॥
तां दृष्ट्वा भूपतिश्चित्ते परमानन्दनिर्भरः। वस्त्राद्यैः पूजयामास श्रेष्ठिनं तं गुणोज्ज्वलम् ॥२१॥

अट्ठानवे सलाइयाँ खरीद कर ली। बेचारे उड्डु को उसकी सच्ची कीमत ही मालूम न थी, इसलिए उसने सब की सब सलाइयाँ लोहे के भाव बेच दीं ॥१३॥

एक दिन पिण्याकगन्ध अपनी बहिन के विशेष कहने-सुनने से अपने भानजे के ब्याह में दूसरे गाँव जाने लगा। जाते समय धन के लोभ से पुत्र को वह सलाई बतलाकर कह गया कि इसी आकार-प्रकार का लोहा कोई बेचने अपने यहाँ आवे तो तू उसे मोल ले लिया करना। पिण्याकगन्ध के पाप का घड़ा अब बहुत भर चुका था। अब उसके फूटने की तैयारी थी इसलिए तो वह पापकर्म की जबरदस्ती से दूसरे गाँव भेजा गया ॥१४-१५॥

उड्डु के पास अब केवल एक ही सलाई बची थी। वह उसे भी बेचने को पिण्याकगन्ध के पास आया। पर पिण्याकगन्ध तो वहाँ था नहीं, तब वह उसके लड़के विष्णुदत्त के हाथ सलाई देकर बोला- आपके पिताजी ने ऐसी बहुतेरी सलाइयाँ मुझसे मोल ली है। अब यह केवल एक ही बची है। इसे आप लेकर मुझको इसकी कीमत दे दीजिये। विष्णुदत्त ने उसे यह कहकर टाल दिया, कि मैं इसे लेकर क्या करूँगा? मुझे जरूरत नहीं। तुम इसे ले जाओ। इस समय एक सिपाही ने उड्डु को देख लिया। उसने खोदने के लिए वह सलाई उससे छुड़ा ली। एक दिन वह सिपाही जमीन खोद रहा था। उससे सलाई पर जमा हुआ कीट साफ हो जाने से कुछ लिखा हुआ उसे दिख पड़ा। लिखा यह था कि सोने की सौ सलाइयाँ सन्दूक में हैं। यह लिखा देखकर सिपाही ने उड्डु को पकड़ लाकर उससे सन्दूक की बाबत पूछा। उड्डु ने सब बातें ठीक-ठाक बतला दीं। सिपाही उड्डु को राजा के पास ले गया। राजा के पूछने पर उसने कहा कि मैंने ऐसी अट्ठानबे सलाइयाँ तो पिण्याकगन्ध सेठ को बेची हैं ओर एक जिनदत्त सेठ को। राजा ने पहले जिनदत्त को बुलाकर सलाई मोल लेने के बाबत पूछा। जिनदत्त ने कहा-महाराज, मैंने एक सलाई खरीदी तो जरूर है, पर जब मुझे यह मालूम पड़ा कि वह सोने की है तो मैंने उसकी जिनप्रतिमा बनवा ली। प्रतिमा मन्दिर में मौजूद है। राजा प्रतिमा को देखकर बहुत खुश हुआ। उसने जिनदत्त की इस सच्चाई पर उसका बहुत मान किया, उसे बहुमूल्य वस्त्राभूषण दिए। सच है, गुणों की पूजा सब जगह हुआ करती है ॥१६-२१॥

**पिण्याकश्रेष्ठिनो गेहं गृहीत्वा तत्कुटुम्बकम्। निक्षिप्तं कष्टतो राज्ञा कारागारे प्रकोपतः ॥२२॥
येन तृष्णातुरेणोच्चैर्गृहीतं परवित्तकम्। निजं तेन स्वहस्तेन क्षयं नीतं च सर्वथा ॥२३॥
विवाहान्तरं सोपि समागच्छन्निजं गृहम्। श्रुत्वा स्वगेहवृत्तान्तं मार्गे पिण्याकगन्धकः ॥२४॥
इमौ पादौ दुरात्मानौ सर्वलक्ष्मीक्षयङ्करौ। गतौ ग्राममिति क्रोधाद्धत्वा पाषाणकेन च ॥२५॥
मृत्वार्तध्यानतो कष्टं षष्ठेऽसौ नरके कुधीः। लेल्लकप्रस्तरे पापी पपात प्रौढलोभतः ॥२६॥
इति ज्ञात्वा बुधैर्नित्यं विवेकोत्कृष्टमानसैः। त्याज्यः पापप्रदो लोभो यस्त्वन्यायप्रवर्त्तकः ॥२७॥
स जयतु जिननाथः सर्वदेवेन्द्रवन्द्यः सकलगुणसमुद्रो विश्वतत्त्वैकदीपः।
विगतनिखिलदोषो दत्तभव्यप्रलक्ष्मीर्विमलतरगिरीशो बोधसिन्धुः सतां वै ॥२८॥**

इति कथाकोशे कृपण-पिण्याकगन्धस्य कथा समाप्ता।

४३. लुब्धकस्य कथा

प्रोल्लसत्केवलज्ञानं श्रीजिनं त्रिजगद्गुरुम्। प्रणम्य परया भक्त्या वक्ष्ये लुब्धकथानकम् ॥१॥

इसके बाद राजा ने पिण्याकगन्ध को बुलवाया। पर वह घर पर न होकर गाँव गया हुआ था। राजा को उसके न मिलने से और निश्चय हो गया कि उसने अवश्य राजधन धोखा देकर ठग लिया है। राजा ने उसी समय उसका घर जब्त करवा कर उसके कुटुम्ब को कैदखाने में डाल दिया। इसलिए कि उसने पूछ-ताछ करने पर भी सलाइयों का हाल नहीं बताया था। सच है, जो आशा के चक्कर में पड़कर दूसरों का धन मारते हैं, वे अपने हाथों अपना सर्वनाश करते हैं ॥२२-२३॥

उधर ब्याह हो जाने के बाद पिण्याकगंध घर की ओर वापस आ रहा था। रास्ते में ही उसे अपने कुटुम्ब की दुर्दशा का समाचार सुन पड़ा। उसे उसका बड़ा दुःख हुआ। उसने अपने इस धन-जन की दुर्दशा का मूल कारण अपने पाँवों को ठहराया। इसलिए कि वह उन्हीं के द्वारा दूसरे गाँव गया था। पाँवों पर उसे बड़ा गुस्सा आया और इसीलिए उसने बड़ा भारी पत्थर लेकर उससे अपने दोनों पाँवों को तोड़ लिया। मृत्यु उसके सिर पर खड़ी ही थी। वह लोभी आर्त्तध्यान; बुरे भावों से मरकर नरक गया। यह कथा शिक्षा देती है जो समझदार है उन्हें चाहिए कि वे अनीति के कारण और पाप के बढ़ाने वाले इस लोभ का दूर ही से छोड़ने का यत्न करें ॥२४-२७॥

वे कर्मों को जीतने वाले जिन भगवान् संसार में सदा काल रहें जो संसार के पदार्थों को दिखलाने के लिये दीपक के समान है; सब दोषों से रहित हैं, भव्य-जनों को स्वर्ग-मोक्ष का सुख देने वाले हैं, जिनके वचन अत्यन्त ही निर्मल या निर्दोष हैं, जो गुणों के समुद्र हैं, देवों द्वारा पूज्य हैं और सत्पुरुषों के लिए ज्ञान के समुद्र हैं ॥२८॥

४३. लुब्धक सेठ की कथा

केवलज्ञान की शोभा को प्राप्त हुए और तीनों जगत् के गुरु ऐसे जिन भगवान् को नमस्कार कर लुब्धक सेठ की कथा लिखी जाती है ॥१॥

चम्पापुर्यां महाराजः संजातोभयवाहनः। पुण्डरीकाऽभवद्राज्ञी पुण्डरीकसमेक्षणा ॥२॥
लुब्धनामाजनि श्रेष्ठी पापतो धनलम्पटः। श्रेष्ठिनी नागवस्वाख्या तस्याभूत्प्राणवल्लभा ॥३॥
पुत्रौ गरुडदत्ताख्यनागदत्तौ मनःप्रियौ। लुब्धकश्रेष्ठिना तेन स्वगेहे भूरिवित्ततः ॥४॥
यक्षयक्षीगजोष्ट्रादि-महिषाश्वयुगानि च। हैमानि कारितान्युच्चैः शृङ्गपुच्छखुरादिषु ॥५॥
नाना रत्नप्रवालादिजटितानि निजेच्छया। बलीवर्दस्तु वैकाकी सुवर्णाभावतस्तदा ॥६॥
द्वितीयवृषभस्योच्चै-र्निमित्तेनैकदा कुधीः। सप्ताहोरात्रिसद्वृष्टौ जातायां कर्मयोगतः ॥७॥
गंगाप्रवाहतः काष्ठं कष्टादानयति स्म सः। अहो दुरात्मनां तृष्णा कदा केन प्रशाम्यति ॥८॥
पुण्डरीका तदा राज्ञी स्वप्रासादोपरि स्थिता। आनयन्तं महाकाष्ठं कष्टतो वीक्ष्य लुब्धकम् ॥९॥
स्वनाथं प्रति सा प्राह हंहो स्वामिंस्तवापि च। राज्ये कोपि दरिद्रोयं दृश्यते कष्टमाश्रितः ॥१०॥
अस्मै किञ्चिद्धनं देव दीयते करुणाधिया। युक्तं कारुण्ययुक्तानां चित्ते दानमतिर्भवेत् ॥११॥
तदाकर्ण्य नृपो धीमांस्तं समाहूय लुब्धकम्। संजगाद त्वया वित्तं यावदत्र प्रयोजनम् ॥१२॥

राजा अभयवाहन चम्पापुरी के राजा हैं इनकी रानी पुण्डरीका है। नेत्र इसके ठीक पुण्डरीक कमल जैसे हैं। चम्पापुरी में लुब्धक नाम का एक सेठ रहता है। इसकी स्त्री का नाम नागवसु हैं। लुब्धक के दो पुत्र हैं। इनके नाम गरुड़दत्त और नागदत्त हैं। दोनों भाई सदा हँस-मुख रहते हैं ॥२-४॥

लुब्धक के पास बहुत धन था। उसने बहुत कुछ खर्च करके यक्ष, पक्षी, हाथी, ऊँट, घोड़ा, सिंह, हरिण आदि पशुओं की एक-एक जोड़ी सोने की बनवाई थी। इसके सींग, पूँछ, खूर आदि में अच्छे-अच्छे बहुमूल्य हीरा, मोती, माणिक आदि रत्नों को जड़ाकर लुब्धक ने देखने वालों के लिए एक नया ही आविष्कार कर दिया था। जो इन जोड़ियों को देखता वह बहुत खुश होता और लुब्धक की तारीफ किये बिना नहीं रहता। स्वयं लुब्धक भी अपनी इस जगमगाती प्रदर्शनी को देखकर अपने को बड़ा धन्य मानता था। इसके सिवा लुब्धक को थोड़ा-सा दुःख इस बात का था कि उसने एक बैल की जोड़ी बनवाना शुरू की थी और एक बैल बन भी चुका था, पर फिर सोना न रहने के कारण वह दूसरा बैल नहीं बनवा सका। बस, इसी की उसे एक चिन्ता थीं। पर यह प्रसन्नता की बात है कि वह सदा चिन्ता से घिरा न रहकर इसी कमी को पूरा करने के यत्न में लगा रहता था ॥५-६॥

एक बार सात दिन बराबर पानी की झड़ी लगी रही। नदी-नाले सब पूर आ गये। पर कर्मवीर लुब्धक ऐसे समय भी अपने दूसरे बैल के लिए लकड़ी लेने को स्वयं नदी पर गया और बहती नदी में से बहुत-सी लकड़ी निकालकर उसने उसकी गठरी बाँधी और उसे आप ही अपने सिर पर लादे लाने लगा। सच है, ऐसे लोभियों की तृष्णा कहीं कभी किसी से मिटी है? नहीं ॥७-८॥

इस समय रानी पुण्डरीका अपने महल पर बैठी हुई प्रकृति की शोभा को देख रही थी। महाराज अभयवाहन भी इस समय यहीं पर थे। लुब्धक को सिर पर एक बड़ा भारी काठ का भार लादकर लाते देख रानी ने अभयवाहन से कहा-प्राणनाथ, जान पड़ता है आपके राज में यह कोई

तावत्संगृह्यते शीघ्रं तच्छ्रुत्वा लुब्धकोवदत्। एकाकी मे गृहे देव बलीवर्दः प्रवर्त्तते ॥१३॥
विलोक्यते द्वितीयस्तु तन्निशम्य महीपतिः। जगावित्थं मदीयेषु बलीवर्देषु साम्प्रतम् ॥१४॥
बलीवर्दं गृहाण त्वं यः सर्वेषु मनोहरः। राजकीयान्समालोक्य ततोसौ वृषभोत्तमात् ॥१५॥
अस्माद् वृषेन सादृश्यो नास्ति देवेति ते वृषः। लुब्धकः प्राह भूपाग्रे ततो राज्ञा प्रजल्पितम् ॥१६॥
कीदृशस्ते बलीवर्दो भो वणिक्मे प्रदर्शय। ततस्तेन गृहं नीत्वा राज्ञः सन्दर्शितो वृषः ॥१७॥
तं समालोक्य भूपालः सुवर्णवृषभोत्तमम्। ईदृशस्ते वृषभोस्ति परमाश्चर्यमाप्तवान् ॥१८॥
श्रेष्ठिन्या नागवस्वा च रत्नैः स्थालं प्रपूरितम्। दत्वा श्रेष्ठिकरे प्रोक्त समर्पय महीभुजे ॥१९॥

बड़ा ही दरिद्री है। देखिए, बेचारा सिर पर लकड़ियों का कितना भारी गट्ठा लादे हुए आ रहा है। दया करके इसे कुछ आप सहायता दीजिए, जिससे इसका कष्ट दूर हो जाये। यह उचित ही है कि दयावानों की बुद्धि दूसरों पर दया करने की होती है। राजा ने उसी समय नौकरों को भेजकर लुब्धक को अपने पास बुलवाया। लुब्धक के आने पर राजा ने उससे कहा–जान पड़ता है तुम्हारे घर की हालत अच्छी नहीं है। इसका मुझे खेद है कि इतने दिनों से मेरा तुम्हारी ओर ध्यान न गया। अस्तु, तुम्हें जितने रुपये पैसे की जरूरत हो, तुम खजाने से ले जाओ। मैं तुम्हें एक पत्र लिख देता हूँ। यह कहकर राजा पत्र लिखने को तैयार हुए कि लुब्धक ने उनसे कहा–महाराज, मुझे और कुछ न चाहिए किन्तु एक बैल की जरूरत है। कारण मेरे पास एक बैल तो है, पर उसकी जोड़ी मुझे मिलानी है। राजा ने कहा–अच्छी बात है तो जाओ हमारे बहुत से बैल है उनमें तुम्हें जो बैल पसंद आवे उसे अपने घर ले जाओ। राजा के जितने बैल थे उन सबको देख आकर लुब्धक ने राजा से कहा–महाराज, उन बैलों में मेरे बैल सरीखा तो एक भी बैल मुझे नहीं दिखाई पड़ा। सुनकर राजा को बड़ा अचम्भा हुआ। उन्होंने लुब्धक से कहा–भाई, तुम्हारा बैल कैसा है, यह मैं नहीं समझा। क्या तुम मुझे अपना बैल दिखाओगे? लुब्धक बड़ी खुशी के साथ अपना बैल दिखाना स्वीकार कर महाराज को अपने घर पर लिवा ले गया। राजा को उस सोने के बने बैल को देखकर बड़ा अचम्भा हुआ। जिसे उन्होंने एक महा दरिद्री समझा था, वही इतना बड़ा धनी है, यह देखकर किसे अचम्भा न होगा ॥९–१८॥

लुब्धक की स्त्री नागवसु अपने घर पर महाराज को आये देखकर बहुत ही प्रसन्न हुई उसने महाराज की भेंट के लिए सोने का थाल बहुमूल्य सुन्दर-सुन्दर रत्नों से सजाया और उसे अपने स्वामी के हाथ में देकर कहा–इस थाल को महाराज को भेंट कीजिए। रत्नों के थाल को देखकर लुब्धक की तो छाती बैठ गई, पर पास ही महाराज के होने से उसे वह थाल हाथों में लेना पड़ा। जैसे ही थाल को उसने हाथों में लिया उसके दोनों हाथ थर-थर काँपने लगे और ज्यों ही उसने थाल देने को महाराज के पास हाथ बढ़ाया तो लोभ के मारे इसकी अंगुलियाँ महाराज को साँप के फण की तरह देख पड़ी। सच है, जिस पापी ने कभी किसी को एक कौड़ी तक नहीं दी, उसका मन क्या

तदा तस्य प्रलोभत्वात्स्थालं च ददतो द्रुतम्। हस्तस्याङ्गुलयो जाताः फणाकाराः सुकष्टतः ॥२०॥
दत्तं येन कदा किञ्चित्कस्मैचिन्नैव पापतः। तन्मतिः प्रेरिता चापि नास्ति दाने कदाचन ॥२१॥
ततो राजा विलोक्योच्चैस्तच्चरित्रं सुनिन्दितम्। दुष्टात्मा फणहस्तोयमित्युक्त्वा स्वगृहं गतः ॥२२॥
एकदासौ महालोभग्रहग्रस्तस्तु लुब्धकः। तद्‌द्वितीयबलीवर्दनिमित्तं पापकर्मतः ॥२३॥
गत्वा च सिंहलद्वीपप्रमुखेषु बहुष्वपि। चतस्त्रः स्वर्णकोट्यस्तु समुपार्ज्य प्रकृष्टतः ॥२४॥
सिन्धुमध्ये समागच्छन्स्फुटिते यानपात्रके। मृत्वा सर्पो निजे गेहे निधिस्थाने बभूव च ॥२५॥
तत्रापि तद्धनं कस्य गृहीतं न ददाति सः। कोपाद् गरुडदत्तेन ज्येष्ठपुत्रेण मारितः ॥२६॥
तदा मृत्वा चतुर्थेऽसौ महार्त्तध्यानपीडितः। संजातो नारको घोरे नरके पापकर्मणा ॥२७॥
एवं धर्मं विना जन्तुर्नाना लोभादिवञ्चितः। कष्टं प्रयाति पापेन संसारे दुःखसागरे ॥२८॥
ज्ञात्वैवं भवदुःखकोटिजनकं दुष्क्रोधलोभादिकं त्यक्त्वा दूरतरं विशुद्धमनसस्त्रेधा सदा चेतसि।
श्रीमत्सारजिनेन्द्रदेवगदितं धर्मं सुशर्मप्रदं शक्त्या भक्तिभरेण शान्तिनिलयं सन्तो भजन्तु श्रिये ॥२९॥

इति कथाकोशे लुब्धकश्रेष्ठिनः कथा समाप्ता।

दूसरे की प्रेरणा से भी कभी दान की ओर झुक सकता है? नहीं। राजा को उसके ऐसे बुरे बरताव पर बड़ी नफरत हुई फिर एक पल भर भी उन्हें वहाँ ठहरना अच्छा न लगा। वे उसका नाम 'फणहस्त' रखकर अपने महल पर आ गये ॥१९-२०॥

लुब्धक की दूसरा बैल बनाने की आकांक्षा अभी पूरी नहीं हुई वह उसके लिए धन कमाने को सिंहलद्वीप गया। लगभग चार करोड़ का धन उसने वहाँ रहकर कमाया भी। जब वह अपना धन, माल-असबाब जहाज पर लाद कर लौटा तो रास्ते में आते-आते कर्मयोग से हवा उलटी वह चली। समुद्र में तूफान पर तूफान आने लगे। एक जोर की आँधी आई उसने जहाज को एक ऐसा जोर का धक्का मारा कि जहाज उलट कर देखते-देखते समुद्र के विशाल गर्भ में समा गया। लुब्धक, उसका धन-असबाब, इसके सिवा और भी बहुत से लोग जहाज के संगी हुए। लुब्धक आर्त्तध्यान से मरकर अपने धन का रक्षक साँप हुआ। तब भी उसमें से एक कोड़ी भी किसी को नहीं उठाने देता था ॥२१-२६॥

एक सर्प को अपने धन पर बैठा देखकर लुब्धक के बड़े लड़के गरुड़दत्त को बहुत क्रोध आया और इसीलिए उसने उसे उठाकर मार डाला। यहाँ से वह बड़े बुरे भावों से मरकर चौथे नरक गया, जहाँ के पापकर्मों का बड़ा ही दुस्सह फल भोगना पड़ता था। इस प्रकार धर्मरहित जीव क्रोध, मान, माया, लोभ आदि के वश होकर पाप के उदय से इस दुःखों के समुद्र संसार में अनन्त काल तक दुःख- कष्ट उठाया करता है। इसलिए जो सुख चाहते हैं, जिन्हें सुख प्यारा है, उन्हें चाहिए कि वे इन क्रोध, लोभ, मान, मायादि को संसार में दुःख देने वाले मूल कारण समझ कर इनका मन, वचन और शरीर से त्याग करें और साथ ही जिनेन्द्र भगवान् के उपदेश किये धर्म को भक्ति और शक्ति के अनुसार ग्रहण करें, जो परम शान्ति-मोक्ष का प्राप्त कराने वाला है ॥२७-२९॥

४४. वसिष्ठतापसस्य कथा

नत्वाष्टादशभिर्दोषैर्निर्मुक्तं जिननायकम्। वसिष्ठतापसस्योच्चै-श्चरित्रं रचयाम्यहम् ॥१॥
मथुरानगरे राजा समभूदुग्रसेनवाक्। रेवतीनाम तद्राज्ञी संजाता चित्तवल्लभा ॥२॥
श्रेष्ठी श्रीजिनदत्ताख्यो जिनपादाब्जषट्पदः। तस्यैव श्रेष्ठिनो दासी प्रियंगुलतिकाभवत् ॥३॥
पुरे तत्र वसिष्ठाख्य-स्तापसो यमुनातटे। कृत्वा स्नानं च पञ्चाग्निसाधनं कुरुते सदा ॥४॥
तदा पौरजनो मूढस्तं समालोक्य तापसम्। स जातो भक्तिकस्तस्य मूढा मूढक्रियारताः ॥५॥
पौरदास्यस्तथा सर्वाः पानीयानयनक्षणे। नित्यं प्रदक्षिणीकृत्य भक्तितस्तं नमन्ति च ॥६॥
सा प्रियंगुलता दासी सखीभिः प्रेरितापि च। प्रणामं कुरुते नैव जैनगेहप्रसंगतः ॥७॥
ततस्ताभिर्बलात्कारं संधृत्वा हस्तपादयोः च। पात्यमाना पदे तस्य निःशंकं सा जगाविति ॥८॥
यद्यस्य तापसस्यात्र प्रणामः क्रियते मया। तदा धीवरनाथस्य प्रणामः क्रियते न किम् ॥९॥
तच्छ्रुत्वा सर्वदासीनां रुष्टोसौ तापसः कुधीः। नष्टास्ताश्च मदोन्मत्ताः कृत्वा हास्यं च दासिकाः ॥१०॥

---

४४. वशिष्ठ तापसी की कथा

भूख, प्यास, रोग, शोक, जन्म, मरण, भय, माया, चिन्ता, मोह, राग, द्वेष आदि अठारह दोषों से जो रहित हैं, ऐसे जिनेन्द्र भगवान् को नमस्कार कर वशिष्ठ तापसी की कथा लिखी जाती है ॥१॥

उग्रसेन मथुरा के राजा थे। उनकी रानी का नाम रेवती था। रेवती अपने स्वामी की बड़ी प्यारी थी। यहीं एक जिनदत्त सेठ रहता था। जिनदत्त के यहाँ प्रियंगुलता नाम की एक नौकरानी थी। मथुरा में यमुना किनारे पर वशिष्ठ नाम का एक तापसी रहता था। वह रोज नहा-धोकर पंचाग्नि तप किया करता था। लोग उसे बड़ा भारी तपस्वी समझ कर उसकी खूब सेवा-भक्ति करते थे। सो ठीक ही है, असमझ लोग प्रायः देखा-देखी हर एक काम करने लग जाते हैं। यहाँ तक कि शहर की दासियाँ पानी भरने को कुँए पर जब आती तो वे भी तापस महाराज की बड़ी भक्ति से प्रदक्षिणा करती, उनके पाँवों पड़ती और उनकी सेवा-सुश्रुषा कर फिर वे घर जातीं। प्रायः सभी का यही हाल था। पर हाँ प्रियंगुलता इससे बरी थी। उसे ये बातें बिल्कुल नहीं रुचती थीं। इसलिए कि वह बचपने से ही जैनी के यहाँ काम करती रही। उसके साथ की और स्त्रियों को प्रियंगुलता का यह हठ अच्छा नहीं जान पड़ा और इसलिए मौका पाकर वे एक दिन प्रियंगुलता को उस तापसी के पास जबरदस्ती लिवा ले गई और इच्छा न रहते भी उन्होंने उसका सिर तापसी के पाँवों पर रख दिया। अब तो प्रियंगुलता से न रहा गया। उसने गुस्सा होकर साफ-साफ कह दिया कि यदि इस ढोंगी के मैं हाथ जोड़ूँ, तब फिर मुझे एक धीवर (भोई) के ही क्यों न हाथ जोड़ना चाहिए? इससे तो वह बहुत अच्छा है। एक दासी के द्वारा अपनी निन्दा सुनकर तापसी जी को बड़ा गुस्सा आया। वे उन दासियों पर भी बहुत बिगड़े, जिन्होंने जर्बदस्ती प्रियंगुलता को उनके पाँवों पर पटका था। दासियाँ तो तापसी जी की लाल-पीली आँखें देखकर उसी समय वहाँ से नौ-दो-ग्यारह हो गई पर तापस महाराज की क्रोधाग्नि तब भी न बुझी ॥२-१०॥

उग्रसेननृपस्याग्रे गत्वासौ तापसोवदत्। भो प्रभो जिनदत्तेन धीवरो भणितोप्यहम् ॥११॥
ततो राज्ञो समाहूतो स श्रेष्ठी जिनदत्तवाक्। सद्दृष्टिर्निर्भयः प्राह भूपाग्रे सत्यमण्डितः ॥१२॥
देवायं तापसश्चैव प्रमाणं तपसा युतः। यद्यसौ धीवरः प्रोक्तो मया भो नाऽथ निश्चयात् ॥१३॥
तापसेन ततः प्रोक्तं दास्याहं भणितोस्य च। हसित्वा वचनं तस्य साहूता भूभुजा तदा ॥१४॥
तां दृष्ट्वा तापसः कोपात्स च प्राह कुधीस्तदा। रे रण्डे विप्रपुत्रोहं वायुभक्षी सुतापसः ॥१५॥
कथं त्वयातिपापिन्या धीवरो भणितो भुवि। मा प्रियंगुलतावोचत्तदोच्चैर्निर्भया सती ॥१६॥
मत्स्यान्मारयति व्यक्तं धीवरस्त्वमपि ध्रुवम्। ततस्ते धीवरस्यापि विशेषो नैव भूतले ॥१७॥
परीक्षार्थं जटाभारं झाटय त्वं शठ द्रुतम्। तस्मिन्कृते तदा तेन पतिताः क्षुद्रमत्स्यकाः ॥१८॥
तदा राजा जिनेन्द्राणां धर्मस्योच्चैः प्रशंसनम्। कृत्वा निष्काशितः शीघ्रं तापसो मानवर्जितः ॥१९॥

उसने उग्रसेन महाराज के पास पहुँचकर शिकायत की कि प्रभो, जिनदत्त सेठ ने मुझे धीवर बतलाकर मेरा बड़ा अपमान किया। उसे एक साधु की इस तरह बुराई करने का क्या अधिकार था? उग्रसेन को भी एक दूसरे धर्म के साधु की बुराई करना अच्छा नहीं जान पड़ा। उन्होंने जिनदत्त को बुलाकर पूछा, जिनदत्त ने कहा–महाराज यदि यह तपस्या करता है तो यह तापसी है ही, इसमें विवाद किसको है। पर मैंने तो इसे धीवर नहीं बतलाया और सचमुच जिनदत्त ने उससे कुछ कहा भी नहीं था। जिनदत्त को इंकार करते देख तापसी घबराया। तब उसने अपनी सच्चाई बतलाने के लिए कहा– ना प्रभो, जिनदत्त की दासी ने ऐसा कहा था तापसी की बात पर महाराज को कुछ हँसी-सी आ गई उन्होंने तब प्रियंगुलता को बुलवाया। वह आई उसे देखते ही तापसी के क्रोध का कुछ ठिकाना ना रहा। वह कुछ न सोचकर एक साथ ही प्रियंगुलता पर बिगड़ खड़ा हुआ और गाली देते हुए उसने कहा– राँड़ तूने मुझे धीवर बतलाया है, तेरे इस अपराध की सजा तो तुझे महाराज देंगे ही। पर देख, मैं धीवर नहीं हूँ किन्तु केवल हवा के आधार पर जीवन रखने वाला एक परम तपस्वी हूँ। बतला तो, तूने मुझे क्या समझ कर धीवर कहा? प्रियंगुलता ने तब निर्भय होकर कहा–हाँ बतलाऊँ कि मैंने तुझे क्यों मल्लाह बतलाया था? ले सुन, जबकि तू रोज-रोज मच्छलियाँ मारा करता है तब तू मल्लाह तो है ही! मुझे ऐसी दशा से कौन समझदार तापसी कहेगा? तू यह कहे कि इसके लिए सबूत क्या? तू जैनी के यहाँ रहती है, इसलिए दूसरे धर्मों की या उनके साधु-सन्तों की बुराई करना तो तेरा स्वभाव होना ही चाहिए। पर सुन, मैं तुझे आज यह बतला देना चाहती हूँ कि जैनधर्म सत्य का पक्षपाती है ॥११-१७॥

उसमें सच्चे साधु संत ही पुजते हैं। तेरे से ढोंगी, बेचारे भोले लोगों को धोखा देने वालों की उसके सामने दाल नहीं गल पाती। ऐसा ही ढोंगी देखकर तुझे मैंने मल्लाह बतलाया और न मैं तुझमें मछली मारने वाले मल्लाहों से कोई अधिक बात ही पाती हूँ। तब बतला मैंने इसमें कौन तेरी बुराई की? अच्छा, यदि तू मल्लाह नहीं है तो जरा अपनी इन जटाओं को तो झाड़ दे अब तो तापस महाराज बड़े घबराये और उन्होंने बातें बनाकर इस बात को ही उड़ा देना चाहा। पर प्रियंगुलता ऐसे

गंगागंधवतीनद्योः संगमे सोपि तापसः। पञ्चाग्निसाधनं कर्त्तुं प्रवृत्तः कष्टतः पुनः ॥२०॥
तत्र पञ्चशतैर्युक्तो मुनीन्द्रो मुनिभिस्तदा। वीरभद्रः समायातो जैनतत्त्वविदांवरः ॥२१॥
दृष्ट्वा तं तापसं तत्र मुनिश्चैको जगौ तदा। अस्य घोरं तपो देव तच्छ्रुत्वा गुरुरब्रवीत् ॥२२॥
अज्ञानिनां दयाहीनं किं तपस्तु प्रशस्यते। ततो रुष्टाहमज्ञानी कथं भो तापसोवदत् ॥२३॥
आचार्येण तदा प्रोक्तं यदि त्वं ज्ञानवान्ध्रुवम्। मृत्वा गुरुः क्व ते जातो वद त्वं चेति तापस ॥२४॥
स च प्राह गतः स्वर्गं मे गुरुस्तापसोत्तमः। तच्छ्रुत्वा वीरभद्रेण प्रोक्तं संज्ञानचक्षुषा ॥२५॥
नन्वस्मिन्दह्यमाने च महाकाष्ठे प्रकष्टतः। गुरुस्ते सर्परूपेण दह्यमानस्तु तिष्ठति ॥२६॥
ततो रुष्टेन तेनाशु तत्काष्ठे च द्विधाकृते। दृष्टो भुजंगमः सोपि हा कष्टं मूढचेष्टितम् ॥२७॥
तं दृष्ट्वा तापसश्चापि त्यक्त्वा गर्वं ततो द्रुतम्। धर्ममाकर्ण्य जैनेन्द्रं मुनिर्जातो दिगम्बरः ॥२८॥

कैसे रास्ते पर आ जाने वाली थी। उसने तापसी से जटा झड़वा कर ही छोड़ा। जटा झाड़ने पर सचमुच छोटी-छोटी मछलियाँ उसमें से गिरी। सब देखकर दंग रह गए। उग्रसेन ने तब जैनधर्म की खूब तारीफ कर तापसी से कहा-महाराज, जाइए-जाइए आपके इस भेष से पूरा पड़े। मेरी प्रजा को आपसे हृदय के मैले साधुओं की जरूरत नहीं। तापसी को भरी सभा में अपमानित होने से बहुत ही नीचा देखना पड़ा। वह अपना-सा मुँह लिए वहाँ से अपने आश्रम में आया पर लज्जा, अपमान, आत्मग्लानि से वह मरा जाता था। जो उसे देख पाता वही उसकी ओर अँगुली उठाकर बतलाने लगता। तब उसने वहाँ रहना छोड़ देना ही अच्छा समझ कुच कर दिया। वहाँ से वह गंगा और गंधवती के मिलाप होने की जगह आया और वहीं आश्रम बनाकर रहने लगा। एक दिन जैनतत्त्व के परम जानकार श्री वीरभद्राचार्य अपने संघ को लिए इस ओर आ गए। वशिष्ठ-तापस को पंचाग्नि तप करते देख एक मुनि ने अपने गुरु से कहा-महाराज, यह तापसी तो बड़ा ही कठिन और असह्य तप करता है ॥१८-२२॥

आचार्य बोले-हाँ यह ठीक है कि ऐसे तप में भी शरीर को बेहद कष्ट दिये बिना काम नहीं चलता, पर अज्ञानियों का तप कोई प्रशंसा के लायक नहीं। भला, जिनके मन में दया नहीं, जो संसार की सब माया, ममता और आरम्भ-सारम्भ छोड़-छोड़कर योगी हुए और फिर वे ऐसा दयाहीन, (जिसमें हजारों लाखों जीव रोज-रोज जलते हैं) तप करें तो इससे और अधिक दुःख की बात कौन होगी। वशिष्ठ के कानों में भी यह आवाज गई वह गुस्सा होकर आचार्य के पास आया और बोला-आपने मुझे अज्ञानी कहा, यह क्यों? मुझमें आपने क्या अज्ञानता देखी, बतलाइए? आचार्य ने कहा-भाई, गुस्सा मत हो। तुम्हें लक्ष कर तो मैंने कोई बात नहीं कही हैं। फिर क्यों इतना गुस्सा करते हों? मेरी धारणा तो ऐसे तप करने वाले सभी तापसों के सम्बन्ध में है कि वे बेचारे अज्ञान से ठगे जाकर ही ऐसे हिंसामय तप को तप समझते हैं। यह तप नहीं है किन्तु जीवों का होम करना है और जो तुम यह कहते हो, कि मुझे आपने अज्ञानी क्यों बतलाया, तो अच्छा एक बात तुम ही बतलाओ कि तुम्हारे गुरु, जो सदा ऐसा तप किया करते थे, मरकर तप के फल से कहाँ पैदा हुए हैं? तापस बोला-हाँ, क्यों

एकदा मथुराभ्यर्णे गोवर्द्धनगिरौ शुभे। वसिष्ठयतिनस्तस्य महामासोपवासिनः ॥२९॥
सुविद्यादेवताः सिद्धाः संजगुश्चेति भो प्रभो। आदेशं देहि नः शीघ्रं किं कुर्मो दासिका वयम् ॥३०॥
तेनोक्तं लोभभावेन यदास्माकं प्रयोजनम्। तदागच्छथ यूयं भो देवता गुणमण्डिताः ॥३१॥
पूर्णे मासोपवासेऽथ भक्तितश्चोग्रसेनकः। स्थापयत्वत्र मा कोपि वसिष्ठमुनिसत्तमम् ॥३२॥
अहं संस्थापयिष्यामि पत्तने चेति घोषणम्। दापयामास भूभर्त्ता मूढभक्तिस्तु कष्टदा ॥३३॥
पारणादिवसे पूर्वं पट्टहस्तिमदाश्रितः। आलानस्तंभमुन्मूल्य निर्गतो निजलीलया ॥३४॥
स राजा व्यग्रचित्तोभूदुग्रसेनः सुविस्मृतः। मुनिः सोपि क्षुधाक्रान्तो भ्रमित्वा पत्तनेऽखिले ॥३५॥

नहीं कहूँगा? मेरे गुरुजी स्वर्ग में गए हैं। वीरभद्राचार्य ने कहा–नहीं तुम्हें इसका मालूम ही नहीं हो सकता। सुनो, मैं बतलाता हूँ कि तुम्हारे गुरु की मरे बाद क्या दशा हुई, आचार्य ने अवधिज्ञान जोड़कर कहा–तुम्हारे गुरु स्वर्ग में नहीं गए किन्तु साँप हुए हैं और इस लकड़े के साथ-साथ जल रहे हैं। तापस को विश्वास नहीं हुआ बल्कि उसे गुस्सा भी आया कि इन्होंने क्यों मेरे गुरु को साँप हुआ बतलाकर उनकी बुराई की। पर आचार्य की बात सच है या झूठ इसकी परीक्षा कर देखने के लिए यही उपाय था कि उस लकड़े को चीरकर देखे। तापसी ने वैसा ही किया। लकड़े को चीरा। वीरभद्राचार्य का कहा सत्य हुआ। सर्प उसमें से निकला। देखते ही तापस को बड़ा अचम्भा हुआ। उसका सब अभिमान चूर-चूर हो गया। उसकी आचार्य पर बहुत ही श्रद्धा हो गई उसने जैनधर्म का उपदेश सुना। सुनकर उसके हिये की आँखें, जो इतने दिनों से बन्द थीं, एकदम खुल गई हृदय में पवित्रता का स्रोत फट निकला। बहुत दिनों का कूट-कपट, मायाचार रूपी मैलापन देखते-देखते न जाने कहाँ बहकर चला गया। वह उसी समय वीरभद्राचार्य से मुनि दीक्षा लेकर अब से सच्चा तापसी बन गया। यहाँ घूमते-फिरते और धर्मोपदेश करते वशिष्ठ मुनि एक बार मथुरा की ओर फिर आए। तपस्या के लिए इन्होंने गोवर्द्धन पर्वत बहुत पसन्द किया। वहीं ये तपस्या किया करते थे। एक बार इन्होंने महीना भर के उपवास किए। तप के प्रभाव से इन्हें कई विद्याएँ सिद्ध हो गई विद्याओं ने आकर इनसे कहा–प्रभो, हम आपकी दासियाँ हैं। आप हमें कोई काम बतलाइए। वशिष्ठ ने कहा–अच्छा, इस समय तो मुझे कोई काम नहीं, पर जब होगा तब मैं तुम्हें याद करूँगा। उस समय तुम उपस्थित होना। इसलिए इस समय तुम जाओ। जिन्होंने संसार की सब माया, ममता छोड़ रखी है, सच पूछो तो उनके लिए ऐसी ऋद्धि-सिद्धि की कोई जरूरत नहीं। पर वशिष्ठ मुनि ने लोभ में पड़कर विद्याओं को अपनी आज्ञा में रहने को कह दिया। पर यह उनके पदस्थ योग्य न था ॥२३-३१॥

महीना भर के उपवास से वशिष्ठ मुनि पारणा को शहर में आए। उग्रसेन को उनके उपवास करने की पहले से मालूम थी। इसलिए तभी से उन्होंने भक्ति के वश हो सारे शहर में डौंडी पिटवा दी थी कि तपस्वी वशिष्ठ मुनि को मैं पारणा कराऊँगा उन्हें आहार दूँगा और कोई न दे। सच है, कभी-कभी मूर्खता की हुई भक्ति भी दुःख की कारण बन जाया करती है। वशिष्ठ मुनि के प्रति

राजालये तथा नैव प्राप्तवान्भ्रामरीं ततः। अलाभेन समागत्य स्वस्थानं तपसि स्थितः ॥३६॥
द्वितीये पारणाघस्रे वह्निदाहे पुरे सति। कर्मतश्चोग्रसेनोसौ संजातो व्याकुलाशयः ॥३७॥
तृतीयस्य तथा मासो-पवासस्य परे दिने। प्रेषिते श्रीजरासन्धराजेनादेशके तदा ॥३८॥
उग्रसेनः स मूढात्मा संजातो व्यग्रमानसः। अज्ञानादत्र जन्तूनां कार्यसिद्धिः कुतो भवेत् ॥३९॥
अन्तरायं ततः कृत्वा निर्गच्छन्तं पुराद्बहिः। मूर्च्छया विकलीभूतं दृष्ट्वा तं कष्टमाश्रितम् ॥४०॥
वृद्धैका कोपतः प्राह मुनिं स्थापयतो जनान्। वारयत्येष भूनाथः स्वयं न स्थापयत्यहो ॥४१॥
मारितोनेन राज्ञासौ मुनीन्द्रस्तपसां निधिः। इत्याकर्ण्य मुनिः सोपि महाकोपाग्निमास्थितः ॥४२॥
गत्वा गोवर्द्धनं शीघ्रं पर्वतं ताः स्वदेवताः। प्रोक्तवान्पापकर्मायं युष्माभिर्मार्यतां नृपः ॥४३॥

उग्रसेन राजा की थी तो भक्ति, पर उसमें स्वार्थ का भाग होने से उसका उल्टा परिणाम हो गया। बात यह हुई कि जब वशिष्ठ मुनि पारणा के लिए आए, तब अचानक राजा का खास हाथी उन्मत्त हो गया। वह साँकल तुड़ाकर भाग खड़ा हुआ और लोगों को कष्ट देने लगा। राजा उसके पकड़वाने का प्रबन्ध करने में लग गए। उन्हें मुनि के पारणे की बात याद न रही। सो मुनि शहर में इधर-उधर घूम-घामकर वापस वन में लौट गए। शहर के और किसी गृहस्थ ने उन्हें इसलिए आहार न दिया कि राजा ने उन्हें सख्त मना कर दिया था। दूसरे दिन कर्मसंयोग से शहर के किसी मुहल्ले में भयंकर आग लग आई, सो राजा इसके मारे व्याकुल हो उठे। मुनि आज भी सब शहर में तथा राजमहल में भिक्षा के लिए चक्कर लगाकर लौट गए। उन्हें कहीं आहार न मिला। तीसरे दिन जरासन्ध राजा का किसी विषय को लिए आज्ञापत्र आ गया, सो आज इसकी चिन्ता के मारे उन्हें स्मरण न आया। सच है, अज्ञान से किया काम कभी सिद्ध नहीं हो पाता। मुनि आज भी अन्तराय कर लौट गए। शहर बाहर पहुँचते न पहुँचते वे गश खाकर जमीन पर गिर पड़े। मुनि की यह दशा देखकर एक बुढ़िया ने गुस्सा होकर कहा– यहाँ का राजा बड़ा ही दुष्ट है। न तो मुनि को आप ही आहार देता है और न दूसरों को देने देता है। हाय! एक निरपराध तपस्वी की उसने व्यर्थ ही जान ले ली। बुढ़िया की बातें मुनि ने सुन लीं ॥३२-४२॥

राजा की इस नीचता पर उन्हें अत्यन्त क्रोध आया। वे उठकर सीधे पर्वत पर गए। उन्होंने विद्याओं को बुलाकर कहा–मथुरा का राजा बड़ा ही पापी है, तुम जाकर फौरन ही मार डालो! मुनि को इस प्रकार क्रोध की आग उगलते देख विद्याओं ने कहा–प्रभो, आपको कहने का हमें कोई अधिकार नहीं, पर तब भी आपके अच्छे के लिहाज से और धर्म पर कोई कलंक न लगे कि एक जैनमुनि ने ऐसा अन्याय किया, हम निःसंकोच होकर कहेंगे कि इस वेष के लिए आपकी यह आज्ञा सर्वथा अनुचित है और इसीलिए हम आपके साथ देने के लिए भी हिचकते हैं। आप क्षमा के सागर हैं, आपके लिए शत्रु और मित्र एक जैसे हैं। मुनि पर देवियों की इस शिक्षा का कुछ असर नहीं हुआ। उन्होंने यह कहते हुए प्राण छोड़ दिये कि अच्छा, तुम मेरी आज्ञा का दूसरे जन्म में पालन करना। मैं दान में विघ्न करने वाले इस उग्रसेन राजा को मारकर अपना बदला अवश्य चुकाऊँगा।

ताभिः प्रोक्तं मुने नैव युक्तं ते जिनलिङ्गिनः। तच्छ्रुत्वा स पुनः प्राह मूढधीः कोपमण्डितः ॥४४॥
जन्मान्तरे तु युष्माभिर्मदीयाज्ञा विधीयताम्। इत्युक्त्वा मारयिष्यामि भवेन्यस्मिन्सुपापिनम् ॥४५॥
उग्रसेनमिमं दान-महाविघ्नविधायकम्। कृत्वा निदानकं चेति स्वतपःक्षयकारकम् ॥४६॥
मृत्वासौ रेवतीगर्भे समायातो निदानतः। हा कष्टं पापरूपोयं कोपः कार्यविनाशकः ॥४७॥
एकदा क्षीणदेहां च रेवतीं वीक्ष्य भूपतिः। उग्रसेनो जगौ देवि किं ते दौर्बल्यकारणम् ॥४८॥
तयोक्तं देव संजातो दोहलो दुष्टको मम। कीदृशो दोहलश्चेति पृष्टा सापि पुनर्जगौ ॥४९॥
वक्तुं न शक्यते स्वामिन्दुष्टत्वात्सोपि दोहलः। आग्रहेण तदावोच-द्रेवती प्राणवल्लभम् ॥५०॥
विदार्य हृदयं तेऽत्र रक्तपानं करोम्यहम्। यादृशो बालको गर्भे तादृशः स्त्रीमनोरथः ॥५१॥
ततस्तेन नरेन्द्रेण कारिते लेपनिर्मिते। स्वाकारे च तया चक्रे हा कष्टं पापकर्म तत् ॥५२॥
कैश्चिद्दिनैः सुतः सोपि संजातः कुलनाशकः। यथा वंशोद्भवो वह्निर्दहत्येव सुकाननम् ॥५३॥

मुनि ने तपस्या नाश करने वाले निदान को तप का फल पर जन्म में मुझे इस प्रकार मिले, ऐसे संकल्प को करके रेवती के गर्भ में जन्म लिया। सच है, क्रोध सब कामों को नष्ट करने वाला और पाप का मूल कारण है। एक दिन रेवती को दुर्बल देखकर उग्रसेन ने उससे पूछा–प्रिये, दिनों–दिन तुम ऐसी दुबली क्यों होती जाती हो? तुझे चिन्तातुर देख बड़ा खेद होता है। रेवती ने कहा–नाथ, क्या कहूँ, कहते हृदय काँपता है। नहीं जान पड़ता कि होनहार कैसी हो? स्वामी, मुझे बड़ा ही भयंकर दोहला हुआ है। मैं नहीं कह सकती कि अपने यहाँ अब की बार किस अभागे ने जन्म लिया है। नाथ! कहते हुए आत्मग्लानि से मेरा हृदय फटा पड़ता है। मैं उसे कहकर आपको और अधिक चिन्ता में डालना नहीं चाहती। उग्रसेन को अधिकाधिक आश्चर्य और उत्कण्ठा बढ़ी। उन्होंने बड़े हठ के साथ पूछा–आखिर रानी को कहना ही पड़ा। वह बोली–अच्छा नाथ, यदि आपका आग्रह ही है तो सुनिए, जी कड़ा करके कहती हूँ। मेरी अत्यन्त इच्छा होती है कि–''मैं आपका पेट चीरकर खून पान करूँ।'' मुझे नहीं जान पड़ता कि ऐसा दुष्ट दोहला क्यों होता है? भगवान् जाने। यह प्रसिद्ध है कि जैसा गर्भ में बालक आता है, दोहला भी वैसा ही होता है। सुनकर उग्रसेन को भी चिन्ता हुई, पर उसके लिए इलाज क्या था, उन्होंने सोचा, दोहला बुरा या भला, इसका निश्चय होना तो अभी असंभव है। पर उसके अनुसार रानी की इच्छा तो पूरी होनी ही चाहिए। तब इसके लिए उन्होंने यह युक्ति की कि अपने आकार का एक पुतला बनवाकर उसमें कृत्रिम खून भरवाया और रानी को उसकी इच्छा पूरी करने के लिए उन्होंने कहा। रानी ने अपनी इच्छा पूरी करने के लिए उस पापकर्म को किया। वह सन्तुष्ट हुई ॥४३–५२॥

थोड़े दिनों बाद रेवती ने एक पुत्र जना। वह देखने में बड़ा भयंकर था। उसकी आँखों से क्रूरता टपक पड़ती थी। उग्रसेन ने उसके मुँह की ओर देखा तो वह मुट्ठी बाँधे बड़ी क्रूर दृष्टि से उनकी ओर देखने लगा। उन्हें विश्वास हो गया कि जैसे बाँसों की रगड़ से उत्पन्न हुआ आग सारे

तन्मुखं चोग्रसेनस्य तदालोकयतः स्वयम्। क्रूरदृष्टिं विधायोच्चैर्बद्धो मुष्टिः सुतेन तु ॥५४॥
दुष्टोयमिति संज्ञात्वा स बालो भूभुजा तदा। स्वनाममुद्रिकारत्नकम्बलाभ्यां समन्वितः ॥५५॥
धृत्वा कांस्यसमुत्पन्नमंजूषायां प्रवेगतः। यमुनायां विनिर्मुक्तो दुष्टात्मा कस्य वा प्रियः ॥५६॥
कौशाम्ब्यां गंगभट्टाख्यकल्पपालस्य भामिनी। राजोदरी समागत्य नदीतीरं जलार्थिनी ॥५७॥
तां समादाय मंजूषां दृष्ट्वा तं बालकं मुदा। कंसनाम विधायोच्चैः पोषयामास सा गृहे ॥५८॥
यदाष्टवार्षिको जातो दुष्टत्वात्परपुत्रकान्। निर्दयं हन्ति पापिष्ठः प्राणी कस्य सुखप्रदः ॥५९॥
निर्घाटितस्तया गेहात्स कंसो रौद्रमानसः। सौरीं पुरीं समागत्य वसुदेवमहीपतेः ॥६०॥
शिष्यो भूत्वा सुशास्त्रज्ञो वरं कश्चिच्च लब्धवान्। अत्रान्तरे कथां वक्ष्ये नत्वा श्रीमज्जिनेश्वरान् ॥६१॥

वन को जलाकर खाक कर देती है ठीक इसी तरह से कुल में उत्पन्न हुआ दुष्ट पुत्र भी सारे कुल को जड़मूल से उखाड़ फेंक देता है। मुझे इस लड़के की क्रूरता को देखकर भी यही निश्चय होता है कि अब इस कुल के भी दिन अच्छे नहीं है। यद्यपि अच्छा-बुरा होना दैवाधीन है, तथापि मुझे अपने कुल की रक्षा के निमित्त कुछ यत्न करना ही चाहिए। हाथ पर हाथ रखे बैठे रहने से काम नहीं चलेगा। यह सोचकर उग्रसेन ने एक छोटा-सा सुन्दर सन्दूक मँगवाया और उस बालक को अपने नाम की एक अँगूठी पहनाकर हिफाजत के साथ उस सन्दूक में रख दिया। इसके बाद सन्दूक को उन्होंने यमुना नदी में छुड़वा दिया। सच है, दुष्ट किसी को भी प्रिय नहीं लगता ॥५३-५६॥

कौशाम्बी में गंगाभद्र नाम का एक माली रहता था। उसकी स्त्री का नाम राजोदरी था। एक दिन वह जल भरने को नदी पर आई हुई थी। तब नदी में बहती हुई एक सन्दूक पर उसकी नजर पड़ी। वह उसे बाहर निकाल अपने घर ले आई सन्दूक को राजोदरी ने खोला। उसमें से एक बालक निकला। राजोदरी उस बालक को पाकर बड़ी खुश हुई कारण कि उसके कोई लड़का नहीं था। उसने बड़े प्रेम से इसे पाला-पोसा। वह बालक काँसे की सन्दूक में निकला था, इसलिए राजोदरी ने इसका नाम भी 'कंस' रख दिया ॥५७-५८॥

कंस का स्वभाव अच्छा न होकर क्रूरता लिए हुए था। यह अपने साथ के बालकों को मारा-पीटा करता और बात-बात पर उन्हें तंग किया करता था। इसके अड़ोस-पड़ोस के लोग बड़े दुःखी रहा करते थे। राजोदरी के पास दिनभर में कंस की कोई पचासों शिकायतें आया करती थी। उस बेचारी ने बहुत दिन तक तो उसका उत्पात-उपद्रव सहा, पर फिर उससे भी यह दिन-रात का झगड़ा-टंटा न सहा गया। सो उसने कंस को घर से निकाल दिया। सच है-पापी पुरुषों से किसी को भी कभी सुख नहीं मिलता। कंस अब शौरीपुर पहुँचा। यहाँ वह वसुदेव का शिष्य बनकर शास्त्राभ्यास करने लगा। थोड़े दिनों में वह साधारण अच्छा लिख-पढ़ गया। वसुदेव की इस पर अच्छी कृपा हो गई इस कथा के साथ एक और कथा का सम्बन्ध है, इसलिए वह कथा यहाँ लिखी जाती है- ॥५९-६१॥

अथ सिंहरथो राजा जरासंधस्य शत्रुकः। नैव सिद्ध्यति दुष्टत्वात्ततोसौ चक्रभृज्जगौ ॥६२॥
सर्वसामन्तभूपानामग्रणीर्यस्तु सद्भटः। शीघ्रं सिंहरथं शत्रुं धृत्वा चानयति ध्रुवम् ॥६३॥
तस्मै जीवंजसां पुत्रीं स्वदेशं वाञ्छितं पुनः। ददामीति पुरे शीघ्रं दापयामास घोषणम् ॥६४॥
तच्छ्रुत्वा वसुदेवोसौ समुद्रविजयस्य वै। ज्येष्ठभ्रातुः समादेशात्सर्वसैन्यसमन्वितः ॥६५॥
पोदनंपुरमासाद्य सैन्यं धृत्वा पुराद्बहिः। सार्थवाहस्य रूपेण पुरे प्रच्छन्नभावतः ॥६६॥
सिंहमूत्रादिकं तत्र दापयित्वा गजादिषु। रणे सिंहरथं जित्वा पातयामास भूतले ॥६७॥
पुनः कंसं प्रति प्राह वसुदेवः स्वसारथिम्। गृह्यते भो त्वया शीघ्रं शत्रुकश्चेति धीमता ॥६८॥

सिंहरथ नाम का एक राजा जरासन्ध का शत्रु था। जरासन्ध ने इसे पकड़ लाने का बड़ा यत्न किया, पर किसी तरह यह इसके काबू में नहीं आता था। तब जरासन्ध ने सारे शहर में डौंडी पिटवाई कि वीर-शिरोमणि सिंहरथ को पकड़कर मेरे सामने लाकर उपस्थित करेगा, उसे मैं अपनी जीवंजसा लड़की को ब्याह दूँगा और अपने देश का कुछ हिस्सा भी मैं उसे दूँगा। इसके लिए वसुदेव तैयार हुआ। वह अपने बड़े भाई की आज्ञा से सब सेना को साथ लिए सिंहरथ के ऊपर जा चढ़ा। उसने जाते ही सिंहरथ की राजधानी पोदनपुर के चारों ओर घेरा डाल दिया और आप एक व्यापारी के वेष में राजधानी के भीतर घुसा। कुछ खास-खास लोगों को धन का खूब लोभ देकर उसने उन्हें फोड़ लिया। हाथी के महावत, रथ के सारथी आदि को उसने पैसे का गुलाम बनाकर अपनी मुट्ठी में कर लिया। सिंहरथ को इसका समाचार लगते ही उसने भी उसी समय रणभेरी बजवाई और बड़ी वीरता के साथ वह लड़ने के लिए अपने शहर से बाहर हुआ। दोनों ओर से युद्ध के झुझारु बाजे बजने लगे। उनकी गम्भीर आवाज अनन्त आकाश को भेदती हुई स्वर्गों के द्वारों से जाकर टकराई, सुखी देवों का आसन हिल गया। अमरांगनाओं ने समझा कि हमारे यहाँ मेहमान आते हैं, सो वे उनके सत्कार के लिए हाथों में कल्पवृक्षों के फलों की मनोहर मालाएँ ले-लेकर स्वर्गों के द्वार पर उनकी अगवानी के लिए आ डटीं। स्वर्गों के दरवाजे उनसे ऐसे खिल उठे मानों चन्द्रमाओं की प्रदर्शनी की गई है। थोड़ी ही देर में दोनों ओर से युद्ध छिड़ गया। खूब मारकाट हुई खून की नदी बहने लगी। मृतकों के सिर और धड़ उसमें तैरने लगे। दोनों ओर की वीर सेना ने अपने-अपने स्वामी के नमक का जी खोलकर परिचय कराया। जिसे न्याय की जीत कहते हैं, वह किसी को प्राप्त न हुई। पर वसुदेव ने जो पोदनपुर के कुछ लोगों को अपने मुट्ठी में कर लिया था, उन स्वार्थियों, विश्वासघातियों ने अन्त में अपने मालिक को दगा दे दिया। सिंहरथ को उन्होंने वसुदेव के हाथ पकड़वा दिया ॥६२-६६॥

सिंहरथ का रथ मौके के समय बेकार हो गया। उसी समय वसुदेव ने उसे घेरकर कंस से कहा-जो कि उसके रथ का सारथी था, कंस देखते क्या हो? उतर कर शत्रु को बाँध लो। कंस ने

तेन क्रुद्धेन कंसेन बद्धः सिंहरथो नृपः। स्वयं तप्तो भवेद्वन्हिः किं पुनर्वायुना हतः ॥६९॥
तं गृहीत्वा द्रुतं सोपि वसुदेवो विचक्षणः। जरासन्धमहीभर्त्तुरर्पयामास शत्रुकम् ॥७०॥
जरासन्धस्तु सन्तुष्टो जगाद मम देहजाम्। गृहाणेमं शुभं देशं यत्तुभ्यं रोचते तराम् ॥७१॥
प्रोक्तं श्रीवसुदेवेन नायं बद्धो मया प्रभो। बद्धः कंसेन भो देव ततोस्मै दीयतेऽखिलम् ॥७२॥
कुलं पृष्टस्ततः प्राह कंसोयं सुभटाग्रणीः। कल्पपालीसुतोहं च भो नरेन्द्रेति सेवकः ॥७३॥
तल्लक्षणं समालोक्य जरासन्धो नरेश्वरः। तस्याः पुत्रोयामित्युच्चैर्निश्चयो नैव संभवेत् ॥७४॥
इत्यालोच्य तदा शीघ्रं तामाकारयति स्म सः। भवन्ति प्रायशो भूपा भूतले चतुराशयाः ॥७५॥
कल्पपाली ततो भीत्या धृत्वा मंजूषिकां करे। तत्रागत्य नृपस्याग्रे तां मुक्त्वा चेति संजगौ ॥७६॥

गुस्से के साथ रथ से उतर कर सिंहरथ को बाँध लिया और रथ में रखकर उसी समय वे वहाँ से चल दिये। सच है, अग्नि एक तो वैसे ही तपी हुई होती है और ऊपर से यदि वायु बहने लगे तब तो उसके तपने का पूछना ही क्या? सिंहरथ को बाँध लाकर वसुदेव ने जरासन्ध के सामने उसे रख दिया। देखकर जरासन्ध बहुत ही प्रसन्न हुआ। अपनी प्रतिज्ञा पूरी करने के लिए उसने वसुदेव से कहा– मैं आपका बहुत ही कृतज्ञ हूँ। अब आप कृपाकर मेरी कुमारी का पाणिग्रहण कर मेरी इच्छा पूरी कीजिए और मेरे देश के जिस प्रदेश को आप पसन्द करें मैं उसे भी देने को तैयार हूँ। वसुदेव ने कहा–प्रभो, आपकी इस कृपा का मैं पात्र नहीं। कारण मैंने सिंहरथ को नहीं बाँधा है। इसे बाँधा है मेरे प्रिय शिष्य कंस ने। सो आप जो कुछ देना चाहें इसे देकर अपनी प्रतिज्ञा पूरी कीजिए। जरासन्ध ने कंस की ओर देखकर उससे पूछा–भाई, तुम्हारी जाति–कुल क्या है? कंस को अपने विषय में जो बात ज्ञात थी, उसने वही स्पष्ट बतला दी कि प्रभो, मैं तो एक मालिन का लड़का हूँ। जरासन्ध को कंस की सुन्दरता और तेजस्विता देखकर यह विश्वास नहीं हुआ कि वह सचमुच ही एक मालिन का लड़का होगा। इसके निश्चय करने के लिए जरासन्ध ने उसकी माँ को बुलवाया। यह ठीक है कि राजा लोग प्रायः बुद्धिमान् और चतुर हुआ करते हैं। कंस की माँ को जब यह खबर मिली कि उसे राजदरबार में बुलाया है, तब तो उसकी छाती धड़कने लग गई वह कंस की शैतानी का हाल तो जानती ही थी, सो उसने सोचा कि जरूर कंस ने कोई बड़ा भारी गुनाह किया है और इसी से वह पकड़ा गया है। अब उसके साथ मेरी भी आफत आई वह घबराई और पछताने लगी कि हाय? मैंने क्यों इस दुष्ट को अपने घर लाकर रखा? अब न जाने राजा मेरा क्या हाल करेगा? जो हो, बेचारी रोती–झींकती राजा के पास गई और अपने साथ उस सन्दूक को भी ले गई, जिसमें कि कंस निकला था। इसने राजा के सामने होते ही काँपते–काँपते कहा–दुहाई है महाराजा की! महाराज, यह पापी मेरा लड़का नहीं हैं, मैं सच कहती हूँ। इस सन्दूक में से यह निकला है। सन्दूक को आप लीजिए और मुझे छोड़ दीजिये। मेरा इसमें कोई अपराध नहीं। मालिन को इतनी घबराई देखकर राजा को कुछ हँसी–सी आ गई उसने कहा–नहीं, इतने डरने–घबराने की कोई बात नहीं। मैंने तुम्हें कोई कष्ट

नायं देव सुतो मेऽस्ति मंजूषायाः सुतोप्ययम्। इत्याकर्ण्य ततश्चक्री दृष्ट्वा तद्रत्नकम्बलम् ॥७७॥
उग्रसेनमहीभर्त्तुस्तां विलोक्य च मुद्रिकाम्। ज्ञात्वा राजकुलोत्पन्नं ददौ तस्मै स्वपुत्रिकाम् ॥७८॥
जीवंजसाभिधां कंसः परिणीय महोत्सवैः। स्वपितुः पर्ववैरेण देशमादाय दुष्टधीः ॥७९॥
मथुरायां समागत्य प्रज्वलन्कोपवह्निना। उग्रसेनं च संग्रामे धृत्वा कष्टेन तातकम् ॥८०॥
पुरीगोपुरसान्निध्ये कृत्वा तं पंजरे दृढम्। दत्वा कोद्रवकाहारं काञ्जिकेन तु मिश्रितम् ॥८१॥
स्वयं राज्यं प्रकुर्वाणः संस्थितः क्रूरमानसः। अहो लोके भवत्येव कुपुत्रः कुलनाशकः ॥८२॥
तदा कंसलघुभ्राता दृष्ट्वा संसारचेष्टितम्। अतिमुक्तकनामासौ संजातो मुनिसत्तमः ॥८३॥
ततः कंसेन सद्भक्त्या गुरुत्वाद्वसुदेववाक्। संस्थापितः स्वसान्निध्ये प्रीतितो गुणमण्डितः ॥८४॥
अथेह मृतिकावत्यां पुर्यां देवकिभूपतेः। भार्याया धनदेव्यास्तु देवकीं चारुकन्यकाम् ॥८५॥

देने को नहीं बुलाया है। बुलाया है सिर्फ कंस की खरी-खरी हकीकत जानने के लिए। इसके बाद राजा ने सन्दूक उठाकर खोला तो उसमें एक कम्बल और एक अँगूठी निकली। अँगूठी पर खुदा हुआ नाम पढ़कर राजा को कंस के सम्बन्ध में अब कोई शंका न रह गई उसने उसे एक अच्छे राजकुल में जन्मा समझ उसके साथ अपनी जीवंजसा कुमारी का ब्याह बड़े ठाटबाट से कर दिया। जरासन्ध ने उसे अपना राज का हिस्सा भी दिया। कंस अब राजा हो गया ॥६७-७९॥

राजा होने के साथ ही अब उसे अपनी राज्य सीमा और प्रभुत्व बढ़ाने की महत्त्वाकांक्षा हुई। मथुरा के राजा उग्रसेन के साथ उसकी पूर्व जन्म की शत्रुता है। कंस जानता था कि उग्रसेन मेरे पिता हैं, पर तब भी उन पर वह जला करता है और उसके मन में सदा यह भावना उठती हैं कि मैं उग्रसेन से लड़ूँ और उनका राज्य छीनकर अपनी आशा पूरी करूँ। यही कारण था कि उसने पहली चढ़ाई अपने पिता पर ही की। युद्ध में कंस की विजय हुई उसने अपने पिता को एक लोहे के पिंजरे में बन्द कर और शहर के दरवाजे के पास उस पिंजरे को रखवा दिया और आप मथुरा का राजा बनकर राज्य करने लगा। कंस को इतने पर भी सन्तोष न हुआ सो अपना बैर चुकाने का अच्छा मौका समझ वह उग्रसेन को बहुत कष्ट देने लगा। उन्हें खाने के लिए वह केवल कोदू की रोटियाँ और छाछ देता। पीने के लिए गन्दा पानी और पहनने के लिए बड़े ही मैले-कुचैले और फटे-पुराने चिथड़े देता। मतलब यह कि उसने एक बड़े से बड़े अपराधी की तरह उनकी दशा कर रक्खी थी। उग्रसेन की इस हालात को देखकर उनके कट्टर दुश्मन की भी छाती फटकर उसकी आँखों से सहानुभूति के आँसू गिर सकते थे, पर पापी कंस को उनके लिए रत्तीभर भी दया या सहानुभूति नहीं थी। सच है- कुपुत्र कुल का काल होता है। अपने भाई की यह नीचता देखकर कंस के छोटे भाई अतिमुक्तक को संसार से बड़ी घृणा हुई उन्होंने सब मोह-माया छोड़कर दीक्षा ग्रहण कर ली। वसुदेव कंस के गुरु थे। इसके सिवा उन्होंने उसका बहुत कुछ उपकार किया था; इसलिए कंस की उन पर बड़ी श्रद्धा थी। उसने उन्हें अपने ही पास बुलाकर रख लिया ॥८०-८४॥

मृतकावती पुरी के राजा देवकी के एक कन्या थी। वह बड़ी सुन्दर थी। राजा का उस पर

प्रतिपन्नस्वभगिनीं तां विवाहप्रयुक्तितः। कंसोसौ वासुदेवाय कुरुवंशोद्भवां ददौ॥८६॥
देवक्याश्चैकदा पूर्वं पुष्पवत्याः सुचीरकम्। धृत्वा स्वमस्तके तूर्यनिनादेन महोत्सवैः॥८७॥
पुरीमध्ये प्रनृत्यन्ती तदा जीवंजसा मुदा। चर्यागतमुनिं हास्यादतिमुक्तकसंज्ञकम्॥८८॥
चक्रिपुत्री जगौ तं च देवर त्वमपि स्फुटम्। नृत्यं कुरु स्वयं चेति यौवनादिमदोद्धता॥८९॥
तेनोक्तं ज्ञानिना मुग्धे नृत्यं मे नैव कल्पते। मार्गं रुद्धा स्थिता सापि पापिनी कंसभामिनी॥९०॥
तदातिपीडितेनोक्तं मुनीन्द्रेणेति मूढधीः। किं नृत्यं त्वं करोषीति देवक्या पुत्रकेन हि॥९१॥
भर्त्ता तव प्रहन्तव्यस्तच्छ्रुत्वा तच्च चीरकम्। कोपतः सा द्विधा चक्रे पुनस्तेन प्रजल्पितम्॥९२॥
त्वयेदं चीरकं मुग्धे कृतं द्वेधा यथा ध्रुवम्। तथा च देवकीभावीपुत्रः शूरमतल्लिकः॥९३॥
संकरिष्यति भो बाले त्वत्पितुर्देहखण्डनम्। तत्समाकर्ण्य सा शीघ्रं कष्टतः स्वगृहं गता॥९४॥
हसन्पापं प्रपुष्णाति प्राणी चाज्ञानभावतः। पश्चात्तत्कर्मणः सोपि फलं भुङ्क्ते सुकष्टतः॥९५॥

बहुत प्यार था। इसलिए उसका नाम उन्होंने अपने ही नाम पर देवकी रख दिया था। कंस ने उसे अपनी बहिन मानी थी, सो वसुदेव के साथ उसने उसका ब्याह कर दिया। एक दिन की बात है कि कंस की स्त्री जीवंजसा ने देवकी के और अपने देवर अतिमुक्तक की स्त्री पुष्पवती के वस्त्रों को आप पहनकर नाच रही थी–हँसी मजाक कर रही थी। इसी समय कंस के भाई अतिमुक्तक मुनि आहार के लिए आए। जीवंजसा ने हँसते–हँसते मुनि से कहा–अजी ओ देवरजी, आइए! आइए! मेरे साथ–साथ आप भी नाचिये। देखिए, फिर बड़ा ही आनन्द आयेगा। मुनि ने गंभीरता से उत्तर दिया। बहिन, मेरा यह मार्ग नहीं है। इसलिए अलग हो जा और मुझे जाने दे। पापिनी जीवंजसा ने मुनि को जाने न देकर उल्टा हाथ पकड़ लिया और बोली–नहीं, मैं तब तक आपको कहीं न जाने दूँगी जब तक कि आप मेरे साथ न नाचेंगे। मुनि को इससे कुछ कष्ट हुआ और इसी से उन्होंने आवेग में आ उससे कह दिया कि मूर्ख, नाचती क्यों है! जाकर अपने स्वामी से कह कि आपकी मौत देवकी के लड़के द्वारा होगी और वह समय बहुत नजदीक आ रहा है। सुनकर जीवंजसा को बड़ा गुस्सा आया। उसने गुस्से में आकर देवकी के वस्त्र को, जिसे कि वह पहने हुए थी, फाड़कर दो टुकड़े कर दिये। मुनि ने कहा–मूर्ख स्त्री, कपड़े को फाड़ देने से क्या होगा? देख और सुन, जिस तरह तूने इस कपड़े के दो टुकड़े कर दिये हैं उसी तरह देवकी के होने वाला वीर पुत्र तेरे बाप के दो टुकड़े करेगा। जीवंजसा को बड़ा ही दुःख हुआ। वह नाचना गाना सब भूल गई अपने पति के पास दौड़ी जाकर वह रोने लगी। सच है यह जीव अज्ञानदशा में हँसता–हँसता जो पाप कमाता है उसका फल भी इसे बड़ा ही बुरा भोगना पड़ता है। कंस जीवंजसा को रोती देखकर बड़ा घबराया। उसने पूछा–प्रिये, क्यों रोती हो? बतलाओ, क्या हुआ? संसार में ऐसा कौन धृष्ट होगा जो कंस की प्राणप्यारी को रुला सके! प्रिये, जल्दी बतलाओ, तुम्हें रोती देखकर मैं बड़ा दुःखी हो रहा हूँ। जीवंजसा ने मुनि द्वारा जो–जो बातें सुनी थीं, उन्हें कंस से कह दिया। सुनकर कंस को भी बड़ी

पृष्टा कंसेन सा प्राह गलदश्रुविलोचना। तन्मुनेर्वचनं चित्ते महाचिन्ताविधायकम् ॥९६॥
तच्छ्रुत्वा कंसराजोसौ मूढात्मा जीविताशया। दुष्टबुद्ध्या ततो नत्वा वसुदेवं गुणोज्ज्वलम् ॥९७॥
देवक्या जनितः पुत्रो हन्तव्यः स मया ध्रुवम्। देवकी च प्रसूतिं मे गृहे कुर्यादिति स्फुटम् ॥९८॥
वरं याचितवान्पूर्वं सोपि तस्मै प्रदत्तवान्। नैव छद्म सतां चित्ते स्ववाक्यप्रतिपालने ॥९९॥
तन्निशम्य तदा प्राह देवकी स्वपतिं प्रति। तपो गृह्णामि भो देव पुत्रदुःखं सुदुस्सहम् ॥१००॥
ततश्च वसुदेवोसौ देवक्या भार्यया सह। गत्वोद्याने समालोक्य फलिताम्रतरोरधः ॥१०१॥
अतिमुक्तकनामानं मुनीन्द्रं ज्ञानलोचनम्। प्रणम्य च महाभक्त्या संजगौ भो यतीश्वर ॥१०२॥
केन मे तनुजेनोच्चैर्जरासन्धश्च कंसकः। हन्तव्यो ब्रूहि योगीन्द्र जिनेन्द्रपदपद्मभाक् ॥१०३॥
देवक्या च तदा हस्तधृताम्रतरुशाखिका। मुक्त्वा तस्यास्तु शाखायाः फलयुग्मत्रयं शुभम् ॥१०४॥
ऊर्ध्वगतं ततश्चैकं फलं भूमौ पपात तत्। अष्टमं च फलं पक्वमूर्ध्वभागं गतं पुनः ॥१०५॥
तं निमित्तं समालोक्य तेनोक्तं ज्ञानचक्षुषा। शृणु भो वासुदेव त्वं महाभव्यशिरोमणे ॥१०६॥

चिन्ता हुई। वह जीवंजसा से बोला–प्रिये, घबराने की कोई बात नहीं, मेरे पास इस रोग की भी दवा है। इसके बाद ही वह वसुदेव के पास पहुँचा और उन्हें नमस्कार कर बोला–गुरु महाराज, आपने मुझे पहले एक 'वर' दिया था। उसकी मुझे अब जरूरत पड़ी है। कृपा कर मेरी आशा पूरी कीजिए इतना कहकर कंस ने कहा–मेरी इच्छा देवकी के होने वाले पुत्र के मार डालने की है। इसलिए कि मुनि ने उसे मेरा शत्रु बतलाया है। सो कृपाकर देवकी की प्रसूति मेरे महल में हो इसके लिए अपनी अनुमति दीजिए ॥८५-९८॥

अपने एक शिष्य की इस प्रकार नीचता, गुरुद्रोह देखकर वसुदेव की छाती धड़क उठी। उनकी आँखों में आँसू भर आए। पर करते क्या? वे क्षत्रिय थे और क्षत्रिय लोग इस व्रत के व्रती होते हैं कि ''प्राण जाँहि पर वचन न जाँहि।'' तब उन्हें लाचार होकर कंस का कहना बिना कुछ कहे-सुने मान लेना पड़ा क्योंकि सत्पुरुष अपने वचनों का पालन करने में कभी कपट नहीं करते। देवकी ये सब बातें खड़ी-खड़ी सुन रही थी। उसे अत्यन्त दुःख हुआ। वह वसुदेव से बोली–प्राणनाथ, मुझसे यह दुःसह पुत्र–दुःख नहीं सहा जायेगा। मैं तो जाकर जिनदीक्षा ले लेती हूँ। वसुदेव ने कहा–प्रिये, घबराने की कोई बात नहीं है, चलो, हम चलकर मुनिराज से पूछे कि बात क्या है? फिर जैसा कुछ होगा विचार करेंगे। वसुदेव अपनी प्रिया के साथ वन में गए वहाँ अतिमुक्तक मुनि एक फले हुए आम के झाड़ के नीचे स्वाध्याय कर रहे थे। उन्हें भक्तिपूर्वक नमस्कार कर वसुदेव ने पूछा–हे जिनेन्द्र भगवान् के सच्चे भक्त योगिराज, कृपा कर मुझे बतलाइए कि मेरे किस पुत्र द्वारा कंस और जरासंध की मौत होगी? इस समय देवकी आम की एक डाली पकड़े हुए थी। उस पर आठ आम लगे थे। उनमें छह आम तो दो-दो की जोड़ी में लगे थे और उनमें ऊपर दो आम जुदा-जुदा लगे थे। इन दो आमों में से एक आम इसी समय पृथ्वी पर गिर पड़ा और दूसरा आम थोड़ी ही देर बाद पक गया। इस निमित्त ज्ञान पर विचार कर अवधिज्ञानी मुनि बोले–भव्य वसुदेव, सुनो मैं तुम्हें

षट् पुत्रास्तेऽत्र निर्वाण-गामिनो नास्ति संशयः। सप्तमस्तु जरासन्धकंसयोः प्राणनाशकः ॥१०७॥
अष्टमश्चाष्ट कर्माणि क्षयं नीत्वा विचक्षणः। ज्ञातव्यो मुक्तिकान्तायाः कान्तो भावी गुणाष्टभाक् ॥१०८॥
तच्छ्रुत्वा मुनिनाथोक्तं परमानन्ददायकम्। स्वचित्ते संविचार्येति नान्यथा मुनिभाषितम् ॥१०९॥
भक्त्या तौ तं मुनिं नत्वा संप्राप्तौ हर्षितौ गृहे। धर्मे श्रीमज्जिनेन्द्रोक्ते विश्वासः शर्मकारणम् ॥११०॥
अथैकदा सती सैव देवकी शुद्धमानसा। कंसगेहे सुतं द्वन्द्वं संप्रसूता शुभप्रदम् ॥१११॥
तत्क्षणे पुण्ययोगेन तच्च देवतया द्वयम्। भद्रिलाख्यपुरे रम्ये श्रेष्ठी श्रीश्रुतदृष्टिवाक् ॥११२॥
अलकाख्या प्रिया तस्याः प्रसूतायाः समर्प्य च। मृतं तत्पुत्रयुग्मं तु देवक्याग्रे शनैर्धृतम् ॥११३॥
अहो पुण्यवतां पुंसां सुराः कुर्वन्ति रक्षणम्। तस्मात्पुण्यं जिनन्द्रोक्तं कार्यं सत्सौख्यकारणम् ॥११४॥
पुण्यं जिनेन्द्रपादाब्जचार्चनं परया मुदा। पात्रदानं व्रताद्यैस्तु संयुक्तं मुनिभिः स्मृतम् ॥११५॥
पापिना तेन कंसेन धृत्वा तन्मृतकद्वयम्। आस्फालितं शिलापीठे पापिनां धिक्च जीवितम् ॥११६॥
एवं तस्याः सुदेवक्याः पुत्रयुग्मत्रयं मुदा। देवतापूर्वपुण्येन स्थापयामास यत्नतः ॥११७॥

खुलासा समझाये देता हूँ। देखो, देवकी के आठ पुत्र होंगे। उनमें छह तो नियम से मोक्ष जायेंगे। रहे दो, सो इनमें सातवाँ जरासंध और कंस का मारने वाला होगा और आठवाँ कर्मों का नाश कर मुक्ति-महिला का पति होगा। मुनिराज से इस सुख-समाचार को सुनकर वसुदेव और देवकी को बहुत आनन्द हुआ। वसुदेव को विश्वास था कि मुनि का कहा कभी झूठ नहीं हो सकता। मेरे पुत्र द्वारा कंस और जरासंध की होने वाली मौत को कोई नहीं टाल सकता। इसके बाद वे दोनों भक्ति से मुनि को नमस्कार कर अपने घर आए। सच है—जिनभगवान् के धर्म पर विश्वास करना ही सुख का कारण है ॥९९-११०॥

देवकी के जब से सन्तान होने की सम्भावना हुई तब से उसके रहने का प्रबन्ध कंस के महल पर हुआ। कुछ दिनों बाद पवित्रमना देवकी ने दो पुत्रों को एक साथ जना। इसी समय कोई ऐसा पुण्य-योग मिला कि भद्रिलापुर में श्रुतदृष्टि सेठ की स्त्री अलका के भी पुत्र युगल हुआ। पर वह युगल-मरा हुआ था। सो देवकी के पुत्रों के पुण्य से प्रेरित होकर एक देवता इस मृत-युगल को उठा कर तो देवकी के पास रख आया और उसके जीते पुत्रों को अलका के पास ला रखा। सच है, पुण्यवानों की देव भी रक्षा करते हैं। इसलिए कहना पड़ेगा कि जिन भगवान् ने जो पुण्यमार्ग में चलने का उपदेश दिया है वह वास्तव में सुख का कारण है और पुण्य भगवान् की पूजा करने से होता है, दान देने से होता है और व्रत, उपवासदि करने से होता है। इसलिए इन पवित्र कर्मों द्वारा निरन्तर पुण्य कमाते रहना चाहिए। कंस को देवकी की प्रसूति का हाल मालूम होते ही उसने उस मरे हुए पुत्र-युगल को उठा लाकर बड़े जोर से शिला पर दे मारा। ऐसे पापियों के जीवन को धिक्कार हैं। इसी तरह देवकी के जो दो और पुत्र-युगल हुए, उन्हें देवता वहीं अलका सेठानी के यहाँ रख आए और उसके मरे पुत्र युगलों को उसने देवकी के पास ला रखा। कंस ने इन दोनों युगलों की भी पहले युगल

भद्रिलाख्यपुरे तत्र षट् पुत्रास्ते गुणोज्ज्वलाः। चरमाङ्गधरा धीराः प्राप्ता वृद्धिं यथासुखम् ॥११८॥
ततोसौ सप्तमे मासे देवक्या चाष्टमीनिशि। सप्तमः शत्रुसन्दोहध्वंसकस्तनुजोभवत् ॥११९॥
तदा रात्रौ गलत्तोये तं समादाय देहजम्। संचचाल पिता धीरो रक्षार्थं वसुदेववाक् ॥१२०॥
छत्रं श्रीबलभद्रेण संधृतं बालकोपरि। रक्षाविधायिनी सापि देवता पुण्ययोगतः ॥१२१॥
शीघ्रं वृषभरूपेण शृङ्गे कृत्वा सुदीपकम्। द्योतयामास सन्मार्गमग्रे भूत्वा शुभोदयात् ॥१२२॥
वासुदेवपदाङ्गुष्ठस्पर्शमात्रेण पुण्यतः। अभूत्प्रतोलिकासार-कपाटं च निरर्गलम् ॥१२३॥
समुत्तीर्य नदीं दत्तपारां तां यमुनां ततः। मातृकादेवतागेहं सम्प्रविश्य सबालकौ ॥१२४॥
प्रच्छन्नं देवतापृष्ठे यावत्तौ संस्थितौ भटौ। तावदेव प्रपुण्येन नन्दाख्यो यस्तु गोपकः ॥१२५॥
तस्य प्रिया यशोदा च चन्दनाक्षतपुष्पकैः। पुत्रार्थिनी समाराध्य भक्त्या तां पुरदेवताम् ॥१२६॥
तस्यामेव सती रात्रौ प्रसूता स्वगृहे सुताम्। तां विलोक्य ततो रुष्टा नन्दगोपस्य भामिनी ॥१२७॥
गृहीत्वा पुत्रिकां कोपात्तत्रागत्य मठे तदा। धृत्वा तां देवताग्रे च गृहाण तव देवते ॥१२८॥

की सी दशा की। देवकी के ये छहों पुत्र इसी भव से मोक्ष जायेंगे, इसलिए इनका कोई बाल भी बाँका नहीं कर सकता। ये सुखपूर्वक यहीं रहकर बढ़ने लगे ॥१११-११८॥

अब सातवें पुत्र की प्रसूति का समय नजदीक आने लगा। अब की बार देवकी के सातवें महीने में पुत्र हो गया। यही शत्रुओं का नाश करने वाला था; इसलिए वसुदेव को इसकी रक्षा की चिन्ता थी। समय कोई दो तीन बजे रात का था। पानी बरस रहा था। वसुदेव उसे गोद में लेकर चुपके से कंस के महल से निकल गए। बलभद्र ने इस होनहार बच्चे के ऊपर छत्री लगायी। चारों ओर गाढ़ान्धकार के मारे हाथ से हाथ तक भी न देख पड़ता था। पर इस तेजस्वी बालक के पुण्य से वही देवता, जिसने कि इसके छह भाइयों की रक्षा की है, बैल के रूप में सींगों पर दीया रखे आगे-आगे हो चला। आगे चलकर इन्हें शहर बाहर होने के दरवाजे बन्द मिले, पर भाग्य की लीला अपरम्पार है। उससे असम्भव भी सम्भव हो जाता है। वही हुआ। बच्चे के पाँवों का स्पर्श होते ही दरवाजा भी खुल गया। आगे चले तो नदी अथाह बह रही थी। उसे पार करने का कोई उपाय न था बड़ी कठिन समस्या उपस्थित हुई उन्होंने होना-करना सब भाग्य के भरोसे पर छोड़कर नदी में पाँव रख दिया। पुण्य की कैसी महिमा जो यमुना का अथाह जल घुटनों प्रमाण हो गया। पार होकर वे एक देवी के मन्दिर में गए। इतने में इन्हें किसी के आने की आहट सुनाई दी। वे वेदी के पीछे छुप गए ॥११९-१२४॥

तदेकं क्रियते कर्म त्वया भो नान्यथा ध्रुवम्। जीवता दृश्यते गंगानदी रे मूढमानस ॥६॥
सोपि तत्र स्मृतेर्वाक्यं चिन्तयामास चेतसि। तिलसर्षपमात्राच्च दोषाः स्युर्मांसभक्षणात् ॥७॥

---

५३. शराब पीने वालों की कथा

सब सुखों के देने वाले सर्वज्ञ भगवान् को नमस्कार कर शराब पीकर नुकसान उठाने वाले एक ब्राह्मण की कथा लिखी जाती है। वह इसलिए कि इसे पढ़कर सर्व साधारण लाभ उठावें ॥१॥

वेद और वेदांगों का अच्छा विद्वान् एकपात नाम का एक संन्यासी एक चक्रपुर से चलकर गंगा नदी की यात्रार्थ जा रहा था। रास्ते में जाता हुआ वह दैवयोग से विन्ध्याटवी में पहुँच गया। यहाँ जवानी से मस्त हुए कुछ चाण्डाल लोग दारु पी-पीकर एक अपनी जाति की स्त्री के साथ हँसी मजाक करते हुए नाचकूद रहे थे, गा रहे थे और अनेक प्रकार की कुचेष्टाएँ में मस्त हो रहे थे। अभागा संन्यासी इस टोली के हाथ पड़ गया। उन लोगों ने उसे आगे न जाने देकर कहा–अहा! आप भले आए! आप ही की हम लोगों में कसर थी। आइए, मांस खाइए, दारू पीजिए और जिन्दगी का सुख देने वाली इस खूबसूरत औरत का मजा लूटिए। महाराज जी, आज हमारे लिए बड़ी खुशी का दिन है और ऐसे समय में जब आप स्वयं यहाँ आ गए तब तो हमारा यह सब करना धरना सफल हो गया। आप सरीखे महात्माओं का आना, सहज में थोड़े ही होता है? और फिर ऐसे खुशी के समय में। लीजिए, अब देर न कर हमारी प्रार्थना को पूरी कीजिए उनकी बातें सुनकर बेचारे संन्यासी के तो होश उड़ गए। वह इन शराबियों को कैसे समझाए, क्या कहे, और वह कुछ कहे सुने भी तो वे मानने वाले कब? वह बड़े संकट में फँस गया। तब भी उसने इन लोगों से कहा–बतलाओ मैं मांस, मदिरा कैसे खा पी सकता हूँ? इसलिए तुम मुझे जाने दो। उन चाण्डालों ने कहा–महाराज कुछ भी हो, हम तो आपको बिना कुछ प्रसाद लिए तो जाने नहीं देंगे। आपसे हम यहाँ तक कह देते हैं कि यदि आप अपनी खुशी से खायेंगे तो बहुत अच्छा होगा, नहीं तो फिर जिस तरह बनेगा हम आपको खिलाकर ही छोड़ेंगे। बिना हमारा कहना किए आप जीते जी गंगाजी नहीं देख सकते। अब तो संन्यासी जी घबराये। वे कुछ विचार करने लगे, तभी उन्हें स्मृतियों के कुछ प्रमाण वाक्य याद आ गए– ॥२-७॥

यतः—तिलसर्षपमात्रं च मांसं खादन्ति ये नराः। तिष्ठन्ति नरके ताव-द्यावच्चन्द्रदिवाकरौ॥
चाण्डालीसंगमे चात्र द्विजानां सुकुलोद्भुवाम्। प्रायश्चित्ताद्भवेच्छुद्धिः काष्ठभक्षणसंज्ञकात्॥
य एवं विधां सुरां पिबति न तेन सुरा पीता भवतीति निखिलमखमणौ सूत्रामणौ।
धातकीपिष्टपानीयैर्गुडाद्यैर्मद्यसंभवः। तस्माद्धेतोर्न दोषोत्र स्वचित्ते चेति मूढधीः ॥८॥
संविचार्य महापापं मद्यपानं चकार सः। तस्य माहात्म्यतो गाढं संजातो नष्टमानसः ॥९॥
दूरीकृत्य स्वकौपीनं चक्रे चोद्भटनर्त्तनम्। ग्रहग्रस्तो यथा कष्टं कुसङ्गः कुलनाशकः ॥१०॥
ततस्तीव्रक्षुधाक्रान्तो मतिभ्रष्टः स तापसः। पापकर्मोदये शीघ्रं पलं भक्षितवान्पुनः ॥११॥
पूर्णकुक्षिस्ततः सोपि प्रोल्लसत्कामपीडितः। मातंगीं मदनोन्मत्तां कुधीः कामितवांस्तदा ॥१२॥
हेतुशुद्धेः श्रुतेर्वाक्यात्पीतमद्यः किलैकपात्। मांसमातङ्गिकासङ्गमकरोन्मूढमानसः।
इति ज्ञात्वा बुधैस्त्याज्या हेतुशुद्धेर्मतिर्भुवि। मृष्टतोयात्समुत्पन्नं विषं हन्त्येव देहिनाम् ॥१३॥

''जो मनुष्य तिल या सरसों के बराबर मांस खाता है वह नरकों में तब तक दुःख भोगा करेगा, जब तक पृथ्वी पर सूर्य और चन्द्र रहेंगे अर्थात् अधिक मांस खाने वाला नहीं। ब्राह्मण लोग यदि चाण्डाली के साथ विषय सेवन करें तो उनकी 'काष्ठभक्षण' नाम के प्रायश्चित्त द्वारा शुद्धि हो सकती है। जो आँवले, गुड़ आदि से बनी हुई शराब पीते हैं, वह शराब पीना नहीं कहा जा सकता-आदि।'' इसलिए जैसा ये कहते हैं, उसके करने में शास्त्रों, स्मृतियों से तो कोई दोष नहीं आता। ऐसा विचार कर उस मूर्ख ने शराब पी ली। थोड़ी ही देर बाद उसे नशा चढ़ने लगा। बेचारे को पहले कभी शराब पीने का काम पड़ा नहीं था इसलिए उसका रंग इस पर और अधिकता से चढ़ा। शराब के नशे में चूर होकर यह सब सुध-बुध भूल गया, अपनेपन का इसे कुछ ज्ञान न रहा। लंगोटी आदि फेंक कर वह भी उन लोगों की तरह नाचते-कूदने लगा जैसे कोई भूत-पिशाच के पंजे में पड़ा हुआ उन्मत्त की भाँति नाचने-कूदने लगता है। सच है, कुसंगति कुल, धर्म, पवित्रता आदि सभी का नाश कर देती है। संन्यासी बड़ी देर तक तो इसी तरह नाचता-कूदता रहा पर जब वह थोड़ा थक गया तो उसे जोर की भूख लगी। वहाँ खाने के लिए मांस के सिवा कुछ भी नहीं था। संन्यासी ने तब मांस ही खा लिया। पेट भरने के बाद उसे काम ने सताया। तब उसने यौवन की मस्ती में मत्त उस स्त्री के साथ अपनी नीच वासना पूरी की। मतलब यह कि एक शराब पीने से उसे ये सब नीचकर्म करने पड़े। दूसरे ग्रन्थों में भी इस एकपात संन्यासी के सम्बन्ध में लिखा है कि-मूर्ख एकपात संन्यासी ने स्मृतियों के वचनों को प्रमाण मानकर शराब पी, मांस खाया और चाण्डालिनी के साथ विषय सेवन किया। इसलिए बुद्धिमानों को उचित है कि वे सहसा किसी प्रमाण पर विश्वास न कर बुद्धि से काम लें, क्योंकि मीठे पानी में मिला हुआ विष भी जान लिए बिना नहीं छोड़ता ॥८-१२॥

देखिये, एकपात संन्यासी गंगा-गोदावरी का नहाने वाला था, विष्णु का सच्चा भक्त था, वेदों

नित्यस्नानविधायको हरिपदद्वन्दे सुसेवापरो वेदज्ञोपि किलैकपात्स्मृतिमतिर्मष्टः परिव्राजकः।
अज्ञानादिह हेतुशुद्धिचलितो मुक्त्वा सुशीलं ततो ज्ञात्वैवं बुधसत्तमैर्जिनपतेः संज्ञानमासेव्यताम् ॥१४॥

इति कथाकोशे मद्यदोषाख्याने एकपात्परिव्राजकस्य कथा समाप्ता।

५४. सगरचक्रवर्तिनः कथा

संप्रणम्य जिनाधीशं सुराधीशैः समर्चितम्। श्रीमद्द्वितीयचक्रेश-चरित्रं रचयाम्यहम् ॥१॥
जम्बूद्वीपेऽत्र विख्याते प्राग्विदेहे मनोहरे। सीतानद्या अवाग्भागे सुदेशो वत्सकावती ॥२॥
तत्रस्थे पृथिवीनाम-पत्तने सुचिरन्तने। जयसेनो महाराजो जयसेनाख्य तत्प्रिया ॥३॥
तयोः पुत्रः समुत्पन्नो रतिषेणो गुणोज्ज्वलः। द्वितीयो धृतिषेणश्च चारुसौभाग्यशोभितः ॥४॥
एकदा रतिषेणाख्यो मृत्युं प्राप्तो विधेर्वशात्। तच्छोकेन महीनाथो जयसेनो विशुद्धधीः ॥५॥
स्वराज्यं धृतिषेणाय दत्वा पुत्राय धीमते। समभ्यर्च्य जिनाधीशान्कार्यसिद्धिविधायिनः ॥६॥
सार्द्धं महारुतेनोच्चैर्मिथुनेन तथा नृपैः। यशोधरगुरोः पार्श्वे दीक्षां जैनेश्वरीं श्रितः ॥७॥
दीर्घकालं तपः कृत्वा संन्यासेन प्रसन्नधीः। मृत्वा महाबलो नाम्ना देवोभूदच्युतो महान् ॥८॥
महारुतोपि तत्रैव मणिकेतुः सुरोभवत्। जिनेन्द्रपदपद्मेषु चञ्चरीकोतिभक्तिमान् ॥९॥

और स्मृतियों का अच्छा विद्वान् था, पर अज्ञान से स्मृतियों के वचनों को हेतु-शुद्ध मानकर अर्थात् ऐसी शराब पीने में पाप नहीं, चाण्डालिनी का सेवन करने पर भी प्रायश्चित्त द्वारा ब्राह्मणों की शुद्धि हो सकती है, थोड़ा मांस खाने में दोष है, न कि ज्यादा खाने में। इस प्रकार मन का समझौता करके उसने मांस खाया, शराब पी और अपने वर्षों के ब्रह्मचर्य को नष्ट कर वह कामी हुआ। इसलिए बुद्धिमानों को उन सच्चे शास्त्रों का अभ्यास करना चाहिए जो पाप से बचाकर कल्याण का रास्ता बतलाने वाले हैं और ऐसे शास्त्र जिनभगवान् ने ही उपदेश किए हैं ॥१३-१४॥

५४. सगर चक्रवर्ती की कथा

देवों द्वारा पूजा किए गए जिनेन्द्र भगवान् को नमस्कार कर दूसरे चक्रवर्ती सगर का चरित लिखा जाता है ॥१॥

जम्बूद्वीप के प्रसिद्ध और सुन्दर विदेह क्षेत्र की पूरब दिशा में सीता नदी के पश्चिम की ओर वत्सकावती नाम का एक देश है। वत्सकावती की बहुत पुरानी राजधानी पृथ्वीनगर के राजा का नाम जयसेन था। जयसेन की रानी जयसेना थी। इसके दो लड़के हुए। इनके नाम थे रतिषेण और धृतिषेण। दोनों भाई बड़े सुन्दर और गुणवान् थे। काल की कराल गति से रतिषेण अचानक मर गया। जयसेन को इसके मरने का बड़ा दुःख हुआ और इसी दुःख के मारे वे धृतिषेण को राज्य देकर मारुत और मिथुन नाम के राजाओं के साथ यशोधर मुनि के पास दीक्षा ले साधु हो गए। बहुत दिनों तक इन्होंने तपस्या की। फिर संन्यास सहित शरीर छोड़ स्वर्ग में वह महाबल नाम का देव हुआ इनके साथ दीक्षा लेने वाला मारुत भी इसी स्वर्ग में मणिकेतु नामक देव हुआ, जो कि भगवान् के

स्वर्गलक्ष्मीं समासाद्य तयोः सन्तुष्टचेतसोः। आवयोर्यो महीभागे पूर्वं याति नृजन्मताम् ॥१०॥
तस्यान्यो बोधको भूयाज्जैनदीक्षाकृते सुधीः। धर्मानुरागतश्चेति संजाते वचसि स्थिरे ॥११॥
द्वाविंशत्यब्धिभिः पूर्णं भुक्त्वा सौख्यं सुराश्रितम्। च्युत्वासावच्युतः स्वर्गाच्छेषपुण्यप्रभावतः ॥१२॥
सुधीर्महाबलो देवः साकेतनगरे शुभे। समुद्रविजयस्योच्चैर्भूपतेः सुबलापतेः ॥१३॥
पुत्रोभूत्सगराख्योसौ सज्जनानन्ददायकः। पूर्वाणां सप्ततिर्लक्षास्तस्यायुःपरमावधिः ॥१४॥
चतुःशतानि चापानां पञ्चाशदधिकानि च। कनत्काञ्चनसद्वर्णकायोत्सेधोस्य वर्णितः ॥१५॥
रूपलावण्यसंयुक्तः प्राप्तसद्यौवनो गुणी। श्रित्वा राज्यश्रियं धीमान्षट्खण्डाधिपतिर्बभौ ॥१६॥
भुञ्जानस्य महाभोगाञ्जिनभक्तिप्रपूर्वकम्। तस्य षष्ठि सहस्राणि पुत्राणामभवन्सुखम् ॥१७॥
अहो पुण्येन जन्तूनां भवेयुः सारसम्पदः। तस्मात्पुण्यं जिनोद्दिष्टं कुर्वन्तु सुधियो जनाः ॥१८॥
तदा सिद्धवने श्रीमच्चतुर्मुखमहामुनेः। केवलज्ञानसम्प्राप्तौ पूजार्थं परया मुदा ॥१९॥
देवेन्द्राद्यैः समायातैः सहागत्य सुरोत्तमः। ज्ञात्वा तं सगराधीशं मणिकेतुर्मुदावदत् ॥२०॥

चरण कमलों का भौंरा था, अत्यन्त भक्त था। वे दोनों देव स्वर्ग की सम्पत्ति प्राप्त कर बहुत प्रसन्न हुए। एक दिन उन दोनों ने विनोद करते-करते धर्म-प्रेम से एक प्रतिज्ञा की कि जो हम दोनों में पहले मनुष्य-जन्म धारण करे, तब स्वर्ग में रहने वाले देव का कर्तव्य होना चाहिए कि वह मनुष्य-लोक में जाकर उसे समझाये और संसार से उदासीनता उत्पन्न करा कर जिनदीक्षा के सम्मुख करे ॥२-११॥

महाबल की आयु बाईस सागर की थी। तब तक उसने खूब मनमाना स्वर्ग का सुख भोगा। अन्त में आयु पूरी कर बचे हुए पुण्य प्रभाव से वह अयोध्या के राजा समुद्रविजय की रानी सुबला के सगर नाम का पुत्र हुआ। इसकी उम्र सत्तर लाख पूर्व वर्षों की थी। उसके सोने के समान चमकते हुए शरीर की ऊँचाई साढ़े चार सौ धनुष अर्थात् १५७५ हाथों की थी। संसार की सुन्दरता ने इसी में आकर अपना डेरा दिया था, वह बड़ा ही सुन्दर था। जो इसे देखता उसके नेत्र बड़े आनन्दित होते। सगर ने राज्य प्राप्त कर छहों खण्ड पृथ्वी पर विजय प्राप्त की। अपनी भुजाओं के बल उसने दूसरे चक्रवर्ती का मान प्राप्त किया। सगर चक्रवर्ती हुआ, पर इसके साथ वह अपना धर्म-कर्म भूल गया था। उसके आठ हजार पुत्र हुए। इसे कुटुम्ब, धन-दौलत, शरीर, सम्पत्ति आदि सभी सुख प्राप्त थे। उसका समय खूब ही सुख के साथ बीतता था। सच है, पुण्य से जीवों को सभी उत्तम-उत्तम सम्पदायें प्राप्त होती है। इसलिए बुद्धिमानों को उचित है कि वे जिनभगवान् के उपदेश किए गए पुण्यमार्ग का पालन करें ॥१२-१८॥

इसी अवसर में सिद्धवन में चतुर्मुख महामुनि को केवलज्ञान हुआ। स्वर्ग के देव, विद्याधर राजा-महाराजा उनकी पूजा के लिए आए। सगर भी भगवान् के दर्शन करने को आया था। सगर को

भो प्रभो स्मरसि व्यक्तं यदावाभ्यां पुरोदितम्। अच्युताख्ये महास्वर्गे प्रोल्लसत्प्रीतियोगतः ॥२१॥
नृलोकं याति यः पूर्वं स्वर्गस्थेन महाधिया। शीघ्रं सम्बोधनीयश्च स श्रीजैनतपोविधौ ॥२२॥
त्वया भुक्तं महाराज्यं दीर्घकालं विचक्षणः। किं पुनर्भूरिभिर्भोगैभव्यस्यन्दुःखकारणैः ॥२३॥
अतस्त्वं श्रीजिनेन्द्रोक्तं तपो धृत्वा जगद्धितम्। सावधानस्तरां भूत्वा कुरु प्रीतिं शिवश्रिये ॥२४॥
इति श्रीसगरश्चक्री बोधितोपि सुधाशिना। विरक्तः संसृतेर्नैव पुत्राणां मोहमूर्च्छितः ॥२५॥
ज्ञात्वा तन्मानसं भूरि सम्पदाप्रमदाश्रितम्। स्वस्थानं स सुरः प्राप्तः कुतो लब्ध्या विना शुभम् ॥२६॥
तथैकदा सुरः सोपि तं तपो ग्राहितुं पुनः। मणिकेतुः समागत्य धृत्वा चारणरूपकम् ॥२७॥
भावयन्संयमं जैनं स्वर्गमोक्षसुखप्रदम्। सगरस्य जिनागारे जिनबिम्बानि भक्तितः ॥२८॥
वन्दित्वा शर्मदान्युच्चैः संस्थितो दिव्यरूपभाक्। दृष्ट्वा तं विस्मयं प्राप्तो जगाद सगरो नृपः ॥२९॥
किं कारणं तपो लक्ष्म्या भो मुने यौवनोद्यते। तवेत्याकर्ण्य गूढात्मा संजगौ स मुनीश्वरः ॥३०॥

आया देख मणिकेतु ने उससे कहा–क्यों राजराजेश्वर, क्या अच्युत स्वर्ग की बात याद है? जहाँ कि तुमने और मैंने प्रेम के वश हो प्रतिज्ञा की थी। कि जो हम दोनों में से पहले मनुष्य जन्म ले उसे स्वर्ग का देव जाकर समझावें और संसार से उदासीन कर तपस्या के सम्मुख करें अब तो आपने बहुत समय तक राज्य–सुख भोग लिया। अब तो इसके छोड़ने का यत्न कीजिए। क्या आप नहीं जानते कि ये विषय–भोग दुःख के कारण और संसार में घुमाने वाले हैं? राजन्, आप तो स्वयं बुद्धिमान् हैं। आपको मैं क्या अधिक समझा सकता हूँ। मैंने तो सिर्फ अपनी प्रतिज्ञा–पालन के लिए आपसे इतना निवेदन किया है। मुझे पूर्ण विश्वास है कि आप इन क्षण–भंगुर विषयों से अपनी लालसा को कम करके जिन भगवान् का परम पवित्र तपोमार्ग ग्रहण करेंगे और बड़ी सावधानी के साथ मुक्ति कामिनी के साथ ब्याह की तैयारी करेंगे। मणिकेतु ने उसे बहुत कुछ समझाया पर पुत्रमोही सगर को संसार से नाममात्र के लिए उदासीनता न हुई। मणिकेतु ने जब देखा कि अभी यह पुत्र, स्त्री, धन–दौलत के मोह में खूब फँस रहा है। अभी इसे संसार से, विषयभोगों से उदासीन बना देना कठिन ही नहीं किन्तु एक प्रकार असंभव को संभव करने का यत्न है। अस्तु, फिर देखा जायेगा। यह विचार कर मणिकेतु अपने स्थान चला गया। सच है, काललब्धि के बिना कल्याण हो भी नहीं सकता ॥१९–२६॥

कुछ समय के बाद मणिकेतु के मन में फिर एक बार तरंग उठी कि अब किसी दूसरे यत्न द्वारा सगर को तपस्या के सम्मुख करना चाहिए। तब वह चारण मुनि का वेष लेकर, जो कि स्वर्ग–मोक्ष के सुख का देने वाला है, सगर के जिन मन्दिर में आया और भगवान् के दर्शन कर वहीं ठहर गया। उसकी नई उमर और सुन्दरता को देखकर सगर को बड़ा अचम्भा हुआ। उसने मुनिरूप धारण करने वाले देव से पूछा, मुनिराज, आपकी इस नई उमर ने, जिसने कि संसार का अभी कुछ सुख नहीं देखा, ऐसे कठिन योग को किसलिए धारण किया? मुझे तो आपको योगी हुए देखकर बड़ा

यौवनं तडिदाभं भो भूपते भाति भूतले। कोयं कायोशुचिर्गाढं भोगा वा भोगिनोऽहिताः ॥३१॥
संसाराब्धिर्महाघोरो दुस्तरो मोहिनां विभो। तीर्यतेऽत्र मया चारुतपोनावा जिनेशिनः ॥३२॥
इत्यादिकैः शुभैर्वाक्यैर्बोधितोपि महीपतिः। जानन्संसारसद्भावं पुत्रपाशं न मुक्तवान् ॥३३॥
वर्त्तते नातितुच्छोस्य संसारश्चेति मानसे। ज्ञात्वा देवः सखेदोसौ मणिकेतुर्दिवं गतः ॥३४॥
अथैकदा सुतास्तेऽपि नृपं सिंहासनस्थितम्। नत्वा भक्त्या जगुः सर्वे श्रूयतां भो नृपाधिप ॥३५॥
ये पुत्राः क्षत्रियाणां च शूरा धीरा धरातले। असाध्यं स्वपितुर्नैव साधयन्ति सुभक्तितः ॥३६॥
तेषां जन्म भटत्वं च निष्फलं वन्ध्यवृक्षवत्। अतोस्माकं कृपां कृत्वा भवद्भिः सुविचक्षणैः ॥३७॥
दीयते प्रेषणं किंचि-द्येन स्यात्सफलं तनुः। तत्समाकर्ण्य चक्रेशो जगाद मधुरं वचः ॥३८॥

ही आश्चर्य हो रहा है तब देव ने कहा–राजन्! तुम कहते हो, वह ठीक है। पर मेरा विश्वास है कि संसार में सुख है ही नहीं। जिधर मैं आँखें खोलकर देखता हूँ मुझे दुःख या अशान्ति ही देख पड़ती है। यह जवानी बिजली की तरह चमक कर पलभर में नाश होने वाली है। यह शरीर, जिसे कि तुम भोगों में लगाने को कहते हो, महा अपवित्र है। ये विषय-भोग, जिन्हें तुम सुखरूप समझते हो, सर्प के समान भयंकर हैं और यह संसाररूपी समुद्र अथाह है, नाना तरह के दुःखरूपी भयंकर जलजीवों से भरा हुआ है और मोह जाल में फँसे हुए जीवों के लिए अत्यन्त दुस्तर है। तब जो पुण्य से यह मनुष्य देह मिली है, इसे इस अथाह समुद्र में बहने देना या जिनेन्द्र भगवान् के द्वारा बतलाये इस अथाह समुद्र के पार होने के साधन तपरूपी जहाज द्वारा उसके पार पहुँचा देना। मैं तो इसके लिए यही उचित समझता हूँ कि, जब संसार असार है और उसमें सुख नहीं है, तब संसार से पार होने का उपाय करना ही कर्तव्य और दुर्लभ मनुष्य देह के प्राप्त करने का फल है। मैं तो तुम्हें भी यही सलाह दूँगा कि तुम इस नाशवान् माया-ममता को छोड़कर कभी नाश न होने वाली लक्ष्मी की प्राप्ति के लिए यत्न करो। मणिकेतु ने इसके सिवा और भी बहुत कहने सुनने या समझाने में कोई कसर न की। पर सगर सब कुछ जानता हुआ भी पुत्र-प्रेम के वश हो संसार को न छोड़ सका। मणिकेतु को इससे बड़ा दुःख हुआ कि सगर की दृष्टि में अभी संसार की तुच्छता नजर न आई और वह उल्टा उसी में फँसता जाता है। लाचार हो वह स्वर्ग चला गया ॥२७-३४॥

एक दिन सगर राज सभा में सिंहासन पर बैठे हुए थे इतने में उनके पुत्रों ने आकर उनसे सविनय प्रार्थना की-पूज्य पिताजी, उन वीर क्षत्रिय-पुत्रों का जन्म किसी काम का नहीं, व्यर्थ है, जो कुछ काम न कर पड़े-पड़े खाते-पीते और ऐशोआराम उड़ाया करते हैं। इसलिए आप कृपाकर हमें कोई काम बतलाइए। फिर वह कितना ही कठिन या असाध्य ही क्यों न हो, उसे हम करेंगे। सगर ने उन्हें जवाब दिया-पुत्रों, तुमने कहा-वह ठीक है और तुमसे वीरों को यही उचित भी है पर अभी मुझे कोई कठिन या सीधा ऐसा काम नहीं दीख पड़ता जिसके लिए मैं तुम्हें कष्ट दूँ और न छहों खण्ड पृथ्वी में मेरे लिए कुछ असाध्य ही है। इसलिए मेरी तो तुमसे यही आज्ञा है कि पुण्य से

न मेऽसाध्यमहो पुत्राः षट्खण्डेषु प्रवर्त्तते। तस्मादेष ममादेशो भवद्भिर्भुज्यते धनम् ॥३९॥
तच्छ्रुत्वा भूपतेर्वाक्यमनुल्लंघ्यं च ते सुताः। नत्वा मौनं विधायोच्चैः संस्थिताः शंकिताशयाः ॥४०॥
तथान्येद्युः समासाद्य भूपतिं स्थिरसंस्थितम्। पुनः प्रणम्य सद्भक्त्या प्रोचुस्ते सुभटोत्तमाः ॥४१॥
प्रेषणेन विना देव क्रियते नैव भोजनम्। अस्माभिश्चेति तच्छ्रुत्वा संविचार्य प्रभुर्जगौ ॥४२॥
भो पुत्रा धर्मकार्यं मे वर्त्तते शर्मकारणम्। कैलासे कारिताः श्रीमच्चक्रिणा भरतेशिना ॥४३॥
चतुर्विंशतितीर्थेशां गृहाः काञ्चननिर्मिताः। प्रोल्लसद्रत्ननिर्माणा यत्रार्हत्प्रतिमाः शुभाः ॥४४॥
तेषां यत्नाय कुर्वन्तु भवन्तः परितो गिरिम्। गंगासत्खातिकां शीघ्रं दुस्तरां दुष्टचेतसाम् ॥४५॥
ततस्ते तं नृपं नत्वा परमानन्दनिर्भराः। दण्डरत्नेन तां चक्रुः सत्वरं साहसोद्धताः ॥४६॥
तस्मिन्नेव क्षणे धीमान्सम्बोधाय महीपते। मणिकेतुः सुरः सोपि कुमारान्देवमायया ॥४७॥
क्रूरनागाकृतिं धृत्वा भस्मीचक्रे बुधोत्तमः। क्वचित्सन्तः प्रकुर्वन्ति सद्धिताय हितेतरम् ॥४८॥

जो धन-सम्पत्ति प्राप्त है, इसे तुम भोगो। उस दिन तो वे सब लड़के पिता की बात का कुछ जवाब न देकर चुपचाप इसलिए चले गए कि पिता की आज्ञा तोड़ना ठीक नहीं परन्तु उनका मन इससे अप्रसन्न ही रहा ॥३५-४०॥

कुछ दिन बीतने पर एक दिन वे सब फिर सगर के पास गए और उन्हें नमस्कार कर बोले- पिताजी, आपने जो आज्ञा दी थी, उसे हमने इतने दिनों उठाई, पर अब हम अत्यन्त लाचार हैं। हमारा मन यहाँ बिल्कुल नहीं लगता। इसलिए आप अवश्य कुछ काम में हमें लगाइये। नहीं तो हमें भोजन न करने को भी बाध्य होना पड़ेगा। सगर ने जब इनका अत्यन्त ही आग्रह देखा तो उसने उनसे कहा-मेरी इच्छा नहीं कि तुम किसी कष्ट के उठाने को तैयार हो। पर जब तुम किसी तरह मानने के लिए तैयार ही नहीं हो, तो अस्तु, मैं तुम्हें यह काम बताता हूँ कि श्रीमान् भरत सम्राट् ने कैलाश पर्वत पर चौबीस तीर्थंकरों के चौबीस मन्दिर बनवाएँ हैं। वे सब सोने के हैं। उनमें बे-शुमार धन खर्च किया है। उनमें जो अर्हन्त भगवान् की पवित्र प्रतिमाएँ हैं वे रत्नमयी हैं। उनकी रक्षा करना बहुत जरूरी है। इसलिए तुम जाओ कैलाश के चारों ओर एक गहरी खाई खोदकर उसमें गंगा का प्रवाह लाकर भर दो। जिससे कि फिर दुष्ट लोग मन्दिरों को कुछ हानि न पहुँचा सकें। सगर के सब पुत्र पिताजी की इस आज्ञा से बहुत खुश हुए। वे उन्हें नमस्कार कर आनन्द और उत्साह के साथ अपने काम के लिए चल पड़े। कैलाश पर पहुँच कर कई वर्षों के कठिन परिश्रम द्वारा उन्होंने चक्रवर्ती के दण्डरत्न की सहायता से अपने कार्य में सफलता प्राप्त कर ली ॥४१-४६॥

अच्छा, अब उस मणिकेतु की बात सुनिए-उसने सगर को संसार से उदासीन कर योगी बनाने के लिए दोबार यत्न किया, पर दोनों बार उसे निराश हो जाना पड़ा। अबकी बार उसने एक बड़ा भयंकर कांड रचा। जिस समय सगर के ये साठ हजार लड़के खाई खोदकर गंगा का प्रवाह लाने को हिमवान् पर्वत पर गए और इन्होंने दण्ड-रत्न द्वारा पर्वत फोड़ने के लिए उस पर एक चोट मारी

ज्ञात्वापि मरणं तेषां मंत्र्याद्यास्तस्य भूपतेः। तद्दुःखमसमर्थस्य सोढुं चक्रुर्न तां कथाम् ॥४९॥
तदा ब्राह्मणरूपेण स देवो मणिकेतुवाक्। समागत्य नृपप्रान्ते शोकाकुलितमानसः ॥५०॥
अहो चक्रेश भूचक्रं रक्षत्युच्चैस्त्वयि प्रभो। अन्तकेन सुतो मेऽत्र गृहीतो दुष्टचेतसा ॥५१॥
तं त्वं प्राणप्रियं पुत्रं समानीय प्रभो द्रुतम्। यावत्प्राणस्थितिर्मेऽत्र तावद्देहि महीपते ॥५२॥
चक्रे पूत्कारकं चेति तन्निशम्य धराधिपः। किंचिद्धास्यं विधायोच्चैस्तस्य सम्बोधनाय च ॥५३॥
जगौ भो विप्र किं मुग्ध-स्त्वं जातोसि महीतले। विना सिद्धैर्निराबाधैर्यमः केनात्र वार्यते ॥५४॥
तं निवारयितुं वाञ्छा वर्त्तते भवतो यदि। दीक्षां जैनीं समादाय कुरु त्वं स्वात्मनो हितम् ॥५५॥

उस समय मणिकेतु ने एक बड़े भारी और महाविषधर सर्प का रूप धर, जिसकी फुंकार मात्र से कोसों के जीव-जन्तु भस्म हो सकते थे, अपनी विषैली हवा छोड़ी। उससे देखते-देखते वे सब ही जलकर खाक हो गए। सच है, अच्छे पुरुष दूसरे का हित करने के लिए कभी-कभी तो उसका अहित कर उसे हित की ओर लगाते हैं। मंत्रियों को उनके मरने की बात मालूम हो गई पर उन्होंने राजा से इसलिए नहीं कहा कि वे ऐसे महान् दुःख को न सह सकेंगे। तब मणिकेतु ब्राह्मण का रूप लेकर सगर के पास पहुँचा और बड़े दुःख के साथ रोता-रोता बोला-राजाधिराज, आप सरीखे न्यायी और प्रजाप्रिय राजा के रहते मुझे अनाथ हो जाना पड़े, मेरी आँखों के एक मात्र तारे को पापी लोग जबरदस्ती मुझसे छुड़ा ले जाए, मेरी सब आशाओं पर पानी फेर कर मुझे द्वार-द्वार का भिखारी बना जाए और मुझे रोता छोड़ जाए तो इससे बढ़कर दुःख की और क्या बात होगी? प्रभो, मुझे आज पापियों ने बे-मौत मार डाला है। मेरी आप रक्षा कीजिए-अशरण-शरण, मुझे बचाइए ॥४७-५२॥

सगर ने उसे इस प्रकार दुःखी देखकर धीरज दिया और कहा-ब्राह्मण देव, घबराइए मत वास्तव में बात क्या है उसे कहिए। मैं तुम्हारे दुःख दूर करने का यत्न करूँगा। ब्राह्मण ने कहा-महाराज क्या कहूँ? कहते छाती फटी जाती है, मुँह से शब्द नहीं निकलता। यह कहकर वह फिर रोने लगा। चक्रवर्ती को इससे बड़ा दुःख हुआ। उसके अत्यन्त आग्रह करने पर मणिकेतु बोला-अच्छा तो महाराज, मेरी दुःख कथा सुनिए-मेरे एक मात्र लड़का था। मेरी सब आशा उसी पर थी। वही मुझे खिलाता-पिलाता था। पर मेरे भाग्य आज फूट गए। उसे एक काल नाम का एक लुटेरा मेरे हाथों से जबरदस्ती छीन भागा। मैं बहुत रोया व कलपा, दया की मैंने उससे भीख माँगी, बहुत आरजू-मिन्नत की, पर पापी चाण्डाल ने मेरी ओर आँख उठाकर भी न देखा। राजराजेश्वर, आपसे, मेरी हाथ जोड़कर प्रार्थना है कि आप मेरे पुत्र को उस पापी से छुड़ा ला दीजिए। नहीं तो मेरी जान न बचेगी। सगर को काल-लुटेरे का नाम सुनकर कुछ हँसी आ गई उसने कहा-महाराज, आप बड़े भोले हैं। भला, जिसे काल ले जाता है, जो मर जाता है वह फिर कभी जीता हुआ है क्या? ब्राह्मण देव, काल किसी से नहीं रुक सकता। वह तो अपना काम किए ही चला जाता है। फिर चाहे कोई बूढ़ा हो, या जवान हो, या बालक, सबके प्रति उसके समान भाव हैं। आप तो अभी अपने लड़के

तच्छ्रुत्वा स द्विजः प्राह सत्यमेतन्महीपते। यद्यमं प्रति नैवात्र समर्थोस्ति नरोपि कः ॥५६॥
त्वया भयं न कर्त्तव्यं मया किंचित्प्रकथ्यते। पुत्रास्ते मारिताः सर्वे यमेन प्राणहारिणा ॥५७॥
तत्समाकर्ण्य भूपालो प्रोल्लसच्छोकमूर्च्छितः। महादुःखवचः श्रुत्वा कस्य मूर्च्छा न जायते ॥५८॥
तदा शीतोपचाराद्यैर्गुरोर्वाक्यामृतैरिव। चेतनां स नृपो नीतः सज्जनैश्चित्तरञ्जनैः ॥५९॥
ततस्त्रिविधवैराग्यं समासाद्यैव चक्रभृत्। दत्वा भागीरथायोच्चैः स राज्यं मोहवर्जितः ॥६०॥
दृढधर्मजिनेन्द्रस्य पादपद्मद्वयान्तिके। दीक्षां जग्राह जैनेन्द्रीं भवभ्रमणनाशिनीम् ॥६१॥
तदासौ वेगतो गत्वा कैलासं च सुरोत्तमः। मायामृत्युमपाकृत्य चक्रिपुत्राञ्जगौ पुनः ॥६२॥
अहो पुत्रा भवन्मृत्युं समाकर्ण्यैव दुःखितः। युष्मत्पिता श्रियं त्यक्त्वा तपो धृत्वा वनं श्रितः ॥६३॥

के लिए रोते हैं, पर मैं कहता हूँ कि वह तुम पर भी बहुत जल्दी सवारी करने वाला है। इसलिए यदि आप यह चाहते हों कि मैं उससे रक्षा पा सकूँ, तो इसके लिए ऐसा उपाय कीजिए कि आप दीक्षा लेकर मुनि हो जाएँ और अपना आत्महित करें। इसके सिवा काल पर विजय पाने का और कोई दूसरा उपाय नहीं है। सब कुछ सुन-सुनाकर ब्राह्मण ने कुछ लाचारी बतलाते हुए कहा कि यदि यह बात सच है और वास्तव में काल से कोई मनुष्य विजय नहीं पा सकता तो लाचारी है। अस्तु, हाँ एक बात तो राजाधिराज, मैं आपसे कहना ही भूल गया और वह बड़ी ही जरूरी बात थी। महाराज, इस भूल की मुझ गरीब पर क्षमा कीजिए। बात यह है कि मैं रास्ते में आता-आता सुनता आ रहा हूँ, लोग परस्पर में बातें करते हैं कि हाय! बड़ा बुरा हुआ जो अपने महाराज के लड़के कैलाश पर्वत की रक्षा के लिए खाई खोदने को गए थे, वे सबके सब एक साथ मर गए ॥५३-५७॥

ब्राह्मण का कहना पूरा भी न हुआ था कि सगर एकदम गश खाकर गिर पड़े। सच है, ऐसे भयंकर दुःख समाचार से किसे गश न आयेगा, कौन मूर्च्छित न होगा? उसी समय उपचारों द्वारा सगर होश में लाये गए। इसके बाद मौका पाकर मणिकेतु ने उन्हें संसार की दशा बतलाकर खूब उपदेश किया। अब की बार वह सफल प्रयत्न हो गया। सगर को संसार की इस क्षण-भंगुर दशा पर बड़ा ही वैराग्य हुआ। उन्होंने भागीरथ को राज देकर और सब माया-ममता छुड़ाकर दृढ़धर्म केवली द्वारा दीक्षा ग्रहण कर ली, जो कि संसार का भटकना मिटाने वाली है ॥५८-६१॥

सगर की दीक्षा लेने के बाद ही मणिकेतु कैलाश पर्वत पर पहुँचा और उन लड़कों को माया-मौत से सचेत कर बोला-सगर सुतो सुनो, जब आपकी मृत्यु का हाल आपके पिता ने सुना तो उन्हें अत्यन्त दुःख हुआ और इसी दुःख के मारे वे संसार की विनाशीक लक्ष्मी को छोड़कर साधु हो गए। मैं आपके कुल का ब्राह्मण हूँ। महाराज को दीक्षा ले जाने की खबर पाकर आपको ढूँढ़ने को निकला था। अच्छा हुआ जो आप मुझे मिल गए। अब आप राजधानी में जल्दी चलें। ब्राह्मणरूपधारी मणिकेतु द्वारा पिता का अपने लिए दीक्षित हो जाना सुनकर सगरसुतों ने कहा महाराज, आप जायें। हम लोग अब घर नहीं जाएँगे। जिस लिए पिताजी सब राज्यपाठ छोड़कर साधु हो गए तब हम

यस्मादहं समायातो महाचिन्ताहताशयः। युष्मत्कुलद्विजोन्वेष्टुं भवतो नृपदेहजान् ॥६४॥
सर्वे षष्ठि सहस्राणि पुत्रास्ते तद्वचः श्रुतेः। दृढधर्मजिनस्यैव पार्श्वे दीक्षां समाश्रिताः ॥६५॥
श्रीमान्भगीरथश्चापि नत्वा तान्मुनिसत्तमान्। श्रुत्वा धर्मं जिनेन्द्राणां संजातः श्रावकोत्तमः ॥६६॥
तदासौ प्रगटीभूय मणिकेतुसुरः सुधीः। नत्वा श्रीसगरादींश्च मुनीन्सुतपसि दृढान् ॥६७॥
क्षन्तव्यं सेवकेनोच्चैर्निर्मितेऽत्रापराधके। भवद्भिर्जैनतत्वज्ञैर्भक्त्या चेति जगौ गिरम् ॥६८॥
तच्छ्रुत्वा मुनयः प्राहुर्भो सुरेन्द्र बुधोत्तम। कोपराधस्तवास्माकं कार्यसिद्धिर्विधायिनः ॥६९॥
यत्त्वया निर्मितं कार्यं महामित्रेण धीमता। तत्कर्तुं कः क्षमो लोके त्वां विना धर्मवत्सलः ॥७०॥
अतस्त्वमेव भो देव जैनपादाब्जषट्पदः। मुक्तिलक्ष्म्याः परिप्राप्त्यै कारणं शर्मकारणम् ॥७१॥
इत्यादिकं वचः श्रुत्वा स देवो सुखदायकम्। तान्प्रणम्य महाभक्त्या सिद्धकार्यो दिवं गतः ॥७२॥
ते मुनींद्रा जिनेन्द्रोक्तं तपः कृत्वा सुदुस्सहम्। सम्मेदपर्वते मोक्षं शुक्लध्यानेन संययुः ॥७३॥

किस मुँह से उस राज को भोग सकते हैं? हमसे इतनी कृतघ्नता न होगी, जो पिताजी के प्रेम का बदला हम ऐशो आराम भोग कर दें। जिस मार्ग को हमारे पूज्य पिताजी ने उत्तम समझकर ग्रहण किया है वही हमारे लिए भी शरण है। इसलिए कृपा कर आप हमारे इस समाचार को भैया भागीरथ से जाकर कह दीजिए कि वह हमारे लिए कोई चिन्ता न करें। ब्राह्मण से इस प्रकार कहकर वे सब भाई भगवान् के समवसरण में आए और पिता की तरह दीक्षा लेकर साधु बन गए ॥६२-६५॥

भागीरथ को भाइयों का हाल सुनकर बड़ा वैराग्य हुआ। उसकी इच्छा भी योग ले लेने की हुई, पर राज्य-प्रबन्ध उसी पर निर्भर रहने से वह दीक्षा न ले सका परन्तु उसने उन मुनियों द्वारा जिनधर्म का उपदेश सुनकर श्रावकों के व्रत ग्रहण किए। मणिकेतु का सब काम जब अच्छी तरह सफल हो गया तब वह प्रकट हुआ और उन सब मुनियों को नमस्कार कर बोला-भगवन् आपका मैंने बड़ा भारी अपराध जरूर किया है। पर आप जैनधर्म में तत्त्व को यथार्थ जानने वाले हैं। इसलिए सेवक को क्षमा करें। इसके बाद मणिकेतु ने आदि से इति पर्यन्त सब घटना कह सुनाई मणिकेतु के द्वारा सब हाल सुनकर उन्हें बड़ी प्रसन्नता हुई वे उससे बोले-देवराज, इसमें तुम्हारा अपराध क्या हुआ, जिसके लिए क्षमा की जाए? तुमने तो उल्टा हमारा उपकार किया है। इसलिए हमें तुम्हारा कृतज्ञ होना चाहिए। मित्रपने के नाते से तुमने जो कार्य किया है वैसा करने के लिए तुम्हारे बिना और समर्थ ही कौन था? इसलिए देवराज, तुम ही सच्चे धर्म-प्रेमी हो, जिन भगवान् के भक्त हो और मोक्ष-लक्ष्मी की प्राप्ति के कारण हो। सगर-सुतों को इस प्रकार सन्तोष-जनक उत्तर पर मणिकेतु बहुत प्रसन्न हुआ। वह फिर उन्हें भक्तिपूर्वक नमस्कार कर स्वर्ग चला गया। यह मुनिसंघ विहार करता हुआ सम्मेदशिखर पर आया और यहीं कठिन तपस्या कर शुक्लध्यान के प्रभाव से इसने निर्वाण लाभ किया ॥६६-७३॥

तेषां निर्वाणसम्प्राप्तिं श्रुत्वा निर्विण्णमानसः। सुधीर्भगीरथश्चापि वरदत्ताय धीमते ॥७४॥
दत्वा राज्यं निजं प्राज्यं जिनस्नपनपूर्वकम्। कैलासाख्यगिरिं गत्वा शिवगुप्तमहामुनेः ॥७५॥
नत्वा पादद्वयं भक्त्या गृहीत्वा सुतपःश्रियम्। भूत्वा महामुनिर्गंगानदीतीरे मनोहरे ॥७६॥
संस्थितः प्रतिमायोगं समादाय बुधोत्तमः। तदा सर्वे सुरेन्द्राद्याः क्षीराब्धेस्तोयसद्घटैः ॥७७॥
श्रीमद्भगीरथस्यास्य भक्त्या पादाब्जयोर्मुदा। चक्रुर्महाभिषेकं च शर्मकोटिविधायकम् ॥७८॥
तत्प्रवाहं समासाद्य सापि गंगा नदी तराम्। तदा प्रभृति तीर्थत्वं जनानां समुपागता ॥७९॥
तस्मिन्गंगातटे चापि भगीरथमुनीश्वरः। कृत्वा तपः शिवं प्राप्तो जरामरणवर्जितम् ॥८०॥
स जयतु सगराख्यः केवलज्ञानचक्षुः सकलसुरसमर्च्यो मुक्तिकान्तासुकान्तः।
विदितपरमतत्त्वास्ते मुनींद्राश्च नित्यं मम विशदसुखश्रीकारणं सन्तु सन्तः ॥८१॥

इति कथाकोशे द्वितीयचक्रवर्त्तिसगरस्य कथा समाप्ता।

५५. मृगध्वजस्य कथा

नत्वा जिनं महाभक्त्या त्रैलोक्यप्रभुपूजितम्। वक्ष्ये मृगध्वजाख्यानं पूर्वाचार्यैः प्रभाषितम् ॥१॥

उधर भागीरथ ने जब अपने भाइयों का मोक्ष प्राप्त करना सुना तो उसे भी संसार से बड़ा वैराग्य हुआ। वह फिर अपने वरदत्त पुत्र को राज्य सौंप आप कैलाश पर शिवगुप्त मुनिराज के पास दीक्षा ग्रहण कर मुनि हो गया। भगीरथ ने मुनि होकर गंगा के सुन्दर किनारों पर कभी प्रतिमायोग से, कभी आतापन योग से और कभी और किसी आसन से खूब तपस्या की। देवता लोग उसकी तपस्या से बहुत खुश हुए और इसीलिए उन्होंने भक्ति के वश हो भगीरथ के चरणों को क्षीर-समुद्र के जल से अभिषेक किया, जो कि अनेक प्रकार के सुखों का देने वाला है। उस अभिषेक के जल का प्रवाह बहता हुआ गंगा में गया। तभी से गंगा तीर्थ के रूप में प्रसिद्ध हुई और लोग उसके स्नान को पुण्य का कारण समझने लगे। भगीरथ ने फिर कहीं अन्यत्र विहार न किया। वह वहीं तपस्या करता रहा और अन्त में कर्मों का नाशकर उसने जन्म, जरा, मरणादि रहित मोक्ष का सुख भी यहीं से प्राप्त किया ॥७४-८०॥

केवलज्ञानरूपी नेत्र द्वारा संसार के पदार्थों को जानने और देखने वाले, देवों द्वारा पूजा किए गए और मुक्तिरूप रमणीरत्न के स्वामी श्रीसगर मुनि तथा जैनतत्त्व के परम विद्वान् वे सगरसुत मुनिराज मुझे वह लक्ष्मी दें, जो कभी नाश होने वाली नहीं है और सर्वोच्च सुख की देने वाली है ॥८१॥

५५. मृगध्वज की कथा

सारे संसार द्वारा भक्ति सहित पूजा किए गए जिन भगवान् को नमस्कार कर प्राचीनाचार्यों के कहे अनुसार मृगध्वज राजकुमार की कथा लिखी जाती है ॥१॥

अयोध्या नगरे रम्ये राजा सीमन्धरोभवत्। तत्प्रिया जिनसेनाख्या तयोः पुत्रो मृगध्वजः ॥२॥
राजकीयोपि तत्रैको महिषो भणितो जनैः। समायाति प्रयात्येव पादयोश्च पतत्यलम् ॥३॥
क्रीडन्तं पुष्करिण्यां तं समालोक्यैकदा पशुम्। मंत्रिश्रेष्ठिकुमाराभ्यां सहायातो मृगध्वजः ॥४॥
राजपुत्रो जगौ तत्र मांसासक्तः स्वसेवकम्। पश्चिमं चरणं चास्य मह्यं देहीति पापधीः ॥५॥
तथा कृते च भृत्येन महिषः सोपि कष्टतः। त्रिभिः पादैर्नृपस्याग्रे गत्वा संपतितस्तदा ॥६॥
राजा सीमन्धरस्तस्मै जिनधर्मधुरन्धरः। सारपञ्चनमस्कारान्ददौ संन्याससंयुतान् ॥७॥
परोपकारिणः केचित्सन्ति सन्तो गुणाकराः। चन्द्रार्ककल्पवृक्षोरुतोयदेभ्योतिसुन्दराः ॥८॥
तत्प्रभावेन सौधर्मस्वर्गे देवो बभूव सः। श्रीमज्जैनेन्द्रसद्धर्मो देहिनां सुहितङ्करः ॥९॥
पुत्रवृत्तान्तमाकर्ण्य ततो रुष्टेन भूभुजा। सिद्धार्थमंत्रिणः प्रोक्तं मारय त्रीनपि द्रुतम् ॥१०॥
तां वार्तां च ततः श्रुत्वा मंत्रिश्रेष्ठिनृपात्मजाः। मुनिदत्तमुनेः पार्श्वे जैनीं दीक्षां समाश्रिताः ॥११॥
ततो वैराग्यभावेन तपः कृत्वा सुदुस्सहम्। मृगध्वजो मुनिः सोपि जैनतत्त्वविदाम्वरः ॥१२॥

सीमन्धर अयोध्या के राजा थे। उनकी रानी का नाम जिनसेना था। इनके एक मृगध्वज नाम का पुत्र था। वह मांस का बड़ा लोलुपी था। उसे बिना मांस खाये एक दिन भी चैन न पड़ता था। यहाँ एक राजकीय भैंसा था। वह बुलाने से पास चला आता, लौट जाने को कहने से चला जाता और लोगों के पाँवों में लोटने लगता। एक दिन वह भैंसा एक तालाब में क्रीड़ा कर रहा था। इतने में राजकुमार मृगध्वज, मंत्री और सेठ के लड़कों को साथ लिए वहाँ आया। इस भैंसे के पाँवों को देखकर मृगध्वज के मन में न जाने क्या धुन समाई सो उसने अपने नौकर से कहा–देखो, आज इस भैंसे का पिछला पाँव काट कर इसका मांस खाने के लिए पकाना। इतना कहकर मृगध्वज चल दिया। नौकर उसके कहे अनुसार भैंसे का पाँव काट कर ले गया। उसका मांस पका। उसे खाकर राजकुमार और उसके साथी बड़े प्रसन्न हुए। इधर बेचारा भैंसा बड़े दुःख के साथ लंगड़ाता हुआ राजा के सामने जाकर गिर पड़ा। राजा ने देखा कि उसकी मौत आ गई है। इसलिए उस समय उसने विशेष पूछ–पाछ न कर, कि किसने उसकी ऐसी दशा की है, दयाबुद्धि से उसे संन्यास देकर नमस्कार मन्त्र सुनाया। सच है, संसार में बहुत से ऐसे भी गुणवान् परोपकारी हैं, जो चन्द्रमा, सूर्य, कल्पवृक्ष, पानी आदि उपकारक वस्तुओं से भी कहीं बढ़कर हैं। भैंसा मरकर नमस्कार मन्त्र के प्रभाव से सौधर्म स्वर्ग में जाकर देव हुआ। सच है, जिनेन्द्र भगवान् का उपदेश किया पवित्र धर्म जीवों का वास्तव में हित करने वाला है ॥२–९॥

इसके बाद राजा ने इस बात का पता लगाया कि भैंसा की यह दशा किसने की। उन्हें जब यह नीच काम अपने और मंत्री तथा सेठ के पुत्रों का जान पड़ा तब तो उनके गुस्से का कुछ ठिकाना न रहा। उन्होंने उसी समय तीनों को मरवा डालने के लिए मंत्री को आज्ञा की। इस राजाज्ञा की खबर उन तीनों को भी लग गई तब उन्होंने झटपट मुनिदत्त मुनि के पास जाकर उनसे जिन दीक्षा ले ली। इनमें मृगध्वज महामुनि बड़े तपस्वी हुए। उन्होंने कठिन तपस्या कर ध्यानाग्नि द्वारा घातिया कर्मों

क्षयं नीत्वा सुधीर्ध्यानाद् घातिकर्मचतुष्टयम्। केवलज्ञानमुत्पाद्य संजातो भुवनार्चितः ॥१३॥
महापापप्रकर्त्तापि प्राणी श्रीजैनधर्मतः। भवेत्त्रिलोक्यसंपूज्यो धर्मात्किं भो परं शुभम् ॥१४॥
स श्रीकेवललोचनोतिचतुरो भव्यौघनिस्तारको देवेन्द्रादिसमर्चितो हितकरो धीरो मृगादिध्वजः।
नाना शर्मयशःप्रबोधजनकैर्भक्त्या समाराधितो। दद्यान्मे भवतां च निर्वृतिपदं नित्यं महामङ्गलम् ॥१५॥

इति कथाकोशे मृगध्वजमुनेराख्यानं समाप्तम्।

५६. परशुरामस्य कथा

नमस्कृत्य जिनाधीशं संसाराम्भोधितारणम्। श्वेतरामस्य संवच्मि चरित्रं चित्रकारणम् ॥१॥
अयोध्यापत्तने राजा कार्त्तवीर्योतिमूढधीः। पद्मावती महाराज्ञी तस्यासीत्प्राणवल्लभा ॥२॥
अटव्यां तापसावासपल्लिकायां च तापसः। रेणुका कामिनीनाथस्तत्रास्ते यमदग्निवाक् ॥३॥
तयोः पुत्रौ मनःप्रीतौ श्वेतरामस्तु पूर्वकः। महेन्द्ररामनामा च द्वितीयः प्राणवल्लभः ॥४॥
एकदा रेणुकाभ्राता वरदत्तो मुनीश्वरः। तत्पल्लिकासमीपेऽसौ वृक्षमूले सुखस्थितः ॥५॥

का नाश किया और केवलज्ञान प्राप्त कर संसार द्वारा वे पूज्य हुए। सच है, जिनधर्म का प्रभाव ही कुछ ऐसा अचिन्त्य है जो महापापी से पापी भी उसे धारण कर त्रिलोक-पूज्य हो जाता है और ठीक भी है, धर्म से और उत्तम है ही क्या? वे मृगध्वज मुनि मुझे और आप भव्य-जनों को महा मंगलमय मोक्ष लक्ष्मी दें, जो भव्य-जनों का उद्धार करने वाले हैं, केवलज्ञानरूपी अपूर्व नेत्र के धारक हैं, देवों, विद्याधरों और बड़े-बड़े राजाओं-महाराजाओं से पूज्य हैं, संसार का हित करने वाले हैं, बड़े धीर हैं और अनेक प्रकार का उत्तम से उत्तम सुख देने वाले हैं ॥१०-१५॥

५६. परशुराम की कथा

संसार-समुद्र से पार करने वाले जिनेन्द्र भगवान् को नमस्कार कर परशुराम का चरित्र लिखा जाता है जिसे सुनकर आश्चर्य होता है ॥१॥

अयोध्या का राजा कार्त्तवीर्य अत्यन्त मूर्ख था। उसकी रानी का नाम पद्मावती था। अयोध्या के जंगल में यमदग्नि नाम के एक तपस्वी का आश्रम था। इस तपस्वी की स्त्री का नाम रेणुका था। इसके दो लड़के थे। इसमें एक का नाम श्वेतराम था और दूसरे का महेन्द्रराम। एक दिन की बात है कि रेणुका के भाई वरदत्त मुनि उस ओर आ निकले। वे एक वृक्ष के नीचे ठहरे। उन्हें देखकर रेणुका बड़े प्रेम से उनसे मिलने को आई और उनके हाथ जोड़कर वहीं बैठ गई। बुद्धिमान् वरदत्त मुनि ने उससे कहा–बहिन, मैं तुझे कुछ धर्म का उपदेश सुनाता हूँ। तू उसे जरा सावधानी से सुन! देख, सब जीव सुख को चाहते हैं, पर सच्चे सुख के प्राप्त करने की कोई बिरला ही खोज करता है और इसीलिए प्रायः लोग दुःखी देखे जाते हैं। सच्चे सुख का कारण पवित्र सम्यग्दर्शन का ग्रहण करना है। जो पुरुष सम्यक्त्व प्राप्त कर लेते हैं, वे दुर्गतियों में फिर नहीं भटकते। संसार का भ्रमण भी

तत्र तं रेणुका वीक्ष्य भ्रातरं मुनिसत्तमम्। महाप्रीत्या प्रणम्योच्चैः पादमूले च संस्थिता ॥६॥
तेनोक्तं वरदत्ताख्यमुनीन्द्रेण महाधिया। शृणु त्वं भो भगिन्यत्र सावधानेन चेतसा ॥७॥
सम्यक्त्वं त्रिगजत्पूतं दुर्गतिच्छेदकारणम्। स्वर्गमोक्षतरोर्बीजं भवभ्रान्तिनिवारणम् ॥८॥
तच्च देवो जिनाधीशो रागद्वेषादिवर्जितः। केवलज्ञानसाम्राज्यः सुरासुरनमस्कृतः ॥९॥
तद्भाषितो भवेद्धर्मो लोकद्वयसुखप्रदः। इन्द्रनागेन्द्रचन्द्राद्यैः पूजितो दशधा मुदा ॥१०॥
उत्तमादिक्षमादिस्तु प्रसिद्धो भुवनत्रये। भवेद्वाले गुरुश्चापि शीलसंयमतत्परः ॥११॥
ज्ञानध्यानरतो नित्यं भार्यादिग्रन्थवर्जितः। इत्येतच्छर्मदं विद्धि सम्यक्त्वं मुग्धमानसे ॥१२॥
पात्रदानं गुणाधानं जिनार्चा शर्मदायिनी। शीलपर्वोपवासादिधर्मोयं गृहिणां शुभः ॥१३॥
इत्यादिकं समाकर्ण्य रेणुका बान्धवोदितम्। धर्मं श्रीमज्जिनेन्द्राणां सन्तुष्टा मानसे तदा ॥१४॥
सम्यक्त्वरत्नमादाय सा सती भक्तितस्तराम्। स्वात्मनो मण्डनं चक्रे भव्यानां तद्विभूषणम् ॥१५॥
ततो धर्मानुरागेण तस्यै श्रीवरदत्तवाक्। परश्वाख्यां महाविद्यां भगिन्यै मुनिसत्तमः ॥१६॥
कामधेनुसुविद्यां च दत्वा शर्मप्रदायिनीम्। स्वस्थानं प्राप्तवान्धीरो जैनतत्त्वविदाम्वरः ॥१७॥
सम्यक्त्वशालिनी सा च रेणुका स्वगृहे सुखम्। संस्थिता जिनपादाब्जभृङ्गी सद्धर्मवत्सला ॥१८॥

उनका कम हो जाता है। उनमें कितने तो उसी भव से मोक्ष चले जाते हैं। सम्यक्त्व का साधारण स्वरूप यह है कि सच्चे देव, सच्चे गुरु और सच्चे शास्त्र पर विश्वास लाना। सच्चे देव वे हैं, जो भूख और प्यास, राग और द्वेष, क्रोध और लोभ, मान और माया आदि अठारह दोषों से रहित हों, जिनका ज्ञान इतना बढ़ा-चढ़ा हो कि उससे संसार का कोई पदार्थ अंजाना न रह गया हो, जिन्हें स्वर्ग के देव, विद्याधर, चक्रवर्ती और बड़े-बड़े राजा-महाराजा भी पूजते हों और जिनका उपदेश किया पवित्र धर्म, इस लोक और परलोक में सुख का देने वाला हो तथा जिस पवित्र धर्म की इन्द्रादि देव भी पूजा-भक्ति कर अपना जीवन कृतार्थ समझते हों। धर्म का स्वरूप उत्तम क्षमा, उत्तम मार्दव, उत्तम आर्जव आदि दशलक्षणों द्वारा प्रायः प्रसिद्ध है और सच्चे गुरु वे कहलाते हैं, जो शील और संयम के पालने वाले हों, ज्ञान और ध्यान का साधन ही जिनके जीवन का खास उद्देश्य हो और जिनके पास परिग्रह रत्तीभर भी न हो। इन बातों पर विश्वास करने को सम्यक्त्व कहते हैं। इसके सिवा गृहस्थों के लिए पात्रदान करना, भगवान् की पूजा करना, अणुव्रत, गुणव्रत और शिक्षाव्रत धारण करना, पर्वों में उपवास वगैरह करना आदि बातें भी आवश्यक हैं। यह गृहस्थ-धर्म कहलाता है। तू इसे धारण कर। इससे तुझे सुख प्राप्त होगा। भाई के द्वारा धर्म का उपदेश सुन रेणुका बहुत प्रसन्न हुई। उसने बड़ी श्रद्धा-भक्ति के साथ सम्यक्त्व-रत्न द्वारा अपनी आत्मा को विभूषित किया और सच भी है, यही सम्यक्त्व तो भव्यजनों का भूषण है। रेणुका का धर्म-प्रेम देखकर वरदत्त मुनि ने उसे एक 'परशु' और दूसरी 'कामधेनु' ऐसी दो महाविद्याएँ दीं, जो कि नाना प्रकार का सुख देने वाली हैं। रेणुका को विद्या देकर जैनतत्त्व के परम विद्वान् वरदत्तमुनि विहार कर गए। इधर सम्यक्त्वशालिनी रेणुका घर आकर सुख से रहने लगी। रेणुका को धर्म पर अब खूब प्रेम हो गया। वह भगवान् की बड़ी भक्त हो गई ॥२-१८॥

एकदा कार्त्तवीर्योसौ राजा तत्र वने घने। गजस्य बन्धनार्थं च समायातस्तदा मुदा ॥१९॥
कामधेनुमहाविद्या-प्रभावेन मनोहरम्। कारितः षड्रसोपेतं भोजनं यमदग्निना ॥२०॥
स पापी कार्त्तवीर्योपि संभुक्त्वा लोभपूरितः। संग्रामे तापसं हत्वा कुधीस्तं यमदग्निकम् ॥२१॥
कामधेनुं समादाय निर्गतस्तद्वनाज्जवात्। पोषितो दुर्जनः प्राणी सर्पवत्प्राणनाशकः ॥२२॥
तदा तौ रेणुकापुत्रौ गृहीत्वा समिधादिकम्। समागतौ गृहं मातुर्ज्ञात्वा तां कष्टवार्त्तिकाम् ॥२३॥
श्वेतरामस्ततो ज्येष्ठः पुत्रोऽसौ सुभटाग्रणीः। रेणुकायाः समादाय तां विद्यां परशुप्रथाम् ॥२४॥
गत्वा महेन्द्ररामेण संयुतः कौशलां पुरीम्। कार्त्तवीर्यं सुसंग्रामे मारयामास भूपतिम् ॥२५॥
मृत्वासौ निजपापेन कार्त्तवीर्यो नृपः कुधीः। सम्प्राप्तो नरकं घोरं पापिनामीदृशी गतिः ॥२६॥
धिक्तृष्णां-पापिनीं जन्तोर्महादुःखप्रदायिनीम्। यत्रासक्तो जनोऽन्यायं कृत्वा कष्टं प्रयात्यलम् ॥२७॥
अन्यायेन नरेन्द्राद्याः क्षयं गच्छन्ति किं परे। यद्वायुना द्विपा यान्ति तत्र किं शलभादयः ॥२८॥
तदायोध्यापुरे सोपि श्वेतरामः स्वविद्यया। ख्यातः परशुरामेति संजातः सुमहीपतिः ॥२९॥

एक दिन राजा कार्त्तवीर्य हाथी पकड़ने को इसी वन की ओर आ निकला। घूमता हुआ वह रेणुका के आश्रम में आ गया। यमदग्नि तापस ने उसका अच्छा आदर-सत्कार किया और उसे अपने यहीं जिमाया। भोजन कामधेनु नाम की विद्या की सहायता से बहुत उत्तम तैयार किया गया था। राजा भोजन कर बहुत ही प्रसन्न हुआ और क्यों न होता? क्योंकि सारी जिन्दगी में उसे कभी ऐसा भोजन खाने को ही न मिला था। उस कामधेनु को देखकर इस पापी राजा के मन में पाप आया। यह कृतघ्न तब उस बेचारे तापसी को जान से मारकर गौ को ले गया। सच है, दुर्जनों का स्वभाव ही ऐसा होता है कि जो उनका उपकार करते हैं, वे दूध पिलाये सर्प की तरह अपने उन उपकारक की ही जान के लेने वाले हो उठते हैं ॥१९-२२॥

राजा के जाने के थोड़ी देर बाद ही रेणुका के दोनों लड़के जंगल से लकड़ियाँ वगैरह लेकर आ गए। माता को रोती हुई देखकर उन्होंने उसका कारण पूछा। रेणुका ने सब हाल उनसे कह दिया। माता की दुःख भरी बातें सुनकर श्वेतराम के क्रोध का ठिकाना न रहा। वह कार्त्तवीर्य से अपने पिता का बदला लेने के लिए उसी समय माता से 'परशु' नाम की विद्या को लेकर अपने छोटे भाई को साथ लिए चल पड़ा। राजा के नगर में पहुँच कर उसने कार्त्तवीर्य को युद्ध के लिए ललकारा। यद्यपि एक ओर कार्त्तवीर्य की प्रचण्ड सेना थी और दूसरी ओर सिर्फ ये दो ही भाई थे; पर तब भी परशु विद्या के प्रभाव से इन दोनों भाइयों ने कार्त्तवीर्य की सारी सेना को छिन्न-भिन्न कर दिया और अन्त में कार्त्तवीर्य को मारकर अपने पिता का बदला लिया। मरकर पाप के फल से कार्त्तवीर्य नरक गया। सो ठीक ही है, पापियों की ऐसी गति होती ही है। उस तृष्णा को धिक्कार है जिसके वश हो लोग न्याय-अन्याय को कुछ नहीं देखते और फिर अनेक कष्टों को सहते हैं। ऐसे ही अन्यायों द्वारा तो पहले भी अनेक राजाओं-महाराजाओं का नाश हुआ है। और ठीक भी है जिस वायु से बड़े-बड़े

भवति जगति शूरः पण्डितो दिव्यलक्ष्मीपतिरिह सुखयुक्तः पुण्यपण्येन जीवः।
इति मनसि विचारं चारु कृत्वा सुभव्याः कुरुत जिनमतोक्तं सारपुण्यं सुखाय ॥३०॥

इति कथाकोशे परशुरामस्य कथा समाप्ता।

५७. सुकुमालमुनेः कथा

यन्नामस्मृतिमात्रेण प्राप्यते सारसम्पदा। तं प्रणम्य जिनं वक्ष्ये सुकुमालकथां मुदा ॥१॥
कौशाम्बीनगरे ख्याते संजातोऽतिबलो नृपः। पुरोहितोऽभवत्तस्य सोमशर्मा विचक्षणः ॥२॥
काश्यपी कामिनी तस्यां काश्यप्यां संबभूवतुः। अग्निभूतिस्तथा वायुभूतिनामा सुतोपि च ॥३॥
तौ द्वौ पुत्रौ प्रमादेन शास्त्राभ्यासं न चक्रतुः। विना पुण्येन जन्तूनां मुखाब्जे नैव भारती ॥४॥
सोमशर्मण्यतस्तस्मिन्कालव्याघ्रेन भक्षिते। पुरोहितपदं तस्य गृहीतं गोत्रिभिस्तदा ॥५॥
मूर्खत्वान्न तयोर्दत्तं भूभुजातिबलेन तत्। क्व भवेन्मूढजन्तूनां दानमानादिकक्रिया ॥६॥
ततस्तौ मानभङ्गेन गत्वा राजगृहं पुरम्। पितृव्यं सूर्यमित्राख्यं नत्वा वृत्तान्तमूचतुः ॥७॥
कैश्चिद्दिनैस्ततस्तेन सूर्यमित्रेण धीमता। नाना शास्त्राणि तावुच्चैः पाठितौ पोषितावपि ॥८॥

हाथी तक मर जाते हैं तब उसके सामने बेचारे कीट-पतंगादि छोटे-छोटे जीव तो ठहर कैसे सकते हैं। श्वेतराम ने कार्त्तवीर्य को परशु विद्या से मारा था, इसलिए फिर अयोध्या में वह 'परशुराम' इस नाम से प्रसिद्ध हुआ ॥२३-२९॥

संसार में जो शूरवीर, विद्वान्, सुखी, धनी हुए देखे जाते हैं वह पुण्य की महिमा है। इसलिए जो सुखी, विद्वान्, धनवान्, वीर आदि बनना चाहते हैं, उन्हें जिन भगवान् का उपदेश किया पुण्य-मार्ग ग्रहण करना चाहिए ॥३०॥

५७. सुकुमाल मुनि की कथा

जिनके नाम मात्र का ध्यान करने से हर प्रकार की धन-सम्पत्ति प्राप्त हो सकती है, उन परम पवित्र जिन भगवान् को नमस्कार कर सुकुमाल मुनि की कथा लिखी जाती है ॥१॥

अतिबल कौशाम्बी के जब राजा थे, तब का यह आख्यान है। यहाँ एक सोमशर्मा पुरोहित रहता था, इसकी स्त्री का नाम काश्यपी था। इसके अग्निभूत और वायुभूति नामक दो लड़के हुए। माँ-बाप के अधिक लाड़ले होने से वे कुछ भी पढ़-लिख न सके और सच है पुण्य के बिना किसी को विद्या आती भी तो नहीं। काल की विचित्र गति से सोमशर्मा की असमय में ही मौत हो गई ये दोनों भाई तब निरे मूर्ख थे। इन्हें मूर्ख देखकर अतिबल ने उनके पिता का पुरोहित पद, जो उन्हें मिलता, किसी और को दे दिया। यह ठीक है कि मूर्खों का कहीं आदर-सत्कार नहीं होता। अपना अपमान हुआ देखकर उन दोनों भाइयों को बड़ा दुःख हुआ। तब उनकी कुछ अकल ठिकाने आई तब उन्हें कुछ लिखने-पढ़ने की सूझी। वे राजगृह में अपने काका सूर्यमित्र के पास गए और अपना

तौ विद्वांसौ ततो भूत्वा समागत्य निजं गृहम्। स्वविद्यां भूपतेस्तस्य दर्शयामासतुस्तराम् ॥९॥
स राजातिबलस्ताभ्यां पुरोहितपदं ददौ। सरस्वत्याः प्रसादेन किं न जायेत भूतले ॥१०॥
अथ राजगृहे तस्य सूर्यमित्रस्य चैकदा। सन्ध्यायां सरसो मध्ये सूर्यार्घं ददतो मुदा ॥११॥
मुद्रिका राजकीया च हस्ताद् ध्वस्ता जलान्विते। पद्मे सम्पतिता तत्र ततो भीतेन तेन तु ॥१२॥
मुनिं सुधर्मनामानं प्रणम्यावधिलोचनम्। प्रोक्तं मे मुद्रिका देव न जाने क्व गता मुने ॥१३॥
ब्रूहे भो करुणासिन्धो सा मया प्राप्यते कथम्। मुनिः प्राह सुधीः सास्ति तडागे कमलोपरि ॥१४॥
पुरोहितः प्रभातेऽसौ सूर्यमित्रश्च मुद्रिकाम्। दृष्ट्वा तस्मात्समादाय सन्तुष्टो मुनिपादयोः ॥१५॥
नत्वा जगाद योगीन्द्र विद्यां मे देहि धीधन। यया प्रश्न सुजानामि भवत्पादप्रसादतः ॥१६॥
तेनोक्तं मुनिना धीर जैनदीक्षां विना भुवि। विद्यैषा न समायाति ततोसौ सूर्यमित्रवाक् ॥१७॥
केवलं लोभतस्तस्य पादमूले मुनेर्मुदा। दीक्षां जग्राह जैनेन्द्रीं सर्वसिद्धिप्रदायिनीम् ॥१८॥

सब हाल उन्होंने उनसे कहा। उनकी पढ़ने की इच्छा देखकर सूर्यमित्र ने स्वयं उन्हें पढ़ाना शुरू किया और कुछ ही वर्षों में उन्हें अच्छा विद्वान् बना दिया। दोनों भाई जब अच्छे विद्वान् हो गए तब ये अपने शहर लौट आए। आकर उन्होंने अतिबल को अपनी विद्या का परिचय कराया। अतिबल उन्हें विद्वान् देखकर बहुत खुश हुआ और उनके पिता का पुरोहित-पद उसने उन्हें दे दिया। सच है सरस्वती की कृपा से संसार में क्या नहीं होता ॥२-१०॥

एक दिन सन्ध्या के समय सूर्यमित्र सूर्य को अर्घ चढ़ा रहा था। उसकी अंगुली में राजकीय एक रत्नजड़ी बहुमूल्य अँगूठी थी। अर्घ चढ़ाते समय वह अँगूठी अंगुली में से निकलकर महल के नीचे तालाब में जा गिरी। भाग्य से वह एक खिले हुए कमल में पड़ी। सूर्य अस्त होने पर कमल मुँद गया। अंगूठी कमल के अन्दर बन्द हो गई। सूर्यमित्र पाठ करके उठा और उसकी नजर उँगली पर पड़ी तब उसे मालूम हुआ कि अँगूठी कहीं पर गिर पड़ी। अब तो उसके डर का कुछ ठिकाना न रहा। राजा जब अँगूठी माँगेगा तब उसे क्या जवाब दूँगा, इसकी उसे बड़ी चिन्ता होने लगी। अँगूठी की शोध के लिए इसने बहुत कुछ यत्न किया, पर इसे उसका कुछ पता न चला। तब किसी के कहने से यह अवधिज्ञानी सुधर्म मुनि के पास गया और हाथ जोड़कर इसने उनसे अँगूठी के बाबत पूछा कि प्रभो, कृपा कर मुझे आप यह बतलावेंगे कि मेरी अँगूठी कहाँ चली गई और हे करुणा के समुद्र, वह कैसे प्राप्त होगी? मुनि ने उत्तर में यह कहा कि सूर्य को अर्घ देते समय तालाब में एक खिले हुए कमल में अँगूठी गिर पड़ी है। वह सबेरे मिल जायेगी। वही हुआ। सूर्योदय होते ही जैसे कमल खिला सूर्यमित्र को उसमें अँगूठी मिली। सूर्यमित्र बड़ा खुश हुआ। उसे इस बात का बड़ा अचम्भा होने लगा कि मुनि ने यह बात कैसे बतलाई? हो न हो, उनसे अपने को भी वह विद्या सीखनी चाहिए। यह विचार कर सूर्यमित्र, मुनिराज के पास गया। उन्हें नमस्कार कर उसने प्रार्थना की कि हे योगिराज, मुझे भी आप अपनी विद्या सिखा दीजिये, जिसमें मैं भी दूसरों के ऐसे प्रश्नों

पुनः पुनश्च तां विद्यां संपृच्छन्भक्तितस्तदा। क्रियागमं जिनन्द्रोक्तं पाठितो गुरुणाखिलम् ॥१९॥
ततोऽसौ गुरुसद्वाक्यप्रदीपोद्योतनेन च। हत्वाज्ञानतमस्तोमं संजातो धर्मतत्त्ववित् ॥२०॥
येन भव्येन सद्भक्त्या गुरुः सन्मार्गदर्शकः। आराधितो जगद्बन्धुः किं न सिद्ध्यति तस्य वै ॥२१॥
ततः श्रीजैनसद्धर्मे भूत्वा यो प्रौढधीर्मुनिः। पृष्ट्वा गुरुसुधर्माख्यमेकाकी विहरन्भुवि ॥२२॥
कौशाम्बीं नगरीं गत्वा चर्यार्थं युक्तितो भ्रमन्। सूर्यमित्रो मुनिर्धीमानग्निभूतिगृहं गतः ॥२३॥
तदाग्निभूतिना तेन महाभक्त्या प्रयुक्तितः। अन्नदानं जगत्सारं तस्मै दत्तं सुखप्रदम् ॥२४॥
वायुभूतिर्लघुभ्राता प्रेरितश्चाप्यनेन तु। स तस्मै वन्दनां नैव चक्रे चक्रे च निन्दनम् ॥२५॥
भाविदुर्गतिभाक्प्राणी सद्धर्मे प्रेरितोपि च। कदाचिन्न रतो मूढ भवेत्पापात्कुकर्मसु ॥२६॥
अग्निभूतः सुपूतात्मा सूर्यमित्रं मुनीश्वरम्। अनुव्रजन्कियन्मार्गं धर्ममाकर्ण्य शर्मदम् ॥२७॥
त्रिधा वैराग्यमापन्नोऽसौ गृहीत्वा तपस्तराम्। मुनिर्जातो लसद्भक्त्या सुधीः स्वपरतारकः ॥२८॥

का उत्तर दे सकूँ। आपकी मुझ पर बड़ी कृपा होगी, यदि आप मुझे अपनी यह विद्या पढ़ा देंगे। तब मुनिराज ने कहा–भाई, मुझे इस विद्या के सिखाने में कोई इंकार नहीं है। पर बात यह है कि बिना जिनदीक्षा लिए यह विद्या आ नहीं सकती। सूर्यमित्र तब केवल विद्या के लोभ से दीक्षा लेकर मुनि हो गया। मुनि होकर उसने गुरु से विद्या सिखाने को कहा। सुधर्म मुनिराज ने तब सूर्यमित्र को मुनियों के आचार–विचार के शास्त्र तथा सिद्धान्त–शास्त्र पढ़ायें। अब तो एकदम सूर्यमित्र की आँखें खुल गई यह गुरु के उपदेश रूपी दिये के द्वारा अपने हृदय के अज्ञानान्धकार को नष्ट कर जैनधर्म का अच्छा विद्वान् हो गया। सच है, जिन भव्य पुरुषों ने सच्चे मार्ग को बतलाने वाले और संसार के अकारण बन्धु गुरुओं की भक्ति सहित सेवा–पूजा की है, उनके सब काम नियम से सिद्ध हुए हैं ॥११–२१॥

जब सूर्यमित्र मुनि अपने मुनिधर्म में खूब कुशल हो गए तब वे गुरु की आज्ञा लेकर अकेले ही विहार करने लगे। एक बार वे विहार करते हुए कौशाम्बी में आए। अग्निभूत ने इन्हें भक्तिपूर्वक दान दिया। उसने अपने छोटे भाई वायुभूति से बहुत प्रेरणा और आग्रह इसलिए किया कि वह सूर्यमित्र मुनि की वन्दना करें, उसे जैनधर्म से कुछ प्रेम हो। कारण वह जैनधर्म से सदा विरुद्ध रहता था पर अग्निभूति के इस आग्रह का परिणाम उल्टा हुआ। वायुभूति ने और खिसियाकर मुनि की अधिक निन्दा की और उन्हें बुरा–भला कहा। सच है–जिन्हें दुर्गतियों में जाना होता है प्रेरणा करने पर भी ऐसे पुरुषों का श्रेष्ठ धर्म की ओर झुकाव नहीं होता किन्तु वह उल्टा पाप कीचड़ में अधिक–अधिक फँसता है। अग्निभूति को अपने भाई की ऐसी दुर्बुद्धि पर बड़ा दुःख हुआ। यही कारण था कि जब मुनिराज आहार कर वन में गए तब अग्निभूति भी उनके साथ–साथ चला गया और वहाँ धर्मोपदेश सुनकर वैराग्य हो जाने से दीक्षा लेकर वह भी तपस्वी हो गया। अपना और दूसरों का हित करना अग्निभूति के जीवन का उद्देश्य हुआ ॥२२–२८॥

अग्निभूतप्रिया या च सोमदत्ता महासती। श्रुत्वा तां स्वपतेर्वार्तां दुःखतो देवरं जगौ ॥२९॥
वायुभूते त्वया पापान्न कृता मुनिवन्दना। कृतं तन्निन्दनं चापि रे कुधीस्तन्निमित्ततः ॥३०॥
भ्राता ते स मुनिर्जातो महावैराग्यतो ध्रुवम्। तच्छ्रुत्वा कोपतस्तेन पापिना वायुभूतिना ॥३१॥
गच्छ गच्छ त्वकं चापि पार्श्वे नग्नस्य तस्य च। विटलस्याशुचेश्चेति प्रोक्त्वा पादेन सा हता ॥३२॥
सोमदत्ता तदा श्रुत्वा तद्वाक्यं कष्टकोटिदम्। जन्मान्तरे सपुत्राहं पादं ते सुखदायकम् ॥३३॥
भक्षयिष्यामि मूढात्मा निदानं सा करोदिति। धिङ्मूढत्वं यतो मूढा भस्मीकुर्वन्ति सच्छुभम् ॥३४॥
वायुभूतिस्तु पापात्मा मुनिनिन्दाप्रभावतः। उदुम्बरोरुकुष्ठेन पीडितः सप्तभिर्दिनैः ॥३५॥
यो मुनिस्त्रिजगत्पूज्यो धर्ममार्गोपदेशकः। तन्निन्दको महापापी किं कष्टं न प्रयाति सः ॥३६॥
मृत्वा ततः कुधीः सोपि दुष्टकष्टप्रकष्टतः। कौशाम्बीनगरे तत्र नटस्याजनि गर्दभी ॥३७॥
तत्रैव सा पुनर्मृत्वा संजाता शूकरी ततः। चम्पापुर्यां स्वपापेन जाता चाण्डालकुक्करी ॥३८॥

अग्निभूति के मुनि हो जाने की बात जब उसकी स्त्री सती सोमदत्ता को ज्ञात हुई तो उसे अत्यन्त दुःख हुआ। उसने वायुभूति से जाकर कहा–देखा, तुमने मुनि वन्दना न कर उनकी बुराई की, सुनती हूँ उससे दुःखी होकर तुम्हारे भाई भी मुनि हो गए। यदि वे अब तक मुनि न हुए हों तो चलो उन्हें तुम हम समझा लावें। वायुभूति ने गुस्सा होकर कहा–हाँ तुम्हें गर्ज हो तो तुम भी उस बदमाश नंगे के पास जाओ! मुझे तो कुछ गर्ज नहीं है। यह कहकर वायुभूति अपनी भौजी को एक लात मारकर चलता बना। सोमदत्ता को उसके मर्मभेदी वचनों को सुनकर बड़ा दुःख हुआ। उसे क्रोध भी अत्यन्त आया। पर अबला होने से वह उस समय कर कुछ नहीं कर सकी। तब उसने निदान किया कि पापी, तूने जो इस समय मेरा मर्म भेदा है और मुझे लातों से ठुकराया है, और इसका बदला स्त्री होने से मैं इस समय न ले सकी तो कुछ चिन्ता नहीं, पर याद रख इस जन्म में नहीं तो दूसरे जन्म में सही, पर बदला लूँगी अवश्य। तेरे इसी पाँव को, जिससे कि तूने मुझे लात मारी है और मेरे हृदय भेदने वाले तेरे इसी हृदय को मैं खाऊँगी तभी मुझे सन्तोष होगा। ग्रन्थकार कहते हैं कि ऐसी मूर्खता को धिक्कार है जिसके वश हुए प्राणी अपने पुण्य-कर्म को ऐसे नीच निदानों द्वारा भस्म कर डालते हैं ॥२९-३४॥

''इस हाथ दे उस हाथ ले'' इस कहावत के अनुसार तीव्र पाप का फल प्रायः तुरन्त मिल जाता है। वायुभूति ने मुनिनिन्दा द्वारा जो तीव्र पापकर्म बाँधा, उसका फल उसे बहुत जल्दी मिल गया। पूरे सात दिन भी न हुए होंगे कि वायुभूति के सारे शरीर में कोढ़ निकल आया। सच है–जिनकी सारा संसार पूजा करता है और जो धर्म के सच्चे मार्ग को दिखाने वाले हैं ऐसे महात्माओं की निन्दा करने वाला पापी पुरुष किन महाकष्टों को नहीं सहता। वायुभूति कोढ़ के दुःख से मरकर कौशाम्बी में ही एक नट के यहाँ गधा हुआ। गधा मरकर वह जंगली सूअर हुआ। इस पर्याय से मरकर इसने चम्पापुर में एक चाण्डाल के यहाँ कुत्ती का जन्म धारण किया, कुत्ती मरकर चम्पापुरी में ही एक

चम्पायां च पुनस्तत्र जाता चाण्डालपुत्रिका। दुष्टदुर्गन्धसंयुक्ता चक्षुषान्धा स्वकर्मणा ॥३९॥
जम्बूवृक्षतले कष्टाद्भक्षयन्ती च तत्फलं। दृष्ट्वा चाण्डालपुत्रीं तां कर्मयोगेन धीधनः ॥४०॥
अग्निभूतिमुनिः प्राह सूर्यमित्रं गुरुं प्रति। वराकीयं महाकष्टं हा कथं जीवति क्षितौ ॥४१॥
तच्छ्रुत्वा सूर्यमित्रेण प्रोक्ते संज्ञानचक्षुषा। तवेयं सोमदत्ता तु प्रिया धर्मपराङ्मुखः ॥४२॥
मुनिनिन्दापापतः कुष्ठी मृत्वा भूत्वा च गर्दभी। शूकरी कुक्करी चापि जाता चाण्डालपुत्रिका ॥४३॥
ततस्तेन मुनीन्द्रेण प्रोल्लसत्करुणाधिया। ग्राहिता शर्मदान्युच्चैः सा पंचाणुव्रतानि च ॥४४॥
ततो मृत्वा च चम्पायां नागशर्माभिधस्य सा। पुरोहितस्य संजाता नागश्रीर्नाम कन्यका ॥४५॥
नागोद्याने तदा श्रेष्ठि-मंत्रिकन्यादिभिः सह। एकदा नागपूजार्थं सा गता तत्र पुण्यतः ॥४६॥
सूर्यमित्राग्निभूती तौ समायातौ मुनीश्वरौ। दृष्ट्वा सद्भावतः सा च तयोः पार्श्वे स्थिता तदा ॥४७॥
नागश्रियं समालोक्य तां कन्यां च लघोर्मुनेः। पूर्वजन्मस्वसम्बन्धात्स्नेहोभून्मानसे तराम् ॥४८॥
पृष्टेन सूर्यमित्रेण संप्रोक्ते स्नेहकारणे। ततोग्निभूतिना तस्यै सारसम्यक्त्वपूर्वकम् ॥४९॥
अणुव्रतानि पञ्चैव दत्वा प्रोक्तं च बालिके। व्रतान्येतानि ते तातो यदि त्याजयति त्वया ॥५०॥

दूसरे चाण्डाल के यहाँ लड़की हुई वह जन्म से ही अन्धी थी। उसका सारा शरीर बदबू दे रहा था। इसलिए उसके माता-पिता ने उसे छोड़ दिया। पर भाग्य सभी का बलवान् होता है। इसलिए उसकी भी किसी तरह रक्षा हो गई। वह एक जांबू के झाड़-नीचे पड़ी-पड़ी जांबू खाया करती थी ॥३५-४०॥

सूर्यमित्र मुनि अग्निभूति को साथ लिए हुए भाग्य से इस ओर आ निकले। उस जन्म की दुःखिनी लड़की को देखकर अग्निभूति के हृदय में कुछ मोह, कुछ दुःख हुआ। उन्होंने गुरु से पूछा-प्रभो, इसकी दशा बड़ी कष्ट में है। यह कैसे जी रही हैं? ज्ञानी सूर्यमित्र मुनि ने कहा-तुम्हारा भाई वायुभूति ने धर्म से पराङ्गमुख होकर जो मेरी निन्दा की थी, उसी पाप के फल से उसे कई भव पशुपर्याय में लेना पड़े। अन्त में वह कुत्ती की पर्याय से मरकर यह चाण्डाल कन्या हुई है। पर अब इसकी उमर बहुत थोड़ी रह गई है। इसलिए जाकर तुम इसे व्रत लिवाकर संन्यास दे आओ। अग्निभूति ने वैसा ही किया। उस चाण्डाल कन्या को पाँच अणुव्रत देकर उन्होंने संन्यास लिवा दिया ॥४१-४४॥

चाण्डाल कन्या मरकर व्रत के प्रभाव से चम्पापुरी में नागशर्मा ब्राह्मण के यहाँ नागश्री नाम की कन्या हुई। एक दिन नागश्री वन में नागपूजा करने को गई थी। पुण्य से सूर्यमित्र और अग्निभूति मुनि भी विहार करते हुए इस ओर आ गए। उन्हें देखकर नागश्री के मन में उनके प्रति अत्यन्त भक्ति हो गई वह उनके पास गई और हाथ जोड़कर उनके पाँवों के पास बैठ गई। नागश्री को देखकर अग्निभूति मुनि के मन में कुछ प्रेम का उदय हुआ और होना उचित ही था क्योंकि थे तो वह उनके पूर्वजन्म के भाई न? अग्निभूति मुनि ने इसका कारण अपने गुरु से पूछा। उन्होंने प्रेम होने का कारण जो पूर्व जन्म का भातृ-भाव था, वह बता दिया। तब अग्निभूति ने उसे धर्म का उपदेश किया और सम्यक्त्व तथा पाँच अणुव्रत उसे ग्रहण करवाये। नागश्री व्रत ग्रहण कर जब जाने लगी तब उन्होंने उससे कह दिया कि हाँ, देख बच्ची, तुझसे यदि तेरे पिताजी इन व्रतों को लेने के लिए नाराज हों,

अत्रागत्य पुनः पुत्रि दीयन्ते मे गुणोज्ज्वले। भवन्ति मुनयो धीराः सत्यं सन्मार्गदर्शकाः ॥५१॥
ततोऽसौ भक्तिभारेण नत्वा तौ द्वौ मुनीश्वरौ। नागश्रीः स्वगृहं प्राप्ता यावच्चित्ते प्रमोदतः ॥५२॥
अन्याभिर्लोककन्याभिः श्रुत्वा तां वार्त्तिकां तदा। नागशर्मद्विजेनोक्तं भो सुते मुग्धमानसे ॥५३॥
अस्माकं न कुले युक्तं ब्राह्मणानां मुनेर्व्रतम्। कर्तुं पुत्रि ततः शीघ्रं त्यज त्वं व्रतसञ्चयम् ॥५४॥
तत्समाकर्ण्य सावोचत्तर्हि तानि व्रतानि तु। समर्पयामि तस्यैव मुनेश्चैतानि निश्चयात् ॥५५॥
ततस्तां स्वकरे धृत्वा ब्राह्मणः कोपसंयुतः। वने तन्मुनिसान्निध्ये संचचाल प्रवेगतः ॥५६॥
मार्गे तया प्रगच्छन्त्या शूलाभ्यर्णे सुकष्टतः। वाद्यमाने कुवादित्रे जाते कोलाहले स्वरे ॥५७॥
बद्धमेकं नरं दृष्ट्वा पृष्टोसौ कन्यया द्विजः। किमर्थं कष्टतो बद्धस्तातायं ब्रूहि कारणम् ॥५८॥
तेनोक्तं वरसेनाख्यो याचमानो निजं धनम्। मारितोत्र वणिक्पुत्रः पुत्रि चानेन पापिना ॥५९॥
तस्मादयं प्रकष्टेन मार्यते राजकिंकरैः। तन्निशम्य सुता प्राह शृणु त्वं तात मे वचः ॥६०॥
एतद्व्रतं जगत्सारं दत्तं मे मुनिना सुधीः। कथं सन्त्यज्यते धीर महाशर्मविधायकम् ॥६१॥
विप्रः प्राह सुते चैतद्व्रतं तिष्ठतु साम्प्रतम्। पश्चादन्यानि दीयन्ते तस्मै नग्नाय बालिके ॥६२॥

तो तू हमारे व्रत हमें ही आकर सौंप जाना। सच है, मुनि लोग वास्तव में सच्चे मार्ग के दिखाने वाले होते हैं ॥४५-५१॥

इसके बाद नागश्री उन मुनिराजों के भक्ति से हाथ जोड़कर और प्रसन्न होती हुई अपने घर पर आ गई। नागश्री के साथ की और लड़कियों ने उसके व्रत लेने की बात को नागशर्मा से जाकर कह दिया। नागशर्मा तब कुछ क्रोध का भाव दिखाकर नागश्री से बोला–बच्ची, तू बड़ी भोली है, जो झट से हर एक के बहकाने में आ जाती है। भला, तू नहीं जानती कि अपने पवित्र ब्राह्मण-कुल में नंगे मुनियों के दिये व्रत नहीं लिए जाते। वे अच्छे लोग नहीं होते। इसलिए उनके व्रत तू छोड़ दे। तब नागश्री बोली–तो पिताजी, उन मुनियों ने मुझे आते समय यह कह दिया था कि यदि तुझसे तेरे पिताजी इन व्रतों को छोड़ देने के लिए आग्रह करें तो तू हमारे व्रत हमें ही दे जाना। तब आप चलिए मैं उन्हें उनके व्रत दे आती हूँ। सोमशर्मा नागश्री का हाथ पकड़े क्रोध से गुर्राता हुआ मुनियों के पास चला। रास्ते में नागश्री ने एक जगह कुछ गुलगपाड़ा होता सुना। उस जगह बहुत से लोग इकट्ठे हो रहे थे और एक मनुष्य उनके बीच में बँधा हुआ पड़ा था। उसे कुछ निर्दयी लोग बड़ी क्रूरता से मार रहे थे। नागश्री ने उसकी यह दशा देखकर सोमशर्मा से पूछा–पिताजी, बेचारा यह पुरुष इस प्रकार निर्दयता से क्यों मारा जा रहा है? सोमशर्मा बोला–बच्ची, इस पर एक बनिये के लड़के वरसेन का कुछ रुपया लेना था। उसने इससे अपने रुपयों का तकादा किया। इस पापी ने उसे रुपया न देकर जान से मार डाला। इसलिए उस अपराध के बदले अपने राजा साहब ने उसे प्राणदंड की सजा दी है और वह योग्य है क्योंकि एक को ऐसी सजा मिलने से अब दूसरा कोई ऐसा अपराध न करेगा। तब नागश्री ने जरा जोर देकर कहा–तो पिताजी, यही व्रत तो उन मुनियों ने मुझे दिया है, फिर आप उसे क्यों छुड़ाने को कहते हैं? सोमशर्मा लाजबाब होकर बोला–अस्तु पुत्री, तू इस व्रत को न छोड़, चल

ततश्चाग्रे प्रगच्छन्त्या दृष्ट्वा नागश्रिया परम्। बद्धं तथा द्विजः पृष्टः संजगादेति पुत्रिके ॥६३॥
वणिक्नारदनामासौ व्यलीकवचनैः कुधीः। जनानां वञ्चनं पुत्रि करोत्यत्र स्वपापतः ॥६४॥
तद्दोषेण सुते चायं हन्यते पापधीरिह। शेषं वक्तव्यमत्रापि ज्ञातव्यं पूर्ववद्बुधैः ॥६५॥
एवं चोर्यपरस्त्रीकभूरिलोभाश्रिताञ्जनान्। नागशर्मा द्विजः प्रोक्त्वा पुनः प्राह सुतां प्रति ॥६६॥
अहो पुत्रि प्रतिष्ठन्तु व्रतान्येतानि किं तु वै। त्वमागच्छ मुनिः सोपि तर्ज्यते वचनोत्करैः ॥६७॥
येनासौ परबालानां व्रतं नैवं ददात्यतः। दुर्जनो न भवत्येव सर्वथा सुजनैः रतः ॥६८॥
ततो गत्वा सुदूरस्थो द्विजो कोपाग्निपूरितः। जगौ किं रे मुने नग्न वंचिता मत्सुता व्रतैः ॥६९॥
हा कष्टं मूर्खजन्तूनां चेष्टितं पापकर्मणाम्। व्रतैः शीलैः शुभोपेतै-र्वंचितः कोपि किं भुवि ॥७०॥
सूर्यमित्रेण संप्रोक्तं भो विप्रेयं सुता मम। नागश्रीर्न त्वदीया च सर्वथा भणितापि सा ॥७१॥
एहि पुत्रीति मत्पार्श्वे तच्छ्रुत्वा सा च कन्यका। भट्टारकस्य सान्निध्ये गत्वोच्चैः संस्थिता तदा ॥७२॥

बाकी के व्रत तो उनके उन्हें दे आवें। आगे चलकर नागश्री ने एक और पुरुष को बँधा देखकर पूछा–और पिताजी, यह पुरुष क्यों बाँधा गया है? सोमशर्मा ने कहा–पुत्री, यह झूठ बोलकर लोगों को ठगा करता था। इसके फन्दे में फँसकर बहुतों को दर-दर का भिखारी बनना पड़ा है। इसलिए झूठ बोलने के अपराध में इसकी यह दशा की जा रही है ॥५२-६४॥

तब फिर नागश्री ने कहा–तो पिताजी, यही व्रत तो मैंने भी लिया है। अब तो मैं उसे कभी नहीं छोड़ूँगी। इस प्रकार चोरी, परस्त्री, लोभ आदि से दुःख पाते हुए मनुष्यों को देखकर नागश्री ने अपने पिता को लाजबाव कर दिया और व्रतों को नहीं छोड़ा। तब सोमशर्मा ने हार खाकर कहा–अच्छा, यदि तेरी इच्छा इन व्रतों को छोड़ने की नहीं है तो न छोड़, पर तू मेरे साथ उन मुनियों के पास तो चल। मैं उन्हें दो बातें कहूँगा कि तुम्हें क्या अधिकार था जो तुमने मेरी लड़की को बिना मेरे पूछे व्रत दे दिये? फिर वे आगे से किसी को इस प्रकार व्रत न दे सकेंगे। सच है, दुर्जनों को कभी सत्पुरुषों से प्रीति नहीं होती। तब ब्राह्मण देवता अपनी होंश निकालने को मुनियों के पास चले। उसने उन्हें दूर से ही देखकर गुस्से से आकर कहा–क्यों रे नंगे! तुमने मेरी लड़की को व्रत देकर क्यों ठग लिया? बतलाओ, तुम्हें इसका क्या अधिकार था? कवि कहता है कि ऐसे पापियों के विचारों को सुनकर बड़ा ही खेद होता है। भला, जो व्रत, शील, पुण्य के कारण हैं, उनसे क्या कोई ठगाया जा सकता है? नहीं। सोमशर्मा को इस प्रकार गुस्सा हुआ देखकर सूर्यमित्र मुनि बड़ी धीरता और शान्ति के साथ बोले–भाई, जरा धीरज धर, क्यों इतनी जल्दी कर रहा है? मैंने इसे व्रत दिये हैं, पर अपनी लड़की समझकर और सच पूछो तो यह है भी मेरी ही लड़की। तेरा तो इस पर कुछ भी अधिकार नहीं है। तू भले ही यह कह कि यह मेरी लड़की है, पर वास्तव में यह तेरी लड़की नहीं है ॥६५-७१॥

यह कहकर सूर्यमित्र मुनि ने नागश्री को पुकारा। नागश्री झट से आकर उनके पास बैठ गई

अन्यायोन्यायकश्चेति कुर्वन्पूत्कारकं द्विजः। गत्वा चम्पापुरीमध्ये चन्द्रवाहनभूपतिम् ॥७३॥
जगौ देव मुनीन्द्रेण गृहीता मत्सुता हठात्। तच्छ्रुत्वा सर्वलोकानामाश्चर्यं समभूद्हृदि ॥७४॥
ततः सर्वजनैर्युक्तश्चन्द्रवाहनभूपतिः। समागत्य मुनेः पार्श्वे नत्वां तं कौतुकाश्रितः ॥७५॥
मदीयासौ मदीयासौ पुत्रिका मुनिविप्रयोः। विवादे चेति संजाते जगौ भट्टारकस्तदा ॥७६॥
चतुर्दश लसद्विद्या पाठितासौ मया प्रभो। मदीयेयं ततः पुत्री तच्छ्रुत्वा स नृपोवदत् ॥७७॥
यद्येवं भो मुनिस्वामिन्पाठयेमां स्वकन्यकाम्। सूर्यवत्सूर्यमित्रोसौ स्ववाक्यकिरणैस्तदा ॥७८॥
जगच्चित्तस्थमूढत्वप्रौढान्धतिमिरं हरन्। मुनिः प्राहेति भो वायुभूते संपठ्यते त्वया ॥७९॥
तच्छुत्वा प्रोल्लसद्विद्याः पूर्वजन्माश्रितास्तया। नागश्रिया महाश्चर्यं प्रव्यक्तं पठितास्तदा ॥८०॥
विस्मितेन नरेन्द्रेण प्रोक्तं नत्वा मुनीश्वरम्। महामुने स्वसम्बन्धं ब्रूहि भो करुणाकर ॥८१॥
संज्ञानलोचनोवोचत्तदासौ मुनिसत्तमः। वायुभूतिभवादेस्तु साक्षात्पूर्वप्रचेष्टितम् ॥८२॥
तच्छ्रुत्वा मुनिनाथोक्तं परमाश्चर्य कारणम्। ज्ञात्वा मोहादिकं सर्वं मानसे दुःखकारणम् ॥८३॥

अब तो ब्राह्मण देवता बड़े घबराये। वे 'अन्याय' 'अन्याय' चिल्लाते हुए राजा के पास पहुँचे और हाथ जोड़कर बोले-देव, नंगे साधुओं ने मेरी नागश्री लड़की को जबरदस्ती छुड़ा लिया। वे कहते हैं कि यह तेरी लड़की नहीं किन्तु हमारी लड़की है। राजाधिराज, सारा शहर जानता है कि नागश्री मेरी लड़की है। महाराज, उन पापियों से मेरी लड़की दिलवा दीजिए। सोमशर्मा की बात से सारी राज-सभा बड़े विचार में पड़ गई। राजा की अकल में कुछ न आया। तब वे सबको साथ लिए मुनि के पास आए और उन्हें नमस्कार कर बैठ गए। फिर यही झगड़ा उपस्थित हुआ। सोमशर्मा तो नागश्री को अपनी लड़की बताने लगा और सूर्यमित्र मुनि अपनी। मुनि बोले-अच्छा, यदि यह तेरी लड़की है तो बतला तूने इसे क्या पढ़ाया? और सुन, मैंने इसे सब शास्त्र पढ़ायें है, इसलिए मैं अभिमान से कहता हूँ कि यह मेरी लड़की है। तब राजा बोले-अच्छा प्रभो, यह आपकी ही लड़की सही, पर आपने इसे जो पढ़ाया है उसकी परीक्षा इसके द्वारा दिलवाइए। जिससे कि हमें विश्वास हो। तब सूर्यमित्र मुनि अपने वचनरूपी किरणों द्वारा लोगों के चित्त में ठसे हुए मूर्खतारूप गाढ़े अन्धकार को नाश करते हुए बोले-हे नागश्री, हे पूर्वजन्म में वायुभूति का भव धारण करने वाली, पुत्री, तुझे मैंने जो पूर्वजन्म में कई शास्त्र पढ़ायें हैं, उनकी इस उपस्थित मंडली के सामने तू परीक्षा दे। सूर्यमित्र मुनि का इतना कहना हुआ कि नागश्री ने जन्मान्तर का पढ़ा-पढ़ाया सब विषय सुना दिया। राजा तथा और सब मंडली को इससे बड़ा अचम्भा हुआ। उन्होंने मुनिराज से हाथ जोड़कर कहा-प्रभो, नागश्री की परीक्षा से उत्पन्न हुआ विनोद हृदयभूमि में अठखेलियाँ कर रहा है। इसलिए कृपाकर आप अपने और नागश्री के सम्बन्ध की सब बातें खुलासा करिए। तब अवधिज्ञानी सूर्यमित्र मुनि ने वायुभूति के भव से लगाकर नागश्री के जन्म तक की सब घटना उनसे कह सुनाई सुनकर राजा को बड़ा आश्चर्य हुआ। उन्हें यह सब मोह की लीला जान पड़ी। मोह ही सब दुःख

चन्द्रवाहनभूपालो महावैराग्ययोगतः। भूरि राजसुतैः सार्द्धं जिनदीक्षां गृहीतवान् ॥८४॥
स विप्रो नागशर्मापि श्रुत्वा धर्मम् जिनेशिनाम्। मुनिर्भूत्वाऽच्युते स्वर्गे देवोभूत्पुण्यपावनः ॥८५॥
नागश्रीश्च जिनेन्द्रोक्तं तपः कृत्वा स्वपुण्यतः। तत्रैवाच्युतकल्पेसौ देवो जातो महर्द्धिकः ॥८६॥
अहो भव्य जगत्सारो गुरुश्चिन्तामणिर्यथा। यत्प्रसादेन जन्तूनां सम्पदा विविधाः सदा ॥८७॥
अग्निमन्दरसच्छैले सूर्यमित्राग्निभूतिकौ। तौ मुनीन्द्रौ जगद्वन्द्यौ घातिकर्मक्षयंकरौ ॥८८॥
केवलज्ञानमुत्पाद्य भूत्वा त्रैलोक्यपूजितौ। संप्राप्तौ परमानन्द-दायकौ मोक्षमक्षयम् ॥८९॥
तौ द्वौ सत्केवलज्ञानलौचनौ श्रीजिनेश्वरौ। अस्माकं भवतां नित्यं सच्छ्रिये भुवनोत्तमौ ॥९०॥
अथावन्तिलसद्देशे विख्यातोज्जयिनीपुरे। इन्द्रदत्तो महाश्रेष्ठी परमेष्ठीप्रभक्तिमान् ॥९१॥
श्रेष्ठिनी गुणवत्याख्या रूपसौभाग्यमण्डिता। तस्या गर्भे समागत्य स्वर्गादच्युतसंज्ञकात् ॥९२॥
नागशर्मचरो देवः पूर्वपुण्यप्रसादतः। पुत्रः सुरेन्द्रदत्ताख्यः संजातो सुगुणान्वितः ॥९३॥
तत्रैव नगरे श्रीमत्सुभद्रश्रेष्ठिनः सुताम्। यशोभद्रां सुरेन्द्रादिदत्तोसौ परिणीतवान् ॥९४॥
नाना भोगान्प्रभुञ्जानौ तौ स्थितौ पूर्वपुण्यतः। श्रीमज्जिनेन्द्रचन्द्रोक्तधर्मकर्मसुतत्परौ ॥९५॥

का मूल कारण समझ कर उन्हें बड़ा वैराग्य हुआ। वे उसी समय और भी बहुत से राजाओं के साथ जिनदीक्षा ग्रहण कर गए। सोमशर्मा भी जैनधर्म का उपदेश सुनकर मुनि हो गया और तपस्या कर अच्युत स्वर्ग में देव हुआ। इधर नागश्री को अपना पूर्व का हाल सुनकर बड़ा वैराग्य हुआ। वह दीक्षा लेकर आर्यिका हो गई और अन्त में शरीर छोड़कर तपस्या के फल से अच्युत स्वर्ग में महर्द्धिक देव हुई अहा! संसार में गुरु चिन्तामणि के समान हैं, सबसे श्रेष्ठ हैं। यही कारण है कि जिनकी कृपा से जीवों को सब सम्पदाएँ प्राप्त हो सकती है ॥७२-८७॥

यहाँ से विहार कर सूर्यमित्र और अग्निभूति मुनिराज अग्निमन्दिर नाम के पर्वत पर पहुँचे। वहाँ तपस्या द्वारा घातिया कर्मों का नाश कर उन्होंने केवलज्ञान प्राप्त किया और त्रिलोकपूज्य हो अन्त में बाकी के कर्मों का भी नाश कर परम सुखमय, अक्षयानन्त मोक्ष लाभ किया। वे दोनों केवलज्ञानी मुनिराज मुझे और आप लोगों को उत्तम सुख की भीख दें ॥८८-९०॥

अवन्ति देश के प्रसिद्ध उज्जैन शहर में एक इन्द्रदत्त नाम का सेठ था। वह बड़ा धर्मात्मा और जिनभगवान् का सच्चा भक्त था। उसकी स्त्री का नाम गुणवती था। वह नाम के अनुसार सचमुच गुणवती और बड़ी सुन्दरी थी। सोमशर्मा का जीव, जो अच्युत स्वर्ग में देव हुआ था वह, वहाँ अपनी आयु पूरी कर पुण्य के उदय से इस गुणवती सेठानी के सुरेन्द्रदत्त नाम का सुशील और गुणी पुत्र हुआ। सुरेन्द्रदत्त का ब्याह उज्जैन में रहने वाले सुभद्र सेठ की लड़की यशोभद्रा के साथ हुआ। उनके घर में किसी बात की कमी नहीं थी। पुण्य के उदय से उन्हें सब कुछ प्राप्त था। इसलिए बड़े सुख के साथ उनके दिन बीतते थे। वे अपनी इस सुख अवस्था में भी धर्म को न भूलकर सदा उसमें सावधान रहा करते थे ॥९१-९५॥

एकदा सा यशोभद्रा प्रणम्यावधिलोचनम्। मुनिं प्राह सुधीर्मेऽत्र पुत्रो भावी न वा मुने ॥९६॥
तेनोक्तं श्रीमुनीन्द्रेण भो सुते संभविष्यति। पुत्रस्ते नैव सन्देहो भव्यानामग्रणीः सुधीः ॥९७॥
भर्त्ता सुरेन्द्रदत्तस्ते दृष्ट्वा तन्मुखपंकजम्। ग्रहीष्यति ध्रुवं जैनीं दीक्षां स्वर्मोक्षदायिनीम् ॥९८॥
सोपि पुत्रि सुतस्ते तु सुधीः सन्मुनिदर्शनात्। त्यक्त्वा भोगान्विशुद्धात्मा तपः शीघ्रं गृहीष्यति ॥९९॥
ततः कैश्चिद्दिनैः सापि यशोभद्रा गुणोज्ज्वलम्। नागश्रीचरदेवं तं संप्राप्ता सुतमुत्तमम् ॥१००॥
महोत्सवशतैस्तत्र बन्धुभिः परमादरात्। सुकुमाल इति व्यक्तं प्रोक्तः शर्मप्रदायकः ॥१०१॥
श्रेष्ठी सुरेन्द्रदत्तस्तु दृष्ट्वा तं तनयं तदा। दत्वा श्रेष्ठिपदं तस्मै मुनिर्जातो जगद्धितः ॥१०२॥
ततोसौ पूर्वपुण्येन श्रेष्ठी श्रीसुकुमालवाक्। नवयौवनमासाद्य परिणीय कुलोत्तमाः ॥१०३॥
द्वात्रिंशत्प्रोल्लसत्कन्या रूपलावण्यमण्डिताः। नित्यं ताभिः प्रभुञ्जानो दिव्यान्भोगान्सुखं स्थितः ॥१०४॥
तन्माता च यशोभद्रा स्वगेहे पुत्रमोहतः। मुनीनामपि तत्रोच्चैः प्रवेशं सा निराकरोत् ॥१०५॥
उज्जयिन्यां समागत्य केनचिच्चैकदा तदा। राज्ञः प्रद्योतनाम्नश्च दर्शितो रत्नकम्बलः ॥१०६॥

एक दिन यशोभद्रा ने एक अवधिज्ञानी मुनिराज से पूछा–क्यों योगिराज, क्या मेरी आशा इस जन्म में सफल होगी? मुनिराज यशोभद्रा का अभिप्राय जानकर कहा–हाँ होगी और अवश्य होगी। तेरे होने वाला पुत्र भव्य मोक्ष में जाने वाला, बुद्धिमान् और अनेक अच्छे-अच्छे गुणों का धारक होगा। पर साथ ही एक चिन्ता की बात यह होगी कि तेरे स्वामी पुत्र का मुख देखकर ही जिनदीक्षा ग्रहण कर जाएँगे, जो दीक्षा स्वर्ग-मोक्ष का सुख देने वाली है। अच्छा, और एक बात यह है कि तेरा पुत्र भी जब कभी किसी जैन मुनि को देख पायेगा तो वह भी उसी समय सब विषयभोगों को छोड़-छोड़कर योगी बन जाएगा ॥९६-९९॥

इसके कुछ महीनों बाद यशोभद्रा सेठानी के पुत्र हुआ। नागश्री के जीव ने, जो स्वर्ग में महर्द्धिक देव हुआ था, अपनी स्वर्ग की आयु पूरी होने के बाद यशोभद्रा के यहाँ जन्म लिया। भाई-बन्धुओं ने उसके जन्म का बहुत कुछ उत्सव मनाया। उसका नाम सुकुमाल रखा गया। उधर सुरेन्द्र पुत्र के पवित्र दर्शन कर और उसे अपने सेठ-पद का तिलक कर आप मुनि हो गया ॥१००-१०२॥

जब सुकुमाल बड़ा हुआ तब उसकी माँ को यह चिन्ता हुई कि कहीं यह भी कभी किसी मुनि को देखकर मुनि न हो जाए, इसके लिए यशोभद्रा ने अच्छे घराने की कोई बत्तीस सुन्दर कन्याओं के साथ उसका ब्याह कर उन सबके रहने को एक जुदा ही बड़ा भारी महल बनवा दिया और उसमें सब प्रकार की विषय-भोगों की एक से एक उत्तम वस्तु इकट्ठी करवा दी, जिससे कि सुकुमाल का मन सदा विषयों में फँसा रहे। इसके सिवा पुत्र के मोह से उसने अपने घर में जैन मुनियों का आना-जाना भी बन्द करवा दिया ॥१०३-१०५॥

एक दिन किसी बाहर के सौदागर ने आकर राजा प्रद्योतन को एक बहुमूल्य रत्न-कम्बल दिखलाया, इसलिए कि वह उसे खरीद ले। पर उसकी कीमत बहुत ही अधिक होने से राजा ने उसे

भूरि मूल्यभराद्राजा गृहीतुं न क्षमोभवत्। ततस्तं सा यशोभद्रा गृहीत्वा रत्नकम्बलम् ॥१०७॥
खण्डं खण्डं विधायाशु पादत्राणार्थमद्भुतम्। द्वात्रिंशत्स्ववधूभ्यश्च लीलया संददौ सती ॥१०८॥
एकदा सौलिका चैकं पादत्राणं सुरक्तकम्। चञ्च्वादाय क्वचिच्छीघ्रं पातयामास तत्तदा ॥१०९॥
वेश्यया च समादाय राज्ञः संदर्शितं ततः। तत्समालोक्य भूपालो ज्ञात्वा तद्वृत्तकं पुनः ॥११०॥
महाश्चर्येण तद्गेहे सुधीः प्रद्योतवाक् स्वयम्। दृष्टुं श्रीसुकुमालं तं समायातः शुभाशयः ॥१११॥
तज्जनन्या विधायोच्चैरभ्युत्थानादिकं तदा। राज्ञः पुत्रस्य चैकत्र चक्रे स्वारार्त्तिकां मुदा ॥११२॥
तत्तेजसा तथाकण्ठहारसत्तेजसाकुलम्। सुकुमालं समालोक्य तथा सद्भोजनक्षणे ॥११३॥
एकैकं सिक्तकं सारं भुंजानं तं महीपतिः। दृष्ट्वा पृष्ट्वा यशोभद्रां ज्ञात्वा तत्कारणं मुदा ॥११४॥
महाविस्मयमापन्नो भो श्रेष्ठिन्पूर्वपुण्यभाक्। अवन्ति सुकुमालस्त्वं तं जगादेति हर्षतः ॥११५॥

नहीं लिया। रत्न-कम्बल की बात यशोभद्रा सेठानी को मालूम हुई उसने उस सौदागर को बुलवाकर उससे वह कम्बल सुकुमाल के लिए मोल ले लिया। पर वह रत्नों को जड़ाई के कारण अत्यन्त ही कठोर था, इसलिए सुकुमाल ने उसे पसन्द न किया। तब यशोभद्रा ने उसके टुकड़े करवा कर अपनी बहुओं के लिए उसकी जूतियाँ बनवा दीं। एक दिन सुकुमाल की प्रिया जूतियाँ खोलकर पाँव धो रही थी। इतने में एक चील मांस के भ्रम से एक जूती को उठा ले उड़ी। उसकी चोंच से छूटकर वह जूती एक वेश्या के मकान की छत पर गिरी। उस जूती को देखकर वेश्या को बड़ा आश्चर्य हुआ। वह उसे राजघराने की समझकर राजा के पास ले गई। राजा भी उसे देखकर दंग रह गए कि इतनी कीमती जिसके यहाँ जूतियाँ पहनी जाती हैं तब उसके धन का क्या ठिकाना होगा। मेरे शहर में इतना भारी धनी कौन है? इसका अवश्य पता लगाना चाहिए। राजा ने जब इस विषय की खोज की तो उन्हें सुकुमाल सेठ का समाचार मिला कि इनके पास बहुत धन है और वह जूती उनकी स्त्री की है ॥१०६-११०॥

राजा को सुकुमाल के देखने की बड़ी उत्कंठा हुई वे एक दिन सुकुमाल से मिलने को आए। राजा को अपने घर आए देख सुकुमाल की माँ यशोभद्रा को बड़ी खुशी हुई उसने राजा का खूब अच्छा आदर-सत्कार किया। राजा ने प्रेमवश हो सुकुमाल को भी अपने पास सिंहासन पर बैठा लिया। यशोभद्रा ने उन दोनों की एक साथ आरती उतारी। दिये की तथा हार की ज्योति से मिलकर बढ़े हुए तेज को सुकुमाल की आँखें न सह सकीं, उनमें पानी आ गया। इसका कारण पूछने पर यशोभद्रा ने राजा से कहा-महाराज, आज इसकी इतनी उमर हो गई, कभी इसने रत्नमयी दीये को छोड़कर ऐसे दीये को नहीं देखा। इसलिए इसकी आँखों में पानी आ गया है। यशोभद्रा जब दोनों को भोजन कराने बैठी तब सुकुमाल अपनी थाली में परोसे हुए चावलों में से एक-एक चावल को बीन-बीनकर खाने लगा। देखकर राजा को बड़ा अचम्भा हुआ। उसने यशोभद्रा से इसका भी कारण पूछा। यशोभद्रा ने कहा-राजराजेश्वर, इसे जो चावल खाने को दिये जाते हैं वे खिले हुए

भोजनानन्तरं तत्र क्रीडावाप्यां स भूपतिः। कुर्वन्स्वयं जलक्रीडां पतितां निजमुद्रिकाम् ॥११६॥
तां पश्यन्प्रोल्लसत्कान्ति नानासद्भूषणोत्करम्। समालोक्य जले तत्र महाश्चर्येण चेतसि ॥११७॥
अहो पुण्येन सामग्री कीदृशीति विचारयन्। लज्जित्वा स्वगृहं प्राप्तस्तत्पुण्यं संस्तुवन्मुहुः। ॥११८॥
शृण्वन्तु महाभव्या धनं धान्यं सुसम्पदाः। पुत्रं मित्रं कलत्रं च रूपसौभाग्यमण्डितम् ॥११९॥
सद्बान्धवान्सुखोपेता-न्नानावस्त्रादिभूषणम्। एकद्वित्र्यादिसद्भूमिलसत्प्रासादसञ्चयम् ॥१२०॥
यानजं पानसन्मानयत्सारं भुवनत्रये। लभन्ते श्रीजिनेन्द्रोक्तपुण्यपण्येन देहिनः ॥१२१॥
तस्मात्त्यक्त्वाशु दुर्मार्गं कष्टदं बुधसत्तमैः। स्वर्गमोक्षश्रियो बीजं कार्यं पुण्यं जिनोदितम् ॥१२२॥
तत्सुपुण्यं भवेदत्र भक्त्या श्रीमज्जिनार्चनैः। पात्रदानैस्तथाशीलोपवासादिव्रतोत्तमैः ॥१२३॥
अथैकदा जगत्पूज्यः सुकुमालस्य मातुलः। नाम्ना गणधराचार्यो जैनतत्त्वविदांवरः ॥१२४॥
ज्ञात्वा श्रीसुकुमालस्य स्वल्पायुर्मुनिसत्तमः। तदीयोद्यानमागत्य सुधीर्योगं गृहीतवान् ॥१२५॥

कमलों में रखे जाकर सुगन्धित किये होते हैं। पर आज वे चावल थोड़े होने से मैंने उन्हें दूसरे चावलों के साथ मिलाकर बना लिया। इससे वह एक-एक चावल चुन-चुनकर खाता है। राजा सुनकर बड़े ही खुश हुए। उन्होंने पुण्यात्मा सुकुमाल की बहुत प्रशंसा कर कहा-सेठानी जी, अब तक तो आपके कुँवर साहब केवल आपके ही घर के सुकुमाल थे, पर अब मैं इनका अवन्ति-सुकुमाल नाम रखकर इन्हें सारे देश का सुकुमाल बनाता हूँ। मेरा विश्वास है कि मेरे देशभर में इस सुन्दरता का इस सुकुमारता का यही आदर्श है। इसके बाद राजा सुकुमाल को संग लिए महल के पीछे जलक्रीड़ा करने बावड़ी पर गए। सुकुमाल के साथ उन्होंने बहुत देर तक जलक्रीड़ा की। खेलते समय राजा की उँगली में से अँगूठी निकलकर क्रीड़ा सरोवर में गिर गई राजा उसे ढूँढ़ने लगे। वे जल के भीतर देखते हैं तो उन्हें उसमें हजारों बड़े-बड़े सुन्दर और कीमती भूषण देख पड़े। उन्हें देखकर राजा की अकल चकरा गई। वे सुकुमाल के अनन्त वैभव को देखकर बड़े चकित हुए। वे यह सोचते हुए, कि यह सब पुण्य की लीला है, कुछ शर्मिन्दा से होकर महल लौट आए ॥१११-११८॥

सज्जनों, सुनो-धन-धान्यादि सम्पदा का मिलना, पुत्र, मित्र और सुन्दर स्त्री का प्राप्त होना, बन्धु-बान्धवों का सुखी होना, अच्छे-अच्छे वस्त्र और आभूषणों का होना, दुमंजले, तिमंजले आदि मनोहर महलों में रहने को मिलना, खाने-पीने को अच्छी से अच्छी वस्तुएँ प्राप्त होना, विद्वान् होना, नीरोग होना आदि जितनी सुख-सामग्री हैं, वह सब जिनेन्द्र भगवान् के उपदेश दिये मार्ग पर चलने से जीवों को मिल सकती है। इसलिए दुःख देने वाले खोटे मार्ग को छोड़कर बुद्धिमानों को सुख का मार्ग और स्वर्ग-मोक्ष के सुख का बीज पुण्यकर्म करना चाहिए। पुण्य जिन भगवान् की पूजा करने से, पात्रों को दान देने से तथा व्रत, उपवास, ब्रह्मचर्य के धारण करने से होता है ॥११९-१२३॥

एक दिन जैनतत्त्व के परम विद्वान् सुकुमाल के मामा गणधराचार्य सुकुमाल की आयु बहुत थोड़ी रही जानकर उसके महल के पीछे से बगीचे में आकर ठहरे और चातुर्मास लग जाने से उन्होंने

यशोभद्रा च तन्माता प्रोच्चैः स्वाध्यायघोषणम्। यावद्योगपरिप्राप्तिर्वारयामास तं मुनिम् ॥१२६॥
ततस्तेन मुनीन्द्रेण योगनिष्ठापनक्रियाम्। कृत्वा पश्चादूर्ध्वलोकप्रज्ञप्तिपठनोच्चकैः ॥१२७॥
अच्युतस्वर्गदेवानामायुरुत्सेधसत्सुखे। व्यावर्णनं तरां कर्त्तुं प्रारब्धं पुण्ययोगतः ॥१२८॥
तच्छ्रुत्वा सुकुमालोसौ स्वामी जातिस्मरोभवत्। गत्वा तस्य मुनेः पार्श्वे नत्वा तं भक्तितः स्थितः ॥१२९॥
मुनिः प्राह सुधीर्वत्स तवायुश्च दिनत्रयम्। यज्जानासि हितं स्वस्य कुरु त्वं तद्धि वेगतः ॥१३०॥
तत्समाकर्ण्य धीरोसौ सुकुमालो गुणोज्ज्वलः। शीघ्रं दीक्षां समादाय जैनीं स्वसौख्यदायिनीम् ॥१३१॥

वहीं योग धारण कर लिया। यशोभद्रा को उनके आने की खबर हुई वह जाकर उनसे कह आई कि प्रभो, जब तक आपका योग पूरा न हो तब तक आप कभी ऊँचे से स्वाध्याय या पठन-पाठन न कीजिएगा। जब उनका योग पूरा हुआ तब उन्होंने अपने योग-सम्बन्धी सब क्रियाओं के अन्त में लोकप्रज्ञप्ति का पाठ करना शुरू किया। उसमें उन्होंने अच्युतस्वर्ग के देवों की आयु, उनके शरीर की ऊँचाई आदि का खूब अच्छी तरह वर्णन किया। उसे सुनकर सुकुमाल को जातिस्मरण हो गया। पूर्व जन्म में पाए दुःखों को याद कर वह काँप उठा। वह उसी समय चुपके से महल से निकल कर मुनिराज के पास आ गया और उन्हें भक्ति से नमस्कार कर उनके पास बैठ गया। तब मुनि ने उससे कहा-बेटा, अब तुम्हारी आयु सिर्फ तीन दिन की रह गई है, इसलिए अब तुम्हें इन विषय-भोगों को छोड़कर अपना आत्महित करना उचित है। ये विषय-भोग पहले कुछ अच्छे से मालूम होते हैं, पर इनका अन्त बड़ा ही दुःखदायी है। जो विषय-भोगों की धुन में ही मस्त रहकर अपने हित की ओर ध्यान नहीं देते, उन्हें कुगतियों के अनन्त दुःख उठाना पड़ते हैं। तुम समझो सियाले में आग बहुत प्यारी लगती है, पर जो उसे छुएगा वह तो जलेगा ही। यही हाल इन ऊपर के स्वरूप से मन को लुभाने वाले विषयों का है ॥१२४-१३०॥

इसलिए ऋषियों ने इन्हें 'भोगा भुजंगभोगाभाः' अर्थात् सर्प के समान भयंकर कहकर उल्लेख किया है। विषयों को भोगकर आज तक कोई सुखी नहीं हुआ, तब फिर ऐसी आशा करना कि इनसे सुख मिलेगा, नितान्त भूल है। मुनिराज का उपदेश सुनकर सुकुमाल को बड़ा वैराग्य हुआ। वह उसी समय सुख देने वाली जिनदीक्षा लेकर मुनि हो गया। मुनि होकर सुकुमाल वन की ओर चल दिया। उसका यह अन्तिम जीवन बड़ा ही करुणा से भरा हुआ है। कठोर से कठोर चित्त वाले मनुष्यों तक के हृदयों को हिला देने वाला है। सारी जिन्दगी में कभी जिनकी आँखों से आँसू न झरे हों, उन आँखों में भी सुकुमाल का यह जीवन आँसू ला देने वाला है। पाठकों को सुकुमाल की सुकुमारता का हाल मालूम है कि यशोभद्रा ने जब उसकी आरती उतारी थी, तब जो मंगल द्रव्य सरसों उस पर डाली गई थी, उन सरसों के चुभने को भी सुकुमाल न सह सका था। यशोभद्रा ने उसके लिए रत्नों का बहूमूल्य कम्बल खरीदा था, पर उसने उसे कठोर होने से ही ना-पास कर दिया था। उसकी माँ का उस पर इतना प्रेम था, उसने उसे इस प्रकार लाड़-प्यार से पाला था कि सुकुमाल को कभी

त्रिधा वैराग्यतः कृत्वा संन्यासं शल्यवर्जितम्। प्रायोपयानसन्नाम्नि संस्थितो मरणे सुधीः ॥१३२॥
अग्निभूतेस्तु या भार्या सोमदत्ता निदानतः। सा संसारे परिभ्रम्य तत्रैवोज्जयिनीपुरे ॥१३३॥
शृगाली पापतो भूत्वा चतुःपुत्रसमन्विता। पूर्ववैरेण पादाभ्यां समारभ्यैव तं मुनिम् ॥१३४॥
भक्षयामास हा कष्टं निदानं पापराशिदम्। तस्माद्भव्यैर्न कर्त्तव्यं तत्त्रिधा दुःखकारणम् ॥१३५॥

जमीन पर तक पाँव रखने का मौका नहीं आया था। उसी सुकुमार सुकुमाल ने अपने जीवन भर के एक रूप से बहे प्रवाह को कुछ ही मिनटों के उपदेश से बिल्कुल ही उल्टा बहा दिया। जिसने कभी यह नहीं जाना कि घर बाहर क्या है, वह अब अकेला भयंकर जंगल में जा बसा। जिसने स्वप्न में भी कभी दुःख नहीं देखा, वही अब दुःखों का पहाड़ अपने सिर पर उठा लेने को तैयार हो गया। सुकुमाल दीक्षा लेकर वन की ओर चला। कंकरीली जमीन पर चलने से उसके फूलों से कोमल पाँवों में कंकर-पत्थरों के गड़ने से घाव हो गए। उनसे खून की धारा बह चली। पर धन्य सुकुमाल की सहनशीलता जो उसने उसकी ओर आँख उठाकर भी नहीं झाँका। अपने कर्तव्य में वह इतना एकनिष्ठ हो गया, इतना तन्मय हो गया कि उसे इस बात का भान ही न रहा कि मेरे शरीर की क्या दशा हो रही है सुकुमाल की सहनशीलता की इतने में ही समाप्त नहीं हो गई। अभी आगे बढ़िए और देखिये कि वह अपने को इस परीक्षा में कहाँ तक उत्तीर्ण करता है ॥१३१॥

पाँवों से खून बहता जाता है और सुकुमाल मुनि चले जा रहे हैं। चलकर वे एक पहाड़ की गुफा में पहुँचे। वहाँ वे ध्यान लगाकर बारह भावनाओं का विचार करने लगे। उन्होंने प्रायोपगमन संन्यास एक पाँव से खड़े रहने का ले लिया, जिसमें कि किसी से अपनी सेवा-शुश्रूषा भी कराना मना किया है। सुकुमाल मुनि तो इधर आत्म-ध्यान में लीन हुए। अब जरा इनके वायुभूति के जन्म को याद कीजिए ॥१३२॥

जिस समय वायुभूति के बड़े भाई अग्निभूति मुनि हो गए थे, तब इनकी स्त्री ने वायुभूति से कहा था कि देखो, तुम्हारे कारण से ही तुम्हारे भाई मुनि हो गए सुनती हूँ। तुमने अन्याय कर मुझे दुःख के सागर में ढकेल दिया। चलो, जब तक वे दीक्षा न ले उससे पहले उन्हें हम तुम समझा-बुझाकर घर लौटा लावें। इस पर गुस्सा होकर वायुभूति ने अपनी भौजी को बुरी-भली सुना डाली थी और फिर ऊपर से उस पर लात भी जमा दी थी। तब उसने निदान किया था कि पापी, तूने मुझे निर्बल समझ मेरा जो अपमान किया है, मुझे कष्ट पहुँचाया है, यह ठीक है कि मैं इस समय इसका बदला नहीं चुका सकती। पर याद रख कि इस जन्म में नहीं तो परजन्म में सही, पर बदला लूँगी और घोर बदला लूँगी।

इसके बाद वह मरकर अनेक कुयोनियों में भटकी। अन्त में वायुभूति तो यह सुकुमाल हुए और उनकी भौजी सियारनी हुई। जब सुकुमाल मुनि वन की ओर रवाना हुए और उनके पावों में कंकर, पत्थर, काँटे वगैरह लगकर खून बहने लगा, तब यही सियारनी अपने पिल्लों को साथ लिए

सुकुमालमुनिः सोपि मेरुवद्धीरमानसः। शत्रुमित्रसमश्चित्ते सुधीः सारसमाधिना ॥१३६॥
तृतीये दिवसे तं च सहमानः परीषहम्। मृत्वा तदाच्युतस्वर्गे जातो देवो महर्द्धिकः ॥१३७॥
क्व ते भोगा मनोभीष्टास्तपः क्वेदं सुदारुणम्। अहो भव्या सतां वृत्तं परमाश्चर्यकारणम् ॥१३८॥
तत्राच्युते सुधीः स्वर्गे देवोसौ सारसौख्यभाक्। श्रीमज्जिनेन्द्रपादाब्जसंजातो भक्तिनिर्भरः ॥१३९॥

उस खून को चाटती-चाटती वहीं आ गई जहाँ सुकुमाल मुनि ध्यान में मग्न हो रहे थे। सुकुमाल को देखते ही पूर्वजन्म के संस्कार से सियारनी को अत्यन्त क्रोध आया। वह उनकी ओर घूरती हुई उनके बिल्कुल नजदीक आ गई है। उसका क्रोध भाव उमड़ा। उसने सुकुमाल को खाना शुरू कर दिया। उसे खाते देखकर उसके पिल्ले भी खाने लग गए। जो कभी एक तिनके का चुभ जाना भी नहीं सह सकता था, वह आज ऐसे घोर कष्ट को सहकर भी सुमेरु सा निश्चय बना हुआ था। जिसके शरीर को एक साथ चार हिंसक जीव बड़ी निर्दयता से खा रहे है, तब भी जो रंचमात्र हिलता-डुलता तक नहीं। उस महात्मा की इस अलौकिक सहन-शक्ति का किन शब्दों में उल्लेख किया जाए, यह बुद्धि में नहीं आता। तब भी जो लोग एक ना-कुछ चीज काँटे के लग जाने से तिलमिला उठते हैं, वे अपने हृदय में जरा गंभीरता के साथ विचार कर देखें कि सुकुमाल मुनि की आदर्श सहनशक्ति कहाँ तक बढ़ी चढ़ी थी और उनका हृदय कितना उच्च था! सुकुमाल मुनि की यह सहनशक्ति उन कर्तव्यशील मनुष्यों को अप्रत्यक्ष रूप में शिक्षा कर रही है कि अपने उच्च और पवित्र कामों में आने वाले विघ्नों की परवाह मत करो। विघ्नों को आने दो और खूब आने दो। आत्मा की अनन्त शक्तियों के सामने ये विघ्न कुछ चीज नहीं, किसी गिनती में नहीं। तुम अपने पर विश्वास करो। भरोसा करो। हर एक कामों में आत्मदृढ़ता, आत्मविश्वास, उनके सिद्ध होने का मूलमंत्र है। जहाँ ये बातें नहीं वहाँ मनुष्यता भी नहीं। तब कर्तव्यशीलता तो फिर योजनों की दूरी पर है। सुकुमाल यद्यपि सुखिया जीव थे, पर कर्तव्यशीलता उनके पास थी। इसलिए देखने वालों के भी हृदय को हिला देने वाले कष्ट में भी वे अचल रहे ॥१३३-१३६॥

सुकुमाल मुनि को उस सियारनी ने पूर्व बैर के सम्बन्ध से तीन दिन तक खाया। पर वे मेरु के समान धीर रहे। दुःख की उन्होंने कुछ परवाह न की। यहाँ तक कि अपने को खाने वाली सियारनी पर भी उनके बुरे भाव न हुए। शत्रु और मित्र को समभावों से देखकर उन्होंने अपना कर्तव्यपालन किया। तीसरे दिन सुकुमाल शरीर छोड़कर अच्युतस्वर्ग में महर्द्धिक देव हुए ॥१३७॥

वायुभूति की भौजी ने निदान के वश सियारनी होकर अपने बैर का बदला चुका लिया। सच है, निदान करना अत्यन्त दुःखों का कारण है। इसलिए भव्यजनों को यह पाप का कारण निदान कभी नहीं करना चाहिए। इस पाप के फल से सियारनी मरकर कुगति में गई। कहाँ वे मन को अच्छे लगने वाले भोग और कहाँ यह दारुण तपस्या! सच तो यह है कि महापुरुषों का चरित कुछ

उज्जयिन्यां तदा देवैर्महाकोलाहलः कृतः। महाकालः कुतीर्थोभूज्जन्तूनां तत्र नाशकृत् ॥१४०॥
गन्धतोयलसद्दृष्टिः कृता देवैः सुभक्तितः। तत्र गन्धवती नाम्नी नदी जातेति भूतले ॥१४१॥
स श्रीमान्वरभोगसंगनिरतो ज्ञात्वा मुनेर्वाक्यतः स्वल्पं जीवितमात्मनो हि सकलं त्यक्त्वा कलत्रादिकम्।
धृत्वा चारु तपो जिनेन्द्रकथितं सोढ्वापशूपद्रवं देवोभूत्सुकुमालनिर्मलमुनिर्भूयात्सतां शान्तये ॥१४२॥

इति कथाकोशे श्रीसुकुमालमुनेराख्यानं समाप्तम्।

५८. सुकौशलमुनेः कथा

अर्हन्तं त्रिजगत्पूतं भारतीं भुवनोत्तमाम्। नत्वा गुरुं प्रवक्ष्येहं सुकौशलकथामिमाम् ॥१॥
अयोध्यायां महाराजः प्रजापालो गुणोज्ज्वलः। श्रेष्ठी सिद्धार्थनामाभूद्धनैर्धान्यैः समन्वितः ॥२॥
द्वात्रिंशत्तस्य संजाता भार्याः सद्रूपमण्डिताः। सर्वास्ताः कर्मयोगेन कामिन्यः पुत्रवर्जिताः ॥३॥
अहो पुत्रं विना नारी राजते नैव भूतले। रूपलावण्ययुक्तापि वल्लीव निष्फला भुवि ॥४॥

विलक्षण हुआ करता है। सुकुमाल मुनि अच्युतस्वर्ग में देव होकर अनेक प्रकार के दिव्य सुखों को भोगते हैं और जिनभगवान् की भक्ति में सदा लीन रहते हैं। सुकुमाल मुनि की इस वीर मृत्यु के उपलक्ष्य में स्वर्ग के देवों ने आकर उनका बड़ा उत्सव मनाया। 'जय जय' शब्द द्वारा महाकोलाहल हुआ। इसी दिन से उज्जैन में महाकाल नाम के कुतीर्थ की स्थापना हुई, जिसके कि नाम से अगणित जीव रोज वहाँ मारे जाने लगे और देवों ने जो सुगन्ध जल की वर्षा की थी, उससे वहाँ की नदी गन्धवती नाम से प्रसिद्ध हुई ॥१३८-१४१॥

जिसने दिनरात विषय-भोगों में ही फँसे रहकर अपनी सारी जिन्दगी बिताई, जिसने कभी दुःख का नाम भी न सुना था, उस महापुरुष सुकुमाल ने मुनिराज द्वारा अपनी तीन दिन की आयु सुनकर उसी समय माता, स्त्री, पुत्र आदि स्वजनों को, धन-दौलत को और विषय-भोगों को छोड़-छाड़कर जिनदीक्षा ले ली और अन्त में पशुओं द्वारा दुःसह कष्ट सहकर भी जिसने बड़ी धीरता और शान्ति के साथ मृत्यु को अपनाया। वे सुकुमाल मुनि मुझे कर्तव्य के लिए कष्ट सहने की शक्ति प्रदान करें ॥१४२॥

५८. सुकौशल मुनि की कथा

जगत्पवित्र जिनेन्द्र भगवान् जिनवाणी और गुरुओं को नमस्कार कर सुकौशल मुनि की कथा लिखी जाती है ॥१॥

अयोध्या में प्रजापाल राजा के समय में एक सिद्धार्थ नाम के सेठ हुए हैं। उनके बत्तीस अच्छी-अच्छी सुन्दर स्त्रियाँ थीं। पर खोटे भाग्य से उनकी कोई सन्तान न थी। स्त्री कितनी भी सुन्दर हो, गुणवती हो, पर बिना सन्तान के उसकी शोभा नहीं होती। जैसे बिना फल-फूल के लताओं की शोभा नहीं होती। इन स्त्रियों में जो सेठ की खास प्राणप्रिया थी, जिस पर कि सेठ महाशय का

तासां मध्ये तु या भार्या श्रेष्ठिनः प्राणवल्लभा। पुत्रार्थं यक्षदेवान्सा पूजयन्ती जयावती ॥५॥
प्रोक्ता ज्ञानिमुनीन्द्रेण भो सुते दुःखदायिनीम्। त्यक्त्वा भक्तिं कुदेवानां जैनधर्मे स्थिरा भव ॥६॥
येन ते सप्तवर्षाणां मध्ये स्याद् गर्भसंभवः। तच्छ्रुत्वा सा च संतुष्टा जिनधर्मे दृढाभवत् ॥७॥
यद्वाञ्छा मानसे नित्यं वर्तते सुतरां भुवि। तद्वस्तु प्राप्तिसान्निध्ये भवेद्धर्षो न कस्य वै ॥८॥
ततः कैश्चिद्दिनैस्तस्या जयावत्याः सुधर्मतः। सुकौशलो लसत्कान्तिः पुत्रो जातो मनोहरः ॥९॥
श्रेष्ठी सिद्धार्थनामासौ दृष्ट्वा तन्मुखपंकजम्। नयंधरमुनेः पार्श्वे सुधीर्दीक्षां गृहीतवान् ॥१०॥
मां बालपुत्रसंयुक्तां मुक्त्वा जातो मुनिस्त्विति। जयावती महाकोपं चक्रे सिद्धार्थसन्मुनौ ॥११॥
अहो चास्मै मुनीन्द्रस्य युक्तं दातुं तपः किमु। कोपान्मुनिप्रवेशस्तु निषिद्धः स्वगृहे तया ॥१२॥

अत्यन्त प्रेम था, वह पुत्र प्राप्ति के लिए सदा कुदेवों की पूजा-मानता किया करती थी। एक दिन उसे कुदेवों की पूजा करते एक मुनिराज ने देख लिया। उन्होंने तब उससे कहा-बहिन, जिस आशा से तू इन कुदेवों की पूजा करती है वह आशा ऐसा करने से सफल न होगी। कारण सुख-सम्पत्ति, सन्तान प्राप्ति, नीरोगता, मान-मर्यादा, सद्बुद्धि आदि जितनी अच्छी बातें हैं, उन सबका कारण पुण्य है। इसलिए यदि तू पुण्य-प्राप्ति के लिए कोई उपाय करे तो अच्छा हो। मैं तुझे तेरे हित की बात कहता हूँ कि इन यक्षादिक कुदेवों की पूजा-मानता छोड़कर, जो कि पुण्य-बन्ध का कारण नहीं है, जिनधर्म का विश्वास कर। इससे तू सत्पथ पर आ जायेगी और फिर तेरी आशा भी पूरी होने लगेगी। जयावती को मुनि का उपदेश रुचा और वह अब से जिनधर्म पर श्रद्धा करने लगी। चलते समय उसे ज्ञानी मुनि ने यह भी कह दिया था कि जिसकी तुझे चाह है वह चीज तुझे सात वर्ष के भीतर-भीतर अवश्य प्राप्त होगी। तू चिन्ता छोड़कर धर्म का पालन कर। मुनि का यह अंतिम वाक्य सुनकर जयावती को बड़ी भारी खुशी हुई और क्यों न हो? जिसकी कि वर्षों से उसके हृदय में भावना थी वही भावना तो अब सफल होने को है न! अस्तु! मुनि का कथन सत्य हुआ। जयावती ने धर्म के प्रसाद से पुत्र-रत्न का मुँह देख पाया। उसका नाम रखा गया सुकौशल। सुकौशल खूबसूरत और तेजस्वी था ॥२-९॥

सिद्धार्थ सेठ विषय-भोगों को भोगते-भोगते कंटाल गए थे। उनके हृदय की ज्ञानमयी आँखों ने उन्हें अब संसार का सच्चा स्वरूप बतला कर बहुत डरा दिया था। वे चाहते तो नहीं थे कि एक मिनट भी संसार में रहे, पर अपनी सम्पत्ति को सम्हाल लेने वाला कोई न होने से पुत्र-दर्शन तक, उन्हें लाचारी से घर में रहना पड़ा अब सुकौशल हो गया, इसका उन्हें बड़ा आनन्द हुआ। वे पुत्र का मुखचन्द्र देखकर और अपने सेठ पद का उसके ललाट पर तिलक कर आप श्री नयंधर मुनिराज के पास दीक्षा ले गए। अभी बालक को जन्मते ही तो देर न हुई कि सिद्धार्थ सेठ घर-बार छोड़कर योगी हो गए। उनकी इस कठोरता पर जयावती को बड़ा गुस्सा आया। न केवल सिद्धार्थ पर ही उसे गुस्सा आया किन्तु नयंधर मुनि पर भी। इसलिए कि उन्हें इस समय सिद्धार्थ को दीक्षा देना उचित न था और

हा कष्टं मोहतो जन्तुः सद्धर्मं त्यजति ध्रुवम्। जन्मान्धको यथा चिन्तामणिं हस्तस्थितं कुधीः ॥१३॥
वृद्धिं प्राप्य ततः सोपि सुकौशलवणिक्पतिः। द्वात्रिंशत्कुलजाः कन्याः परिणीय गुणोज्ज्वलाः ॥१४॥
नाना भोगान्प्रभुञ्जानः संस्थितः पूर्वपुण्यतः। जन्तूनां पूर्वपुण्येन सम्पदो विविधा भवेत् ॥१५॥
एकदा जननीभार्याधात्रिकाभिः समन्वितः। स्वप्रासादोपरिस्थोसौ सुकौशलवणिग्वरः ॥१६॥
पश्यन्पुरस्य सच्छोभां तत्रायातं मुनीश्वरम्। नाना देशान्विहृत्योच्चैर्दृष्ट्वा सिद्धार्थमद्भुतम् ॥१७॥
कोयं मातः सुधीरेवं पृष्टवान् जननीं मुदा। जयावती क्रुधा प्राह रंकोयं याति कोपि भो ॥१८॥
तदा सुकौशलेनोक्तं सावधानेन धीमता। सर्वलक्षणयुक्तत्वा-न्नायं रंको भवत्यहो ॥१९॥
सुनन्दा धात्रिकावोचत्तदा तन्मातरं प्रति। न युक्तं निन्दितं वाक्यं वक्तुं चास्य महामुनेः ॥२०॥

इसी कारण मुनि मात्र पर उसकी अश्रद्धा हो गई। उसने अपने घर में मुनियों का आना-जाना तक बन्द कर दिया। बड़े दुःख की बात है कि यह जीव मोह के वश हो धर्म को भी छोड़ बैठता है। जैसे जन्म का अन्धा हाथ में आए चिन्तामणि को खो बैठता है ॥१०-१३॥

वयः प्राप्त होने पर सुकौशल का अच्छे-अच्छे घराने की कोई बत्तीस कन्या-रत्नों से ब्याह हुआ। सुकौशल के दिन अब बड़े ऐशो आराम के साथ बीतने लगे। माता का उस पर अत्यन्त प्यार होने से नित नई वस्तुएँ उसे प्राप्त होती थीं। सैकड़ों दास-दासियाँ उसकी सेवा में सदा उपस्थित रहा करती थी। वह जो कुछ चाहता वह कार्य उसकी आँखों के इशारे मात्र से होता था। सुकौशल को कभी कोई बात के लिए चिन्ता न करनी पड़ती थी। सच है, जिनके पुण्य का उदय होता है उन्हें सब सुख-सम्पत्ति सहज में प्राप्त हो जाती हैं ॥१४-१५॥

एक दिन सुकौशल, अपनी माँ, अपनी स्त्री और अपनी धाय के साथ महल पर बैठा अयोध्या की शोभा तथा मन को लुभाने वाले प्रकृति की नई-नई सुन्दर छटाओं को देख-देखकर बड़ा खुश हो रहा था। उसकी दृष्टि कुछ दूर तक गई उसने एक मुनिराज को देखा। ये मुनि इसके पिता सिद्धार्थ ही थे। इस समय कई अन्य नगरों और गाँवों में विहार करते हुए ये आ रहे थे। इनके वंदन पर नाममात्र के लिए भी वस्त्र न देखकर सुकौशल बड़ा चकित हुआ। इसलिए कि पहले कभी उसने मुनि को देखा नहीं था। उनका अजीब वेष देखकर सुकौशल ने माँ से पूछा-माँ, यह कौन है? सिद्धार्थ को देखते ही जयावती की आँखों में खून बरस गया। वह कुछ घृणा और कुछ उपेक्षा कर बोली-बेटा, होगा कोई भिखारी, तुझे इससे क्या मतलब परन्तु अपनी माँ के इस उत्तर से सुकौशल को सन्तोष नहीं हुआ। उसने फिर पूछा-माँ, यह तो बड़ा खूबसूरत और तेजस्वी देख पड़ता है। तुम इसे भिखारी कैसे बताती हो? जयावती को अपने स्वामी पर ऐसी घृणा करते देख सुकौशल की धाय सुनन्दा से न रहा गया। वह बोल उठी-अरी ओ, तू इन्हें जानती है कि ये हमारे मालिक है। फिर भी तू इनके सम्बन्ध में ऐसा उल्टा सुझा रही है? तुझे यह योग्य नहीं। क्या हो गया यदि ये मुनि हो गए तो? इसके लिए क्या तुझे इनकी निन्दा करनी चाहिए? इसकी बात पूरी भी न हो पाई थी कि सुकौशल की माँ

मुग्धे कुलप्रभोस्ते च ततो रुष्टा तु सा जगौ। तिष्ठ मौनेन नेत्राभ्यां वारयामास धात्रिकाम् ॥२१॥
दुष्टस्त्रीमानसे नास्ति धर्मस्नेहः कदाचन। यथा ज्वलन्महावह्नि-मध्यभागो न शीतलः ॥२२॥
मात्राहं वंचितः कष्टं चिन्तयन्निजचेतसि। तदा सुकौशलो धीमान्सूपकारेण भाषितः ॥२३॥
जाता भोजनवेलेति भो स्वामिन्क्रियते कृपा। तथा मातृस्वभार्याभिः प्रेरितो भोजनाय सः ॥२४॥
तेनोक्तं धीमता तत्र मया सत्यस्वरूपकम्। अस्योत्तमपुरुषस्य ज्ञात्वा भोक्तव्यमित्यलम् ॥२५॥
ततः सुनन्दया धात्र्या प्रोक्तं पूर्वं प्रघट्टकम्। सुकौशलः समाकर्ण्य महावैराग्ययोगतः ॥२६॥
गत्वा तस्य मुनेः पार्श्वं नत्वा पादद्वयं मुदा। ज्ञात्वा धर्मस्य सद्भावं जिनेन्द्रैः परिकीर्त्तितम् ॥२७॥
सुभद्रायाः स्वभार्याया गर्भस्थाय सुताय च। दत्वा श्रेष्ठिपदं शीघ्रं त्यक्त्वा मोहादिकं धनम् ॥२८॥
नत्वा सिद्धार्थनामानं पुनस्तं मुनिसत्तमम्। दीक्षामादाय जैनेन्द्रीं मुनिर्जातो विचक्षणः ॥२९॥
यः सुधीः पूर्वपुण्येन संयुक्तो धर्मवत्सलः। सावधानो हिते नित्यं स केन भुवि वंच्यते ॥३०॥
आर्त्तध्यानेन सा मृत्वा श्रेष्ठिनी तु जयावती। देशे मगधसंज्ञे च गिरौ मौद्गिलनामनि ॥३१॥

ने उसे आँख के इशारे से रोककर कह दिया कि चुप क्यों नहीं रह जाती। तुझसे कौन पूछता है, जो बीच में ही बोल उठी! सच है, दुष्ट स्त्रियों के मन में धर्म-प्रेम कभी नहीं होता। जैसे जलती हुई आग का बीच का भाग ठंडा नहीं होता ॥१६-२२॥

सुकौशल ठीक तो न समझ पाया, पर उसे इतना ज्ञान हो गया कि माँ ने मुझे सच्ची बात नहीं बतलाई। इतने में रसोइया सुकौशल को भोजन कर आने के लिए बुलाने आया। उसने कहा–प्रभो, चलिए। बहुत समय हो गया। सब भोजन ठंडा हुआ जाता है। सुकौशल ने तब भोजन के लिए इंकार कर दिया। माता और स्त्रियों ने भी बहुत आग्रह किया, पर वह भोजन करने को नहीं गया। उसने साफ-साफ कह दिया कि जब तक मैं उस महापुरुष का सच्चा-सच्चा हाल न सुन लूँगा तब तक भोजन नहीं करूँगा। जयावती को सुकौशल के इस आग्रह से कुछ गुस्सा आ गया, सो वह तो वहाँ से चल दी। पीछे सुनन्दा ने सिद्धार्थ मुनि की सब बातें सुकौशल से कह दीं। सुनकर सुकौशल को कुछ दुःख भी हुआ, पर साथ ही वैराग्य ने उसे सावधान कर दिया। वह उसी समय सिद्धार्थ मुनिराज के पास गया और उन्हें नमस्कार कर धर्म का स्वरूप सुनने की उसने इच्छा प्रकट की। सिद्धार्थ ने उसे मुनिधर्म और गृहस्थ-धर्म का खुलासा स्वरूप समझा दिया। सुकौशल को मुनिधर्म बहुत पसन्द पड़ा। वह मुनिधर्म की भावना भाता हुआ घर आया और सुभद्रा की गर्भस्थ सन्तान को अपने सेठ पद का तिलक कर तथा सब माया-ममता, धन-दौलत और स्वजन-परिजन को छोड़कर श्री सिद्धार्थ मुनि के पास ही दीक्षा लेकर योगी बन गया। सच है–जिसे पुण्योदय से धर्म पर प्रेम है और जो अपना हित करने के लिए सदा तैयार रहता है, उस महापुरुष को कौन झूठी-सच्ची सुझाकर अपने कैद में रख सकता है, उसे धोखा दे ठग सकता है? ॥२३-३०॥

एक मात्र पुत्र और वह भी योगी बन गया। इस दुःख की जयावती के हृदय पर बड़ी गहरी

व्याघ्री स्वपापतो जाता त्रिपुत्रा क्रूरमानसा। मुक्त्वा धर्मं जिनन्द्रोक्तं जन्तुर्यात्येव दुर्गतिम् ॥३२॥
तदा तौ कर्मयोगेन मुनीन्द्रौ गुणशालिनौ। मौद्गिलपर्वते योगं गृहीत्वा भुवनोत्तमौ ॥३३॥
चतुर्मासोपवासान्ते पूर्णयोगे जगद्धितौ। चर्यार्थं निर्गतौ तौ च दृष्ट्वा व्याघ्री दुराशया ॥३४॥
संन्यासेन स्थितौ यावत्तया तावक्रमेण च। भक्षितौ मरणं प्राप्य तदा सारसमाधिना ॥३५॥
जातौ सर्वार्थसिद्धौ तौ सिद्धार्थाख्यसुकौशलौ। भाविमुक्तिश्रियः कान्तौ शान्तौ मे भवतां श्रिये ॥३६॥
सा व्याघ्री च समालोक्य खादन्ती तत्पलं तदा। सुकौशलकरे चारु लाञ्छनं भुवनोत्तमम् ॥३७॥
भूत्वा जातिस्मरी शीघ्रं त्यक्त्वा तत्पापकर्मकम्। हा कष्टं दुष्टसंसारे त्यक्तश्रीजैनसद्वृषाः ॥३८॥
भ्रमन्ति प्राणिनो मूढा मादृश्यः पापपंडिताः। पुत्रादीन्भक्षयन्तीति कृत्वा संसारनिन्दनम् ॥३९॥
संन्यासं च समादाय मृत्वा शुद्धाशयेन सा। प्राप्ता सौधर्मसत्स्वर्गं जीवानां शक्तिरद्भुता ॥४०॥

चोट लगी। वह पुत्र दुःख से पगली-सी बन गई। खाना-पीना उसके लिए जहर हो गया। उसकी सारी जिन्दगी ही धूलधानी हो गई वह दुःख और चिन्ता के मारे दिनोंदिन सूखने लगी। जब देखो तब ही उसकी आँखें आँसुओं से भरी रहती। मरते दम तक वह पुत्रशोक को न भूल सकी। इसी चिन्ता, दुःख, आर्त्तध्यान से उसके प्राण निकले। इस प्रकार बुरे भावों से मरकर मगध देश के मौद्गिल नाम के पर्वत पर उसने व्याघ्री का जन्म लिया। इसके तीन बच्चे हुए। यह अपने बच्चों के साथ पर्वत पर ही रहती थी। सच हैं, जो जिनेन्द्र भगवान् के पवित्र धर्म को छोड़ बैठते हैं, उनकी ऐसी ही दुर्गति होती है। विहार करते हुए सिद्धार्थ और सुकौशल मुनि ने भाग्य से इसी पर्वत पर आकर योग धारण कर लिया। योग पूरा हुए बाद जब ये भिक्षा के लिए शहर में जाने के लिए पर्वत पर से नीचे उतर रहे थे उसी समय वह व्याघ्री, जो कि पूर्वजन्म में सिद्धार्थ की स्त्री और सुकौशल की माता थी, इन्हें खाने को दौड़ी और जब तक कि ये संन्यास लेकर बैठते हैं, उसने इन्हें खा लिया। ये पिता-पुत्र समाधि से शरीर छोड़कर सर्वार्थसिद्धि में जाकर देव हुए। वहाँ से आकर अब वे निर्वाण लाभ करेंगे। ये दोनों मुनिराज आप भव्यजनों को और मुझे शान्ति प्रदान करें ॥३१-३६॥

जिस समय व्याघ्री ने सुकौशल को खाते-खाते उनका हाथ खाना शुरू किया, उस समय उसकी दृष्टि सुकौशल के हाथों के लाञ्छनों (चिह्नों) पर जा पड़ी। उन्हें देखते ही इसे अपने पूर्वजन्म का ज्ञान हो गया। जिसे वह खा रही है, वह उसी का पुत्र है, जिस पर उसका बेहद प्यार था, उसे ही वह खा रही है यह ज्ञान होते ही उसे जो दुःख, जो आत्म-ग्लानि हुई वह लिखी नहीं जा सकती। वह सोचती है, हाय! मुझसी पापिनी कौन होगी जो अपने ही प्यारे पुत्र को मैं खा रही हूँ! धिक्कार है मुझसी मूर्खिनी को जो पवित्र धर्म को छोड़कर अनन्त संसार को अपना वास बनाती है। उस मोह को, उस संसार को धिक्कार है जिसके वश हो यह जीव अपने हित-अहित को भूल जाता है और फिर कुमार्ग में फँसकर दुर्गतियों में दुःख उठाता है। इस प्रकार अपने किए कर्मों की बहुत कुछ आलोचना कर उस व्याघ्री ने संन्यास ग्रहण कर लिया और अन्त में शुद्ध भावों से मरकर व

अहो श्रीजैनसद्धर्म-प्रभावोभुवनोत्तमः। क्व व्याघ्री पापकर्मासौ क्व स्वर्गे सारसंभवः ॥४१॥
ततः श्रीजैनसद्धर्मो स्वर्गमोक्षसुखप्रदः। आराध्यो भक्तितो नित्यं भव्यैः स्वात्मप्रसिद्धये ॥४२॥
सिद्धश्रीमूलसंघाख्ये प्रोत्तुंगोदयभूधरे। भानुर्भट्टारकः स्वामी जीयान्मे मल्लिभूषणः ॥४३॥
प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभंगीतरङ्गैः निर्द्धूतैकान्तमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः।
श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेन्दुप्रवृद्धो।जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यः श्रुताब्धिः ॥४४॥

इति कथाकोशे भट्टारकश्रीमल्लिभूषणशिष्यब्रह्मनेमिदत्तविरचिते
श्रीसुकौशलश्रेष्ठिनः कथा समाप्ता।

५९. गजकुमारमुनेः कथा

प्रसिद्धं स्वगुणैः सिद्धं पूजार्थं जिननायकम्। नत्वा गजकुमारस्य कथयामि कथानकम् ॥१॥
श्रीमद्द्वारवतीपुर्यां प्रसिद्धायां जगत्त्रये। श्रीमन्नेमिजिनेन्द्रस्य पवित्रायां सुजन्मना ॥२॥

सौधर्मस्वर्ग में देव हुई। सच है–जीवों की शक्ति अद्‌भुत ही हुआ करती है और जैनधर्म का प्रभाव भी संसार में बड़ा ही उत्तम है। नहीं तो कहाँ तो पापिनी व्याघ्री और कहाँ उसे स्वर्ग की प्राप्ति इसलिए जो आत्मसिद्धि ने चाहने वाले हैं, उन भव्य जनों को स्वर्ग–मोक्ष को देने वाले पवित्र जैनधर्म का पालन करना चाहिए ॥३७-४२॥

श्री मूलसंघरूपी अत्यन्त ऊँचे उदयाचल से उदय होने वाले मेरे गुरु श्रीमल्लिभूषणरूपी सूर्य संसार में सदा प्रकाश करते रहें ॥४३॥

वे प्रभाचन्द्राचार्य विजयलाभ करें जो ज्ञान के समुद्र हैं। देखिए, समुद्र में रत्न होते हैं, आचार्य महाराज सम्यग्दर्शन रूपी श्रेष्ठ रत्न को धारण किए हैं। समुद्र में तरंगें होती हैं, ये भी सप्तभंगी रूपी तरंगों से युक्त हैं, स्याद्वाद विद्या के बड़े ही विद्वान् हैं। समुद्र की तरंगें जैसे कूड़ा–करकट निकाल बाहर फेंक देती हैं, इसी तरह ये अपनी सप्तभंगवाणी द्वारा एकान्त मिथ्यात्वरूपी कूड़े–करकट को हटा दूर करते थे, अन्य मतों के बड़े–बड़े विद्वानों को शास्त्रार्थ में पराजित कर विजयलाभ करते थे। समुद्र में मगरमच्छ घड़ियाल आदि अनेक भयानक जीव होते हैं, पर प्रभाचन्द्ररूपी समुद्र में उससे यह विशेषता थी, अपूर्वता थी कि उसमें क्रोध, मान, माया, लोभ, राग, द्वेष आदि भयानक मगरमच्छ न थे। समुद्र में अमृत रहता है और इनमें जिनेन्द्र भगवान् का वचनमयी निर्मल अमृत समाया हुआ था और समुद्र में अनेक तरह की बिकने योग्य वस्तुएँ रहती हैं ये भी व्रतों द्वारा उत्पन्न होने वाली पुण्यरूपी विक्रेय–वस्तु को धारण किए थे ॥४४॥

५९. गजकुमार मुनि की कथा

जिन्होंने अपने गुणों से संसार में प्रसिद्ध हुए और सब कामों को करके सिद्धि, कृत्यकृत्यता लाभ की है, उन जिन भगवान् को नमस्कार कर गजकुमार मुनि की कथा लिखी जाती है ॥१॥

वासुदेवोभवद्राजा त्रिखण्डेशो महाबलिः। तस्य गन्धर्वसेनायां राज्ञ्यां गजकुमारवाक् ॥३॥
पूत्रोभूद्भटकोटीनां मध्येसौ सुभटाग्रणीः। यत्प्रतापेन शत्रूणां दग्धा मानलता तता ॥४॥
पोदनादिपुरे राजा तथाभूदपराजितः। स च श्रीवासुदेवस्य नैव सिद्ध्यति दुष्टधीः ॥५॥
ततः श्रीवासुदेवेन घोषणा दापिता पुरे। योपराजितभूपालं समानयति विद्विषम् ॥६॥
तस्मै ददामि सत्प्रीत्या वाञ्छितं वरमुत्तमम्। श्रीमान् गजकुमारोसौ तत्समाकर्ण्य वेगतः ॥७॥
पितुः पादद्वयं नत्वा गत्वा तत्पोदनं पुरम्। युद्धेऽपराजितं जित्वा गृहीत्वा जीवितं द्रुतम् ॥८॥
समानीय त्रिखण्डोरु-स्वामिनस्तं समर्पयत्। दुःसाध्यं साध्यते केन सद्भटेन विना क्षितौ ॥९॥
वरं प्राप्य कुमारोसौ कामचारं सुलम्पटः। हठाद्द्वारवतीस्त्रीणां समूहं सेवते स्म च ॥१०॥
धिग्धिक्कामं दुराचारं महापापस्य कारणम्। यतो लज्जाभयं नैव कामिनां मुग्धचेतसाम् ॥११॥
श्रेष्ठिनः पांसुलस्यापि सुरत्याख्यास्ति कामिनी। प्रोल्लसद्रूपसंयुक्ता तस्यां सोपि रतोभवत् ॥१२॥

नेमिनाथ भगवान् के जन्म से पवित्र हुई प्रसिद्ध द्वारका के अर्धचक्री वासुदेव की रानी गन्धर्वसेना से गजकुमार का जन्म हुआ था। गजकुमार बड़ा वीर था। उसके प्रताप को सुनकर ही शत्रुओं की विस्तृत मानरूपी बेल भस्म हो जाती थी ॥२-३॥

पोदनपुर के राजा अपराजित ने तब बड़ा सिर उठा रखा था। वासुदेव ने उसे अपने काबू में लाने के लिए अनेक यत्न किए, पर वह किसी तरह इनके हाथ न पड़ा। तब इन्होंने शहर में यह डौंडी पिटवाई कि जो मेरे शत्रु अपराजित को पकड़ लाकर मेरे सामने उपस्थित करेगा, उसे उसका, मन चाहा वर मिलेगा। गजकुमार डौंडी सुनकर पिता के पास गया और हाथ जोड़कर उसने स्वयं अपराजित पर चढ़ाई करने की प्रार्थना की। उसकी प्रार्थना मंजूर हुई वह सेना लेकर अपराजित पर जा चढ़ा। दोनों ओर से घमासान युद्ध हुआ। अन्त में विजयलक्ष्मी ने गजकुमार का साथ दिया। अपराजित को पकड़ लाकर उसने पिता के सामने उपस्थित कर दिया। गजकुमार की इस वीरता को देखकर वासुदेव बहुत खुश हुए उन्होंने उसकी इच्छानुसार वर देकर उसे संतुष्ट किया ॥४-९॥

ऐसे बहुत कम अच्छे पुरुष निकलते हैं जो मनचाहा वर लाभकर सदाचारी और सन्तोषी बने रहें। परन्तु गजकुमार की उल्टी दशा हुई उसने मनचाहा वर पिताजी से लाभ कर अन्याय की ओर कदम बढ़ाया। वह पापी जबरदस्ती अच्छे-अच्छे घरों की सती स्त्रियों की इज्जत लेने लगा। वह ठहरा राजकुमार, उसे कौन रोक सकता था और जो रोकने की कुछ हिम्मत करता तो वह उसकी आँखों को काँटा खटकने लगता और फिर गजकुमार उसे जड़मूल से उखाड़कर फेंकने का यत्न करता। उस काम को, उस दुराचार को धिक्कार है, जिसके वश हो मूर्ख-जनों को लज्जा और भय भी नहीं रहता है ॥१०-११॥

इसी तरह गजकुमार ने अनेक अच्छी-अच्छी कुलीन स्त्रियों की इज्जत ले डाली। पर इसके

अन्तः पांसुलकश्चापि प्रज्वलन्कोपवह्निना। गृहे संतिष्ठते कष्टमक्षमस्तन्निवारणे ॥१३॥
एकदा केवलज्ञान-प्रकाशितजगत्त्रयः। श्रीमन्नेमिजिनः स्वामी सुरेन्द्राद्यैः प्रसेवितः ॥१४॥
भव्यपुण्योदयेनोच्चै-र्द्वारवत्यां समागतः। तत्र श्रीबलभद्रेण वासुदेवान्वितेन च ॥१५॥
अन्यैर्भूपादिभिः सर्वैः परमानन्दनिर्भरैः। तस्य श्रीजिननाथस्य पादपद्मद्वयं मुदा ॥१६॥
समभ्यर्च्य बलाद्यैश्च स्वर्गमोक्षसुखप्रदम्। स्तुत्वा नत्वा महाभक्त्या भावितं चेतसि स्थिरम् ॥१७॥
पुनस्ते धर्ममाकर्ण्य शर्मकोटिविधायकम्। मुनिश्रावकभेदाभ्यां श्रीमन्नेमिजिनोदितम् ॥१८॥
सन्तुष्टा मानसे गाढं स्तुतिं चक्रुर्जिनेशिनाम्। श्रुत्वा धर्मं जिनेन्द्राणां कस्यानन्दो न जायते ॥१९॥
तथा धर्मं समाकर्ण्य भक्त्या गजकुमारवाक्। त्रिधा वैराग्यमासाद्य कृत्वा निन्दां स्वकर्मणः ॥२०॥
दीक्षामादाय जैनेन्द्रीं भवभ्रमणनाशिनीम्। विहृत्योच्चैर्महीपीठं प्रान्तेऽसौ सत्तपोनिधिः ॥२१॥
ऊर्जयन्तमहोद्याने प्रायोपमरणे दृढः। संन्यासेन स्थितः स्वामी निश्चलो मेरुवत्तराम् ॥२२॥
तं तत्रस्थं कुधीर्ज्ञात्वा पांसुलो वैरतो द्रुतम्। गत्वा तत्र महाकोपात्तं संप्राप्य यतीश्वरम् ॥२३॥
सर्वतो लोहकीलैश्च कीलित्वा च प्रसन्धिषुः। नष्टः पापी समादाय भूरि पापस्य संचयम् ॥२४॥

दबदबे से किसी ने चूँ तक न किया। एक दिन पांसुल सेठ की सुरति नाम की स्त्री पर इसकी नजर पड़ी और उसने उसे खराब भी कर दिया। यह देख पांसुल का हृदय क्रोधाग्नि से जलने लगा। पर वह बेचारा उसका कुछ कर नहीं सकता था। इसलिए उसे भी चुपचाप घर में बैठा रह जाना पड़ा ॥१२-१३॥

एक दिन भगवान् नेमिनाथ भव्य-जनों के पुण्योदय से द्वारका में आए बलभद्र, वासुदेव तथा और बहुत से राजा-महाराजा बड़े आनन्द के साथ भगवान् की पूजा करने को गए। खूब भक्तिभावों से उन्होंने स्वर्ग-मोक्ष का सुख देने वाले भगवान् की पूजा-स्तुति की, उनका ध्यान-स्मरण किया। बाद में मुनि और गृहस्थ धर्म का भगवान् के द्वारा उन्होंने उपदेश सुना, जो कि अनेक सुखों का देने वाला है। उपदेश सुनकर सभी बहुत प्रसन्न हुए। उन्होंने बार-बार भगवान् की स्तुति की। सच है, साक्षात् सर्वज्ञ भगवान् का दिया सर्वोपदेश सुनकर किसे आनन्द या खुशी न होगी। भगवान् के उपदेश का गजकुमार के हृदय पर अत्यन्त प्रभाव पड़ा। वह अपने किए पापकर्मों पर बहुत पछताया। संसार से उसे बड़ी घृणा हुई। उसने उसी समय भगवान् के पास ही दीक्षा ले ली, जो संसार के भटकने को मिटाने वाली है। दीक्षा लेकर गजकुमार मुनि विहार कर गए। अनेक देशों और नगरों में विहार करते और भव्य-जनों को धर्मोपदेश द्वारा शान्तिलाभ कराते। अन्त में वे गिरनार पर्वत के जंगल में आए। उन्हें अपनी आयु बहुत थोड़ी जान पड़ी। इसलिए वे प्रायोपगमन संन्यास लेकर आत्म-चिंतन करने लगे। तब उनकी ध्यान-मुद्रा बड़ी निश्चल और देखने योग्य थी ॥१४-२२॥

उनके संन्यास का हाल पांसुल सेठ को जान पड़ा, जिसकी स्त्री को गजकुमार ने अपने दुराचारीपने की दशा में खराब किया था। सेठ को अपना बदला चुकाने को बड़ा अच्छा मौका हाथ लग गया। वह क्रोध से भर्राता हुआ गजकुमार मुनि के पास पहुँचा और उनके सब सन्धिस्थानों में

तदा गजकुमारोसौ मुनीन्द्रो जिनतत्त्ववित्। तां वेदनां सुधीश्चित्ते गणयंश्च तृणोपमाम् ॥२५॥
कृत्वा समाधिना कालं स्वर्गलोकं ययौ द्रुतम्। तत्र सौख्यं चिरंकालं भुंजानः सुखतः स्थितः ॥२६॥
अहो सतां महाचित्रं चारित्रं भुवनोत्तमम्। क्व वेदनाभवद्भूरिः क्व समाधिः प्रशर्मदः ॥२७॥
सकलभुवननाथश्रीजिनेन्द्रप्रणीतं विमलमुखनिवासं जैनधर्मं निशम्य।
विशदतरमतीशः संयमी योऽत्र जातो भवतु गजकुमारः शान्तयेऽसौ मुनीन्द्रः ॥२८॥

इति कथाकोशे गजकुमारमुनेः कथा समाप्ता।

६०. पणिकमुनेः कथा

श्रीजिनं शर्मदं नत्वा शान्तये सद्भिरर्चितम्। वक्ष्ये श्रीपणिकाख्यानं संक्षेपेण जगद्धितम् ॥१॥
पुरे पणीश्वरे रम्ये प्रजापालो महीपतिः। श्रेष्ठी सागरदत्ताख्यः पणिका श्रेष्ठिनी प्रिया ॥२॥
तयोः पुत्रः पवित्रात्मा संजातः पणिकाभिधः। सुधीः सन्मार्गसंसक्तो विरक्तः पापकर्मणि ॥३॥
एकदा पणिको धीमान्वर्द्धमानजिनेशिनः। समवादिसृतिं प्राप्य प्रोल्लसद्रत्नतोरणाम् ॥४॥

लोहे के बड़े-बड़े कीले ठोककर चलता बना। गजकुमार मुनि पर उपद्रव तो बड़ा ही दुःसह हुआ, पर वे जैनतत्त्व के अच्छे अभ्यासी थे, अनुभवी थे, इसलिए उन्होंने इस घोर कष्ट को एक तिनके के चुभने की बराबर भी न गिन बड़ी शान्ति और धीरता के साथ शरीर छोड़ा। यहाँ से ये स्वर्ग में गए। वहाँ अब चिरकाल तक वे सुख भोगेंगे। अहा! महापुरुषों का चरित बड़ा ही अचंभा पैदा करने वाला होता है। देखिये, कहाँ तो गजकुमार मुनि का ऐसा दुःसह कष्ट और कहाँ सुख देने वाली पुण्य-समाधि! इसका कारण सच्चा तत्त्वज्ञान है। इसलिए इस महत्ता को प्राप्त करने के लिए तत्त्वज्ञान का अभ्यास करना सबके लिए आवश्यक है ॥२३-२७॥

सारे संसार के प्रभु कहलाने वाले जिनेन्द्र भगवान् के द्वारा सुख के कारण धर्म का उपदेश सुनकर जो गजकुमार अपनी दुर्बुद्धि को छोड़कर पवित्र बुद्धि के धारक और बड़े भारी सहनशील योगी हो गए, वे हमें भी सुबुद्धि और शान्ति प्रदान करें, जिससे हम भी कर्तव्य के लिए कष्ट सहने में समर्थ हो सकें ॥२८॥

६०. पणिक मुनि की कथा

सुख के देने वाले और सत्पुरुषों से पूजा किए गए जिनेन्द्र भगवान् को नमस्कार कर श्री पणिक नाम के मुनि की कथा लिखी जाती है, जो सबका हित करने वाली है ॥१॥

पणीश्वर नामक शहर के राजा प्रजापाल के समय वहाँ सागरदत्त नाम का एक सेठ हो चुका है। उसकी स्त्री का नाम पणिका था। उसका एक लड़का था। उसका नाम पणिक था। पणिक सरल, शान्त और पवित्र हृदय का था। पाप कभी उसे छू भी न गया था। सदा अच्छे रास्ते पर चलना उसका कर्तव्य था। एक दिन वह भगवान् के समवसरण में गया, जो कि रत्नों के तोरणों से बड़ी

मानस्तंभादिसद्भूत्या जगच्चेतोनुरंजनम्। तत्र गंधकुटीमध्ये त्रिपीठेषु निरंजनम् ॥५॥
कनत्काञ्चनसद्रत्नसिंहासनमधिष्ठितम्। पूर्णेन्दुकान्तिविद्वेषिछत्रत्रयविराजितम् ॥६॥
तारहारोज्ज्वलैर्दिव्यैर्वीज्यमानं सुचामरम्। सूर्यकोटिप्रभाभारहारिसत्कान्तिमण्डितम् ॥७॥
सर्वसन्देहविध्वंसिदिव्यध्वनिसमन्वितम्। दुंदुभीनां महाध्वानर्भुवनत्रयशोभितम् ॥८॥
इन्द्रनागेन्द्रचन्द्रार्कनरेन्द्राद्यैः समर्चितम्। निर्ग्रन्थादिगुणोपेतं भव्यसन्दोहसंस्तुतम् ॥९॥
चतुस्त्रिंशन्महाश्चर्यै-र्भूषितं भुवनोत्तमम्। सच्चतुष्टयसंयुक्तं व्यक्तलोकत्रयक्रमम् ॥१०॥
दृष्ट्वा श्रीवर्द्धमानाख्यं जिनेन्द्रं मुक्तिसत्प्रियम्। त्रिः परीत्य लसद्भक्त्या समभ्यर्च्य कृतश्रियम् ॥११॥
नत्वा स्तुत्वा सतां स्तुत्यं धर्ममाकर्ण्य शर्मदम्। श्रुत्वास्तोकतरं स्वायुर्दीक्षामादाय निर्मदम् ॥१२॥
एकाकी विहरन्नुच्चैस्ततोऽसौ पणिको मुनि। गंगां नदीं समागत्य नौमध्ये चैकदा स्थितः ॥१३॥
नौर्निमज्जति यावत्सा तावत्सोपि मुनीश्वर। केवलज्ञानमुत्पाद्य सद्ध्यानान्मोक्षमाप्तवान् ॥१४॥

ही सुन्दरता धारण किए हुए था और अपनी मानस्तंभादि शोभा से सबके चित्त को आनन्दित करने वाला था। वहाँ उसने वर्धमान भगवान् को गंधकुटी पर विराजे हुए देखा। भगवान् की इस समय की शोभा अपूर्व और दर्शनीय थी। वे रत्न-जड़े सोने के सिंहासन पर विराजे हुए थे, पूनम के चन्द्रमा को शर्मिन्दा करने वाले तीन छत्र उन पर शोभा दे रहे थे, मोतियों के हार के समान उज्ज्वल और दिव्य चँवर उन पर ढुर रहे थे, एक साथ उदय हुए अनेक सूर्यों के तेज को जिनके शरीर की कान्ति दबाती थी, नाना प्रकार की शंकाओं को मिटाने वाली दिव्यध्वनि द्वारा जो उपदेश कर रहे थे, देवों के बजाये दुन्दुभि नाम के बाजों से आकाश और पृथ्वी मण्डल शब्दमय बन गया था। इन्द्र, नागेन्द्र, चक्रवर्ती, विद्याधर और बड़े-बड़े राजा-महाराजा आदि आ-आकर जिनकी पूजा करते थे, अनेक निर्ग्रन्थ मुनिराज उनकी स्तुति कर अपने को कृतार्थ कर रहे थे, चौंतीस प्रकार के अतिशयों से जो शोभित थे, अनन्तदर्शन, अनन्तज्ञान, अनन्तसुख और अनन्तवीर्य ऐसे चार अनन्त चतुष्टय आत्म-सम्पत्ति को धारण किये थे, जिन्हें संसार के सर्वोच्च महापुरुष का सम्मान प्राप्त था, तीनों लोकों को स्पष्ट देख-जानकर उसका स्वरूप भव्य-जनों को जो उपदेश कर रहे थे और जिनके लिए मुक्ति-रमणी वरमाला हाथ में लिए उत्सुक हो रही थी। पणिक ने भगवान् का ऐसा दिव्य स्वरूप देखकर उन्हें अपना सिर नवाया, उनकी स्तुति-पूजा की, प्रदक्षिणा दी और बैठकर धर्मोपदेश सुना। अन्त में उसने अपनी आयु के सम्बन्ध में भगवान् से प्रश्न किया। भगवान् के उत्तर से उसे अपनी आयु बहुत थोड़ी जान पड़ी। ऐसी दशा में आत्महित करना बहुत आवश्यक समझ पणिक वहीं दीक्षा ले साधु हो गया। यहाँ से विहार कर अनेक देशों और नगरों में धर्मोपदेश करते हुए पणिक मुनि एक दिन गंगा किनारे आए। नदी पार होने के लिए वे एक नाव में बैठे। मल्लाह नाव खेये जा रहा था कि अचानक एक प्रलय की-सी आँधी ने आकर नाव को खूब डगमग कर दिया, उसमें पानी भर आया, नाव डूबने लगी। जब तक नाव डूबती है पणिक मुनि ने अपने भावों को खूब उन्नत

स श्रीवणिक्सुतो धीमान्मेरुवन्निश्चलाशयः। कर्मसन्दोहशत्रुघ्नो दद्यान्मे शाश्वतीं श्रियम् ॥१५॥
श्रीमत्सागरदत्तनामपणिकासच्छ्रेष्ठिनीनन्दनः पूतात्मा पणिको विलोक्य शिवदं श्रीवर्द्धमानं जिनम्।
ज्ञात्वा स्वल्पतरं निजायुमखिलं त्यक्त्वा च मोहादिकं भूत्वा यस्तु मुनिः स मुक्तिमगमन्नित्यं सुखं मे क्रियात् ॥१६॥

इति कथाकोशे श्रीपणिकमुनेः कथा समाप्ता।

६१. श्रीभद्रबाहुमुनेः कथा

नत्वा जिनं जगद्भद्रं सुरासुरनमस्कृतम्। भद्रबाहोर्मुनीन्द्रस्य चरित्रं कथ्यते हितम् ॥१॥
पुण्ड्रवर्द्धनसद्देशे कोटीसन्नगरे वरे। राजा पद्मरथो धीमान्सोमशर्मा पुरोहितः ॥२॥
श्रीदेवी भामिनी तस्य तयोः पुत्रो बभूव च। भद्रबाहुर्गुणैर्भद्रो भद्रमूर्त्तिर्भवोत्तमः ॥३॥
एकदा प्रौढबालोऽसौ मौंजीबन्धे कृते सति। क्रीडां कुर्वन्पुरीबाह्ये भूरिबालजनैः सह ॥४॥
तत्र क्रीडाविधौ धीमान्गोलकांश्च त्रयोदश। क्रमेणोपरि संचक्रे बुद्ध्या हस्तकलान्वितः ॥५॥

दो हजार कोस का होता है) यहीं एक और शालिसिक्थ नाम का मच्छ इस बड़े मच्छ के कानों के पास रहता है। पर यह बहुत ही छोटा है और इस बड़े मच्छ के कानों का मैल खाया करता है। जब यह बड़ा मच्छ सैकड़ों छोटे-मोटे जल-जीवों को खाकर और मुँह फाड़े छह मास की गहरी नींद के खुर्राटे में मग्न हो जाता उस समय कोई एक-एक दो-दो योजन के लंबे-चौड़े कछुए, मछलियाँ, घड़ियाल, मगर आदि जल जन्तु, बड़े निर्भीक होकर इसके विकराल डाढों वाले मुँह में घुसते और बाहर निकलते रहते हैं तब यह छोटा सिक्थ-मच्छ रोज-रोज सोचा करता है कि यह बड़ा मच्छ कितना मूर्ख है जो अपने मुख में आसानी से आए हुए जीवों को व्यर्थ ही जाने देता है! यदि कहीं मुझे वह सामर्थ्य प्राप्त हुई होती तो मैं कभी एक भी जीव को न जाने देता। बड़े दुःख की बात है कि पापी लोग अपने आप ही ऐसे बुरे भावों द्वारा महान् पाप का बन्धकर दुर्गतियों में जाते हैं और वहाँ अनेक कष्ट सहते हैं। सिक्थ-मच्छ की भी यह दशा हुई वह इस प्रकार बुरे भावों से तीव्र कर्मों का बन्ध कर सातवें नरक गया क्योंकि मन के भाव ही तो पुण्य या पाप के कारण होते हैं। इसलिए सत्पुरुषों को जैन शास्त्रों के अभ्यास या पढ़ने-पढ़ाने से मन को सदा पवित्र बनाये रखना चाहिए, जिससे उसमें बुरे विचारों का प्रवेश ही न हो पाये और शास्त्रों के अभ्यास के बिना अच्छे बुरे का ज्ञान नहीं हो पाता, इसलिए शास्त्राभ्यास पवित्रता का प्रधान कारण है ॥२-११॥

यही जिनवाणी मिथ्यात्वरूपी अंधेरे को नष्ट करने के लिए दीपक है, संसार के दुःखों को जड़मूल से उखाड़ फेंकने वाली है, स्वर्ग-मोक्ष के सुख की कारण है और देव, विद्याधर आदि सभी महापुरुषों के आदर की पात्र है। सभी जिनवाणी की उपासना बड़ी भक्ति से करते हैं। आप लोग भी इस पवित्र जिनवाणी का शांति और सुख के लिए सदा अभ्यास मनन-चिन्तन करें ॥१२॥

७६. सुभौमचक्रवर्त्तिन आख्यानम्।

इन्द्रनागेन्द्रचन्द्रार्क्क-समर्चितपदद्वयम्। नत्वा जिनं प्रवक्ष्येऽहं सुभौमेशस्य वृत्तकम् ॥१॥
ईर्ष्यावति पुरे राजा कार्त्तवीर्यो गुणोज्ज्वलः। रेवती कामिनी तस्य तयोः पुत्रः सुभौमवाक् ॥२॥
अष्टमश्चक्रवर्त्ती च तस्य पाकविधायकः। जातो विजयसेनाख्यो नाना भोजनयुक्तिवित् ॥३॥
एकदा तेन भूपाय तस्मै सत्यायसाशनम्। दत्तमुष्णं प्रभोक्तुं च दग्धोसौ तेन चक्रभृत् ॥४॥
तत्पायसं प्रकोपेन ततस्तेनैव चक्रिणा। क्षिप्त्वा तन्मस्तके शीघ्रं मारितः सूपकारकः ॥५॥
मृत्वा विजयसेनोसौ भूत्वा क्षारसमुद्रके। ततो व्यन्तरदेवश्च ज्ञात्वा पूर्वप्रघट्टकम् ॥६॥
कोपात्तापसरूपेण सुभौमस्यास्य चक्रिणः। नाना मृष्टफलान्युच्चैः समानीय प्रदत्तवान् ॥७॥
तत्फलास्वादनात्तेन सम्प्रोक्तं चक्रवर्त्तिना। कुत्र सन्ति फलानीति महामृष्टानि तापस ॥८॥
ततस्तेन प्रपंचेन नीत्वा तं फललम्पटम्। समुद्रे प्रकटीभूय प्रोक्तमित्थं च शत्रुणा ॥९॥
रे रे दुष्ट ममप्राण-नाशकस्त्वं मदोद्धतः। क्व यासि त्वमिदानीं च हन्यतेऽत्र मया ध्रुवम् ॥१०॥

---

७६. सुभौम चक्रवर्ती की कथा

चारों प्रकार के देवों द्वारा जिनके चरण पूजे जाते हैं उन जिनेन्द्र भगवान् को नमस्कार कर आठवें चक्रवर्ती सुभौम की कथा लिखी जाती है ॥१॥

सुभौम ईर्ष्यावान् शहर के राजा कार्त्तवीर्य की रानी रेवती के पुत्र थे। चक्रवर्ती का एक विजयसेन नाम का रसोइया था। एक दिन चक्रवर्ती जब भोजन करने को बैठे तब रसोइये ने उन्हें गरम-गरम खीर परोस दी। उसके खाने से चक्रवर्ती का मुँह जल गया। इससे उन्हें रसोइये पर बड़ा गुस्सा आया। गुस्से से उन्होंने खीर रखे गरम बरतन को ही उसके सिर पर दे मारा। उससे उसका सारा सिर जल गया। इसकी घोर वेदना से मरकर वह लवणसमुद्र में व्यन्तर देव हुआ। कु-अवधिज्ञान से अपने पूर्वभव की बात जानकर सुभौम चक्रवर्ती पर उसके गुस्से का पार न रहा। प्रतिहिंसा से उसका जी बे-चैन हो उठा। तब वह एक तापसी बनकर अच्छे-अच्छे सुन्दर फलों को अपने हाथ में लिए चक्रवर्ती के पास पहुँचा। फलों को उसने चक्रवर्ती को भेंट किया। चक्रवर्ती उन फलों को खाकर बड़े प्रसन्न हुए। उन्होंने उस तापस से कहा-महाराज, ये फल तो बड़े ही मीठे हैं। आप ये फल कहाँ से लाये? और ये कहाँ मिलेंगे? तब उस व्यन्तर ने धोखा देकर चक्रवर्ती से कहा-समुद्र के बीच में एक छोटा सा टापू है। वहीं मेरा घर है। आप मुझ गरीब पर कृपा कर मेरे घर को पवित्र करें तो मैं आपको बहुत से ऐसे-ऐसे उत्तम और मीठे फल भेंट करूँगा। कारण वहाँ ऐसे फलों के बहुत बगीचे हैं। चक्रवर्ती लोभ में फँसकर व्यन्तर के फाँसे में आ गए और उसके साथ चल दिये। जब व्यन्तर उन्हें साथ लिए बीच समुद्र में पहुँचा तब अपने सच्चे स्वरूप में आ उसने बड़े गुस्से से चक्रवर्ती को कहा-पापी, जानता है कि मैं तुझे यहाँ क्यों लाया हूँ? यदि न जानता हो तो सुन-मैं तेरा जयसेन नाम का रसोइया था, तब तूने मुझे निर्दयता के साथ जलाकर मार डाला था। अब उसी का बदला लेने को मैं तुझे यहाँ लाया हूँ। बतला अब कहाँ जाएगा? जैसा किया उसका

यदा पञ्चनमस्काराँल्लिखित्वात्र जले द्रुतम्। पादेन स्पृशसि व्यक्तं तदा त्वं मुच्यते मया ॥११॥
तदासौ चक्रवर्ती च कृत्वा तत्कर्मनिन्दितम्। कुधीः प्राणक्षयाच्छीघ्रं सप्तमं नरकं गतः ॥१२॥
धिङ्मूढत्वमहो लोके लंपटत्वं हि धिक्तराम्। अष्टमश्चक्रभृच्चापि यतोसौ कुगतिं ययौ ॥१३॥
विश्वासेन विहीनोसौ धर्मे श्रीमज्जिनेशिनाम्। भवेद्दुर्गतिभाक्प्राणी यथासौ चक्रवर्त्तिकः ॥१४॥
धन्यास्ते जगतां पूज्या येषां चित्ते जिनेशिनः। नित्यं वाक्यामृतानि स्युः शर्मकारीणि देहिनाम् ॥१५॥
सम्यक्त्वं त्रिजगद्धितं भवहरं शक्रादिभिः पूजितं नाना शर्मविधायकं गुणकरं स्वर्गापवर्गप्रदम्।
तद्भक्त्याष्टविधं जिनेन्द्रकथितं श्रित्वा च मुक्तिश्रिये चित्ते भव्यमतल्लिका गतभयं संभावयन्तु प्रियम् ॥१६॥

इति कथाकोशे सुभौमचक्रवर्त्तिन आख्यानं समाप्तम्।

फल भोगने को तैयार हो जा। तुझसे पापियों की ऐसी गति होनी ही चाहिए। पर सुन, अब भी एक उपाय है, जिससे तू बच सकता है और वह यह कि यदि तू पानी में पंच नमस्कार मन्त्र लिखकर उसे अपने पाँवों से मिटा दे तो तुझे मैं जीता छोड़ सकता हूँ। अपनी जान बचाने के लिए कौन किस काम को नहीं कर डालता? ॥२-११॥

वह भला है या बुरा इसके विचार करने की तो उसे जरूरत ही नहीं रहती। उसे तब पड़ी रहती है अपनी जान की। यही दशा चक्रवर्ती महाशय की हुई उन्होंने तब नहीं सोच पाया कि इस अनर्थ से मेरी क्या दुर्दशा होगी? उन्होंने उस व्यन्तर के कहे अनुसार झटपट जल में मंत्र लिख कर पाँव से उसे मिटा डाला। उनका मन्त्र मिटाना था कि व्यन्तर ने उन्हें मारकर समुद्र में फेंक दिया। इसका कारण यह हो सकता है कि मंत्र को पाँव से मिटाने के पहले व्यन्तर की हिम्मत चक्रवर्ती को मारने की इसलिए न पड़ी होगी कि जगत्पूज्य जिनेन्द्र भगवान् के भक्त को वह कैसे मारे या यह भी संभव था कि उस समय कोई जिनशासन का भक्त अन्य देव उसे इस अन्याय से रोककर चक्रवर्ती की रक्षा कर लेता और अब मंत्र को पाँवों से मिटा देने से चक्रवर्ती जिनधर्म का द्वेषी समझा गया और इसलिए व्यन्तर ने उसे मार डाला। मरकर इस पाप के फल से चक्रवर्ती सातवें नरक गया। उस मूर्खता को, उस लम्पटता को धिक्कार है जिससे चक्रवर्ती सारी पृथ्वी का सम्राट् दुर्गति में गया। जिसका जिन भगवान् के धर्म पर विश्वास नहीं होता उसे चक्रवर्ती की तरह कुगति में जाना पड़े तो इसमें आश्चर्य क्या? वे पुरुष धन्य है और वे ही सबके आदर पात्र हैं, जिनके हृदय में सुख देने वाले जिन वचन रूप अमृत का सदा स्रोत बहता रहता है। इन्हीं वचनों पर विश्वास करने को सम्यग्दर्शन कहते हैं। यह सम्यग्दर्शन जीवमात्र का हित करने वाला है, संसार भय मिटाने वाला है, नाना प्रकार के सुखों का देने वाला है, और मोक्ष प्राप्ति का मुख्य कारण है। देव, विद्याधर आदि सभी बड़े-बड़े पुरुष सम्यग्दर्शन की या उसके धारण करने वाले की पूजा करते हैं। यह गुणों का खजाना है। सम्यग्दृष्टि को किसी प्रकार की भय-बाधा नहीं होती। वह बड़ी सुख-शान्ति से रहता है। इसलिए जो सच्चे सुख की आशा रखते हैं उन्हें आठ अंग सहित इस पवित्र सम्यग्दर्शन का विश्वास के साथ पालन करना चाहिए ॥१२-१६॥

७७. शुभनृपतेराख्यानम्

प्रणम्य परमानन्दं श्रीजिनेन्द्रजगद्धितम्। शुभाख्यभूपतेर्वच्मि चरित्रं विरतिप्रदम् ॥१॥
मिथिलानगरे राजा शुभो राज्ञी मनोरमा। तयोर्देवरतिः पुत्रः संजातः सुगुणाकरः ॥२॥
एकदा नगरे तत्र मुनीन्द्रो ज्ञानसंयुतः। नाम्ना देवगुरुर्धीमान्समायातः सुसंघभाक् ॥३॥
तदा महीपतिः सोपि शुभो भव्यजनैः सह। नत्वा मुनिं जगत्पूज्यं धर्ममाकर्ण्य पृष्टवान् ॥४॥
अहो मुने क्व मे जन्म भविष्यति विचक्षण। तच्छ्रुत्वा स मुनिः प्राह सुधीर्देवगुरुः स्फुटम् ॥५॥
निजवर्चो गृहे राजंस्त्वं भविष्यसि पापतः। महाकृमिर्मुनीन्द्राणां मानसे न भयं क्वचित् ॥६॥
नगर्याश्च प्रवेशे ते विट्प्रवेशो मुखे ध्रुवम्। छत्रभंगस्तथा विद्धि साभिज्ञानमिति स्फुटम् ॥७॥
सप्तमे च दिने भूप विद्युत्पातेन ते क्षयः। भविष्यति भवेदत्र प्राणिनां पापतो न किम् ॥८॥
पुरं प्रविशतश्चापि ततस्तस्य महीपतेः। रथाश्वचरणोद्घातान्मुखे गूथः प्रविष्टवान् ॥९॥
महावायुप्रवेगेन छत्रभंगोभवत्तदा। दुष्टपापोदये जन्तोः किं किं न स्याद्विरूपकम् ॥१०॥

---

७७. शुभ राजा की कथा

संसार का हित करने वाले जिनेन्द्र भगवान् को प्रसन्नता पूर्वक नमस्कार कर शुभ नाम के राजा की कथा लिखी जाती है। मिथिला नगर के राजा शुभ की रानी मनोरमा के देवरति नाम का एक पुत्र था। देवरति गुणवान् और बुद्धिमान् था। किसी प्रकार का दोष या व्यसन उसे छू तक न गया था ॥१-२॥

एक दिन देवगुरु नाम के अवधिज्ञानी मुनिराज अपने संघ को साथ लिए मिथिला आए। शुभ राजा तब बहुत से भव्यजनों के साथ मुनि-पूजा के लिए गया। मुनिसंघ की सेवा-पूजा कर उसने धर्मोपदेश सुना। अन्त में उसने अपने भविष्य के सम्बन्ध का मुनिराज से प्रश्न किया-योगिराज, कृपाकर बतलाइए कि आगे मेरा जन्म कहाँ होगा? उत्तर में मुनिराज ने कहा-राजन् सुनिए-पाप कर्मों के उदय से तुम्हें आगे के जन्म में तुम्हारे ही पाखाने में एक बड़े कीड़े की देह प्राप्त होगी, शहर में घुसते समय तुम्हारे मुँह में विष्टा प्रवेश करेगा, तुम्हारा छत्रभंग होगा और आज के सातवें दिन बिजली गिरने से तुम्हारी मौत होगी। सच है-जीवों के पाप के उदय से सभी कुछ होता है। मुनिराज ने ये सब बातें राजा से बड़े निडर होकर कहीं और यह ठीक भी है कि योगियों के मन में किसी प्रकार का भय नहीं रहता। मुनि का शुभ के सम्बन्ध का भविष्य-कथन सच होने लगा। एक दिन बाहर से लौट कर जब वे शहर में घुसने लगे तब घोड़े के पाँवों की ठोकर से उड़े हुए थोड़े से विष्टा का अंश उनके मुँह में आ गिरा और यहाँ से वे थोड़े ही आगे बढ़े होंगे कि एक जोर की आँधी ने उनके छत्र को तोड़ डाला। सच है, पाप कर्मों के उदय से क्या नहीं होता। उन्होंने तब अपने पुत्र देवरति को बुलाकर कहा-बेटा, मेरे कोई ऐसा पापकर्म का उदय आएगा उससे मैं मरकर अपने पाखाने में पाँच रंग का कीड़ा होऊँगा, सो तुम उस समय मुझे मार डालना। इसलिए कि फिर मैं कोई अच्छी गति प्राप्त कर सकूँ। उक्त घटना को देखकर शुभ को यद्यपि यह एक तरह निश्चय-सा हो

सुतं प्राह ततो भूपः पुत्र वर्चोगृहेऽहकम्। पञ्चवर्णः कृमिः पापाद्-भविष्यामि तदा त्वया ॥११॥
स हन्तव्य इति प्रोक्त्वा भीत्वा विद्युत्प्रपाततः। कारयित्वा महालोहमंजूषां तां प्रविश्य च ॥१२॥
तस्थौ गंगाह्लदे यावत्तावत्सप्तमवासरे। सा मंजूषा स्वपापेन मत्स्येनोच्छादिता द्रुतम् ॥१३॥
तस्मिन्नेव क्षणे कष्टं विद्युत्पातेन स प्रभुः। मृत्वा वर्चोगृहे जातः कृमिजन्तुः स्वपापतः ॥१४॥
स देवरतिपुत्रेण मार्यमाणोऽपि विट्चयम्। प्रणश्य गतवानित्थं भुंक्ते जन्तुः स्वकर्मकम् ॥१५॥
तदा देवरतेर्वाक्याच्छ्रुत्वा तद्वृत्तकं जनाः। भीत्वा संसारचेष्टाया जिनधर्मे तरां रताः ॥१६॥
सोपि देवरतिर्धीमान्महावैराग्यभावतः। विधाय संसृतेर्निन्दां मुनिर्जातो विचक्षणः ॥१७॥

गया था कि मुनिराज की कहीं बातें सच्ची हैं और वे अवश्य होंगी पर तब भी उनके मन में कुछ-कुछ सन्देह बना रहा और इसी कारण बिजली गिरने के भय से डरकर उन्होंने एक लोहे की बड़ी मजबूत सन्दूक मँगवाई और उसमें बैठकर गंगा के गहरे जल में उसे रख आने को नौकरों को आज्ञा की। इसलिए कि जल में बिजली का असर नहीं होता। उन्हें आशा थी कि मैं इस उपाय से रक्षा पा जाऊँगा। पर उनकी ये बे-समझी थी। कारण प्रत्यक्ष-ज्ञानियों की कोई बात कभी झूठी नहीं होती। जो हो, सातवाँ दिन आया। आकाश में बिजलियाँ चमकने लगीं। इसी समय भाग्य से एक बड़े मच्छ ने राजा की उस सन्दूक को एक ऐसा जोर का उथेला दिया कि सन्दूक जल के बाहर दो हाथ ऊँचे तक उछल आयी सन्दूक का बाहर होना था कि इतने में बड़े जोर से कड़क कर उस पर बिजली आ गिरी। खेद है कि उस बिजली के गिरने से राजा अपने यत्न में कामयाब न हुए और आखिर वे मौत के मुँह में पड़ ही गए। मरकर वह मुनिराज के कहे अनुसार पाखाने में कीड़ा हुए। पिता के कहे अनुसार जब देवरति ने जाकर देखा तो सचमुच एक पाँच रंग का कीड़ा उसे देख पड़ा और तब उसने उसे मार डालना चाहा। पर जैसे ही देवरति ने हाथ का हथियार उसके मारने को उठाया, वह कीड़ा उस विष्टा के ढेर में घुस गया। देवरति को इससे बड़ा अचम्भा हुआ। उसने जिन-जिन से इस घटना का हाल कहा, उन सब को संसार की इस भयंकर लीला को सुन बड़ा डर मालूम हुआ। उन्होंने तब संसार का बन्धन काट देने के लिए जैनधर्म का आश्रय लिया, कितनों ने सब माया-ममता तोड़ जिनदीक्षा ग्रहण की और कितनों ने अभ्यास बढ़ाने को पहले श्रावकों के व्रत ही लिए ॥३-१६॥

देवरति को इन घटना से बड़ा अचम्भा हो ही रहा था, सो एक दिन उसने ज्ञानी मुनिराज से इसका कारण पूछा-भगवन्! क्यों तो मेरे पिता ने मुझसे कहा कि मैं विष्टा में कीड़ा होऊँगा सो मुझे तू मार डालना और जब मैं उस कीड़े को मारने जाता हूँ तब वह भीतर ही भीतर घुसने लगता है। मुनि ने उसके उत्तर में देवरति से कहा-भाई, जीव गति सुखी होता है फिर चाहे वे कितनी ही बुरी से बुरी जगह भी क्यों न पैदा हो। वह उसी में अपने को सुखी मानेगा, वहाँ से कभी मरना पसन्द न करेगा। यही कारण है कि जब तक तुम्हारे पिता जीते थे तब तक उन्हें मनुष्य जीवन से प्रेम था, उन्होंने न मरने के लिए यत्न भी किया, पर उन्हें सफलता न मिली और ऐसी उच्च मनुष्य गति से

सकलभुवनसारं दत्तसंसारपारं दुरितशतनिवारं यस्य वाक्यं सुतारम्।
स सृजतु जिनदेवो देवदेवेन्द्रवन्द्यो निजचरणसुसेवां मुक्तिपर्यन्तमुच्चैः ॥१८॥
इति कथाकोशे शुभनृपस्याख्यानं समाप्तम्।

७८. सुदृष्टेराख्यानम्

नत्वा जगत्त्रयाधीशैः पूजितं श्रीजिनेश्वरम्। वक्ष्ये सुदृष्टिसन्नामरत्नविज्ञानिवृत्तकम् ॥१॥
उज्जयिन्यां महाराजः प्रजापालः प्रजाहितः। श्रीमज्जिनेन्द्रपादाब्जसेवनैकमधुव्रतः ॥२॥
राज्ञी च सुप्रभा तस्य सती सद्रूपमण्डिता। तदेव भुवने भाति रूपं यच्छीलसंयुतम् ॥३॥
तत्रैव पत्तने जातो रत्नविज्ञानिको महान्। सुदृष्टिर्नामतस्तस्य भार्याभूद्विमला कुधीः ॥४॥

वे मरकर कीड़ा होंगे, सो भी विष्टा में। उसका उन्हें खेद था और इसलिए उन्होंने तुमसे उस अवस्था में मार डालने को कहा था। पर अब उन्हें वही जगह अत्यन्त प्यारी हैं, वे मरना पसन्द नहीं करते। इसलिए जब तुम उस कीड़ा को मारने जाते हो तब वह भीतर घुस जाता है। इसमें आश्चर्य और खेद करने की कोई बात नहीं। संसार की स्थिति ही ऐसी है। मुनिराज द्वारा यह मार्मिक उपदेश सुनकर देवरति को बड़ा वैराग्य हुआ। वह संसार छोड़कर, इसलिए कि उसमें सार कुछ नहीं है, मुनिपद स्वीकार कर आत्महित साधक योगी हो गया। जिनके वचन पापों के नाश करने वाले हैं, सर्वोत्तम हैं और संसार का भ्रमण मिटाने वाले हैं, वे देवों द्वारा, पूजे जाने वाले जिन भगवान् मुझे तब तक अपने चरणों को सेवा का अधिकार दें जब तक कि मैं कर्मों का नाश कर मुक्ति प्राप्त न कर लूँ ॥१७-१८॥

७८. सुदृष्टि सुनार की कथा

देवों, विद्याधरों, राजाओं और महाराजाओं द्वारा पूजा किए जाने वाले जिन भगवान् को नमस्कार कर सुदृष्टि नामक सुनार की, जो रत्नों के काम में बड़ा होशियार था, कथा लिखी जाती है ॥१॥

उज्जैन के राजा प्रजापाल बड़े प्रजाहितैषी, धर्मात्मा और भगवान् के सच्चे भक्त थे। उनकी रानी का नाम सुप्रभा था। सुप्रभा बड़ी सुन्दरी और सती थी। सच है-संसार में वही रूप और वही सौन्दर्य प्रशंसा के लायक होता है जो शील से भूषित हो ॥२-३॥

यहाँ एक सुदृष्टि नाम का सुनार रहता था। जवाहरात के काम में यह बड़ा चतुर था तथा सदाचारी और सरल-स्वभावी था। इसकी स्त्री का नाम विमला था, विमला दुराचारिणी थी। अपने घर में रहने वाले एक वक्र नाम के विद्यार्थी से, जिसे कि सुदृष्टि अपने खर्च से लिखाता-पढ़ाता था, विमला का अनुचित सम्बन्ध था। विमला अपने स्वामी से बहुत नाखुश थी। इसलिए उसने अपने प्रेमी वक्र को उस्का कर, उसे कुछ भली-बुरी सुझाकर सुदृष्टि का खून करवा दिया। खून उस समय किया गया जब कि सुदृष्टि विषय-सेवन में मग्न था। सो यह मरकर विमला के ही गर्भ में

वक्राख्यो दुष्टधीस्तस्या गृहे छात्रः प्रवर्त्तते। तेन सार्द्धं दुराचारं सा करोति स्म पापिना ॥५॥
एकदा विमलायाश्च वाक्यतः सोपि वक्रकः। सुदृष्टिं मारयामास कुर्वन्तं कामसेवनम् ॥६॥
स्ववीर्येण समं तत्र सुदृष्टिः कर्मयोगतः। मृत्वासौ विमलागर्भे पुत्रोभूत्कतिचिद्दिनैः ॥७॥
अहो संसारिणो जीवाः स्वकर्मवशवर्त्तिनः। नाना रूपं प्रयान्त्युच्चैर्नटाचार्यो यथा भुवि ॥८॥
अथैकदा महोद्याने चैत्रमासे मनोहरे। सुप्रभाया महाराज्ञ्याः क्रीडन्त्या भूभुजा समम् ॥९॥
कण्ठस्थितो महाहारो नाम्ना क्रीडाविलासकः। त्रुटितः प्रोल्लसत्कान्तिमण्डितो रचनान्वितः ॥१०॥
केनापि स्वर्णकारेण न हारो रचितस्तथा। सारपुण्यं विना केन सद्विज्ञानं हि लभ्यते ॥११॥
तं हारं च समालोक्य तदा स विमलासुतः। भूत्वा जातिस्मरो धीमानरचयामास पूर्ववत् ॥१२॥
ज्ञानविज्ञानसद्दानं पूजनं श्रीजिनेशिनाम्। पूर्वाभ्यासेन जन्तूनां समायाति स्वपुण्यतः ॥१३॥
प्रजापालो नृपः प्राह तदा सन्तुष्टमानसः। सुदृष्टेर्निर्मितो हारः कथं भो रचितस्त्वया ॥१४॥
तच्छ्रुत्वा स जगादेवं भो नरेन्द्र महामते। अहमेव भवाम्यत्र सुदृष्टिः परमार्थतः ॥१५॥
पूर्ववृत्तान्तमाकर्ण्य स राजा जैनतत्त्ववित्। ज्ञात्वा संसारवैचित्र्यं मुनिर्जातो गुणोज्ज्वलः ॥१६॥

आया। विमला ने कुछ दिनों बाद पुत्र प्रसव किया। आचार्य कहते हैं कि संसार की स्थिति बड़ी ही विचित्र है जो पल भर में कर्मों की पराधीनता से जीवों का अजब परिवर्तन हो जाता है। वे नट की तरह क्षणक्षण में रूप बदला ही करते हैं ॥४-८॥

चैत का महीना था वसन्त शोभा ने सब ओर अपना साम्राज्य स्थापित कर रखा था। वन उपवनों की शोभा मन को मोह लेती थी। इसी सुन्दर समय में एक दिन महारानी सुप्रभा अपने खास बगीचे में प्राणनाथ के साथ हँसी विनोद कर रही थी। इसी हँसी-विनोद में उसका क्रीड़ा-विलास नाम का सुन्दर बहुमूल्य हार टूट पड़ा। उसके सब रत्न बिखर गए। राजा ने उसे फिर वैसा ही बनवाने का बहुत यत्न किया, जगह-जगह से अच्छे सुनार बुलवाए पर हार पहले सा किसी से नहीं बना। सच है-बिना पुण्य के कोई उत्तम कला या ज्ञान नहीं होता। इसी टूटे हुए हार को विमला के लड़के ने अर्थात् पूर्वभव के उसके पति सुदृष्टि ने देखा। देखते ही उसे जातिस्मरण पूर्व जन्म का ज्ञान हो गया। उससे उसने इस हार को पहले-जैसा ही बना दिया। इसका कारण यह था कि इस हार को पहले भी सुदृष्टि ने ही बनाया था और यह बात सच है कि इस जीव को पूर्व जन्म के संस्कार पुण्य से ही कला-कौशल, ज्ञान-विज्ञान दान-पूजा आदि सभी बातें प्राप्त हुआ करती है। प्रजापाल उसकी ऐसी होशियारी देखकर बड़े प्रसन्न हुए। उन्होंने उससे पूछा भी कि भाई, यह हार जैसा सुदृष्टि का बनाया था वैसा ही तुमने कैसे बना दिया? तब वह विमला का लड़का मुँह नीचा कर बोला-राजाधिराज, मैं अपनी कथा आपसे क्या कहूँ। आप यह समझें कि वास्तव में मैं ही सुदृष्टि हूँ। इसके बाद उसने बीती हुई सब घटना राजा से कह सुनाई। वे संसार की इस विचित्रता को सुनकर विषय-भोगों से बड़े विरक्त हुए। उन्होंने उसी समय सब माया-जाल छोड़कर आत्महित का पथ जिनदीक्षा ग्रहण कर ली ॥९-१६॥

त्रिधा वैराग्यमासाद्य सोपि श्रीविमलासुतः। दीक्षामादाय जैनेन्द्रीं स्वर्गमोक्षसुखप्रदाम् ॥१७॥
मुनिर्भूत्वा विशुद्धात्मा तपः कुर्वन्मनोहरम्। भव्यान्सम्बोधयन्नुच्चैर्विहरंश्च महीतले ॥१८॥
सौरीपुरोत्तरे भागे यमुनाया लसत्तटे। शुक्लध्यानेन कर्मारि-लोकालोकप्रकाशकम् ॥१९॥
केवलज्ञानमुत्पाद्य भूत्वा त्रैलोक्यपूजितः। मुक्तिं संप्राप्तवान्स्वामी सोस्माकं शान्तयेस्तु वै ॥२०॥
स श्रीमान्भवसिन्धुतारणपरः सत्केवलज्ञानभाक् कर्मारातिविनाशकृच्छिवपतिर्देवेन्द्रवृन्दार्चितः ।
लोकालोकविलोकनैकचतुरः स्वर्गापवर्गप्रदो भूयान्मे भवतां च पूजितपदः सच्छ्रेयसे श्रीजिनः ॥२१॥

इति कथाकोशे सुदृष्टेराख्यानं समाप्तम्।

७९. धर्मसिंहमुनेराख्यानम्

सर्वदेवेन्द्रचन्द्राद्यै-र्वन्दितं श्रजिनेशिनम्। नत्वा श्रुताब्धिमाप्तं च धर्मसिंहकथां ब्रुवे ॥१॥
दक्षिणादिपथे ख्याते कौशलादिगिरौ पुरे। वीरसेनो महीनाथो राज्ञी वीरमती सती ॥२॥
चन्द्रभूतिस्तयोः पुत्रश्चन्द्रश्रीश्च सुताभवत्। रूपलावण्यसौभाग्यमण्डिता यौवनाश्रिता ॥३॥
कौशलाख्ये तथा देशे पुरे कौशलनामनि। धर्मसिंहो महाराजस्तां कन्यां परिणीतवान् ॥४॥

इधर विमला के लड़के को भी अत्यन्त वैराग्य हुआ। वह स्वर्ग-मोक्ष के सुखों को देने वाली जिनदीक्षा लेकर योगी बन गया। यहाँ से फिर यह विशुद्धात्मा धर्मोपदेश के लिए अनेक शहरों में घूम-फिर कर तपस्या करता हुआ और अनेक भव्यजनों को आत्महित के मार्ग पर लगाता हुआ शौरीपुर के उत्तर भाग में यमुना के पवित्र किनारे पर आकर ठहरा। यहाँ शुक्लध्यान द्वारा कर्मों का नाश कर इसने लोकालोक का ज्ञान कराने वाला केवलज्ञान प्राप्त किया और संसार द्वारा पूज्य होकर अन्त में मुक्ति लाभ किया। वे विमला-सुत मुनि मुझे शान्ति दें ॥१७-२०॥

वे जिन भगवान् आप भव्यजनों को और मुझे मोक्ष का सुख दें, जो संसार-सिन्धु में डूबते हुए, असहाय-निराधार जीवों को पार करने वाले हैं, कर्म-शत्रुओं का नाश करने वाले है।, संसार के सब पदार्थों को देखने वाले केवलज्ञान से युक्त हैं, सर्वज्ञ हैं, स्वर्ग तथा मोक्ष का सुख देने वाले हैं और देवों, विद्याधरों, चक्रवर्तियों आदि प्रायः सभी महापुरुषों से पूजा किए जाते हैं ॥२१॥

७९. धर्मसिंह मुनि की कथा

इस प्रकार के देवों द्वारा जो पूजा-स्तुति किए जाते हैं और ज्ञान के समुद्र हैं, उन जिनेन्द्र भगवान् को नमस्कार कर धर्मसिंह मुनि की कथा लिखी जाती है ॥१॥

दक्षिण देश के कौशलगिर नगर के राजा वीरसेन की रानी वीरमती के दो सन्तान थीं। एक पुत्र और एक कन्या थी। पुत्र का नाम चन्द्रभूति और कन्या का चन्द्रश्री था। चन्द्रश्री बड़ी सुन्दर थी। उसकी सुन्दरता देखते ही बनती थी। कौशल देश और कौशल ही शहर के राजा धर्मसिंह के साथ चन्द्रश्री का विवाह हुआ था। दोनों दम्पति सुख से रहते थे। नाना प्रकार की भोगोपभोग वस्तुएँ सदा

तया सार्द्धं महाभोगान्स भुञ्जानः स्वपुण्यतः। दानपूजादिसत्कर्मतत्परः सुचिरं स्थितः ॥५॥
एकदा स महीनाथो धर्मसिंहो विशुद्धधीः। नत्वा दमधराचार्य मुनीन्द्रं सत्तपोनिधिम् ॥६॥
धर्ममाकर्ण्य जैनेन्द्रं सुरेन्द्राद्यैः समर्चितम्। त्रिधा वैराग्यमासाद्य मुनिर्जातो गुणोज्ज्वलः ॥७॥
चन्द्रश्रीभगिनीं वीक्ष्य दुःखितां चन्द्रभूतिना। हठादसौ समानीय तस्याश्चैव समर्पितः ॥८॥
गत्वा सोपि पुनर्दीक्षां समादाय प्रवेगतः। मुनिर्भूत्वा महाघोरं करोति स्म सुधीस्तपः ॥९॥
तथैकदा समालोक्य चन्द्रभूतिं दुराशयम्। आगच्छन्तं मुनीन्द्रोसौ धर्मसिंहो गुणाकरः ॥१०॥
पुनर्मेऽसौ तपोभङ्गं कारयिष्यति मानसे। संविचार्य तदा शीघ्रं व्रतरक्षणहेतवे ॥११॥
संप्रविश्य विशुद्धात्मा मृतहस्तिकलेवरम्। संन्यासेन ततो मृत्वा स्वर्गलोकं सुधीर्ययौ ॥१२॥
अहो भव्यैः प्रकर्त्तव्यं कष्टेऽपि व्रतरक्षणम्। येन सौख्यं भवेदुच्चैः स्वर्गमोक्षादिसंभवम् ॥१३॥
श्रीमज्जैनविशुद्धधर्मरसिकः श्रीधर्मसिंहो मुनिः कृत्वा सारतपो जिनेन्द्रगदितं स्वर्गापवर्गप्रदम्।
प्राप्तः स्वर्गसुखं प्रसिद्धमहिमा तत्पुण्यतो निर्मलं स श्रीमान्गुणरत्नरंजितमतिः कुर्याच्च मे मंगलम् ॥१४॥

इति कथाकोशे धर्मसिंहमुनेराख्यानं समाप्तम्।

उनके लिए मौजूद रहती थी। इतना होने पर भी राजा का धर्म पर पूर्ण विश्वास था, अगाध श्रद्धा थी। वे सदा दान, पूजा, व्रतादि धर्म कार्य करते थे ॥२-५॥

एक दिन धर्मसिंह तपस्वी दमधर मुनि के दर्शनार्थ गए। उनकी भक्ति से पूजा-स्तुति कर उन्होंने उनसे धर्म का पवित्र उपदेश सुना, जो धर्म देवों द्वारा भी बड़ी भक्ति के साथ पूजा जाता है। धर्मोपदेश का धर्मसिंह के चित्त पर बड़ा गहरा असर पड़ा। उससे वे संसार और विषय-भोगों से विरक्त हो गए और मुनि दीक्षा ले ली। उनकी रानी चन्द्रश्री को उन्हें जवानी में दीक्षा ले जाने से बड़ा कष्ट हुआ। पर बेचारी लाचार थी। उसके दुःख की बात जब उसके भाई चन्द्रभूति को मालूम हुई तो उसे भी अत्यन्त दुःख हुआ। उससे अपनी बहिन की यह हालत न देखी गई। उसने तब जबरदस्ती अपने बहनोई धर्मसिंह को उठा लाकर चन्द्रश्री के पास ला रखा। धर्मसिंह फिर भी न ठहरे और जाकर उन्होंने पुनः दीक्षा ले ली और महा तप तपने लगे ॥६-९॥

एक दिन इसी तरह वे तपस्या कर रहे थे। तब उन्होंने चन्द्रभूति को अपनी ओर आता हुआ देखा। उन्होंने समझ लिया कि यह फिर मेरी तपस्या बिगाड़ेगा। सो तप की रक्षा के लिए पास ही पड़े हुए मृत हाथी के शरीर में घुसकर उन्होंने समाधि ले ली और अन्त में शरीर छोड़कर वे स्वर्ग में गए। इसलिए भव्यजनों को कष्ट के समय भी अपने व्रत की रक्षा करनी चाहिए। जिससे स्वर्ग या मोक्ष का सर्वोच्च सुख प्राप्त होता है ॥१०-१३॥

निर्मल जैनधर्म के प्रेमी श्रीधर्मसिंह मुनि ने जिन भगवान् के उपदेश किए और स्वर्ग-मोक्ष के देने वाले तप मार्ग का आश्रय ले उसके पुण्य से स्वर्ग-सुख लाभ किया। वे संसार प्रसिद्ध महात्मा और अपने गुणों से सबकी बुद्धि पर प्रकाश डालने वाले मुझे भी मंगल-सुख दान करें ॥१४॥

८०. वृषभसेनस्याख्यानम्

नत्वा जिनं जगत्पूज्यं स्वर्गमोक्षसुखप्रदम्। वक्ष्ये वृषभसेनस्य सच्चरित्रं सतामिदम् ॥१॥
पुरे पाटलिपुत्राख्ये श्रेष्ठी वृषभदत्तवाक्। धनैर्धान्यैश्च सम्पूर्णः पूर्वपुण्येन शुद्धधीः ॥२॥
भार्याभूद्वृषभश्रीश्च पुत्रो वृषभसेनकः। श्रीजिनेन्द्र पदाम्भोजमहासेवाविधायकः ॥३॥
तन्मातुलो धनपतिः श्रीकान्ताकामिनीपतिः। तयोः सद्रूपसंयुक्ता धनश्रीश्चारुकन्यका ॥४॥
तां श्रीवृषभसेनोसौ परिणीय महोत्सवैः। भुञ्जानो विविधान्भोगान्सुधीः सौख्येन संस्थितः ॥५॥
एकदा दमधरस्य मुनेः पार्श्वे सुभक्तितः। श्रुत्वा धर्मं जिनन्द्रोक्तं मुनिः शीघ्रं बभूव च ॥६॥
धनश्री रोदनं चक्रे ततोसौ मातुलेन च। गृहमानीय कष्टेन कारितो व्रतखण्डनम् ॥७॥
अहो मोहयुतो जन्तु कार्याकार्यं न पश्यति। मत्तवत्कुरुते कर्मभूरिपापविधायकम् ॥८॥
स श्रीवृषभसेनस्तु कारागारे यथा नरः। गृहे स्थित्वा कियत्कालं संजातश्च मुनिः सुधीः ॥९॥

---

८०. वृषभसेन की कथा

स्वर्ग और मोक्ष का सुख देने वाले तथा सारे संसार के द्वारा पूज्य-माने जाने वाले श्री भगवान् को नमस्कार कर वृषभसेन की कथा लिखी जाती है ॥१॥

पाटलिपुत्र (पटना) में वृषभदत्त नाम का एक सेठ रहता था। पूर्व पुण्य के प्रभाव से इसके पास धन सम्पत्ति खूब थी। उसकी स्त्री का नाम वृषभदत्ता था। उसके वृषभसेन नाम का सर्वगुण-सम्पन्न एक पुत्र था। वृषभसेन बड़ा धर्मात्मा और सदा दान-पूजादिक पुण्यकर्मों का करने वाला था ॥२-३॥

वृषभसेन के मामा सेठ धनपति की स्त्री श्रीकान्ता के एक लड़की थी। उसका नाम धनश्री था। धनश्री सुन्दरी थी, चतुर थी और लिखी-पढ़ी थी। धनश्री का ब्याह वृषभसेन के साथ हुआ था। दोनों दम्पत्ति सुख से रहते थे। नाना प्रकार के विषय-भोगों की वस्तुएँ उनके लिए सदा हाजिर रहती थी ॥४-५॥

एक दिन वृषभसेन दमधर मुनिराज के दर्शनों के लिए गया। भक्ति सहित उनकी पूजा-वन्दना कर उसने उनसे धर्म का पवित्र उपदेश सुना। उपदेश उसे बहुत रुचा और उसका प्रभाव भी उस पर बहुत पड़ा। वह उसी समय संसार और भ्रम से सुख जान पड़ने वाले विषय-भोगों से उदासीन हो मुनिराज के पास आत्महित की साधक जिनदीक्षा ले गया। उसे युवावस्था में ही दीक्षा ले जाने से धनश्री को बड़ा दुःख हुआ। उसे दिन-रात रोने के सिवा कुछ न सूझता था। धनश्री का यह दुःख उसके पिता धनपति से न सहा गया। वह तपोवन में जाकर वृषभसेन को उठा लाया और जबरदस्ती उसकी दीक्षा वगैरह खण्डित कर दी, उसे गृहस्थ बना दिया। सच है, मोही पुरुष करने और न करने योग्य कर्मों का विचार न कर उन्मत्त की तरह हर एक काम करने लग जाता है, जिससे कि पापकर्मों का उसके तीव्र बन्ध होता है ॥६-८॥

जैसे मनुष्य को कैद में जबरदस्ती रहना पड़ता है उसी समय वृषभसेन को भी कुछ समय तक

पुनस्तं च समानीय प्रपंचेन स मातुलः। गृहे शृंखलया पापी स्थापयामास कष्टतः ॥१०॥
पुनर्मां व्रतसच्छैलात्पातयिष्यति मानसे। संविचार्येति संन्यासं गृहीत्वा मुनिसत्तमः ॥११॥
मृत्वा समाधिना स्वर्गं संप्राप्तो निजपुण्यतः। दुर्जनैः पीडितश्चापि सज्जनो नाशुभे रतः ॥१२॥
भवतु दुर्जनको विपदाप्रदो विशदबुद्धिरसौ सुजनः पुनः।
जिनपतेः पदपद्मसुसेवनाद्भवति शर्मपतिर्निजपुण्यतः ॥१३॥

इति कथाकोशे श्रीवृषभसेनाख्यानं समाप्तम्।

८१. जयसेननृपस्याख्यानम्

सारलक्ष्मीप्रदं नत्वा जिनेन्द्रं मुक्तिनायकम्। वक्ष्ये श्रीजयसेनस्य भूपतेः सत्कथानकम् ॥१॥
श्रावस्तीपत्तने राजा जयसेनोभवत्पुरा। वीरसेना महाराज्ञी वीरसेनः सुतस्तयोः ॥२॥
वन्दकः शिवगुप्ताख्यो निन्दकः पललम्पटः। सोपि राज्ञो गुरुर्जातो धिङ्मिथ्यात्वमशर्मकम् ॥३॥
एकदा नगरे तत्र मुनिवृन्दसमन्वितः। समायातो मुनीन्द्रस्तु यत्यादिवृषभः सुधीः ॥४॥

और घर में रहना पड़ा। उसके बाद वह फिर मुनि हो गया। उसका फिर मुनि हो जाना जब धनपति को मालूम हुआ तो किसी बहाने से घर पर लाकर अब की बार उसे उसने लोहे की साँकल से बाँध दिया। मुनि ने यह सोचकर, कि यह मुझे अब की बार फिर व्रतरूपी पर्वत से गिरा देगा, मेरा व्रत भंग कर देगा, संन्यास ले लिया और इसी अवस्था में शरीर छोड़कर वह पुण्य के उदय से स्वर्ग में देव हुआ। दुर्जनों द्वारा सत्पुरुषों को कितने ही कष्ट क्यों न पहुँचाये जायें पर वे कभी पापबन्ध के कारण कामों में नहीं फँसते ॥९-१२॥

दुर्जन पुरुष चाहे कितनी ही तकलीफ क्यों न दें, पर पवित्र बुद्धि के धारी सज्जन महात्मा पुरुष तो जिन भगवान् के चरणों की सेवा-पूजा से होने वाले पुण्य से सुख ही प्राप्त करेंगे। इसमें तनिक भी सन्देह नहीं ॥१३॥

८१. जयसेन राजा की कथा

स्वर्गादि सुखों को देने वाले और मोक्षरूपी रमणी के स्वामी श्रीजिन भगवान् को नमस्कार कर जयसेन राजा की सुन्दर कथा लिखी जाती है ॥१॥

श्रावस्ती के राजा जयसेन की रानी वीरसेना के एक पुत्र था। इसका नाम वीरसेन था। वीरसेन बुद्धिमान् और सच्चे हृदय का था, मायाचार-कपट उसे छू तक न गया था ॥२॥

यहाँ एक शिवगुप्त नाम का बुद्ध भिक्षुक रहता था। यह मांसभक्षी और निर्दयी था। ईर्ष्या और द्वेष इसके रोम-रोम में ठसा था मानों वह इनका पुतला था। यह शिवगुप्त राजगुरु था। ऐसे मिथ्यात्व को धिक्कार है जिसके वश हो ऐसे मायावी और द्वेषी भी गुरु हो जाते हैं ॥३॥

एक दिन यतिवृषभ मुनिराज अपने सारे संघ को साथ लिए श्रावस्ती में आए। राजा यद्यपि

तत्पार्श्वे पुण्ययोगेन भव्यैः संघैः प्रमण्डितः। धर्ममाकर्ण्य जैनेन्द्रं भूपोभूच्छ्रावकोत्तमः ॥५॥
ततस्तेन महाभक्त्या जयसेनेन भूभुजा। जिनेन्द्रभवनैः सर्वं मण्डितं निजमण्डलम् ॥६॥
तदा स दुर्जनः पापी बुद्धकः शिवगुप्तकः। तद्भूपमारणोपायं चिन्तयंश्चेतसि क्रुधा ॥७॥
पुरीं च पृथिवीं गत्वा राजानं बौद्धधार्मिकम्। सुमत्याख्यं जगौ सर्वं जयसेनप्रचेष्टितम् ॥८॥
ततोसौ सुमतिर्लेखं प्रेषयामास तं प्रति। विरूपकं त्वया चक्रे बुद्धधर्मं गृहाण च ॥९॥
तेनोक्तं जयसेनेन जैनधर्मो जगद्धितः। निश्चयान्निश्चलो मेऽस्ति किमन्यैः पापकारणैः ॥१०॥
ज्ञातश्रीजैनसद्धर्मः प्राणी किं केन मुह्यति। वायुना महता चापि चाल्यते किं सुराचलः ॥११॥
रुष्टेन प्रेषितौ तेन सुमत्याख्येन दुर्भटौ। मारणार्थं समागत्य सावस्त्यां तौ च वेगतः ॥१२॥
स्थित्वा दुष्टौ कियत्कालमवकाशं विना ततः। पश्चादागत्य तं भूपमूचतुर्निजवृत्तकम् ॥१३॥
सुमतिश्च ततः प्राह पापात्मा सेवकान्प्रति। अस्ति कोपि भटो यस्तु जयसेनं प्रहन्ति च ॥१४॥

बुद्धधर्म का मानने वाला था, तथापि वह और लोगों को मुनिदर्शन के लिए जाते देख आप भी गया। उसने मुनिराज द्वारा धर्म का पवित्र उपदेश चित्त लगाकर सुना। उपदेश उसे बहुत पसन्द आया। उसने मुनिराज से प्रार्थना कर श्रावक के व्रत लिए। जैनधर्म पर अब उसकी दिनों-दिन श्रद्धा बढ़ती ही गई उसने अपने सारे राज्यभर में कोई ऐसा स्थान न रहने दिया जहाँ जिनमन्दिर न हो। प्रत्येक शहर, प्रत्येक गाँव में उसने जिनमन्दिर बनवा दिया। जिनधर्म के लिए राजा का यह प्रयत्न देख शिवगुप्त ईर्ष्या और द्वेष के मारे जल कर खाक हो गया। वह अब राजा को किसी प्रकार मार डालने के प्रयत्न में लगा। और एक दिन खास इसी काम के लिए वह पृथ्वीपुरी गया और वहाँ के बुद्धधर्म के अनुयायी राजा सुमति को उसने जयसेन के जैनधर्म धारण करने और जगह-जगह जिनमन्दिरों के बनवाने आदि का सब हाल कह सुनाया। यह सुन सुमति ने जयसेन को एक पत्र लिखा कि ''तुमने बुद्धधर्म छोड़कर जो जैनधर्म ग्रहण किया, यह बहुत बुरा किया है। तुम्हें उचित है कि तुम फिर से बुद्धधर्म स्वीकार कर लो।'' इसके उत्तर में जयसेन ने लिख भेजा कि-''मेरा विश्वास है, निश्चय है कि जैनधर्म ही संसार में एक ऐसा सर्वोच्च धर्म है जो जीवमात्र का हित करने वाला है। जिस धर्म में जीवों का मांस खाया जाता है या जिनमें धर्म के नाम पर हिंसा वगैरह महापाप बड़ी खुशी के साथ किए जाते हैं वे धर्म नहीं हो सकते। धर्म का अर्थ है जो संसार के दुःखों से छुड़ाकर उत्तम सुख में रक्खें, सो यह बात सिवा जैनधर्म के और धर्मों में नहीं है। इसलिए इसे छोड़कर और सब अशुभ बन्ध के कारण है।'' सच है, जिसने जैनधर्म का सच्चा स्वरूप जान लिया वह क्या फिर किसी से डिगाया जा सकता है? नहीं। प्रचण्ड हवा भी क्यों न चले पर क्या वह मेरु को हिला देगी? नहीं। जयसेन के इस प्रकार विश्वास को देख सुमति को बड़ा गुस्सा आया। तब उसने दो आदमियों को इसलिए श्रावस्ती में भेजा कि वे जयसेन की हत्या कर आवें। वे दोनों आकर कुछ समय तक श्रावस्ती में ठहरे और जयसेन के मार डालने की खोज में लगे रहे, पर उन्हें ऐसा मौका ही न मिल

तन्निशम्य हिमाराख्यो राजपुत्रो दुराशयः। अहं तं मारयाम्युच्चै-रित्युक्त्वा पापपण्डितः ॥१५॥
सावस्तीनगरीं गत्वा यत्यादिवृषभस्य सः। मुनेः पार्श्वे प्रपंचेन मुनि-र्भूत्वा कुधीः स्थितः ॥१६॥
एकदा जयसेनोसौ राजा सद्धर्मवत्सलः। जिनालये मुनिं नत्वा धृत्वा लोकं बहिः पुनः ॥१७॥
पादमूले मुनेः स्थित्वा कृत्वा किंचित्प्रजल्पनम्। यावत्सुधीर्नमस्कारं गमनाय करोति च ॥१८॥
बौद्धो हिमारकः सोपि हत्वा तं जयसेनकम्। नष्टः शीघ्रं महानिन्द्यो लोके बुद्धाश्रितो जनः ॥१९॥
तमालोक्य मुनिः सोपि यत्यादिवृषभः सुधीः। दर्शनोडाहनाशाय लिखित्वा भित्तिभागके ॥२०॥
नृपो हिमारकेणैव मारितः पापकर्मणा। इति स्वयं विदार्योच्चैरसिधेनुकयोदरम् ॥२१॥
संन्यासं च समादाय निश्चलो मेरुवत्तराम्। मृत्वा स्वर्गालयं प्राप्य देवो जातो गुणोज्ज्वलः ॥२२॥
वीरसेनकुमारो यो जयसेनसुतस्तदा। दृष्ट्वा तौ मरणं प्राप्तौ भित्तौ वीक्ष्याक्षराणि च ॥२३॥

पाया जो वे जयसेन को मार सकें। तब लाचार हो वे वापस पृथ्वीपुरी लौट आए और सब हाल उन्होंने राजा से कह सुनाया। इससे सुमति का क्रोध और भी बढ़ गया। उसने तब अपने सब नौकरों को इकट्ठा कर कहा–क्या कोई मेरे आदमियों में ऐसा भी हिम्मत बहादुर है जो श्रावस्ती जाकर किसी तरह जयसेन को मार आवे। उनमें से एक हिमारक नाम के दुष्ट ने कहा–हाँ महाराज, मैं इस काम को कर सकता हूँ। आप मुझे आज्ञा दें। इसके बाद ही वह राजाज्ञा पाकर श्रावस्ती आया और यतिवृषभ मुनिराज के पास मायाचार से जिनदीक्षा लेकर मुनि हो गया ॥४-१६॥

एक दिन जयसेन मुनिराज के दर्शन करने को आया और अपने नौकर-चाकरों को मन्दिर के बाहर ठहरा कर आप मन्दिर में गया। मुनि को नमस्कार कर वह कुछ धर्म-सम्बन्धी बातचीत की। इसके बाद जब वह चलने के पहले मुनिराज को ढोक देने के लिए झुका कि इतने में वह दुष्ट हिमारक जयसेन को मार कर भाग गया। सच है–बुद्ध लोग बड़े ही दुष्ट हुआ करते हैं। यह देख मुनि यतिवृषभ को बड़ी चिन्ता हुई उन्होंने सोचा–कहीं सारे संघ पर विपत्ति न आए, इसलिए पास ही की भीत पर उन्होंने यह लिखकर कि ''दर्शन या धर्म की डाह के वश होकर ऐसा काम किया गया है।'' छुरी से अपना पेट चीर लिया और स्थिरता से संन्यास द्वारा मृत्यु प्राप्त कर वे स्वर्ग गए ॥१७-२२॥

वीरसेन को जब अपने पिता की मृत्यु का हाल मालूम हुआ तो वह उसी समय दौड़ा हुआ मन्दिर आया। उसे इस प्रकार दिन-दहाड़े किसी साधारण आदमी की नहीं किन्तु खास राजा साहब की हत्या हो जाने और हत्याकारी का कुछ पता न चलने का बड़ा ही आश्चर्य हुआ और जब उसने अपने पिता के पास मुनि को भी मरा पाया तब तो उसके आश्चर्य का कुछ ठिकाना ही न रहा। वह बड़े विचार में पड़ गया। वे हत्याएँ क्यों हुई? और कैसे हुई? इसका कारण कुछ भी उसकी समझ में न आया। उसे यह भी सन्देह हुआ कि कहीं इन मुनि ने तो यह काम न किया हो? पर दूसरे ही क्षण में उसने सोचा कि ऐसा नहीं हो सकता। इनका और पिताजी का कोई वैर-विरोध नहीं, लेना-

प्रशंसां सुतरां कृत्वा मुनीन्द्रस्य विचक्षणः। धर्मे श्रीमज्जिनेन्द्रोक्ते संजातो तीव्रनिश्चलः ॥२४॥
दुष्टात्मा कुरुते दोषं धर्मे श्रीमज्जिनेशिनाम्। स स्वभावेन निर्दोषो निरभ्रो भास्करो यथा ॥२५॥
यः श्रीदेवनिकायभूपतिशतैर्नागेन्द्रसत्खेचरैः पूज्यो भक्तिभरेण शर्मनिलयो धर्मो जिनेन्द्रोदितः।
नाना दुःखविनाशको भवहरः स्वर्गापवर्गप्रदः स श्रीमान्भवतां जगत्त्रयहितो दद्याच्छुभं मङ्गलम् ॥२६॥

इति कथाकोशे जयसेननृपस्याख्यानं समाप्तम्।

८२. शकटालमुनेराख्यानम्

नत्वा पादद्वयं जैनं शर्मदं त्रिजगद्धितम्। ब्रुवेऽहं शकटालस्य मुनेर्वृत्तं बुधैर्मतम् ॥१॥
पुरे पाटलिपुत्रेऽभूद्राजा नन्दोतिभद्रधीः। मंत्री श्रीशकटालाख्यो जैनधर्मरतस्तराम् ॥२॥

देना नहीं, फिर वे क्यों ऐसा करने चले? और पिताजी तो इनके इतने बड़े भक्त थे और न केवल यही बात थी कि पिताजी ही इनके भक्त हों, ये साधु भी तो उनसे बड़ा प्रेम करते थे; घण्टों तक उनके साथ इनकी धर्मचर्चा हुआ करती थी। फिर इस सन्देह को जगह नहीं रहती कि एक निस्पृह और शान्त योगी यह अनर्थ किया जा सके। तब हुआ क्या? बेचारा वीरसेन बड़ी कठिन समस्या में फँसा। वह इस प्रकार चिन्तातुर हो कुछ सोच-विचार कर ही रहा था कि उसकी नजर सामने की भीत पर जा पड़ी। उस पर यह लिखा हुआ, कि ''दर्शन या धर्म की डाह के वश होकर ऐसा हुआ है'' देखते ही उसकी समझ में उस समय सब बातें बराबर आ गई उसके मन को अब रहा-सहा सन्देह भी दूर हो गया। उसकी अब मुनिराज पर अत्यन्त श्रद्धा हो गई। उसने मुनिराज के धैर्य और सहनपने की बड़ी प्रशंसा की। जैनधर्म के विषय में उसका पूरा-पूरा विश्वास हो गया। जिनका दुष्ट स्वभाव है, जिनसे दूसरों के धर्म का अभ्युदय-उन्नति नहीं सही जाती ऐसे लोग जिनधर्म सरीखे पवित्र धर्म पर चाहे कितना ही दोष क्यों न लगावें, पर जिनधर्म तो बादलों से न ढके हुए सूरज की तरह सदा ही निर्दोष रहता है ॥२३-२५॥

जिस धर्म को चारों प्रकार के देव, विद्याधर, चक्रवर्ती, राजा-महाराजा आदि सभी महापुरुष भक्ति से पूजते-मानते हैं, जो संसार के दुःखों का नाश कर स्वर्ग या मोक्ष का देने वाला हैं, सुख का स्थान है, संसार के जीव मात्र का हित करने वाला है और जिसका उपदेश सर्वज्ञ भगवान् ने किया है और इसीलिए सबसे अधिक प्रमाण या विश्वास करने योग्य है, वह धर्म-वह आत्मा की एक खास शक्ति मुझे प्राप्त होकर मोक्ष का सुख दे ॥२६॥

८२. शकटाल मुनि की कथा

सुख के देने वाले संसार का हित करने वाले जिनेन्द्र भगवान् के चरणों को नमस्कार कर शकटाल मुनि की कथा लिखी जाती है ॥१॥

पाटलिपुत्र (पटना) के राजा नन्द के दो मंत्री थे। एक शकटाल और दूसरा वररुचि। शकटाल

द्वितीयस्तु कुधीर्मंत्री वरादिरुचिनामभाक्। तौ परस्परमत्यन्तं वैरिणौ भवत स्म च ॥३॥
एकदा मुनिभिर्युक्तो महापद्मो मुनीश्वरः। तत्रायातो जगत्पूज्यो जिनतत्त्वविदांवरः ॥४॥
तत्पार्श्वे श्रीजिनन्द्रोक्तं धर्मं शर्माकरं द्विधा। समाकर्ण्य सुधीर्मंत्री शकटालो गुणोज्ज्वलः ॥५॥
मुनिर्भूत्वा लसद्भक्त्या ज्ञात्वा शास्त्रार्थमुत्तमम्। आचार्यत्वं समासाद्य गुरोः पादप्रसादतः ॥६॥
कुर्वन्विहारमत्युच्चैर्भव्यान्सम्बोधयन्सुखम्। कुर्वन्धर्मोद्यमं पूतं दुर्गतिच्छेदकारणम् ॥७॥
पुनः पाटलिपुत्राख्यं पुरमागत्य शुद्धधीः। नन्दस्यान्तःपुरे चर्यां कृत्वा स्वस्थानकं गतः ॥८॥
पूर्ववैरेण पापात्मा वरादिरुचिकस्तदा। नन्दं भूपं प्रति प्राह भो नरेन्द्र विचक्षण ॥९॥
भिक्षामिषेण ते गेहं संप्रविश्य प्रवेगतः। तवान्तःपुरके कष्टं शकटालः सुधूर्त्तकः ॥१०॥
अन्यायं च विधायैव स्वस्थानं गतवानिति। पापी दुर्गतिभाक् प्राणी किं करोति न पातकम् ॥११॥

जैनी था, इसलिए सुतरां उसकी जैनधर्म पर अचल श्रद्धा या प्रीति थी और वररुचि जैनी नहीं था, इसलिए सुतरां उसे जैनधर्म से, जैनधर्म के पालने वालों से द्वेष करती थी और इसलिए शकटाल और वररुचि की कभी न बनती थी, एक से एक अत्यन्त विरुद्ध थे ॥२-३॥

एक दिन जैनधर्म के परम विद्वान् महापद्म मुनिराज अपने संघ को साथ लिए पटना में आए। शकटाल उनके दर्शन करने को गया। बड़ी भक्ति के साथ उसने उनकी पूजा-वन्दना की और उनके पास बैठकर मुनि और गृहस्थ धर्म का उनसे पवित्र उपदेश सुना। उपदेश का शकटाल के धार्मिक अतएव कोमल हृदय पर बहुत प्रभाव पड़ा। वह उसी समय संसार का सब मायाजाल तोड़कर दीक्षा ले मुनि हो गया। इसके बाद उसने अपने गुरु द्वारा सिद्धान्तशास्त्र का अच्छा अभ्यास किया। थोड़े ही दिनों में शकटाल मुनि ने कई विषयों में बहुत अच्छी योग्यता प्राप्त कर ली। गुरु इनकी बुद्धि, विद्वत्ता, तर्कणाशक्ति और सर्वोपरि स्वाभाविक प्रतिभा देखकर बहुत ही खुश हुए। उन्होंने अपना आचार्य पद अब इन्हें ही दे दिया। यहाँ से ये धर्मोपदेश और धर्मप्रचार के लिए अनेक देशों, शहरों और गाँवों में घूमे-फिरे। इन्होंने बहुतों को आत्महित साधक पवित्र मार्ग पर लगाया और दुर्गति के दुःखों का नाश करने वाले पवित्र जैनधर्म का सब ओर प्रकाश फैलाया। इस प्रकार धर्म प्रभावना करते हुए ये एक बार फिर पटना में आए ॥४-७॥

एक दिन की बात है कि शकटाल मुनि राजा के अन्तःपुर में आहार कर तपोवन की ओर जा रहे थे। मंत्री वररुचि ने इन्हें देख लिया। सो उस पापी ने पुराने बैर का बदला लेने का अच्छा मौका देखकर नन्द से कहा-महाराज, आपको कुछ खबर है कि इस समय अपना पुराना मंत्री पापी शकटाल भीख के बहाने आपके अन्तःपुर में, रनवास में घुसकर न जाने क्या अनर्थ कर गया है। मुझे तो उसके चले जाने के बाद ये समाचार मिले, नहीं तो मैंने उसे कभी का पकड़वा कर पाप की सजा दिलवा दी होती। अस्तु, आपको ऐसे धूर्तों के लिए चुप बैठना उचित नहीं। सच है, दुर्गति में जाने वाले ऐसे

ततो नन्देन भूभर्त्ता महाकोपेन तत्क्षणे। प्रेषितः शकटालस्य घातको मारणेच्छया ॥१२॥
अहो मूढमतिर्जीवः प्रेरितो दुर्जनेन च। कार्याकार्यं न वेत्त्येव करोत्येव कुकर्म सः ॥१३॥
शकटालो मुनीन्द्रोसौ दृष्ट्वा तं घातकं खरम्। ज्ञात्वा तन्मंत्रिणो दुष्टचेष्टितं पापकारणम् ॥१४॥
संन्यासेन सुधीर्मृत्वा स्वर्लोकं च गतः सुखम्। दुष्टः करोतु दुष्टत्वं भवेन्नित्यं सतां शुभम् ॥१५॥
सुनन्दोपि तदा राजा कृत्वा सर्वपरीक्षणम्। ज्ञात्वा मुनिं सुनिर्दोषं त्यक्त्वा कोपं प्रवेगतः ॥१६॥
महापद्ममुनेः पाद-मूले सद्भक्तिनिर्भरः। श्रुत्वा धर्मं जिनैः प्रोक्तं सारसम्पद्विधायकम् ॥१७॥
निन्दां गर्हां निजां कृत्वा दानपूजाव्रतान्विते। धर्मे श्रीमज्जिनेन्द्राणां संजातः सुतरां रतः ॥१८॥
भवेज्जन्तुः कुसंगेन महापापस्य भाजनम्। स एव सद्गुरुं प्राप्य संभवेत्पुण्यभाजनम् ॥१९॥
तस्माद्भव्यैः प्रकर्त्तव्यं सद्गुरोः सेवनं सदा। प्राप्यते येन सत्सौख्यं स्वर्गमोक्षभवं मुदा ॥२०॥

पापी लोग बुरा से बुरा कोई काम करते नहीं चूकते। नन्द ने अपने मंत्री के बहकावे में आकर गुस्से से उसी समय एक नौकर को आज्ञा दी कि वह जाकर शकटाल को जान से मार आवें। सच है, मूर्ख पुरुष दुर्जनों द्वारा उकसाने पर, करने और न करने योग्य भले-बुरे कार्य का कुछ विचार न कर, अन्याय कर डालते हैं। शकटाल मुनि ने जब उस घातक मनुष्य को अपनी ओर आते देखा तब उन्हें विश्वास हो गया कि वह मेरे को ही मारने को आ रहा है और यह सब कर्म मन्त्री वररुचि का है। अस्तु, जब तक वह घातक शकटाल मुनि के पास पहुँचता है उसके पहले ही उन्होंने सावधान होकर संन्यास ले लिया। घातक अपना काम पूरा कर वापस लौट गया। इधर शकटाल मुनि ने समाधि से शरीर त्याग कर स्वर्ग लाभ किया। सच है, दुष्ट पुरुष अपनी ओर से कितनी ही दुष्टता क्यों न करे, पर उससे सत्पुरुषों को कुछ नुकसान न पहुँच कर लाभ ही होता है ॥८-१५॥

परन्तु जब नन्द को यह सब सच्चा हाल ज्ञात हुआ और उसने सब बातों की गहरी छान-बीन की तब उसे मालूम हो गया कि शकटाल मुनि का कोई दोष न था, वे सर्वथा निरपराध थे। इसके पहले जैन मुनियों के सम्बन्ध में जो उसकी मिथ्या धारण हो गई थी और उन पर जो उसका बे-हद क्रोध हो रहा था उस सबको हृदय से दूर कर वह अब बड़ा ही पछताया। अपने पाप कर्मों की उसने बहुत निन्दा की। इसके बाद वह श्रीमहापद्म मुनि के पास गया। बड़ी भक्ति से उसने उनकी पूजा-वन्दना की और सुख के कारण पवित्र जैनधर्म का उनके द्वारा उपदेश सुना। धर्मोपदेश का उसके चित्त पर बहुत प्रभाव पड़ा। उसने श्रावकों के व्रत धारण किए। जैनधर्म पर अब इसकी अचल श्रद्धा हो गई ॥१६-१८॥

इस जीव को जब कोई बुरी संगति मिल जाती है तब तो वह बुरे से बुरे पापकर्म करने लग जाता है और जब अच्छे महात्मा पुरुषों की संगति मिलती है तब यही पुण्य-पवित्र कर्म करने लगता है। इसलिए भव्यजनों को सदा ऐसे महापुरुषों की संगति करना चाहिए जो संसार के आदर्श हैं और जिनकी सत्संगति से स्वर्ग-मोक्ष प्राप्त हो सकता है ॥१९-२०॥

सम्यग्दर्शनबोधवृत्तसुतपोरत्नोत्कराराधनामाला श्रीजिनसारसूत्रसहिता पूर्वं बुधैर्निर्मिता। सद्बोधाम्बुधिभिर्जगत्त्रयहितैः सा शर्मणे श्रीप्रभाचन्द्राद्यैस्तदनुग्रहेण सुधिया चक्रे मयापि श्रिये ॥२१॥

इति कथाकोशे शकटालमुनेराख्यानं समाप्तम्।

८३. श्रद्धाख्यानम्

विशुद्धकेवलज्ञान-प्रकाशितजगत्त्रयम्। नत्वा जिनं प्रवक्ष्यामि श्रद्धाख्यानं सतां प्रियम् ॥१॥
कुरुजांगलसद्देशे हस्तिनागपुरे शुभे। विनयंधरभूपालो विनयादिवती प्रिया ॥२॥
श्रेष्ठी वृषभसेनाख्यस्तन्नाम्नी श्रेष्ठिनी मता। तयोः पुत्रस्तु संजातो जिनदासो गुणोज्ज्वलः ॥३॥
एकदा तस्य भूभर्त्तुः कामासक्तस्य कर्मतः। महाव्याधिः समुत्पन्नो भूरिकामो न शान्तये ॥४॥
वैद्या न शक्नुवन्ति स्म तं व्याधिं संचिकित्सितुम्। पीडितस्तेन भूनाथो दुर्जनेन च पापिना ॥५॥
ततः सिद्धार्थसन्नाम्ना शुद्धश्रावकमंत्रिणा। पादौषधमुनेः पादप्रक्षालनजलं शुभम् ॥६॥
दत्तं तस्मै नरेन्द्राय सर्वव्याधिविनाशकम्। श्रीजिनेन्द्रपदाम्भोजचंचरीकेण निर्मलम् ॥७॥

इन सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र और सम्यक्तपरूप रत्नों की सुन्दर माला को प्रभाचन्द्र आदि पूर्वाचार्यों ने शास्त्रों का सार लेकर बनाया है, जो ज्ञान के समुद्र और सारे संसार के जीव मात्र का हित करने वाले थे। उन्हीं की कृपा से मैंने इस आराधनारूपी माला को अपनी बुद्धि और शक्ति के अनुसार बनाया है। यह माला भव्यजनों को और मुझे सुख दे ॥२१॥

८३. श्रद्धायुक्त मनुष्य की कथा

निर्मल केवलज्ञान द्वारा सारे संसार के पदार्थों को प्रकाशित करने वाले जिन भगवान् को नमस्कार कर श्रद्धागुण के धारी विनयंधर राजा की कथा लिखी जाती है जो कथा सत्पुरुषों को प्रिय है ॥१॥

कुरुजांगल देश की राजधानी हस्तिनापुर का राजा विनयंधर था। उसकी रानी का नाम विनयवती था। यहाँ वृषभसेन नाम का एक सेठ रहता था। उसकी स्त्री का नाम वृषभसेना था। उसके जिनदास नाम का एक बुद्धिमान् पुत्र था ॥२-३॥

विनयंधर बड़ा कामी था। सो एक बार इसके कोई महारोग हो गया। सच है, ज्यादा मर्यादा से बाहर विषय सेवन भी उल्टा दुःख का ही कारण होता है। राजा ने बड़े-बड़े वैद्यों से इलाज करवाया पर उसका रोग किसी तरह न मिटा। राजा इस रोग से बड़ा दुःखी हुआ। उसे दिन-रात चैन न पड़ने लगा ॥४-५॥

राजा का एक सिद्धार्थ नाम का मंत्री था। यह जैनी था। शुद्ध सम्यग्दर्शन का धारक था। सो एक दिन उसने पादौषधिऋद्धि के धारक मुनिराज के पाँव प्रक्षालन का जल लाकर, जो कि सब रोगों का नाश करने वाला होता है, राजा को दिया। जिन भगवान् के सच्चे भक्त उस राजा ने बड़ी श्रद्धा के साथ उस जल को पी लिया उसे पीने से उसका सब रोग जाता रहा। जैसे सूरज के उगने

श्रद्धादिगुणसंयुक्तो विनयंधरभूपतिः। पीत्वा तज्जलमत्युच्चैः संजातो रोगवर्जितः ॥८॥
तज्जलास्वादनादेव गतो व्याधिः प्रवेगतः। भास्करस्योदये शीघ्रं प्रयात्येव यथा तमः ॥९॥
प्रभावः श्रीमुनीन्द्राणां तपसः केन वर्ण्यते। यत्पादक्षालनं तोयं सर्वव्याधिक्षयप्रदम् ॥१०॥
यथा सिद्धार्थमंत्री च सत्तोयं भूभुजे ददौ। तथा भव्यैः प्रदातव्यं धर्मपानीयमङ्गिनाम् ॥११॥
स श्रीपादौषधः स्वामी मुनीन्द्रो गुणसागरः। अस्तु मे शर्मणे नित्यं जैनतत्त्वविदांवरः ॥१२॥
श्रद्धा श्रीजिनधर्मकर्मणि सतां दुःखौघविध्वंसिनी। देवेन्द्रादिनरेन्दचक्रिपदवीशर्मप्रदास्तोकतः ॥
बाहुल्येन करोति या शुभतरा सत्केवलद्योतनं। व्यक्तानन्तचतुष्टयं शिवकरं सा शर्मणे वास्तु वै ॥१३॥

इति कथाकोशे श्रद्धाख्यानं समाप्तम्।

८४. स्वात्मनिन्दाफलाख्यानम्

सर्वदेवेन्द्रचन्द्राद्यैः पूजितं श्रीजिनेश्वरम्। संप्रणम्य प्रवक्ष्येहं स्वात्मनिन्दाफलोत्करम् ॥१॥
काशीदेशे सुविख्याते पूते वाराणसी पुरे। राजा विशाखदत्तोभूत्तद्राज्ञी कनकप्रभा ॥२॥
चित्रकारो विचित्राख्यो नानाचित्रविधायकः। विचित्रादिपताकाख्या तस्य भार्या बभूव च ॥३॥
तयोर्बुद्धिमती पुत्री संजाता सुविचक्षणा। एकदा तस्य भूपस्य मन्दिरे वातिसुन्दरे ॥४॥

से अन्धकार जाता रहता है। सच है, महात्माओं के तप के प्रभाव को कौन कह सकता है, जिनके कि पाँव धोने के पानी से ही सब रोगों की शान्ति हो जाती है। जिस प्रकार सिद्धार्थ मन्त्री ने मुनि के पाँव प्रक्षालन का पवित्र जल राजा को दिया, उसी प्रकार अन्य भव्यजनों को भी उचित है कि वे धर्मरूपी जल सर्व-साधारण को देकर उनका संसार ताप शान्त करें। जैनतत्त्व के परम विद्वान् वे पादौषधिऋद्धि के धारक मुनिराज मुझे शान्ति-सुख दें ॥६-१२॥

जैनधर्म में या जैनधर्म के अनुसार किए जाने वाले दान, पूजा, व्रत, उपवास आदि पवित्र कार्यों में की हुई श्रद्धा, किया हुआ विश्वास दुःखों का नाश करने वाला है। इस श्रद्धा का आनुषङ्गिक फल है-इन्द्र, चक्रवर्ती, विद्याधर आदि की सम्पदा का लाभ और वास्तविक फल है मोक्ष का कारण केवलज्ञान, जिसमें कि अनन्तज्ञान, अनन्तदर्शन, अनन्तसुख और अनन्तवीर्य ये चार अनन्तचतुष्टय-आत्मा की खास शक्तियाँ प्रकट हो जाती हैं। वह श्रद्धा आप भव्यजनों का कल्याण करे ॥१३॥

८४. आत्मनिन्दा करने वाली की कथा

चारों प्रकार के देवों द्वारा पूजे जाने वाले जिन भगवान् को नमस्कार कर उस स्त्री की कथा लिखी जाती है कि जिसने अपने किए पापकर्मों की आलोचना कर अच्छा फल प्राप्त किया है ॥१॥

बनारस के राजा विशाखदत्त थे। उनकी रानी का नाम कनकप्रभा था। इनके यहाँ एक चितेरा रहता था। इसका नाम विचित्र था। वह चित्रकला का बड़ा अच्छा जानकार था। चितेरे की स्त्री का नाम विचित्रपताका था। उसके बुद्धिमती नाम की एक लड़की थी। बुद्धिमती बड़ी सुन्दरी और चतुर थी ॥२-४॥

विचित्रचित्रकारस्य चित्रं चित्रयतः पितुः। बुद्धिमत्या समादाय भोजनं गतया तया ॥५॥
लीलया लिखितं तत्र भूपतेर्मणिकुट्टिमे। स्वच्छं मयूरपिच्छं तद्-गृह्णन् राजाल्पधीर्मतः ॥६॥
तथान्यदिवसे राज्ञो दर्शयंश्चित्रमद्भुतम्। भणितः पितरम् चेति तया पुत्र्या सुधूर्त्तया ॥७॥
शीघ्रमागच्छ भो तात मा कुरु त्वं विलम्बलनम्। यौवनं साम्प्रतं याति भोजनस्य विचक्षण ॥८॥
तद्वचस्तु समाकर्ण्य भूपतिश्चित्रिताशयः। मुखं पश्यन्प्रमूर्खोऽसौ भणितश्च तया पुनः ॥९॥
तथान्यदा तया चापि कुड्यप्रच्छादने शुभे। अपनीते द्वितीये च कुड्ये चित्रावलोकने ॥१०॥
स राजा भणितो मूर्ख-स्ततः सोपि महीपतिः। पृष्ट्वा तत्कारणं सर्वं तुष्टस्तां परिणीय च ॥११॥
सर्वस्वान्तःपुरे चक्रे सुप्रधाना सुवल्लभा। गुणाः कुर्वन्ति दूतत्वं पुण्यतो भव्यदेहिनाम् ॥१२॥

एक दिन विचित्र चितेरा राजा के खास महल में, जो कि बड़ा सुन्दर था, चित्रकारी कर रहा था। उसकी लड़की बुद्धिमती उसके लिए भोजन लेकर आयी। उसने विनोद वश हो भीत पर मोर की पीछी का एक चित्र बनाया वह चित्र इतना सुन्दर बना कि सहसा कोई न जान पाता कि वह चित्र है। जो उसे देखता वह यही कहता कि यह मोर की पीछी है। इसी समय महाराज विशाखदत्त इस ओर आ गए। वे उस चित्र को मोर की पीछी समझ उठाने को उसकी ओर बढ़े। यह देख बुद्धिमती ने समझा कि महाराज बे-समझ है। नहीं तो इन्हें इतना भ्रम नहीं होता ॥५-६॥

दूसरे दिन बुद्धिमती ने एक और अद्भुत चित्र राजा को बतलाते हुए अपने पिता को पुकारा- पिताजी, जल्दी आइए, भोजन की जवानी का समय बीत रहा है। बुद्धिमती के इन शब्दों को सुनकर राजा बड़े अचम्भे में पड़ गया। वह उसके कहने का कुछ भाव न समझ कर एक टक की लगाये उसके मुँह की ओर देखता रह गया। राजा को अपना भाव न समझा देख बुद्धिमती को उसके मूर्ख होने का और दृढ़ विश्वास हो गया ॥७-९॥

अब की बार बुद्धिमती ने एक और चाल चली। एक भींत पर दो परदे लगा दिये और राजा को चित्र बतलाने के बहाने उसने एक परदा उठाया। उसमें चित्र न था। तब राजा उस दूसरे परदे की ओर चित्र की आशा से आँखें फाड़कर देखने लगा। बुद्धिमती ने दूसरा परदा भी उठा दिया। भीत पर चित्र को न देखकर राजा बड़ा शर्मिंदा हुआ। उसकी इन चेष्टाओं से उसे पूरा मूर्ख समझ बुद्धिमती ने जरा हँस दिया। राजा और भी अचम्भे में पड़ गया। वह बुद्धिमती का कुछ भी अभिप्राय न समझ सका। उसने तब व्यग्र हो बुद्धिमती से ऐसा करने का कारण पूछा। बुद्धिमती के उत्तर से उसे जान पड़ा कि वह उसे चाहती है और इसलिए पिता को भोजन के लिए पुकारते समय व्यंग से राजा पर उसने अपना भाव प्रकट किया था। राजा उसकी सुन्दरता पर पहले ही से मुग्ध था, सो वह बुद्धिमती की बातों से बड़ा खुश हुआ। उसने फिर बुद्धिमती के साथ ब्याह भी कर लिया। धीरे-धीरे राजा का उस पर इतना अधिक प्रेम बढ़ गया कि अपनी सब रानियों में पट्टरानी उसने उसे ही बना दिया। सच बात यह है कि प्राणियों की उन्नति के लिए उनके गुण ही उनका दूतपना करते हैं, उन्हें उन्नति पर पहुँचा देते हैं ॥१०-१२॥

तस्याः सेवागतं सर्वं दुष्टमन्तःपुरं तदा। मस्तके टोल्लकाद्दत्वा गच्छति स्म दिनं प्रति ॥१३॥
ततो बुद्धिमती सा च संजाता दुर्बला सती। जिनालयं प्रविश्योच्चैः पापस्य विलयप्रदम् ॥१४॥
जिनेन्द्रप्रतिमाग्रे च कार्यसिद्धिविधायिनि। आत्मनिन्दां करोति स्म भक्तिभारेण मण्डिता ॥१५॥
श्रीजिनेन्द्रजगद्वन्द्य स्वर्गमोक्षप्रदायक। अहं दीनकुलोत्पन्ना कस्य दोषोत्र दीयते ॥१६॥
त्वमेव शरणं तात दुःखदावाग्निवारिद। किमन्यैर्बहुभिर्देवैः कामक्रोधादिदूषितैः ॥१७॥
एकान्ते निन्दनं चेति कुर्वती स्वगृहे स्थिता। पृष्टापि भूभुजा वक्ति नैव दौर्बल्यकारणम् ॥१८॥
अथैकस्मिन्दिने श्रीमज्जिनेन्द्रभवनं शुभम्। पूर्वं प्राप्तेन तद्राज्ञा श्रुत्वा तद्दुःखकारणम् ॥१९॥
अन्तःपुरं सुनिर्भर्त्स्य कृत्वा सेवापरं तराम्। सती बुद्धिमती सा च सुप्रधाना कृता मुदा ॥२०॥
एवमन्यैर्बुधैश्चापि श्रीजिनाग्रे सुभक्तितः। क्षुल्लकाद्यैः प्रकर्त्तव्या स्वात्मनिन्दा शुभश्रिये ॥२१॥

राजा ने बुद्धिमती को सारे रनवास की स्वामिनी बना तो दिया, पर उसमें सब रानियाँ उस बेचारी की शत्रु बन गईं, उससे डाह, ईर्ष्या करने लगीं। आते-जाते वे बुद्धिमती के सिर पर मारती और उसे बुरी-भली सुनाकर बेहद कष्ट पहुँचातीं। बेचारी बुद्धिमती सीधी-साधी थी, सो न तो वह उनसे कुछ कहती और न महाराज से ही कभी उनकी शिकायत करती। इस कष्ट और चिन्ता से मन ही मन घुलकर वह सूख सी गई। वह जब जिन मन्दिर दर्शन करने जाती तब सब सिद्धियों के देने वाले भगवान् के सामने खड़े हो अपने पूर्व कर्मों की निन्दा करती और प्रार्थना करती कि हे संसार पूज्य, हे स्वर्ग-मोक्ष के सुख देने वाले, हे दुःखरूपी दावानल के बुझाने वाले मेघ, और हे दयासागर, मैं एक छोटे कुल में पैदा हुई हूँ, इसीलिए मुझे ये सब कष्ट हो रहे हैं। पर नाथ, इसमें दोष किसी का नहीं। मेरे पूर्व जन्म के पापों का उदय है। प्रभो, जो हो, पर मुझे विश्वास है कि जीवों को चाहे कितने ही कष्ट क्यों न सता रहे हों, पर जो आपको हृदय से चाहता है, आपका सच्चा सेवक है, उसके सब कष्ट बहुत जल्दी नष्ट हो जाते हैं और इसीलिए हे नाथ, कामी, क्रोधी, मानी, मायावी देवों को छोड़कर मैंने आपकी शरण ली है। आप मेरा कष्ट दूर करेंगे ही। बुद्धिमती न मन्दिर में ही किन्तु महल पर भी अपने कर्मों की आलोचना किया करती। वह सदा एकान्त में रहती और न किसी से विशेष बोलती-चालती। राजा ने उसके दुर्बल होने का कारण पूछा-बार-बार आग्रह किया, पर बुद्धिमती ने उससे कुछ भी न कहा ॥१३-१८॥

बुद्धिमती क्यों दिनों-दिन दुर्बल होती जाती है, इसका शोध लगाने के लिए एक दिन राजा उसके पहले जिनमन्दिर आ गया। बुद्धिमती ने प्रतिदिन की तरह आज भी भगवान् के सामने खड़ी होकर आलोचना की। राजा ने वह सब सुन लिया। सुनकर वह सीधा महल पर आया। अपनी सब रानियों को उसने खूब ही फटकारा, धिक्कारा और बुद्धिमती को ही उनकी मालकिन-पट्टरानी बनाकर उन सबको उसकी सेवा करने के लिए बाध्य किया ॥१९-२०॥

जिस प्रकार बुद्धिमती ने अपनी आत्म-निन्दा की, उसी तरह अन्य बुद्धिमानों और क्षुल्लक

शुभकुलोत्तमशर्मविधायिनी जिनपतेः पदभक्तिरसौ सदा।
भवतु दुर्गतिदुःखविनाशिनी शिवपदं मम देव यतो मुदा ॥२२॥

इति कथाकोशे आत्मनिंदाप्राप्तफलदृष्टान्ताख्यानं समाप्तम्।

८५. आत्मनिन्दाख्यानम्

सर्वदोषप्रहर्त्तारं कर्त्तारं शर्मणः सताम्। नत्वा जिनं प्रवक्ष्येहं स्त्रीकथां गर्हणाश्रिताम् ॥१॥
अयोध्यानगरे राजा दुर्योधन इतीरितः। श्रीदेवीकामिनीनाथः संजातो न्यायमण्डितः ॥२॥
बभूव ब्राह्मणस्तत्र सर्वोपाध्यायनामभाक्। ब्राह्मणी तस्य वीराख्या यौवनोन्मत्तमानसा ॥३॥
सार्द्धं छात्रेण संसक्ता पापिनी साग्निभूतिना। हत्वा पतिं निजं वृद्धं सर्वोपाध्यायकं तदा ॥४॥
छत्रिकायां समारोप्य कृष्णरात्रौ श्मशाने तं। निक्षेप्तुं च गता तत्र कोपाद्व्यन्तरदेवता ॥५॥
छत्रिकां कीलयामास मस्तके संजगाद च। प्रभाते पुरनारीणा-मग्रतस्तु गृहे गृहे ॥६॥

आदि को भी जिन भगवान् के सामने भक्तिपूर्वक आत्मनिन्दा-पूर्वक कर्मों की आलोचना करना उचित है। उत्तम कुल और उत्तम सुखों की देन वाली तथा दुर्गति के दुःखों की नाश करने वाली जिन भगवान् की भक्ति मुझे भी मोक्ष का सुख दें ॥२१-२२॥

८५. आत्मनिन्दा की कथा

सब दोषों के नाश करने वाले और सुख के देने वाले ऐसे जिन भगवान् को नमस्कार कर अपने बुरे कर्मों की निन्दा-आलोचना करने वाली बीरा ब्राह्मणी की कथा लिखी जाती है ॥१॥

दुर्योधन जब अयोध्या का राजा था तब की यह कथा है। यह राजा बड़ा न्यायी और बुद्धिमान् हुआ है। इसकी रानी का नाम श्रीदेवी था। श्रीदेवी बड़ी सुन्दरी और सच्ची पतिव्रता थी। यहाँ एक सर्वोपाध्याय नाम का ब्राह्मण रहता था। उसकी स्त्री का नाम वीरा था। उसका चाल-चलन अच्छा न था। जवानी के जोर में वह मस्त रहा करती थी। उपाध्याय के घर पर एक विद्यार्थी पढ़ा करता था। उसका नाम अग्निभूति था। वीरा ब्राह्मणी के साथ इसकी अनुचित प्रीति थी। ब्राह्मणी इसे बहुत चाहती थी। पर उपाध्याय इन दोनों के सुख का काँटा था। इसलिए ये मनमाना ऐशोआराम न कर पाते थे। ब्राह्मणी को यह बहुत खटका करता था। सो एक दिन मौका पाकर ब्राह्मणी ने अपने पति को मार डाला और उसे श्मशान में फेंक आने को छत्री में छुपाकर अन्धेरी रात में वह घर से निकली। श्मशान में जैसे ही उपाध्याय के मुर्दे को फेंकने को तैयार हुई कि एक व्यन्तरदेवी ने उसके ऐसे नीच कर्म पर गुस्सा होकर छत्री को कील दिया और कहा-''सबेरा होने पर जब तू सारे शहर की स्त्रियों के घर-घर पर जाकर अपना यह नीच कर्म प्रकट करेगी, अपने कर्म पर पछतायेगी तब तेरे सिर पर से यह छत्री गिरेगी।'' देवी के कहे अनुसार ब्राह्मणी ने वैसा ही किया। तब कहीं उसका पीछा छूटा, छत्री सिर से अलग हो सकी। इस आत्म-निन्दा से ब्राह्मणी का पापकर्म बहुत हल्का हो गया, वह

दुराचारंस्त्वया स्वस्य कथ्यते गर्हणोत्करैः। तदा ते पतति व्यक्तं मस्तकाच्छत्रिका द्रुतम् ॥७॥
तया तथा कृते शीघ्रं छत्रिका पतिता क्षितौ। सा लोके च विशुद्धाभूद्-ब्राह्मणी निजगर्हणात् ॥८॥
तथान्यैस्तु बुधैः कार्यं गर्हणं स्वस्य शुद्धये। गुरूणामग्रतो भक्त्या दोषके पापभीरुभिः ॥९॥
शल्येनैव यथा प्रपीडिततनुर्निष्काश्य शल्यं भटः संप्राप्नोति सुखं तथा च सुधियः श्रीजैनसूत्रान्वितान्।
श्रित्वा श्रीमुनिनायकाञ्छुभतरान्भूत्वा च शल्योज्झिताः स्वात्मोत्पन्नकुदोषगर्हणभरैर्नित्यं भजन्तु श्रियम् ॥१०॥

इति कथाकोशे आत्मगर्हणाख्यानं समाप्तम्।

८६. सोमशर्ममुनेराख्यानम्

सम्प्रणम्य जिनाधीशं सारधर्मोपदेशकम्।
सोमशर्ममुनेर्वच्मि शर्मदं सुकथानकम् ॥१॥
आलोचनैर्गर्हणनिन्दनैश्च व्रतोपवासैः स्तुतिसत्कथाभिः।
एभिस्तु योगैः क्षपणं करोमि विषप्रतीघातमिवाप्रमत्तः ॥२॥
अथात्र भरते क्षेत्रे पुण्ड्राख्यविषये शुभे। देवीकोट्टपुरे जातो ब्राह्मणः सोमशर्मवाक् ॥३॥
वेदवेदाङ्गपारज्ञः सोमिल्याब्राह्मणीपतिः। संजातौ चाग्निभूत्याख्यवायुभूती तयोः सुतौ ॥४॥

शुद्ध हुई। इसी तरह अन्य भव्यजनों को भी उचित है कि वे प्रतिदिन होने वाले बुरे कर्मों की गुरुओं के पास आलोचना किया करें। उससे उनका पाप नष्ट होगा और अपने आत्मा को वे शुद्ध बना सकेंगे। किसी पुरुष के शरीर में काँटा लग गया और वह उससे बहुत कष्ट पा रहा है। पर जब तक वह काँटा उसके शरीर से नहीं निकलेगा तब तक वह सुखी नहीं हो सकता। इसलिए उस काँटे को निकाल फेंककर जैसे वह पुरुष सुखी होता है, उसी तरह जो आत्म-हितैषी जैनधर्म के बताये सिद्धान्त पर चलने वाले वीतरागी साधुओं की शरण ले अपने आत्मा को कष्ट पहुँचाने वाले पापकर्म रूपी काँटे की कृत कर्मों की आलोचना द्वारा निकाल फेंकते हैं वे फिर कभी नाश न होने वाली आत्मीक लक्ष्मी को प्राप्त करते हैं ॥२-१०॥

८६. सोमशर्म मुनि की कथा

सर्वोत्तम धर्म का उपदेश करने वाले जिनेन्द्र भगवान् को नमस्कार कर सोमशर्म मुनि की कथा लिखी जाती है ॥१॥

आलोचना, गर्हा, आत्मनिन्दा, व्रत उपवास, स्तुति और कथाएँ तथा इनके द्वारा प्रमाद को, असावधानी को नाश करना चाहिए। जैसे मंत्र, औषधि आदि से विष का वेग नाश किया जाता है। इसी सम्बन्ध की यह कथा है ॥२॥

भारत के किसी हिस्से में बसे हुए पुण्ड्रक देश के प्रधान शहर देवी-कोटपुर में सोमशर्म नाम का ब्राह्मण हो चुका है। सोमशर्म वेद और वेदांग, व्याकरण, निरुरक्त, छन्द, ज्योतिष, शिक्षा और कला का अच्छा विद्वान् था। इसकी स्त्री का नाम सोमिल्या था। इसके अग्निभूति और वायुभूति दो लड़के थे ॥३-४॥

तत्रैव नगरे विष्णुदत्तनामा द्विजोपरः। विष्णुश्रीकामिनीनाथो भूरिवित्तसमन्वितः ॥५॥
ऋणं श्रीविष्णुदृत्तात् तु गृहीत्वा सोमशर्मकः। एकदा धर्ममाकर्ण्य मुनेः पार्श्वे जिनेशिनाम् ॥६॥
दीक्षामादाय सद्भक्त्या मुनिर्भूत्वा विचक्षणः। कृत्वा विहारमत्युच्चैः प्राप्तः कोट्टपुरं पुनः ॥७॥
दृष्ट्वासौ विष्णुदत्तेन धृत्वा द्रव्यं प्रयाचितः। सोमशर्ममुनेः पुत्रौ निर्धनौ तौ तु साम्प्रतम् ॥८॥
द्रव्यं मे देहि भो धीर नो चेद्धर्मं सुशर्मदम्। तच्छ्रुत्वा वक्ति स्वाचार्यं विकल्पं ॥९॥
वीरभद्रमहाचार्यवाक्यतस्तु श्मशानके। धर्मं विक्रीणयन्तं च प्रत्यक्षीभूय देवता ॥१०॥
संजगाद मुने स्वामिन्धर्मस्ते कीदृशो भुवि। ततः प्राह मुनिः सोपि सोमशर्मा गुणोज्ज्वलः ॥११॥
मूलोत्तरैर्गुणैर्युक्तो दशलाक्षणिको महान्। धर्मो देवि मम श्रीमज्जिनेन्द्रैर्भाषितः शुभः ॥१२॥
तत्समाकर्ण्य सा देवी सन्तुष्टा भक्तिभारतः। नत्वा मुनिं जगद्वन्द्यं संजगौ व्यक्तभाषया ॥१३॥
धम्मो जयवसियरणं धम्मो चिंतामणी अणग्घेओ। धम्मो सुहवसुधारा धम्मो कामदुहा धेणू ॥
किं जंपिएण बहुणा जं जं दीसइ सम्मतियलोए। इंदियमणोहिरामं तं तं धम्मफलं सव्वं ॥
सर्वलोकोत्तमस्यास्य नास्ति मूल्यं सुधर्मणः। किं तु सर्वोपसर्गस्य विनाशार्थं महामुनेः ॥१४॥

यहाँ विष्णुदत्त नाम का एक और ब्राह्मण रहता था। उसकी स्त्री का नाम विष्णुश्री था। विष्णुदत्त अच्छा धनी था। पर स्वभाव का अच्छा आदमी न था। किसी दिन कोई खास जरूरत पड़ने पर सोमशर्म ने विष्णुदत्त से कुछ रुपया कर्ज लिया था। उसका कर्ज अदा न कर पाया था कि एक दिन सोमशर्म के किसी जैनमुनि के धर्मोपदेश से वैराग्य हो जाने से मुनि हो गया। वहाँ से विहार कर वह कहीं अन्यत्र चला गया और दूसरे नगरों और गाँवों में धर्म का उपदेश करता हुआ एक बार फिर वह कोटपुर में आया। विष्णुदत्त ने तब उसे देखकर पकड़ लिया और कहा–साधुजी, आपके दोनों लड़के तो इस समय महा दरिद्र दशा में हैं। उनके पास एक फूटी कौड़ी तक नहीं हैं वे मेरा रुपया नहीं दे सकते। इसलिए या तो आप मेरा रुपया दे दीजिये या अपना धर्म बेच दीजिये। सोमशर्म मुनि के सामने बड़ी कठिन समस्या उपस्थित हुई, वे क्या करें, इसकी उन्हें कुछ सूझ न पड़ी। तब उनके गुरु वीरभद्राचार्य ने उनसे कहा–अच्छा तुम जाओ और धर्म बेचो! उनकी आज्ञा पाकर सोमशर्म मुनि मसान में जाकर धर्म बेचने लगे। इस समय एक देवी ने आकर उनसे पूछा–मुनिराज, जिस धर्म को आप बेच रहे हैं, भला कहिए तो वह कैसा है? उत्तर में मुनि ने कहा–मेरा धर्म अट्ठाईस मूलगुण और चौरासी लाख उत्तरगुणों से युक्त है तथा उत्तम–क्षमा, मार्दव, आर्जव, सत्य, शौच, संयम, तप, त्याग आकिंचन और ब्रह्मचर्य इन दस भेद रूप है। धर्म का यह स्वरूप श्री जिनेन्द्र भगवान् ने कहा है। मुनि द्वारा अपने बेचे जाने वाले धर्म की इस प्रकार व्याख्या सुनकर वह देवी बहुत प्रसन्न हुई उसने मुनि को नमस्कार कर धर्म की प्रशंसा में कहा–मुनिराज, आपने जो कहा वह बहुत ठीक है। यही धर्म संसार को वश करने के लिए एक वशीकरण मंत्र है, अमूल्य चिन्तामणि है, सुखरूप अमृत की धारा है और मनचाही वस्तुओं के दुहने–देने के लिए कामधेनु हैं। अधिक क्या किन्तु यह समझना चाहिए कि संसार में जो–

एकवारं त्रिमुष्ट्या च समुत्पाटितकेशजम्। मूल्यलेशं ददामीमं श्रीमतां शर्मकारिणाम् ॥१५॥
इत्युक्त्वासौ लसत्कान्तिप्रद्योतितककुब्मुखम्। रत्नराशिं विधायोच्चैर्देवता स्वगृहं गता ॥१६॥
श्रीमज्जिनेन्द्रसद्धर्मप्रभावः केन वर्ण्यते। यो धर्मः शर्मदो नित्यं सुरेन्द्राद्यैः समर्चितः ॥१७॥
प्रभाते तत्तपोलक्ष्मी-सत्प्रभावप्रवीक्षणात्। विष्णुदत्तो द्विजश्चापि नत्वा तं मुनिनायकम् ॥१८॥
संजगाद मुने धीर धन्यस्त्वं जैनतत्त्ववित्। दुर्धरोरुतपोयुक्तो विरक्तो मोहकर्मणि ॥१९॥
अहं दुष्कर्मयोगेन वंचितो धनतस्करैः। अतः परं भवत्पादपद्मयुग्माश्रयं भजे ॥२०॥
इत्यादिकैः शुभैर्वाक्यैः स्तुत्वा तं भक्तिनिर्भरः। पादमूले मुनेस्तस्य दीक्षामादाय निर्मदः ॥२१॥
मुनिर्भूत्वा गुरोर्भक्त्या स्वर्मोक्षसुखभागभूत्। अहो धर्माश्रितो जन्तुः को वा न स्यान्महासुखी ॥२२॥
सर्वभव्यजनाश्चान्ये धर्मे श्रीमज्जिनेशिनाम्। तं प्रभावं समालोक्य संजाता भक्तिनिर्भराः ॥२३॥
तद्धनैः श्रावकैश्चापि कोटितीर्थाभिधानकः। चैत्यालयो जिनेन्द्राणां कारितः शर्मदायकः ॥२४॥

जो मनोहरता देख पड़ती है वह सब एक धर्महीन का फल है। धर्म एक सर्वोत्तम अमोल वस्तु है। उसका मोल हो ही नहीं सकता। पर मुनिराज, आपको उस ब्राह्मण का कर्ज चुकाना है। आपका यह उपसर्ग दूर हो, इसलिए दीक्षा समय-केशलोंच किए आपके बालों को उस कर्ज के बदले दिये देती हूँ। यह कहकर देवी उन बालों को अपनी दैवी-माया से चमकते हुए बहुमूल्य रत्न बनाकर आप अपने स्थान पर चल दी। सच है, जैनधर्म का प्रभाव कौन वर्णन कर सकता है, जो कि सदा ही सुख देने वाला और देवों द्वारा पूजा किया जाता है ॥५-१७॥

सबेरा होने पर विष्णुदत्त, सोमशर्म मुनि के तप का प्रभाव देखकर चकित रह गया। उसकी मुनि पर तब बड़ी श्रद्धा हो गई उसने नमस्कार कर उनकी प्रशंसा में कहा-योगिराज, सचमुच आप बड़े ही भाग्यशाली है। आपके सरीखा विद्वान् और धीर मैंने किसी को नहीं देखा। यह आपही से महात्माओं का काम है जो मोहपाश को तोड़-तुड़ाकर इस प्रकार दुःसह तपस्या कर रहे हैं। महाराज, आपकी मैं किन शब्दों में तारीफ करूँ, यह मुझे नहीं जान पड़ता। आपने तो अपने जीवन को सफल बना लिया। पर हाय! मैं पापी पापकर्म के उदय से धनरूपी चोरों द्वारा ठगा गया। मैं अब इनके पैंचीले जाल से कैसे छूट सकूँगा? दयासागर! मुझे बचाइये। नाथ, अब तो मैं आप ही के चरणों की सेवा करूँगा। आपकी सेवा को ही अपना ध्येय बनाऊँगा। तब ही कहीं मेरा भला होगा। इस प्रकार बड़ी देर तक विष्णुदत्त ने सोमशर्म मुनि की स्तुति की। अन्त में प्रार्थना कर उनसे दीक्षा ले वह मुनि हो गया। जो विष्णुदत्त एक ही दिन पहले मुनि की इज्जत, प्रतिष्ठा बिगाड़ने को हाथ धोकर उनके पीछा पड़ा था और मुनि को उपसर्ग कर जिसने पाप बाँधा था वही गुरुभक्ति से स्वर्ग और मोक्ष के सुख का पात्र हो गया। सच है, धर्म की शरण ग्रहण कर सभी सुखी होती हैं। विष्णुदत्त के सिवा और भी बहुतेरे भव्यजन जैनधर्म का ऐसा प्रभाव देखकर जैनधर्म के प्रेमी हो गए और उस धन से, जिसे देवी ने मुनि के बालों को रत्नों के रूप में बनाया था, कोटितीर्थ नाम का एक बड़ा ही सुन्दर जिनमन्दिर बनवा दिया, जिसमें धर्मसाधन कर भव्यजन सुख-शान्ति लाभ-करते थे ॥१८-२४॥

श्रीमत्सारजिनेन्द्रदेवगदितं त्रैलोक्यसंपूजितं नाना शर्मविधायकं भवहरं स्वर्मोक्षदं सत्तपः।
आराध्यैव विशुद्धभक्तिभरतो ये साधवो धीधनाः प्राप्ता मुक्तिसुखं विनाशरहितं कुर्युस्तु ते मे श्रियम् ॥२५॥

इति कथाकोशे श्रीसोमशर्ममुनेराख्यानं समाप्तम्।

८७. कालाध्ययनाख्यानम्

यस्य ज्ञानं जगत्सारसंसाराम्भोधिपारदम्। तं प्रणम्य जिनं वक्ष्ये कालाध्ययनवृत्तकम् ॥१॥
वीरभद्रो जगद्भद्रो मुनीन्द्रो जैनतत्त्ववित्। एकदासौ महाटव्यां महोरात्रं पठेच्छ्रुतम् ॥२॥
श्रुतदेव्या तया दृष्टस्ततः सम्बोधनाय च। धृत्वा गोकुलिकारूपं समागत्य निशि स्फुटम् ॥३॥
सुगन्धिमधुरं तक्रं गृहीस्वेति स्व लीलया। सा जल्पन्ती मुनेः पार्श्वे चक्रे पर्यटनं तदा ॥४॥
वीरभद्रो मुनिः प्राह शास्त्राभ्यासैकमानसः। मुग्धे किं गृहिलासीति तक्रं गृह्णाति कोधुना ॥५॥
निशायां निर्जने देशे तच्छ्रुत्वा देवतावदत्। त्वमेव गृहीलोऽकाले पठस्यत्रागमं यतः ॥६॥
ततोसौ मुनिरालोक्य नक्षत्राणि नभस्तले। प्रबुद्धो गुरुसान्निध्यं गत्वालोच्य निजक्रियाम् ॥७॥

जो बुद्धिरूपी धन के मालिक, बड़े विचारशील साधु-सन्त जिन भगवान् के द्वारा उपदेश किए, सारे संसार में पूजे-माने जाने वाले, स्वर्ग-मोक्ष के या और सब प्रकार सांसारिक सुख के कारण, संसार का भय मिटाने वाले ऐसे परम पवित्र तप को भक्ति से ग्रहण करते हैं वे कभी नाश न होने वाले मोक्ष सुख का लाभ करते हैं। ऐसे महात्मा योगीराज मुझे भी आत्मीक सच्चा सुख दें ॥२५॥

८७. कालाध्ययन की कथा

जिनका ज्ञान सबसे श्रेष्ठ है और संसारसमुद्र से पार करने वाला है, उन जिनेन्द्र भगवान् को नमस्कार कर उचित काल में शास्त्राध्ययन कर जिसने फल प्राप्त किया उसकी कथा लिखी जाती है ॥१॥

जैनतत्त्व के विद्वान् वीरभद्र मुनि एक दिन सारी रात शास्त्राभ्यास करते रहे। उन्हें इस हालत में देखकर श्रुतदेवी एक अहीरनी का वेष लेकर उनके पास आई इसलिए कि मुनि को इस बात का ज्ञान हो जाए कि यह समय शास्त्रों के पढ़ने-पढ़ाने का नहीं है। देवी अपने सिर पर छाछ की मटकी रखकर और यह कहती हुई, कि लो, मेरे पास बहुत ही मीठी छाछ है, मुनि के चारों ओर घूमने लगी। मुनि ने तब उसकी और देखकर कहा-अरी, तू बड़ी बेसमझ जान पड़ती है, कहीं पगली तो नहीं हो गई है बतला तो ऐसे एकान्त स्थान में ओर रात में कौन तेरी छाछ खरीदेगा? उत्तर में देवी ने कहा-महाराज क्षमा कीजिए। मैं तो पगली नहीं हूँ किन्तु मुझे आप ही पागल देख पड़ते हैं। नहीं तो ऐसे असमय में, जिसमें पठन-पाठन की मना है, आप क्यों शास्त्राभ्यास करते? देवी का उत्तर सुनकर मुनिजी की आँखें खुलीं। उन्होंने आकाश की ओर नजर उठाकर देखा तो उन्हें तारे चमकते हुए देख पड़े उन्हें मालूम हुआ कि अभी बहुत रात है। तब वे पढ़ना छोड़कर सो गए ॥२-७॥

शास्त्रं संपठति स्मोच्चैः काले काले तथान्यदा। तं पठन्तं जिनैः प्रोक्तं स्वागमं मुनिसत्तमम् ॥८॥
दृष्ट्वासौ देवता तुष्टा विशुद्धाष्टविधार्चनैः। पूजयामास सद्भक्त्या सद्गुणैः को न पूजितः ॥९॥
ततोसौ वीरभद्रस्तु मुनीन्द्रो ज्ञानमण्डितः। दर्शनज्ञानचारित्रैः परलोकं सुधीर्गतः ॥१०॥

तस्माच्छ्रीजिनभाषितं शुभतरं ज्ञानं जगन्मोहनं
नित्यं सारविभूतिशर्मजनकं स्वर्गापवर्गप्रदम्।
युक्ता भक्तिभरेण निर्मलधियो विश्वप्रदीपं हितं
श्रित्वा शोककलंकपङ्कहरणं कुर्वन्तु सन्तः सुखम् ॥११॥

इति कथाकोशे कालाध्ययनाख्यानं समाप्तम्।

८८. अकालाध्ययनाख्यानम्

नत्वा जिनं जगद्वन्द्यं केवलज्ञानलोचनम्। अकालाख्यानकं वक्ष्ये सतां सम्बोधहेतवे ॥१॥
शिवनन्दी मुनिः कश्चिदेकदा गुरुवाक्यतः। श्रीमच्छ्रवणनक्षत्रोदये स्वाध्यायकालकः ॥२॥

सबेरा होने पर वे अपने गुरु महाराज के पास गए और अपनी इस क्रिया की आलोचना कर उनसे उन्होंने प्रायश्चित्त लिया। तब से वे शास्त्राभ्यास का जो काल है उसी में पठन-पाठन करने लगे। उन्हें अपनी गलती का सुधार किए देखकर देवी उनसे बहुत खुश हुई। बड़ी भक्ति से उसने उनकी पूजा की। सच है, गुणवानों की सभी पूजा करते हैं ॥७-९॥

इस प्रकार दर्शन, ज्ञान और चारित्र का यथार्थ पालन कर वीरभद्र मुनिराज अन्त समय में धर्म-ध्यान से मृत्यु लाभ कर स्वर्गधाम सिधारे ॥१०॥

भव्यजनों को भी उचित है कि वे जिन भगवान् के उपदेश किए, संसार को अपनी महत्ता से मुग्ध करने वाले, स्वर्ग या मोक्ष की सर्वोच्च सम्पदा को देने वाले, दुःख, शोक, कलंक आदि आत्मा पर लगे हुए कीचड़ को धो-देने वाले, संसार के पदार्थों का ज्ञान कराने में दीये की तरह काम देने वाले और सब प्रकार के सांसारिक सुख के आनुषंगिक कारण ऐसे पवित्र ज्ञान को भक्ति से प्राप्त कर मोक्ष का अविनाशी सुख लाभ करें ॥११॥

८८. अकाल में शास्त्राभ्यास करने वाले की कथा

संसार द्वारा पूजे जाने वाले और केवलज्ञान जिनका प्रकाशमान नेत्र है, ऐसे जिन भगवान् को नमस्कार कर असमय में जो शास्त्राभ्यास के लिए योग्य नहीं है, शास्त्राभ्यास करने से जिन्हें उसका बुरा फल भोगना पड़ा, उनकी कथा लिखी जाती है। इसलिए कि विचारशीलों को इस बात का ज्ञान हो कि असमय में शास्त्राभ्यास करना अच्छा नहीं है, उसका बुरा फल होता है ॥१॥

शिवनन्दी मुनि ने अपने गुरु द्वारा यद्यपि यह ज्ञान रखा था कि स्वाध्याय का समय-काल श्रवण नक्षत्र का उदय होने के बाद माना गया है, तथापि कर्मों के तीव्र उदय से वे अकाल में ही

भवत्येवं परिज्ञात्वा तथापि प्रौढकर्मतः। अकाले संपठन्मिथ्या-समाधिमरणेन सः ॥३॥
गंगानद्यां महामस्त्यः संजातः पापकर्मणा। जिनाज्ञालोपनेनैवं प्राणी दुर्गतिभाग्भवेत् ॥४॥
ततश्चैकदिने सोपि मत्स्यस्तु पुलिने शुभे। साधुपाठं समाकर्ण्य भूत्वा जातिस्मरोभवत् ॥५॥
अहो पठितमूर्खोहं जैनवाक्यपराङ्मुखः। संजातः पापतो मत्स्यो दुष्टकर्मविधायकः ॥६॥
इत्यात्मनिन्दनं कृत्वा गृहीत्वा त्रिजगद्धितम्। सम्यक्त्वं भक्तिभारेण संयुक्तः सदणुव्रतैः ॥७॥
समाराध्य जिनेन्द्रस्य पादपद्मद्वयं मुदा। स्वर्गे महर्धिको जातो देवः सत्पुण्यसम्बलः ॥८॥
धर्मस्याराधकः स्वर्गी भवेत्पापी विराधकः। पूर्वोसौ सत्सुखोपेतः परो दुःखाश्रितो जनः ॥९॥
इति ज्ञात्वा बुधैर्नित्यं धर्मः श्रीजिनभाषितः। आराध्यो भक्तितो नित्यं शक्त्या शर्मशतप्रदः ॥१०॥
विमलतरविभूतिः प्राणिनां शुद्धकीर्ति र्भवति विशदमूर्तिर्ज्ञानतश्चारुशान्तिः।
असुरसुरनरेन्द्रैः खेचरेन्द्रैः प्रपूज्यं जिनपतिवरबोधं संभजन्तु प्रभव्याः ॥११॥

इति कथाकोशे अकालाध्ययनाख्यानं समाप्तम्।

शास्त्राभ्यास किया करते थे। फल इसका यह हुआ कि मिथ्या समाधिमरण द्वारा मरकर उन्होंने गंगा में एक बड़े भारी मच्छ की पर्याय धारण की। सो ठीक ही है जिन भगवान् की आज्ञा का उल्लंघन करने से इस जीव को दुर्गति के दुःख भोगने ही पड़ते हैं ॥२-४॥

एक दिन नदी किनारे पर एक मुनि शास्त्राभ्यास कर रहे थे। इस मच्छ ने उनके पाठ को सुन लिया। उससे उसे जातिस्मरण हो गया। तब उसने इस बात का बहुत पछतावा किया कि हाय! मैं पढ़कर भी मूर्ख बना रहा, जो जैनधर्म से विमुख होकर मैंने पापकर्म बाँधा। उसी का यह फल हैं, जो मुझे मच्छ-शरीर लेना पड़ा। इस प्रकार अपनी निन्दा और अपने पापकर्म की आलोचना कर उसने भक्ति से सम्यक्त्व ग्रहण किया, जो कि सब जीवों का हित करने वाला है। इसके बाद वह जिन भगवान् की आराधना कर पुण्य के उदय से स्वर्ग में महर्द्धिक देव हुआ। सच है, मनुष्य धर्म की आराधना कर स्वर्ग जाता है और पापी धर्म से उल्टा चलकर दुर्गति में जाता है। पहला सुख भोगता है और दूसरा दुःख उठाता है। यह जानकर बुद्धिमानों को उचित है, उनका कर्तव्य है कि वे जिनेन्द्र भगवान् के उपदेश किए धर्म की भक्ति से अपनी शक्ति के अनुसार आराधना करें, जो कि सब सुखों का देने वाला है ॥५-१०॥

सम्यग्ज्ञान जिसने प्राप्त कर लिया उसकी सारे संसार में कीर्ति होती है, सब प्रकार की उत्तम-उत्तम सम्पदाएँ उसे प्राप्त होती है, शान्ति मिलती है और वह पवित्रता की साक्षात्प्रतिमा बन जाता है। इसलिए भव्यजनों को उचित है कि वे जिन भगवान् के पवित्र ज्ञान को, जो कि देवों और विद्याधरों द्वारा पूजा-माना जाता है, प्राप्त करने का यत्न करें ॥११॥

८९. विनयाख्यानम्

सर्व-देवेन्द्रनागेन्द्र-नरेन्द्राद्यैः समर्चितम्। नत्वा जिनं प्रवक्ष्येहं विनयाख्यानकं शुभम् ॥१॥
वत्सदेशे सुविख्याते कौशाम्बीपत्तने शुभे। राजाभूद्धनसेनाख्यो विष्णुभक्तो विमुग्धधीः ॥२॥
धनश्रीः श्रीरिवात्यन्तसुन्दरा तस्य कामिनी। श्रीजिनेन्द्रपदाम्भोजसद्भृङ्गी श्राविकोत्तमा ॥३॥
सुप्रतिष्ठाभिधस्तत्र पुरे भागवतस्तथा। तद्राजाग्रासने भुङ्क्ते भोजनं कुतपोव्रतः ॥४॥
स जलस्तंभिनीविद्या-सामर्थ्येन प्रपंचतः। यमुनाख्यामहानद्यामध्ये जापं करोति च ॥५॥
तत्प्रभावं समालोक्य सर्वे मूढजनास्तदा। संप्राप्ता विस्मयं युक्तं मूढा मूढक्रियारतः ॥६॥
अथ श्रीविजयार्धस्य दक्षिणश्रेणिसंस्थिते। रथनूपुरचक्रादिबालाख्ये पत्तनेऽभवत् ॥७॥
राजा विद्युत्प्रभः ख्यातः श्रावकव्रतमण्डितः। विद्युद्वेगा महाराज्ञी विष्णुभक्ता बभूव च ॥८॥
एकदा तौ विनोदेन कौशाम्बीमागतौ पुरीम्। माघमासे जलस्नानं नद्यां जापं जलोपरि ॥९॥
कुर्वन्तं सुप्रतिष्ठन्तं मिथ्यात्वविषदूषितम्। विद्युद्वेगा विलोक्योच्चै-स्तत्प्रशंसां चकार सा ॥१०॥

---

८९. विनयी पुरुष की कथा

इन्द्र, धरणेन्द्र, चक्रवर्ती आदि महापुरुषों द्वारा पूजे जाने वाले जिन भगवान् को नमस्कार कर विनयधर्म के पालने वाले मनुष्य की पवित्र कथा लिखी जाती है ॥१॥

वत्सदेश में सुप्रसिद्ध कौशाम्बी के राजा धनसेन वैष्णव धर्म के मानने वाले थे। उनकी रानी धनश्री, जो बहुत सुन्दरी और विदुषी थी, जिनधर्म पालती थी। उसने श्रावकों के व्रत ले रक्खे थे। यहाँ सुप्रतिष्ठ नाम का एक वैष्णव साधु रहता था। राजा इसका बड़ा आदर-सत्कार कराते थे और यही कारण था कि राजा इसे स्वयं ऊँचे आसन पर बैठाकर भोजन कराते थे। इसके पास एक जलस्तंभिनी नाम की विद्या थी। उससे यह बीच यमुना में खड़ा रहकर ईश्वराराधना किया करता था, पर डूबता न था। इसके ऐसे प्रभाव को देखकर मूढ़ लोग बड़े चकित होते थे। सो ठीक ही है मूर्खों को ऐसी मूर्खता की क्रियाएँ पसन्द हुआ ही करती है ॥२-६॥

विजयार्ध पर्वत की दक्षिण श्रेणी में बसे हुए रथनूपुर के राजा विद्युत्प्रभ जैनी थे, श्रावकों के व्रतों के पालने वाले थे और उनकी रानी विद्युद्वेगा वैष्णव धर्म की मानने वाली थी। सो एक दिन ये राजा-रानी प्रकृति की सुन्दरता देखते और अपने मन को बहलाते कौशाम्बी की ओर नदी-किनारे आ गए। वहाँ पहुँच कर देखा कि एक साधु यमुना में खड़ा रहकर तपस्या कर रहा है। विद्युत्प्रभ ने सुप्रतिष्ठ को जल में खड़ा देख उसने जान लिया कि यह मिथ्यादृष्टि है। पर उनकी रानी विद्युद्वेगा ने उस साधु की बहुत प्रशंसा की। विद्युत्प्रभ ने रानी से कहा यह कोई मिथ्यादृष्टि है जो लोगों को ठग रहा है। रानी ने कहा नहीं है एक बड़ा साधु है तब विद्युत्प्रभ ने रानी से कहा-अच्छी बात है, प्रिये, आओ तो मैं तुम्हें जरा इसकी मूर्खता बतलाता हूँ। इसके बाद ये दोनों चाण्डाल का

ततो विद्युत्प्रभः प्राह सुधीर्विद्याधराधिपः। आगच्छतो प्रिये चास्य मूढत्वं दर्शयामि ते ॥११॥
तदा चांडालरूपेण ताभ्यां द्वाभ्यां प्रपञ्चतः। यमुनोपरि गत्वाशु दुष्टकर्मोत्करस्य च ॥१२॥
प्रक्षालनेन तत्सर्वं जलं संदूषितं महत्। ततो रुष्टेन तेनापि प्रोक्त्वा कष्टमिति स्फुटम् ॥१३॥
नद्याश्चोपरि गत्वाशु तथा स्नानादिकं पुनः। प्रारब्धं मूढभावेन किं न कुर्वन्ति देहिनः ॥१४॥
पुनस्ताभ्यां परीक्षार्थं तज्जलं चातिदूषितम्। ततः सोपि प्रकोपेन दूरं गत्वा तथा स्थितः ॥१५॥
एवं ताभ्यां बहून्वारांस्तज्जले दूषिते तराम्। स्नानजापादिकं त्यक्त्वा मोहं प्राप्तः स मूढधीः ॥१६॥
ततस्ताभ्यां वनक्रीडाप्रासादादोलनादिकम्। विद्यया दर्शितं तस्य नभोयानादिकं तथा ॥१७॥
तद्दृष्ट्वा सुप्रतिष्ठोसौ विष्णुभक्तः सुविस्मयात्। अहो विद्याधराणां च देवानामपि नेदृशी ॥१८॥
विद्या संविद्यते यादृक्चाण्डालानां मनोहरा। एषा चेद्वर्त्तते मे च विद्या सर्वप्रवञ्चनम् ॥१९॥
करोमीति हृदि ध्यात्वा समागत्य तदन्तिकम्। संजगादेति भो ब्रूत यूयं कस्मात्समागताः ॥२०॥
महाश्चर्यं प्रकुर्वन्ति भवन्तः कथमीदृशम्। आनन्दो वर्त्तते मेऽत्र भवत्क्रीडासमीक्षणात् ॥२१॥
तच्छ्रुत्वा सोपि मातंगो जगौ भो विष्णुभाक्तिक। नैवं जानासि किं चात्र मातंगोहमिति स्फुटम् ॥२२॥
नमस्कर्त्तुं समायातो गुरोः पादद्वयं मुदा। तुष्टेन गुरुणा मह्यं दत्ता विद्या सुखप्रदा ॥२३॥
तस्याः प्रभावतः सर्वं मयेदं क्रियते ध्रुवम्। तत्समाकर्ण्य तेनोक्तं तदा भागवतेन च ॥२४॥

वेष बना ऊपर किनारे की ओर गए और मरे ढोरों का चमड़ा नदी में धोने लगे। अपने इस निन्द्यकर्म द्वारा इन्होंने जल को अपवित्र कर दिया। उस साधु को यह बहुत बुरा लगा। सो वह इन्हें कुछ कह सुनकर ऊपर की ओर चला गया। वहाँ उसने फिर नहाया धोया। सच है–मूर्खता के वश लोग कौन काम नहीं करते। साधु की यह मूर्खता देखकर ये भी फिर आगे जाकर चमड़ा धोने लगे। इनकी बार–बार यह शैतानी देखकर साधु को बड़ा गुस्सा आया। तब वह और आगे चला गया। इसके पीछे हो ये दोनों भी जाकर फिर अपना काम करने लगे। गर्ज यह कि इन्होंने उस साधु को बहुत ही कष्ट दिया। तब हार खाकर बेचारे को अपना जप–तप, नाम–ध्यान ही छोड़ देना पड़ा। इसके बाद उस साधु को इन्होंने अपनी विद्या के बल से वन में एक बड़ा भारी महल खड़ा कर देना, झूला बनाकर उस पर झूलना आदि अनेक अचम्भे डालने वाली बातें बतलाई उन्हें देखकर सुप्रतिष्ठ साधु बड़ा चकित हुआ। वह मन में सोचने लगा कि जैसी विद्या इन चाण्डालों के पास है ऐसी तो अच्छे–अच्छे विद्याधरों या देवों के पास भी न होगी। यदि यही विद्या मेरे पास भी होती तो मैं भी इनकी तरह बड़ी मौज मारता। अस्तु, देखें, इनके पास जाकर मैं कहूँ कि ये अपनी विद्या मुझे भी दे दें। इसके बाद वह उनके पास आया और उनसे बोला–आप लोग कहाँ से आ रहे हैं? आपके पास तो लोगों को चकित करने वाली बड़ी–बड़ी करामातें हैं। आपका यह विनोद देखकर मुझे बड़ी प्रसन्नता हुई। उत्तर में विद्युत्प्रभ विद्याधर ने कहा–योगी जी, आप मुझे नहीं जानते कि मैं चाण्डाल हूँ। मैं तो अपने गुरु महाराज के दर्शन के लिए यहाँ आया हुआ था। गुरुजी ने खुश होकर मुझे जो विद्या दी है, उसी के प्रभाव से यह सब कुछ मैं करता हूँ। अब तो साधुजी के मुँह में भी विद्यालाभ के लिए पानी आ

अहो कृपां विधायोच्चैर्मह्यमेषा प्रदीयते। विद्या यया करोम्यत्र सद्विनोदमहं पुनः ॥२५॥
स चाण्डालस्तदा प्राह त्वमुत्तमकुलोद्भवः। वेदवेदाङ्गपारज्ञो न विद्या विनयैर्विना ॥२६॥
विद्युद्वेगस्त्वकं चापि यत्र मां पश्यसि स्फुटम्। तत्राष्टाङ्गनमस्कारं कृत्वा सद्भक्तिनिर्भरः ॥२७॥
भवत्पादप्रसादेन जीवामीति प्रजल्पसि। तदा विद्याप्रसिद्धिस्ते न चेत्सिद्धापि याति सा ॥२८॥
सर्वं करोमि तेनोक्तं यद्भवद्भिः प्रजल्पितम्। ततस्तस्मै निजां विद्यां दत्वासौ स्वगृहं गतः ॥२९॥
सोपि विद्याप्रभावेन कृत्वा चारुविकुर्वणाम्। सिद्धा विद्येति संज्ञात्वा सुप्रतिष्ठाख्यो विष्णुभाक् ॥३०॥
तद्वेलातिक्रमे प्राप्तो भोजनार्थं नृपान्तिकम्। राज्ञा पृष्टः कथं वेलातिक्रमो भगवन्नभूत् ॥३१॥
प्रोक्तं तेन मृषा वाक्यं लम्पटेन कुवादिना। भो नरेन्द्र चिरं चारुतपोमाहात्म्यतोद्य मे ॥३२॥
सर्वे हरिहरब्रह्मा-सुराद्या भक्तिनिर्भराः। मां समभ्यर्च्य योगीन्द्रं स्वस्थानं संययुर्मुदा ॥३३॥
तेन राजन्बृहद्वेला संजातेति तथापरम्। अभूत्प्रभो नभोभागे गमनागमनं च मे ॥३४॥
ततः श्रीधनसेनोसौ भूपतिः प्राह भो द्विज। त्वं प्रभाते महाश्चर्यं सर्वं मे दर्शय ध्रुवम् ॥३५॥
दर्शयिष्यामि चेत्युक्त्वा स कृत्वा भोजनं गतः। प्रभाते मठिकायां च राजादीनां मनोहरम् ॥३६॥

गया। उन्होंने तब उस चाण्डाल रूपधारी विद्याधर से कहा–तो क्या कृपा करके आप मुझे भी यह विद्या दे सकते हैं, जिससे कि मैं भी फिर आपकी तरह खुशी मनाया करूँ। उत्तर में विद्याधर ने कहा–भाई, विद्या के देने में तो मुझे कोई हर्ज मालूम नहीं होता, पर बात यह है कि मैं ठहरा चाण्डाल और आप वेद–वेदांग के पढ़े हुए एक उत्तम कुल के मनुष्य, तब आपका मेरा गुरु–शिष्य भाव नहीं बना सकता और ऐसी हालत में आपसे मेरा विनय भी न हो सकेगा और बिना विनय के विद्या आ नहीं सकती। हाँ यदि आप यह स्वीकार करें कि जहाँ मुझे देख पावें वहाँ मेरे पाँवों में पड़कर बड़ी भक्ति के साथ यह कहें कि प्रभो, आप ही की चरणकृपा से मैं जीता हूँ तब तो मैं आपको विद्या दे सकता हूँ और तभी विद्या सिद्ध हो सकती है। बिना ऐसा किए सिद्ध हुई विद्या भी नष्ट हो जाती है। उसने यह सब बातें स्वीकार कर लीं। तब विद्युत्प्रभ विद्याधर इसे विद्या देकर अपने घर चला गया ॥७–२९॥

इधर सुप्रतिष्ठ साधु को जैसे ही विद्या सिद्ध हुई, उसने उन सब लीलाओं को करना शुरू किया जिन्हें कि विद्याधर ने किया था। सब बातें वैसी ही हुई देखकर सुप्रतिष्ठ बड़ा खुश हुआ। उसे विश्वास हो गया कि अब मुझे विद्या सिद्ध हो गई। इसके बाद वह भोजन के लिए राजमहल आया। उसे देर से आया हुआ देखकर राजा ने पूछा–भगवन् आज आपको बड़ी देर लगी? मैं बड़ी देर से आपका रास्ता देख रहा हूँ। उत्तर में सुप्रतिष्ठ ने मायाचारी से झूठ–मूठ ही कह दिया कि राजन्, आज मेरी तपस्या के प्रभाव से ब्रह्मा, विष्णु, महेश आदि सब देव आए थे। ये बड़ी भक्ति से मेरी पूजा करके अभी गए हैं। यही कारण मुझे देरी लगी और राजन् एक बात नई यह हुई कि मैं अब आकाश में ही चलने–फिरने लग गया। सुनकर राजा को बड़ा आश्चर्य हुआ और साथ ही में यह सब कौतुक देखने की उसकी मंशा हुई। उसने तब सुप्रतिष्ठ से कहा–अच्छा तो महाराज, अब आप आइए और भोजन कीजिए क्योंकि बहुत देर हो चुकी है। आप वह सब कौतुक मुझे बतलाइएगा। सुप्रतिष्ठ 'अच्छी बात

दर्शयत्येव ब्रह्मादिरूपं यावत्कृतोद्यमः। तावच्चण्डालरूपेण तत्रायातौ च तौ पुनः ॥३७॥
तदा दृष्ट्वा वदत्सोपि मातंगौ दुष्टचेष्टितौ। कस्मादिमौ समायातौ नष्टा विद्येति जल्पनात् ॥३८॥
किं कारणं नृपः प्राह भगवन्ब्रूहि मे स्फुटम्। प्रोक्तं तेन यथार्थं च श्रुत्वा सोपि महीपतिः ॥३९॥
तौ प्रणम्य लसद्भक्त्या चण्डालौ पूर्वयुक्तितः। ततो विद्यां समादाय तां परीक्ष्य प्रहर्षतः ॥४०॥
सम्प्राप्तः स्वगृहं शीघ्रं विद्यालाभो हि शर्मदः। येन जन्तुर्भवत्येव नित्यं सत्सौख्यभाजनम् ॥४१॥
अन्यदा स्वसभामध्ये विष्टरस्थो महीपतिः। तं चाण्डालं समायातं दृष्ट्वा भक्तिनिर्भरः ॥४२॥
सम्प्रणम्य जगादोच्चैर्भो स्वामिंस्त्वत्प्रसादतः। जीवामीति ततः सोपि विद्युत्प्रभखगाधिपः ॥४३॥
विलोक्य विनयं तस्य सुधीः संतुष्टमानसः। स्वरूपं प्रकटीकृत्य तस्मै भूपाय शर्मदाम् ॥४४॥
दत्वा विद्यां तथान्यां च सम्प्राप्तो निजमन्दिरम्। गुरूणां विनयेनोच्चैः किं न जायेत सुन्दरम् ॥४५॥

है' कहकर भोजन के लिए चला आया ॥३०-३६॥

दूसरे दिन सबेरा होते ही राजा और उसके अमीर-उमराव वगैरह सभी सुप्रतिष्ठ साधु के मठ में उपस्थित हुए। दर्शकों का भी ठाठ लग गया। सबकी आँखें और मन साधु की ओर जा लगे कि वह अपना नया चमत्कार बतलावें। सुप्रतिष्ठ साधु भी अपनी करामात बतलाने को आरंभ करने वाला ही था कि इतने में वह विद्युत्प्रभ विद्याधर और उसकी स्त्री उसी चाण्डाल वेष में वहीं आ धमके। सुप्रतिष्ठ के देवता उन्हें देखते ही कूँच कर गए। ऐसे समय उनके आ जाने से इसे उन पर बड़ी घृणा हुई उसने मन ही मन घृणा के साथ कहा-ये दुष्ट इस समय क्यों चले आये। उसका यह कहना था कि उसकी विद्या नष्ट हो गई। वह राजा वगैरह को अब कुछ भी चमत्कार न बतला सका और बड़ा शर्मिन्दा हुआ। तब राजा ने ''ऐसा एक साथ क्यों हुआ'', इसका सब कारण सुप्रतिष्ठ से पूछा। झक मारकर फिर उसे सब बातें राजा से कह देनी पड़ीं ॥३७-३९॥

सुनकर राजा ने उन चाण्डालों को बड़ी भक्ति से प्रणाम किया। राजा की यह भक्ति देखकर उन्होंने वह विद्या राजा को दे दी। राजा उसकी परीक्षा कर बड़ी प्रसन्नता से अपने महल लौट गया। सो ठीक ही है विद्या का लाभ सभी को सुख देने वाला होता है ॥४०-४१॥

राजा की भी परीक्षा का समय आया। विद्या प्राप्ति के कुछ दिनों बाद एक दिन राजा राज-दरबार में सिंहासन पर बैठा हुआ था। राजसभा सब अमीरों-उमरावों से ठसा-ठस भरी हुई थी। इसी समय राजगुरु चाण्डाल वहाँ आया, जिसने कि राजा को विद्या दी थी। राजा उसे देखते ही बड़ी भक्ति से सिंहासन पर से उठा और उसके सत्कार के लिए कुछ आगे बढ़कर उसने उसे नमस्कार किया और कहा-प्रभो, आप ही के चरणों की कृपा से मैं जीता हूँ। राजा की ऐसी भक्ति और विनयशीलता देखकर विद्युत्प्रभ बड़ा खुश हुआ। उसने तब अपना खास रूप प्रकट किया और राजा को और भी कई विद्याएँ देकर वह अपने घर चला गया। सच है, गुरुओं के विनय से लोगों को सभी सुन्दर-सुन्दर वस्तुएँ प्राप्त होती है। इस आश्चर्य को देखकर धनसेन, विद्युद्वेगा तथा और भी बहुत

तदाश्चर्यं समालोक्य स राजा धनसेनवाक्। विद्युद्वेगा तथान्ये च संजाताः श्रावकोत्तमाः ॥४६॥
अन्यैश्चापि महाभव्यैः स्वर्गमोक्षसुखप्रदः। गुरूणां विनयः कार्यो विशुद्धपरिणामतः ॥४७॥
सर्वकार्यप्रसिद्धिं च या करोति क्षणार्द्धतः। अस्तु सा सद्गुरोर्भक्तिः क्रियासन्दोहभूषणम् ॥४८॥
वन्द्यते स गुरुनित्यं यः संसारमहार्णवम्। स्वयं तरति पूतात्मा भव्यानां तारणक्षमः ॥४९॥

यस्य श्रीजिनपादपद्मयुगले देवेन्द्रचन्द्रार्चिते
शास्त्रे सद्विनयस्तथा मुनिजने जैने सदा तिष्ठति।
तस्य श्रीजयकीर्तिकान्तविलसद्बोधादयः सद्गुणाः
प्रीत्यां पार्श्वनिवासिनोतिनितरां तिष्ठन्ति शर्मप्रदाः ॥५०॥

इति कथाकोशे विनयाख्यानं समाप्तम्।

९०. अवग्रहाख्यानम्

पादपद्मद्वयं नत्वा जिनेन्द्रस्य शुभप्रदम्। उपधानकथा वक्ष्ये यतः सौख्यं भजाम्यहम् ॥१॥
अहिच्छत्रपुरे राजा वसुपालो विचक्षणः। श्रीमज्जैनमते भक्तो वसुमत्याभिधा प्रिया ॥२॥

से लोगों ने श्रावक-व्रत स्वीकार किए। विनय का इस प्रकार फल देखकर अन्य भव्यजनों को भी उचित है कि वे गुरुओं का विनय, भक्ति निर्मल भावों से करें ॥४२-४७॥

जो गुरुभक्ति क्षण मात्र में कठिन से कठिन काम को पूरा कर देती है वही भक्ति मेरी सब क्रियाओं की भूषण बने। मैं उन गुरुओं को नमस्कार करता हूँ कि जो संसार-समुद्र से स्वयं तैरकर पार होते हैं और साथ ही और भव्यजनों को पार करते हैं ॥४८-४९॥

जिनके चरणों की पूजा देव, विद्याधर, चक्रवर्ती आदि बड़े-बड़े महापुरुष करते है उन जिन भगवान् का, उनके रचे पवित्र शास्त्रों का और उनके बताये मार्ग पर चलने वाले मुनिराजों का जो हृदय से विनय करते हैं, उनकी भक्ति करते है उनके पास कीर्ति, सुन्दरता, उदारता, सुख-सम्पत्ति और ज्ञान-आदि पवित्र गुण अत्यन्त पड़ोसी होकर रहते हैं अर्थात् विनय के फल से उन्हें सब गुण होते हैं ॥५०॥

९०. अवग्रह-नियम लेने वाले की कथा

पुण्य के कारण जिन भगवान् के चरणों को नमस्कार कर उपधान अवग्रह की अर्थात् वह काम जब तक न होगा तब तक मैं ऐसी प्रतिज्ञा करता हूँ, इस प्रकार का नियम कर जिसने फल प्राप्त किया, उसकी कथा लिखी जाती है, जो सुख को देने वाली है ॥१॥

अहिच्छत्रपुर के राजा वसुपाल बड़े बुद्धिमान् थे। जैनधर्म पर उनकी बड़ी श्रद्धा थी। उनकी रानी का नाम वसुमती था। वसुमती भी अपने स्वामी के अनुरूप बुद्धिमती और धर्म पर प्रेम करने वाली थी। वसुपाल ने एक बड़ा ही विशाल और सुन्दर 'सहस्त्रकूट' नाम का जिनमन्दिर बनवाया।

तेन श्रीवसुपालेन कारिते भुवनोत्तमे। लसत्सहस्त्रकूटे श्री-जिनेन्द्रभवने शुभे ॥३॥
श्रीमत्पार्श्वजिनेन्द्रस्य प्रतिमा पापनाशिनी। तत्रास्ते चैकदा तस्यां भूपतेर्वचनेन च ॥४॥
दिने लेपं ददात्युच्चैर्लेपकाराः कलान्विताः। मांसादिसेविनस्ते तु ततो रात्रौ स लेपकः ॥५॥
पतत्येव क्षितौ शीघ्रं कदर्थ्यन्ते च तेखिलाः। एवं च कतिचिद्वारैः खेदक्षुण्णे नृपादिके ॥६॥
तदैकेन परिज्ञात्वा लेपकारेण धीमता। देवताधिष्ठितां दिव्यां जिनेन्द्रप्रतिमां हिताम् ॥७॥
कार्यसिद्धिर्भवेद्यावत्तावत्कालं सुनिश्चितम्। अवग्रहं समादाय मांसादेर्मुनिपार्श्वतः॥८॥
तस्यां लेपः कृतस्तेन स लेपः संस्थितस्तदा। कार्यसिद्धिर्भवत्येवं प्राणिनां व्रतशालिनाम्॥९॥
तदासौ वसुपालेन भूभुजा परया मुदा। नानावस्त्रसुवर्णाद्यैः पूजितो लेपकारकः ॥१०॥
तथा कार्यप्रसिद्ध्यर्थं भक्त्या ज्ञानादिकर्मणि। अवग्रहः प्रकर्त्तव्यो मुन्यादिबुधसत्तमैः ॥११॥

जिनपतिकथितोसौ बोधसिन्धुः प्रयुक्त्या विशदतरमुनीन्द्रैः सेवितः शर्महेतुः।
सुरनरखचरेन्द्रैः पूजितो भक्तिसांद्रैः स भवतु मम नित्यं केवलज्ञानकर्त्ता ॥१२॥

इति कथाकोशे अवग्रहाख्यानं समाप्तम्।

उसमें उन्होंने श्रीपार्श्वनाथ भगवान् की प्रतिमा विराजमान की। राजा ने प्रतिमा पर लेप चढ़ाने को एक अच्छे होशियार लेपकार को बुलाया और प्रतिमा पर लेप चढ़ाने को उससे कहा। राजाज्ञा पाकर लेपकार ने प्रतिमा पर बहुत सुन्दरता से लेप चढ़ाया। पर रात होने पर वह लेप प्रतिमा पर से गिर पड़ा। दूसरे दिन फिर ऐसा ही किया गया। रात में वह लेप भी गिर पड़ा। गर्ज यह कि वह दिन में लेप लगाता और रात में वह लेप गिर पड़ता। इस तरह उसे कई दिन बीत गए। ऐसा क्यों होता है, इसका उसे कुछ भी कारण न जान पड़ा। उससे वह तथा राजा वगैरह बड़े दुःखी हुए। बात असल में यह थी कि वह लेपकार मांस खाने वाला था। इसलिए उसकी अपवित्रता से प्रतिमा पर लेप न ठहरता था। तब उस लेपकार को एक मुनि द्वारा ज्ञान हुआ कि प्रतिमा अतिशय वाली है, कोई शासनदेवी या देव उसकी रक्षा में सदा नियुक्त रहते हैं। इसलिए जब तक यह कार्य पूरा हो तब तक मुझे मांस के न खाने का व्रत लेना चाहिए। लेपकार ने वैसा ही किया, मुनिराज के पास उसने मांस न खाने का नियम ले लिया। इसके बाद जब उसने दूसरे दिन लेप किया तो अब की बार वह ठहर गया। सच है, व्रती पुरुषों के कार्य की सिद्धि होती ही है। तब राजा ने अच्छे-अच्छे वस्त्राभूषण देकर लेपकार का बड़ा आदर-सत्कार किया। जिस तरह इस लेपकार ने अपने कार्य की सिद्धि के लिए नियम किया उसी प्रकार और लोगों को तथा मुनियों को भी ज्ञान प्रचार, शासन-प्रभावना आदि कामों में अवग्रह या प्रतिज्ञा करना चाहिए ॥२-११॥

वह जिनेन्द्र भगवान् का उपदेश किया ज्ञानरूपी समुद्र मुझे भी केवलज्ञानी-सर्वज्ञ बनावें, जो अत्यन्त पवित्र साधुओं द्वारा आत्म-सुख की प्राप्ति के लिए सेवन किया जाता है और देव, विद्याधर, चक्रवर्ती आदि बड़े-बड़े महापुरुष जिसे भक्ति से पूजते हैं ॥१२॥

९१. अभिमानस्याख्यानम्

विशुद्धकेवलज्ञानं नत्वा श्रीमज्जिनेश्वरम्। बहुमानकथां वच्मि सारशर्मप्रदायिनीं ॥१॥
काशीदेशे सुविख्याते जातो वाराणसीपुरे। राजा वृषध्वजो धीमान्स्वप्रजाप्रतिपालकः ॥२॥
वसुमत्यभिधा तस्य महादेवी बभूव च। रूपलावण्यसौभाग्यमण्डिता पूर्वपुण्यतः ॥३॥
तथा गंगानदीतीरे पलासग्रामवासकः। नाम्नाशोकोभवद्धीमान्महागोकुलिकस्तदा ॥४॥
ददात्यसौ नरेन्द्राय तस्मै संवत्सरं प्रति। सद्घृतैः पूर्णकुंभानां सहस्रं करमुत्तमम् ॥५॥
तस्य भार्याभवन्नन्दा सती वन्ध्या स्वकर्मतः। साशोकाय सुधीर्भार्या रोचते नैव मानसे ॥६॥
रूपशीलादियुक्तापि कामिनी पुत्रवर्जिता। पुंसश्चित्ते समायाति नैव वल्लीव निष्फला ॥७॥
अशोकस्तु तदा सोपि सुधीर्गोकुलिको महान्। पुत्रार्थं कामिनीमन्यां सुनन्दां परिणीतवान् ॥८॥
तयोश्च कलहे जाते स्त्रियोस्तेन च धीमता। अर्द्धमर्द्धं विधायोच्चैर्दत्तं सर्वं गृहादिकम् ॥९॥
नन्दा नित्यं विशुद्ध्यादि-भाजनादिप्रयत्नकम्। दानमानादिसत्पूजां गोपालानां विधाय च ॥१०॥

---

९१. अभिमान करने वाली की कथा

निर्मल केवलज्ञान धारी जिन भगवान् को नमस्कार का मान करने से बुरा फल प्राप्त करने वाले की कथा लिखी जाती है। इस कथा को सुनकर जो लोग मान के छोड़ने का यत्न करेंगे वे सुख लाभ करेंगे ॥१॥

बनारस के राजा वृषध्वज प्रजा का हित चाहने वाले और बड़े बुद्धिमान् थे। इनकी रानी का नाम वसुमती था। वसुमती बड़ी सुन्दर थी। राजा का उस पर अत्यन्त प्रेम था ॥२-३॥

गंगा के किनारे पर पलास नाम का एक गाँव बसा हुआ था। उसमें अशोक नाम का एक ग्वाला रहता था। वह ग्वाला राजा को गाँव के लगान में कोई एक हजार घी के भरे घड़े दिया करता था। उसकी स्त्री नन्दा पर इसका प्रेम न था। इसलिए कि वह बाँझ थी और यह सच है, सुन्दर या गुणवान् स्त्री भी बिना पुत्र के शोभा नहीं पाती है और न उस पर पति का पूरा प्रेम होता है। वह फल रहित लता की तरह निष्फल समझी जाती है। अपनी पहली स्त्री को निःसन्तान देखकर अशोक ग्वाले ने एक और ब्याह कर लिया। इस नई स्त्री का नाम सुनन्दा था। कुछ दिनों तक तो इन दोनों सौतों में लोक-लाज से पटती रही, पर जब बहुत ही लड़ाई-झगड़ा होने लगा तब अशोक ने इनसे तंग आकर अपनी जितनी धन-सम्पत्ति थी उसे दोनों के लिए आधी-आधी बाँट दिया। नन्दा को अलग घर में रहना पड़ा और सुनन्दा अशोक के पास ही रही। नन्दा में एक बात बड़ी अच्छी थीं वह एक तो समझदार थी। दूसरे वह अपने दूध दुहने के लिए बरतन वगैरह को बड़ा साफ रखती। उसे सफाई बड़ी पसन्द थी। इसके सिवा वह अपने नौकर ग्वाले पर बड़ा प्रेम करती। उन्हें अपना नौकर न समझ अपने कुटुम्ब की तरह मानती। वह उनका बड़ा आदर-सत्कार करती। उन्हें हर एक त्यौहारों के मौकों पर दान-मानादि से बड़ा

घृतकुंभसहस्त्रार्द्धं कृत्वा संवत्सरं प्रति। ददाति स्म स्वनाथाय राजदेयं गुणोज्ज्वला ॥११॥
सुनन्दा च स्वरूपादि-महागर्वेण दूषिता। गोपालानां कुधीः पूजां नैव यत्नं करोति च ॥१२॥
तस्या गोपालकाः सर्वे स्वयं दुग्धं पिबन्ति च। तस्मात्तस्य घृतं जातं प्रमादादतितुच्छकम् ॥१३॥
नन्दयान्यघृतं चापि दत्तं गोकुलिकेन तु। निर्घाटिता सुनन्दा सा सौभाग्येन प्रगर्विता ॥१४॥
नन्दा नन्दप्रदा सा च स्वपुण्येन तदा सती। स्वगेहे सर्ववित्तादौ सुप्रधानाभवच्छुभा ॥१५॥
एवं मुन्यादिभिर्जैनधर्मकर्मणि शर्मदम्। पूजादानादिकं कार्यं नित्यं सद्बोधसिद्धये ॥१६॥
श्रीमज्जैनपदाम्बुजेऽत्र नितरां स्वर्मोक्षसौख्यप्रदे शास्त्रे श्रीजिनभाषिते शुभतरे धर्मे गुरौ सज्जने।
ये यच्छन्ति विशुद्धभक्तिभरतः सद्भूरिमानादिकं तेषां सारयशः सुबोधविलसच्छ्रीशर्म नित्यं भवेत् ॥१७॥
इति कथाकोशे बहुमानाख्यानं समाप्तम्।

खुश रखती। इसलिए वे ग्वाले लोग भी उसे बहुत चाहते थे और उनके कामों को अपना ही समझ कर किया करते थे। जब वर्ष पूरा होता तो नन्दा राज लगान के हजार घी के घड़ों से अपना आधा हिस्सा पाँच सौ घड़े अपने स्वामी को प्रतिवर्ष दे दिया करती थी। पर सुनन्दा में ये सब बातें न थीं। उसे अपनी सुन्दरता का बड़ा अभिमान था। इसके सिवा यह बड़ी शौकीन थी। साज-सिंगार में ही उसका सब समय चला जाता था। वह अपने हाथों से कोई काम करना पसन्द न करती थी। सब नौकर-चाकरों द्वारा ही होता था। इस पर भी उसका अपने नौकरों के साथ अच्छा बरताव न था। सदा उनके साथ वह माथा-फोड़ी किया करती थी। किसी का अपमान करती, किसी को गालियाँ देती और किसी को भला-बुरा कहकर झिटकारती। न वह उन्हें कभी त्यौहारों पर कुछ देकर प्रसन्न करती। गर्ज यह कि सब नौकर-चाकर उससे प्रसन्न न थे। जहाँ तक उनका बस चलता वे भी सुनन्दा को हानि पहुँचाने का यत्न करते थे। यहाँ तक कि वे जो गायों को चराने जंगल में ले जाते, वहाँ उनका दूध दुह कर पी लिया करते थे। इससे सुनन्दा के यहाँ पहले वर्ष में ही घी बहुत थोड़ा हुआ। वह राज लगान का अपना आधा हिस्सा भी न दे सकी। उसके इस आधे हिस्से को भी बेचारी नन्दा ने ही चुकाया। सुनन्दा की यह दशा देख कर अशोक ने घर से निकाल बाहर की। नन्दा को अपना गया अधिकार प्राप्त हुआ। पुण्य से वह अशोक की प्रेमपात्र हुई। घर बार, धन-दौलत की वह मालकिन हुई जिस प्रकार नन्दा अपने घर गृहस्थी के कामों को अच्छी तरह चलाने के लिए सदा दान-मानादि किया करती उसी प्रकार अपने पारमार्थिक कामों के लिए भव्यजनों को भी अभिमान रहित होकर जैनधर्म की उन्नति के कार्यों में दान-मानादि करते रहना चाहिए। उससे वे सुखी होंगे और सम्यग्ज्ञान लाभ करेंगे। जो स्वर्ग-मोक्ष का सुख देने वाले जिन भगवान् को बड़ी भक्ति से पूजा-प्रभावना करते हैं, भगवान् के उपदेश किए शास्त्रों के अनुसार चल उनका सत्कार करते हैं, पवित्र जैनधर्म पर श्रद्धा-विश्वास करते हैं और सज्जन धर्मात्माओं का आदर सत्कार करते हैं वे संसार में सर्वोच्च यश लाभ करते हैं और अन्त में कर्मों का नाश कर परम पवित्र केवलज्ञान-कभी नाश न होने वाला सुख प्राप्त करते हैं ॥४-१७॥

९२. अनिह्नवाख्यानम्

यस्य सत्केवलज्ञाने भाति विश्वमणूपमम्। तं जिनेन्द्रं प्रणम्योच्चै-रनिह्नवकथां ब्रुवे ॥१॥
अवन्तिविषये श्रीमानुज्जयिन्यां विचक्षणः। राजाभूद्धृतिषेणाख्यस्तद्राज्ञी मलयावती ॥२॥
चण्डप्रद्योतनः पुत्रस्तयोर्जातो गुणोज्ज्वलः। रूपलावण्यसौभाग्यमण्डितः पूर्वपुण्यतः ॥३॥
दक्षिणादिपथे वेनातटाख्ये नगरे तथा। ब्राह्मणः सोमशर्माभूत्सोमाख्या ब्राह्मणी तयोः ॥४॥
सुपुत्रः कालसंदीवः सर्वविद्याविराजितः। उज्जयिन्यां समागत्य स श्रीसोमसुतो महान् ॥५॥
चण्डप्रद्योतनं चारुलिपीश्चाष्टादशोत्तमाः। पाठयामास पूतात्मा कालसंदीववाक् सुधीः ॥६॥
एकां म्लेच्छलिपिं तेन तं सुपाठयता तथा। कूटं पठन्प्रभोः पुत्रो हतः पादेन सोवदत् ॥७॥
यदाहं संभविष्यामि भूपतिस्तु तदा तव। पादं संखण्डयिष्यामि युक्तं स्वल्पमतिः शिशुः ॥८॥
ततस्तं पाठयित्वासौ कालसंदीवको द्विजः। गत्वा दक्षिणदेशं च मुनिर्जातो गुणोज्ज्वलः ॥९॥

---

९२. निह्नव-असल बात को छुपाने वाले की कथा

जिनके सर्व-श्रेष्ठ ज्ञान में यह सारा संसार परमाणु के समान देख पड़ता है, उन सर्वज्ञ भगवान् को नमस्कार कर निह्नव-जिस प्रकार जो बात हो उसे उसी प्रकार न कहना, उसे छुपाना, इस सम्बन्ध की कथा लिखी जाती है ॥१-२॥

उज्जैन के राजा धृतिषेण की रानी मलयावती के चण्डप्रद्योत नाम का एक पुत्र था। वह जैसा सुन्दर था वैसा ही गुणवान् भी था। पुण्य के उदय से उसे सभी सुख सामग्री प्राप्त थी ॥३॥

एक बार दक्षिण देश के वेनातट नगर में रहने वाले सोमशर्मा ब्राह्मण का कालसंदीव नाम का विद्वान् पुत्र उज्जैन में आया। वह कई भाषाओं का जानने वाला था। इसलिए धृतिषेण ने चण्डप्रद्योत को पढ़ाने के लिए उसे रख लिया। कालसंदीव ने चण्डप्रद्योत को कई भाषाओं का ज्ञान कराने के बाद एक म्लेच्छ-अनार्यभाषा को पढ़ाना शुरू किया। इस भाषा का उच्चारण बड़ा ही कठिन था। राजकुमार को उसके पढ़ने में बहुत दिक्कत पड़ा करती थी। एक दिन कोई ऐसा ही पाठ आया, जिसका उच्चारण बहुत क्लिष्ट था। राजकुमार से उसका ठीक-ठीक उच्चारण न बन सका। कालसन्दीव ने उसे शुद्ध उच्चारण कराने की बहुत कोशिश की, पर उसे सफलता प्राप्त न हुई इससे कालसन्दीव को कुछ गुस्सा आ गया। गुस्से में आकर उसने राजकुमार के एक लात मार दी। चण्डप्रद्योत था तो राजकुमार ही सो उसका भी कुछ मिजाज बिगड़ गया। उसने अपने गुरु महाराज से तब कहा-अच्छा महाराज, आपने जो मुझे मारा हैं, मैं भी इसका बदला लिए बिना न छोड़ूँगा। मुझे आप राजा होने दीजिये, फिर देखिएगा कि मैं भी आपके इसी पाँव को काटकर ही रहूँगा। सच है, बालक कम-बुद्धि हुआ ही करते हैं। कालसन्दीव कुछ दिनों तक और यहाँ रहा, फिर वह यहाँ से दक्षिण की ओर चला गया। उधर कालसन्दीव को एक दिन किसी मुनि का उपदेश सुनने का मौका मिला। उपदेश सुनकर उसे बड़ा वैराग्य हुआ। वह मुनि हो गया ॥४-९॥

सोपि श्रीधृतिषेणाख्यो राजा श्रीजिनभक्तिभाक्। चण्डप्रद्योतनायोच्चैर्दत्वा राज्यं तपोगृहीत् ॥१०॥
एकदा तस्य भूपस्य चण्डप्रद्योतनस्य हि। लेखः संप्रेषितो म्लेच्छराजनोच्चैः स्वकार्यतः ॥११॥
केनापि वाचितो नैव स लेखस्तु ततो नृपः। स्वयं वाचयति स्मोच्चैस्तं लेखं तुष्टमानसः ॥१२॥
स्मृत्वासौ सद्गुरुं चित्ते तं समानीय भक्तितः। पूजयामास शुद्धात्मा तत्पदाम्बुजमद्भुतम् ॥१३॥
भवन्ति सद्गुरोर्वाचो भव्यानां शर्मदायकाः। यथा चौषधयोजन्तोर्भवेयुश्चारुसौख्यदाः ॥१४॥
सोपि श्रीकालसंदीवो मुनिः श्रीजिनसूत्रवित्। कस्मैचिच्छ्वेतसंदीवनाम्ने दीक्षां जिनोदिताम् ॥१५॥
दत्वा कुर्वन्विहारं च भव्यान्सम्बोधयन्सुधीः। श्रीमद्वीरजिनेन्द्रस्य विपुलाख्यगिरौ स्थिताम् ॥१६॥
समवादिसृतिं प्राप्तो महाशर्मविधायिनीम्। कृत्वा तद्वन्दनां भक्त्या संस्थितो विमलाशयः ॥१७॥
श्वेतसंदीवकश्चापि नूतनो मुनिसत्तमः। समवादिसृतेर्बाह्ये योगे स्वातापने स्थितः ॥१८॥
निर्गच्छता तदा श्रीमच्छ्रेणिकेन महीभुजा। दृष्टः कस्ते गुरुश्चेति संपृष्टोसौ सुभक्तितः ॥१९॥

इधर धृतिषेण राजा भी चण्डप्रद्योत को सब राज-काज सौंपकर साधु बन गया। राज्य की बागडोर चण्डप्रद्योत के हाथ में आयी। इसमें कोई सन्देह नहीं कि चण्डप्रद्योत ने भी राज्य शासन बड़ी नीति के साथ चलाया। प्रजा के हित के लिए उसने कोई बात उठा न रखी ॥१०॥

एक दिन चण्डप्रद्योत पर एक यवनराज का पत्र आया। भाषा उसकी अनार्य थी। उस पत्र को कोई राजकर्मचारी न बाँच सका। तब राजा ने उसे देखा तो वह उससे बच गया। पत्र पढ़कर राजा की अपने गुरु कालसन्दीव पर बड़ी भक्ति हो गई। उसने बचपन की अपनी प्रतिज्ञा को उसी समय भुला दिया। इसके बाद राजा ने कालसन्दीव का पता-लगाकर उन्हें अपने शहर बुलाया और बड़ी भक्ति से उनके चरणों की पूजा की। सच है, गुरुओं के वचन भव्यजनों को उसी तरह सुख देने वाले होते हैं जैसे रोगी को औषधि ॥११-१४॥

कालसन्दीव मुनि यहाँ श्वेतसन्दीव नाम के किसी एक भव्य को दीक्षा देकर फिर बिहार कर गए। मार्ग में पड़ने वाले शहरों और गाँवों में उपदेश करते हुए वे विपुलाचल पर महावीर भगवान् के समवसरण में गए, जो कि बड़ी शान्ति देने वाला था। भगवान् के दर्शन कर उन्हें बहुत शान्ति मिली। वन्दना कर भगवान् का उपदेश सुनने के लिए वे वहीं बैठ गए ॥१५-१७॥

श्वेतसन्दीव मुनि भी इन्हीं के साथ थे। वे आकर समवसरण के बाहर आतापन योग द्वारा तप करने लगे। भगवान् के दर्शन कर जब महामण्डलेश्वर श्रेणिक जाने लगे तब उन्होंने श्वेतसन्दीव मुनि को देखकर पूछा-आपके गुरु कौन है; किनसे आपने यह दीक्षा ग्रहण की? उत्तर में श्वेतसंदीव मुनि ने कहा-राजन्, मेरे गुरु श्रीवर्धमान भगवान् है। इतना कहना था कि उनका सारा शरीर काला पड़ गया। यह देख श्रेणिक को बड़ा आश्चर्य हुआ। उन्होंने जाकर गणधर भगवान् से इसका कारण पूछा। उन्होंने कहा-श्वेतसन्दीव के असल गुरु हैं कालसंदीव, जो कि यहीं बैठे हुए हैं। उनका इन्होंने निह्नव किया-सच्ची बात न बतलाई इसलिए उनका शरीर काला पड़ गया है। तब श्रेणिक ने श्वेतसंदीव को समझा कर उनकी गलती उन्हें सुझाई और कहा-महाराज, आपकी अवस्था के

स च प्राह मुनिः श्रीमद्वर्द्धमानो गुरुर्मम। इत्युक्ते पाण्डुरं तस्य शरीरं कृष्णतामितम् ॥२०॥
ततो व्याघुटितः श्रीमाञ्छ्रेणिको गौतमं मुनिम्। तच्छरीरस्य कृष्णत्वकारणं पृष्टवान्नृपः ॥२१॥
तेनोक्तं ज्ञानिना भूप स्वगुरोर्निह्नवाद्ध्रुवम्। तत्कायः कृष्णवर्णोभूत्तत्समाकर्ण्य धीमता ॥२२॥
शीघ्रं पश्चात्समागत्य तत्समीपं महीभुजा। श्रेणिकेन शुभैर्वाक्यैर्भक्त्या सम्बोधितः स च ॥२३॥
ततोऽसौ श्वेतसंदीवो मुनिः कृत्वा स्वनिन्दनम्। शुक्लध्यानेन संहत्वा घातिकर्मचतुष्टयम् ॥२४॥
केवलज्ञानमुत्पाद्य लोकालोकप्रकाशकम्। पूजितस्त्रिजगद्भव्यैः संप्राप्तो मोक्षमक्षयम् ॥२५॥
ततो भव्यैर्न कर्त्तव्यो निह्नवः स्वगुरोः कदा। समाराध्यो गुरुर्यस्मात्स्वर्गमोक्षसुखप्रदः ॥२६॥
स श्रीकेवललोचनोतिचतुरो भव्यौघसम्बोधको देवेन्द्रादिनरेन्द्रखेचरशतैर्भक्त्या सदाभ्यर्चितः।
व्यक्तानन्तचतुष्टयो गुणनिधिः श्रीश्वेतसंदीववाक् कुर्यान्मे भवशान्तिमक्षयसुखं शीघ्रं जिनः शर्मदम् ॥२७॥

इति कथाकोशे निह्नवाख्यानं समाप्तम्।

९३. व्यञ्जनहीनाख्यानम्

नत्वा श्रीमज्जिनेन्द्रस्य पादपद्मद्वयं मुदा। वक्ष्ये व्यंजनहीनस्य कथां सम्बोधहेतवे ॥१॥
देशे मगधसंज्ञेऽभूत्पुरे राजगृहे सुधीः। वीरसेनो महाराजो वीरसेना प्रिया तयोः ॥२॥

योग्य ऐसी बातें नहीं हैं ऐसी बातों से पाप बन्ध होता है इसलिए आगे से आप कभी ऐसा न करेंगे, यह मेरी आपसे प्रार्थना है। श्रेणिक की इस शिक्षा का श्वेतसंदीव मुनि के चित्त पर बड़ा गहरा असर पड़ा। वे अपनी भूल पर बहुत पछताये। इस आलोचना से उनके परिणाम बहुत उन्नत हुए। यहाँ तक कि उसी समय शुक्लध्यान द्वारा कर्मों का नाश कर लोकालोक का प्रकाशक केवलज्ञान उन्होंने प्राप्त कर लिया। वे सारे संसार द्वारा अब पूजे जाने लगे। अन्त में अघातिया कर्मों को नष्ट कर उन्होंने मोक्ष का अनन्त सुख लाभ किया। श्वेतसंदीव मुनि के इस वृत्तान्त से भव्यजनों को शिक्षा लेनी चाहिए कि वे अपने गुरु आदि का निह्नव न करें क्योंकि गुरु स्वर्ग-मोक्ष के देने वाले हैं, इसलिए सेवा करने योग्य हैं ॥१८-२६॥

वे श्रीश्वेतसंदीव मुनि मेरे बढ़ते हुए संसार की-भव-भ्रमण की शान्ति कर-मेरा संसार का भटकना मिटाकर मुझे कभी नाश न होने वाला और अन्त मोक्ष-सुख दें, जो केवलज्ञानरूपी अपूर्व नेत्र के धारक हैं, भव्यजनों को हित की ओर लगाने वाले हैं, देव, विद्याधर, चक्रवर्ती आदि महापुरुषों द्वारा पूज्य है और अनन्तचतुष्टय-अनन्तदर्शन, अनन्तज्ञान, अनन्तसुख और अनन्तवीर्य से युक्त हैं तथा और भी अनन्त गुणों के समुद्र हैं ॥२७॥

९३. अक्षरहीन अर्थ की कथा

जिन भगवान् के चरणों को नमस्कार कर अक्षरहीन अर्थ की कथा लिखी जाती है। मगधदेश की राजधानी राजगृह के राजा जब वीरसेन थे, उसी समय की यह कथा है। वीरसेन की रानी का नाम वीरसेना था। इनके एक पुत्र हुआ, उसका नाम रखा गया सिंह। सिंह को पढ़ाने के लिए वीरसेन

सिंहनामा सुतो जातस्तस्योपाध्यायकोभवत्। सोमशर्मा सुधीः सर्वशास्त्रव्याख्याविचक्षणः ॥३॥
सुरम्यविषये ख्याते पोदनादिपुरे तथा। राजा सिंहरथस्तस्योपरि प्राप्तेन वैरिणा ॥४॥
वीरसेनेन भूभर्त्ता पोदनाख्यपुरात्तदा। सिंहोध्यापयितव्योसौ सुलेखः प्रेषितो गृहम् ॥५॥
सिंहोध्यापयितव्यः स शब्दस्यैव विचारणे। 'ध्यै' स्मृतीति प्रचिन्ताया-मस्यधातोः प्रयोगकम् ॥६॥
ज्ञात्वा कारयितव्यस्तु चिन्तां राज्यादिके सुतः। सिंहो पाठयितव्यो न जगौ चेति कुवाचकः ॥७॥
इत्याकारे प्रलुप्ते च व्याख्याते भ्रान्तितस्तदा। पाठितो नैव सिंहोसौ हा कष्टं मूढचेष्टितम् ॥८॥
आगतेन ततो राज्ञा वीरसेनेन धीमता। ज्ञात्वा तत्कारणं कष्टं वाचको दण्डितः क्रुधा ॥९॥
तस्मादेवं न कर्त्तव्यः प्रमादः साधुभिः क्वचित्। येन कार्यस्य हानिः स्यादर्थसन्दोहनाशिनी ॥१०॥
यथौषधं हीनगुणत्वमाश्रितं निहन्ति नैवात्र शरीरखेदनाम्। तथाक्षरैर्हीनगुणाश्रितं श्रुतं हितं न तत्तच्च शुभं सुधीः पठेत् ॥११॥

इति कथाकोशे व्यंजनहीनाख्यानं समाप्तम्।

महाराज ने सोमशर्मा ब्राह्मण को रखा। सोमशर्मा सब विषयों का अच्छा विद्वान् था ॥१-३॥

पोदनपुर के राजा सिंहरथ के साथ वीरसेन की बहुत दिनों से शत्रुता चली आती थी। सो मौका पाकर वीरसेन ने उस पर चढ़ाई कर दी। वहाँ से वीरसेन ने अपने यहाँ एक राज्य-व्यवस्था की बाबत पत्र लिखा और समाचारों के सिवा पत्र में वीरसेन ने एक यह भी समाचार लिख दिया था कि राजकुमार सिंह के पठन-पाठन की व्यवस्था अच्छी तरह करना। इसके लिए उन्होंने यह वाक्य लिखा था कि ''सिंहो ध्यापयितव्यः''। जब यह पत्र पहुँचा तो इसे एक अर्धदग्ध ने बाँचकर सोचा-'ध्यै' धातु का अर्थ है स्मृति या चिन्ता करना इसलिए अर्थ हुआ कि 'राजकुमार पर अब राज्य-चिन्ता का भार डाला जाये' उसे अब पढ़ाना उचित नहीं। बात यह थी कि उक्त वाक्य के पृथक् पद करने से-''सिंहः अध्यापयितव्यः'' ऐसे पद होते हैं और इनका अर्थ होता है-सिंह को पढ़ाना, पर उस बाँचने वाले अर्धदग्ध ने इस वाक्य के-''सिंहः ध्यापयितव्य'' ऐसे पद समझकर इसके सन्धिस्थ अकार पर ध्यान न दिया और केवल 'ध्यै' धातु से बने हुए 'ध्यापयितव्यः' का चिन्ता अर्थ करके राजकुमार का लिखना-पढ़ना छुड़ा दिया। व्याकरण के अनुसार तो उक्त वाक्य के दोनों ही तरह पद होते है और दोनों ही शुद्ध हैं, पर यहाँ केवल व्याकरण की ही दरकार न थी। कुछ अनुभव भी होना चाहिए था। पत्र बाँचने वाले में इस अनुभव की कमी होने से उसने राजकुमार का पठन-पाठन छुड़ा दिया। इसका फल यह हुआ कि जब राजा आए और अपने कुमार का पठन-पाठन छूटा हुआ देखा तो उन्होंने उसके कारण की तलाश की। यथार्थ बात मालूम हो जाने पर उन्हें उस अर्धदग्ध-मूर्ख पत्र बाँचने वाले पर बड़ा गुस्सा आया। उन्होंने इस मूर्खता की उसे बड़ी कड़ी सजा दी। इस कथा से भव्यजनों को यह शिक्षा लेनी चाहिए कि वे कभी ऐसा प्रमाद न करें, जिससे कि अपने कार्य को किसी भी तरह की हानि पहुँचे। जिस प्रकार गुणहीन औषधि से कोई लाभ नहीं होता, वह शरीर के किसी रोग को नहीं मिटा सकती, उसी तरह अक्षर रहित शास्त्र या मन्त्र वगैरह भी लाभ नहीं पहुँचा सकते। इसलिए बुद्धिमानों को उचित है कि वे सदा शुद्ध रीति से शास्त्राभ्यास करें- उसमें किसी तरह का प्रमाद न करें, जिससे कि हानि होने की संभावना है ॥४-११॥

९४. अर्थहीनाख्यानम्

सर्वकल्याणकेषूच्चै-श्चर्चितांस्त्रिदशादिभिः। नत्वा जिनेश्वरान्वक्ष्ये अर्थहीनकथानकम् ॥१॥
विनीतविषये रम्ये पुरेऽयोध्याभिधानके। राजाऽभूद्वसुपालाख्यो वसुमत्यभिधा प्रिया ॥२॥
तयोः पुत्रः समुत्पन्नो वसुमित्रो विचक्षणः। तस्योपाध्यायको जातो गर्गनामा गुणोज्ज्वलः ॥३॥
अवन्तिविषये पुर्यामुज्जयिन्यां तथाभवत्। वीरदत्तो महान्राजा वीरदत्ता सुवल्लभा ॥४॥
अयं श्रीवीरदत्ताख्यो वसुपालस्य भूभुजः। मानभङ्गं करोत्युच्चैस्ततः स वसुपालकः ॥५॥
उज्जयिन्यां समागत्य तस्योपरि महाक्रुधा। गतेषु दिवसेषूच्चैर्वसुमत्यादिकान्प्रति ॥६॥
पुत्रोध्यापयितव्योसौ वसुमित्रोतिसादरम्। शालिभक्तं मसिस्पृक्तं सर्पिर्युक्तं दिनं प्रति ॥७॥

---

९४. अर्थहीन वाक्य की कथा

गर्भ, जन्म, तप, ज्ञान और निर्वाण ऐसे पाँच कल्याणों में स्वर्ग के देवों ने आकर जिनकी बड़ी भक्ति से पूजा की, उन जिन भगवान् को नमस्कार कर अर्थहीन अर्थात् उल्टा अर्थ करने के सम्बन्ध की कथा लिखी जाती है ॥१॥

वसुपाल अयोध्या के राजा थे। उनकी रानी का नाम वसुमती था। इनके वसुमित्र नाम का एक बुद्धिमान् पुत्र था। वसुपाल ने अपने पुत्र के लिखने-पढ़ने का भार एक गर्ग नाम के विद्वान् पंडित को सौंपकर उज्जैन के राजा वीरदत्त पर चढ़ाई कर दी। कारण वीरदत्त हर समय वसुपाल का मानभंग किया करता था और उनकी प्रजा को भी कष्ट दिया करता था। वसुपाल उज्जैन आकर कुछ दिनों तक शहर का घेरा डाले रहे। इस समय उन्होंने अपनी राज्य-व्यवस्था के सम्बन्ध का एक पत्र अयोध्या भेजा। उसी में अपने पुत्र के बाबत उन्होंने लिखा- ॥२-६॥

''वसुमित्र के पढ़ाने-लिखाने का प्रबन्ध अच्छा करना, कोई त्रुटि न करना और उसके पढ़ाने वाले पंडित जी को खाने-पीने की कोई तकलीफ न हो-उन्हें घी, चावल, दूध-भात वगैरह खाने को दिया करना। पत्र पहुँचा। बाँचने वाले ने उसे ऐसा ही बाँचा। पर श्लोक में [1]मससिप्पृक्तं एक शब्द

---

१. श्लोक में 'मसिस्पृक्तं' शब्द है : उससे ग्रन्थकार का क्या मतलब है यह समझ में नहीं आता। पर वह ऐसी जगह प्रयोग किया गया है कि उसे 'शालिभक्तं' का विशेषण न किए गति ही नहीं है। आराधना कथाकोश की छन्दोबन्ध भाषा बनाने वाले पंडित बख्तावरमल उक्त श्लोकों की भाषा यों करते हैं-

''सुत वसुमित्र पढ़ाइयो नित्त, गर्गनाम पाठक जो पवित्त।
ताको भोजन तंदुल घीव, लिखन हेत मसि देव सदीव॥''

पंडित बख्तावरमलजी ने 'मसिस्पृक्तं' शब्द का अर्थ किया है-उपाध्याय को लिखने को स्याही देना। यह उन्होंने कैसे ही किया हो, पर उस शब्द में ऐसी कोई शक्ति नहीं जिससे कि यह अर्थ किया जा सके और यदि ग्रन्थकार का भी इसी अर्थ से मतलब हो तो कहना पड़ेगा कि उनकी रचना शक्ति बड़ी ही शिथिल थी। हमारा यह विश्वास केवल इसी डेढ़ श्लोक से ही ऐसा ही हुआ किन्तु इतने बड़े ग्रन्थ में जगह-जगह, श्लोक-श्लोक में

गर्गोपाध्यायकस्योच्चैर्दीयते भोजनाय च। लेखं संप्रेषयामास भूपश्चेति निजं गृहम् ॥८॥
विनीतानगरीं प्राप्तः स लेखस्तु प्रमादतः। वाचितो वाचकेनैव महामुग्धेन कर्मतः ॥९॥
सुतोध्यापयितव्योसौ तथा गर्गाय धीमते। मसिर्घृतं सुभक्तं च दीयते भोजनक्षणे ॥१०॥
चूर्णीकृत्य ततोङ्गारं घृतभक्तेन मिश्रितम्। दत्तं तस्मै तकैर्मूढैरुपाध्यायाय सेवकैः ॥११॥
आगतेन ततो राज्ञा समाधानं सुभक्तितः। उपाध्यायश्च पृष्टोसौ संजगाविति भो नृप ॥१२॥
अस्ति मे कुशलं देव भवत्पुण्यप्रसादतः। किन्तु तेऽत्र कुलाचारैर्मसिं भोक्तुं क्षमोस्मि न ॥१३॥

है। इसका अर्थ करने में वह गलती कर गया। उसने इसे 'शालिभक्तं' का विशेषण समझ यह अर्थ किया कि घी, दूध और मसि[२] मिले चावल पंडित जी को खाने को देना ऐसा ही हुआ।''॥७-८॥

स्याही काली होती है और कोयला भी काला, शायद इसी रंग की समानता से ग्रन्थकार ने कोयले की जगह मसि का प्रयोग कर दिया होगा? पर है आश्चर्य! ग्रन्थकार ने इस श्लोक में मसि शब्द को अलग लिखा है, पर ऊपर के श्लोक में आए हुए 'मसिस्पृक्तं' शब्द का ऐसा जुदा अर्थ किसी तरह नहीं किया जा सकता। ग्रन्थकार की कमजोरी की हद है, जो उनकी रचना इतनी शिथिल दीख पड़ती है।

जब बेचारे पंडित जी भोजन करने को बैठते तब चावलों में घी वगैरह के साथ थोड़ा कोयला भी पीसकर मिला दिया जाया करता था। जब राजा विजय प्राप्त कर लौटे तब उन्होंने पंडित जी से कुशल समाचार उत्तर में पूछा। उत्तर में पंडित जी ने कहा–राजाधिराज, आपके पुण्य प्रसाद से मैं हूँ तो अच्छी तरह, पर खेद है कि आपके कुल परम्परा की रीति के अनुसार मुझसे मसि–कोयला नहीं खाया जा सकता। इसलिए अब क्षमा कर आज्ञा दें तो बड़ी कृपा हो। राजा को पंडित जी की बात का बड़ा अचम्भा हुआ। उनकी समझ में न आया कि बात क्या है। उन्होंने फिर उसका खुलासा पूछा। जब सब बातें उन्हें ज्ञान पड़ी तब उन्होंने रानी से पूछा–मैंने तो अपने पत्र में ऐसी कोई बात न लिखी थी, फिर पंडित जी को ऐसा खाने को दिया जाकर क्यों तंग किया जाता था? रानी ने राजा

ऐसी ही शिथिलता देख पड़ती है। हाँ यह कहा जा सकता है कि ग्रन्थकार ने इतना बड़ा ग्रन्थ बना जरूर लिया, पर हमारे विश्वास के अनुसार उन्हें ग्रन्थ की साहित्य सुन्दरता, रचना सुन्दरता आदि बातों में बहुत थोड़ी भी सफलता शायद ही प्राप्त हुई हो! इस विषय का एक पृथक् लेख लिखकर हम पाठकों की सेवा में उपस्थित करेंगे, जिससे वे हमारे कथन में कितना तथ्य है, इसका ठीक-ठीक पता पा सकेंगे।

२. 'मसि' का अर्थ स्याही प्रसिद्ध है। पं० बख्तावरमलजी ने भी स्याही अर्थ किया है। पर ग्रंथकार इसका अर्थ करते हैं–'कोयला'।

देखिए–

मसिर्घृतं सुभक्तं च दीयते भोजनक्षणे।

चूर्णीकृत्य ततोङ्गारं घृतभक्तेन मिश्रितम्॥ दत्तं तस्मै इति।

तदा श्रीवसुपालेन पृष्टा राज्ञी च कारणम्। तं लेखं दर्शयामास सा सती गुणमण्डिता ॥१४॥
ततस्तेन नरेन्द्रेण वाचकस्य महाक्रुधा। मुण्डनादिखरारोहैः कृतो दण्डस्तु कष्टदः ॥१५॥
एवमन्यैर्न कर्त्तव्यं साधुभिस्तु प्रमादतः। सदर्थस्याप्यनर्थत्वं सर्वशास्त्रविचक्षणैः ॥१६॥
तस्माच्छ्रीजिनभाषितं शुभतरं कीर्तिप्रमोदप्रदं ज्ञानं ज्ञानघनैर्विशुद्धचरणैः सद्भिः सदा सेवितम्।
युक्त्या भक्तिभरेण निर्मलधियो भव्या भजन्त्यत्र ये तेषां सारसुखं प्रबोधविलसच्छ्रीसंभवं संभवेत् ॥१७॥

इत कथाकोशे अर्थहीनाख्यानं समाप्तम्।

९५. व्यंजनार्थहीनस्याख्यानम्

विशुद्धकेवलज्ञानं नत्वा श्रीमज्जिनेश्वरम्। व्यंजनार्थप्रहीनस्य प्रवक्ष्येहं कथानकम् ॥१॥
कुरुजांगलसद्देशे हस्तिनागपुरे परे। महापद्मोभवद्राजा जिनपादाब्जषट्पदः ॥२॥
तस्य राज्ञी महासाध्वी पद्मश्री रूपशालिनी। श्रीमज्जिनेन्द्रसद्धर्म-कर्मसन्दोहभाविनी ॥३॥
तथा सुरम्यदेशे च पोदनाख्यमहापुरे। सिंहनादो महीनाथ-स्तस्योपरि महाक्रुधा ॥४॥
स श्रीमांश्च महापद्मः पोदनादिपुरं गतः। तत्र श्रीमज्जिनेन्द्राणां महास्तंभसहस्रकम् ॥५॥

के हाथ में उनका लिखा हुआ पत्र देकर कहा—आपके बाँचने वाले ने हमें यही मतलब समझाया था। इसलिए यह समझकर, कि ऐसा करने से राजा साहब का कोई विशेष मतलब होगा मैंने ऐसी व्यवस्था की थी। सुनकर को बड़ा गुस्सा आया। उन्होंने पत्र बाँचने वाले को उसी समय देश निकाले की सजा देकर उसे अपने शहर बाहर करवा दिया। इसलिए बुद्धिमानों को उचित है कि वे लिखने-बाँचने में ऐसा प्रमाद का अर्थ कर अनर्थ न करें ॥९-१६॥

यह विचार कर जो पवित्र आचरण के धारी और ज्ञान जिनका धन है ऐसे सत्पुरुष भगवान् के उपदेश किए हुए, पुण्य के कारण और यश तथा आनन्द को देने वाले ज्ञान-सम्यग्ज्ञान के प्राप्त करने का भक्तिपूर्वक यत्न करेंगे वे अनन्तज्ञानरूपी लक्ष्मी का सर्वोच्च सुख लाभ करेंगे ॥१७॥

९५. व्यंजनहीन अर्थ की कथा

निर्मल केवलज्ञान के धारक श्रीजिनेन्द्र भगवान् को नमस्कार कर व्यंजनहीन अर्थ करने वाले की कथा लिखी जाती है ॥१॥

तया सार्द्धं प्रगत्वा च यत्नाल्लब्ध्वा जगद्धितम्। समाधिगुप्तनामानं प्रणम्य मुनिसत्तमम्॥९५॥
जगौ स्वामिन्कृपां कृत्वा दीक्षां मे देहि शुद्धधीः। तच्छ्रुत्वा स मुनिः प्राह जैनतत्त्वविदाम्वरः ॥९६॥
अहो पुत्रि तवेदानीं दीक्षाकालो न विद्यते। पूर्वं वारत्रयं चक्रे त्वया सद्वृत्तखण्डनम् ॥९७॥
पश्चाद्व्रतं समाराध्य त्वं जातासि नृपात्मजा। दुःखं ते व्रतभङ्गेन जातं वारत्रयं ध्रुवम् ॥९८॥
तत्कर्मणि प्रशान्ते च पुत्रराज्यं विलोक्य वै। तेन सार्द्धं सुपुत्रेण दीक्षा ते संभविष्यति ॥९९॥
श्रुत्वा समाधिगुप्तस्य मुनेर्वाक्यं सुखप्रदम्। नत्वा तं क्षुल्लिकाभ्यर्णे भक्त्या सौख्येन सा स्थिता ॥१००॥
इतोसौ बालकस्तेन बालदेवखगेशिना। सारसर्वकलासूच्चैः संचक्रे कुशलो महान् ॥१०१॥
एकदा तौ समागत्य करकण्डुखगाधिपौ। हस्तिनागपुरस्यैव श्मशाने लीलया स्थितौ ॥१०२॥
तदा तत्र समायातो मुनीन्द्रो जयभद्रवाक्। दिव्यज्ञानी लसद्वृत्तो मुनिवृन्दसमन्वितः ॥१०३॥
केनचिद्यतिना तत्र दृष्ट्वा नर-कपालके। मुखे लोचनयोर्जातं वेणुत्रयमनुत्तरम् ॥१०४॥
गुरोः प्रोक्तमहो स्वामिन्निदं किं कौतुकं स च। तच्छ्रुत्वा जयभद्राख्यो मुनिः प्राह तपोनिधिः ॥१०५॥

पद्मावती तब करकण्डु से जुदा होकर गान्धारी नाम की क्षुल्लिका के पास आई उसे उसने भक्ति से प्रणाम किया और आज्ञा पा उसी के पास वह बैठ गई। थोड़ी देर बार पद्मावती ने उस क्षुल्लिका से अपना सब हाल कहा और जिनदीक्षा लेने की इच्छा प्रकट की। क्षुल्लिका उसे तब समाधिगुप्त मुनि के पास लिवा गई पद्मावती ने मुनिराज को नमस्कार कर उनसे भी अपनी इच्छा कह सुनाई। उत्तर में मुनि ने कहा–बहिन, तू साध्वी होना चाहती है, तेरा यह विचार बहुत अच्छा है पर यह समय तेरी दीक्षा के लिए उपयुक्त नहीं हैं। कारण तूने पहले जन्म में नागदत्ता की पर्याय में जिनव्रत को तीन बार ग्रहण कर तीनों बार ही छोड़ दिया था और फिर चौथी बार ग्रहण कर तू उसके फल से राजकुमार हुई तूने तीन बार व्रत छोड़ा उससे तुझे तीनों बार ही दुःख उठाना पड़ा। तीसरी बार का कर्म कुछ और बचा है। वह जब शान्त हो जाए और इस बीच में तेरे पुत्र को भी राज्य मिल जाए तब कुछ दिनों तक राज्य सुख भोग कर फिर पुत्र के साथ-साथ ही तू भी साध्वी होना। मुनि द्वारा अपना भविष्य सुनकर पद्मावती उन्हें नमस्कार कर उस क्षुल्लिका के साथ चली गई। अब से वह पद्मावती उसी के पास रहने लगी ॥९४-१००॥

इधर करकण्डु बालदेव के यहाँ दिनों-दिन बढ़ने लगा। जब उसकी पढ़ने की उमर हुई तब बालदेव ने अच्छे-अच्छे विद्वान् अध्यापकों को रखकर उसे पढ़ाया। करकण्डु पुण्य के उदय से थोड़े ही वर्षों में पढ़-लिखकर अच्छा होशियार हो गया। कई विषय में उसकी अरोक गति हो गई एक दिन बालदेव और करकण्डु हवा-खोरी करते-करते शहर के बाहर श्मशान में आ निकले। ये दोनों एक अच्छी जगह बैठकर श्मशान भूमि की लीला देखने लगे। इतने में जयभद्र मुनिराज अपने संघ को लिए इसी श्मशान में आकर ठहरे। यहाँ एक नर-कपाल पड़ा हुआ था। उसके मुँह और आँखों के तीन छेदों में तीन बाँस उग रहे थे। उसे देखकर एक मुनि ने विनोद से अपने गुरु से पूछा-भगवान्

हस्तिनागपुरे योऽत्र महाराजा भविष्यति। अंकुशच्छत्रदण्डाः स्यु-स्तस्य चैतत्त्रयेण वै ॥१०६॥
विप्रेण केनचित्तत्र समाकर्ण्य मुनेर्वचः। वेणुत्रयं समुन्मूल्य गृहीतं सुधनाशया ॥१०७॥
तस्माद्विप्रात्सुधीः सोपि करकण्डुर्गृहीतवान्। यस्य यन्मुनिनोद्दिष्टं तस्य तद्भवति ध्रुवम् ॥१०८॥
कियद्दिनेषु तत्रैव हस्तिनागपुरे मृतः। बलवाहनभूपस्तु विपुत्रः कर्मयोगतः ॥१०९॥
तत्सज्जनैस्तदा हस्ती प्रेषितो विधिपूर्वकम्। स्वराजान्वेषणायोच्चैस्ततः सोपि महागजः ॥११०॥
करकण्डुं समालोक्य सारपुण्यसमन्वितम्। अभिषिंच्य प्रयत्नेन धृत्वा तं निजमस्तके ॥१११॥
राजमन्दिरमानीय स्थापयामास विष्टरे। ततस्तैः सज्जनैश्चापि प्रोल्लसज्जयघोषणैः ॥११२॥
महोत्सवशतैः शीघ्रं करकण्डुर्गुणोज्ज्वलः। स्वप्रभुर्विहितो भक्त्या किं न स्याज्जिनपूजनात् ॥११३॥
तत्क्षणे बालदेवस्य खेचरस्य सुपुण्यतः। विद्यासिद्धिरभूदुच्चैस्ततोसौ परया मुदा ॥११४॥
पद्मावतीं सतीं तस्य मातरं तां समर्प्य च। सस्नेहं तं प्रणम्योच्चैः खगाद्रिं खचरोगमत् ॥११५॥
तदासौ करकण्डुश्च हस्तिनागपुरे प्रभुः। सर्वशत्रून्समुन्मूल्य कुर्वन्राज्यं सुखं स्थितः ॥११६॥

यह क्या कौतुक है, जो इस नर-कपाल में तीन बाँस उगे हुए हैं? तपस्वी मुनि ने उसके उत्तर में कहा- इस हस्तिनापुर का जो नया राजा होगा, इस बाँसों के उसके लिए अंकुश, छत्र, दण्ड वगैरह बनेंगे। जयभद्राचार्य द्वारा कहे गए इस भविष्य को किसी एक ब्राह्मण ने सुन लिया। अतः वह धन की आशा से इन बाँसों को उखाड़ लाया। उसके हाथ से इन्हें करकण्डु ने खरीद लिया। सच है मुनि लोग जिसके सम्बन्ध में जो बात कह देते हैं वह फिर होकर ही रहती है। उस समय हस्तिनापुर का राजा बलवाहन था। इसके कोई संतान न थी। उसकी मृत्यु हो गई अब राजा किसको बनाया जाए, इस विषय में चर्चा चली। आखिर यह निश्चय हुआ कि महाराज का खास हाथी जल भरा सुवर्ण-कलश देकर छोड़ा जाए। वह जिसका अभिषेक कर राजसिंहासन पर ला बैठा दे, वही इस राज्य का मलिक हो। ऐसा ही किया गया। हाथी राजा को ढूँढ़ने निकला। चलता-चलता वह करकण्डु के पास पहुँचा। वही इसे अधिक पुण्यवान् दीख पड़ा। उसी समय उसने करकण्डु का अभिषेक कर उसे अपने ऊपर चढ़ा लिया और राज्यसिंहासन पर ला रख दिया। सारी प्रजा ने उस तेजस्वी करकण्डु को अपना मालिक हुआ देख खूब जय-जयकार मनाया और खूब आनन्द उत्सव किया। करकण्डु के भाग्य का सितारा चमका। वह राजा हुआ। सच है, जिन भगवान् की पूजा के फल से क्या-क्या प्राप्त नहीं होता। करकण्डु के राजा होते ही बालदेव को उसकी नष्ट हुई विद्याएँ फिर सिद्ध हो गई उसे उसकी सेवा का मनचाहा फल मिल गया। इसके बाद बालदेव विद्या की सहायता से करकण्डु की खास माँ पद्मावती जहाँ थी, वहाँ गया और उसे करकण्डु के पास लाकर उसने दोनों माता-पुत्रों का मिलाप करवाया। पद्मावती आज कृतार्थ हुई उसकी वर्षों की तपस्या समाप्त हुई पश्चात् बालदेव इन दोनों को बड़ी नम्रता से प्रणाम कर अपनी राजधानी में चला गया ॥१०१-११५॥

करकण्डु के राजा होने पर कुछ राजा लोग उससे विरुद्ध होकर लड़ने को तैयार हुए। पर करकण्डु ने अपनी बुद्धिमानी और राजनीति की चतुरता से सबको अपना मित्र बनाकर देशभर में शत्रु का नाम

तत्प्रतापं समाकर्ण्य कदाचिद्दन्तिवाहनः। दूतं संप्रेषयामास तदन्ते सोपि दूतकः ॥११७॥
समागत्य प्रभुं नत्वा करकण्डुं जगाद च। भो प्रभो मत्प्रभुर्वक्ति दन्तिवाहननामभाक् ॥११८॥
त्वया राज्यं प्रकर्त्तव्यं कृत्वा मे सेवनं सदा। अन्यथा ते प्रभुत्वं च वर्त्तते नैव भूतले ॥११९॥
तच्छ्रुत्वासौ प्रभुः प्राह करकण्डुर्महाक्रुधा। रे रे दूत त्वकं याहि मारयामि न नीतिवित् ॥१२०॥
रणांगणे मया कार्यं भावि यत्क्रियते हि तत्। इत्युक्त्वा वेगतो दत्वा प्रयाणं स्वबलान्वितः ॥१२१॥
गत्वा चम्पापुरीं बाह्ये संस्थितः सुभटाग्रणीः। कार्ये समागते न स्युः सद्भटा मन्दबुद्धयः ॥१२२॥
दन्तिवाहनराजापि स्वसैन्येन विनिर्गतः। तदा व्यूहप्रतिव्यूह क्रमेण द्वे बले स्थिते ॥१२३॥
तस्मिन्नेव क्षणे ज्ञात्वा सर्वं पद्मावती सती। गत्वा शीघ्रं स्वभर्तुश्च संजगौ सर्ववृत्तकम् ॥१२४॥
तदा गजात्समुत्तीर्य-समागत्य च सम्मुखम्। पिता पुत्रश्च सोप्याशु करकण्डुर्विचक्षणः ॥१२५॥
दृष्ट्वा परस्परं तत्र पितुः पादाम्बुजद्वयम्। ननाम विनयोपेतः सुपुत्रो भक्तिनिर्भरः ॥१२६॥

भी न रहने दिया। वह फिर सुख से राज्य करने लगा। करकण्डु के दिनों-दिन बढ़ते हुए प्रताप की खबर चारों ओर फैलती-फैलती दन्तिवाहन के पास पहुँची। दन्तिवाहन करकण्डु के पिता हैं। पर न तो दन्तिवाहन को यह ज्ञात था कि करकण्डु मेरा पुत्र है और न करकण्डु को इस बात का पता था कि दन्तिवाहन मेरे पिता हैं। यही कारण था कि दन्तिवाहन को इस नये राजा का प्रताप सहन नहीं हुआ। उन्होंने अपने एक दूत को करकण्डु के पास भेजा। दूत ने आकर करकण्डु से प्रार्थना की-''राजाधिराज दन्तिवाहन मेरे द्वारा आपको आज्ञा करते हैं कि यदि राज्य आप सुख से करना चाहते हैं तो उनकी आप आधीनता स्वीकार करें। ऐसे किए बिना किसी देश के किसी हिस्से पर आपकी सत्ता नहीं रह सकती।'' करकण्डु एक तेजस्वी राजा और उस पर एक दूसरे की सत्ता, सचमुच करकण्डु के लिए यह आश्चर्य की बात थी। उसे दन्तिवाहन की इस धृष्टता पर बड़ा क्रोध आया। उसने तेज आँखें कर दूत की ओर देखा और उससे कहा-यदि तुम्हें अपनी जान प्यारी है तो तुम यहाँ से जल्दी भाग जाओ। तुम दूसरे के नौकर हो, इसलिए मैं तुम पर दया करता हूँ नहीं तो तुम्हारी इस धृष्टता का फल तुम्हें मैं अभी ही बता देता। जाओ और अपने मालिक से कह दो कि वह रणभूमि में आकर तैयार रहे। मुझे जो कुछ करना होगा मैं वही करूँगा। दूत ने जैसे ही करकण्डु की आँखें चढ़ी देखीं वह उसी समय डरकर राजदरबार से रवाना हो गया ॥११६-१२१॥

इधर करकण्डु अपनी सेना में युद्धघोषणा दिलवा कर आप दन्तिवाहन पर जा चढ़ा और उनकी राजधानी को उसने सब ओर से घेर लिया। दन्तिवाहन तो इसके लिए पहले ही से तैयार थे। वे भी सेना ले युद्धभूमि में उतरे। दोनों ओर की सेना में व्यूह रचना हुई रणवाद्य बजने वाला ही था कि पद्मावती को यह ज्ञान हो कि यह युद्ध शत्रुओं का न होकर खास पिता-पुत्र का है। वह तब उसी समय अपने प्राणनाथ के पास गई और सब हाल उसने उन से कह सुनाया। दन्तिवाहन को इस समय अपनी प्रिया-पुत्र को प्राप्त कर जो आनन्द हुआ, उसका पता उन्हीं के हृदय को हैं। दूसरा वह कुछ थोड़ा बहुत

**दन्तिवाहनभूपोपि तं समालिंग्य सत्सुतम्। विभूत्या तूर्यनिर्घोषैः पुत्राद्यैः प्रविशत्पुरीम् ॥१२७॥
भक्त्या जिनान्समभ्यर्च्य महास्नपनपूर्वकम्। तस्था गेहे सुखं धीमान्पूर्वपुण्यप्रसादतः ॥१२८॥
अथान्यदिवसे राजा सोपि श्रीदन्तिवाहनः। विभूत्याष्टसहस्त्रोरुकन्याभिः परमादरात् ॥१२९॥
विवाहं कारयित्वाशु करकण्डोर्महाधियः। राजभारं च तस्यैव समर्प्य गुणशालिनः ॥१३०॥
स्वयं पद्मावतीदेव्या सार्द्धं पञ्चेन्द्रियोद्भवान्। भुंजानो विविधान्भोगान्मंदिरे सुखतः स्थितः ॥१३१॥
राज्ये स्थित्वा सुधीः सोपि करकण्डुर्महानृपः। श्रीमज्जिनेन्द्रचन्द्राणां धर्मकर्मपुरस्सरम् ॥१३२॥
स्वप्रजां पुत्रवन्नित्यं पालयन्परया मुदा। पूर्वपुण्यप्रसादेन चिरं संतिष्ठते मुदा ॥१३३॥
तदा मंत्रिवरैः प्रोक्तं प्रणम्य परमादरात्। श्रूयतां देव यद्भक्तैरस्माभिः संनिगद्यते ॥१३४॥
साधनीया भवद्भिस्तु चेरमाख्यस्तथा परः। पाण्ड्यश्चोलश्च राजानो गर्वपर्वतमाश्रिताः ॥१३५॥
तच्छ्रुत्वासौ प्रभुस्तेषां प्रेषयामास दूतकम्। तेनागतेन संज्ञात्वा तेषां गर्वं च सत्वरम् ॥१३६॥
गत्वा स्वयं क्रुधा युद्धस्थाने यावत्स्थितस्तदा। तेऽपि सम्मुखमागत्य चक्रुर्युद्धं सुदारुणम् ॥१३७॥**

पा सकता है जिस पर ऐसा ही भयानक प्रसंग आकर कभी पड़ा हो। सर्वसाधारण उनके उस आनन्द का, उस सुख का थाह नहीं ले सकते। दन्तिवाहन तब उसी समय हाथी से उतर कर अपने प्रिय-पुत्र के पास आए। करकण्डु को ज्ञात होते ही वह उनके सामने दौड़ा गया और जाकर उनके पाँवों में गिर पड़ा। दन्तिवाहन ने झट से उसे उठाकर अपनी छाती से लगा लिया। पिता-पुत्र का पुण्य मिलाप हुआ। इसके बाद दन्तिवाहन ने बड़े आनन्द और ठाठबाट से पुत्र का शहर में प्रवेश कराया। प्रजा ने अपने युवराज का अपार आनन्द के साथ स्वागत किया। घर-घर आनन्द उत्सव मनाया गया। दान दिया गया। पूजा-प्रभावना की गई महा अभिषेक किया गया। गरीब लोग मनचाही सहायता से खुश किए गए। इस प्रकार पुण्य-प्रसाद से करकण्डु ने राज्यसम्पत्ति के सिवा कुटुम्ब-सुख भी प्राप्त किया। वह अब स्वर्ग के देवों की तरह सुख से रहने लगा ॥१२२-१२८॥

कुछ दिनों बाद दन्तिवाहन ने अपने पुत्र का विवाह समारंभ किया। उसमें उन्होंने खूब खर्च कर बड़े वैभव के साथ करकण्डु का कोई आठ हजार राजकुमारियों के साथ ब्याह किया। ब्याह के बाद ही दन्तिवाहन राज्य का भार सब करकण्डु के जिम्मे कर आप अपनी प्रिया पद्मावती के साथ सुख से रहने लगे। सुख-चैन से समय बिताना उन्होंने अब अपना प्रधान कार्य रखा ॥१२९-१३१॥

इधर करकण्डु राज्यशासन करने लगा। प्रजा को उसके शासन की जैसी आशा थी, करकण्डु ने उससे कहीं बढ़कर धर्मज्ञता, नीति और प्रजा प्रेम बतलाया। प्रजा को सुखी बनाने में उसने कोई बात की कमी न रखी। इस प्रकार वह अपने पुण्य का फल भोगने लगा। एक दिन समय देख मंत्रियों ने करकण्डु से निवेदन किया—महाराज, चेरम, पाण्ड्य और चोल आदि राजा चिर समय से अपने आधीन हैं। पर जान पड़ता है उन्हें इस समय कुछ अभिमान ने आ घेरा है। वे मानपर्वत का आश्रय पा अब स्वतंत्र से हो रहे हैं। राज-कर वगैरह भी अब वे नहीं देते। इसलिए उन पर चढ़ाई करना बहुत आवश्यक

करकण्डुस्ततो दृष्ट्वा भूपः स्वबलभङ्गकम्। महायुद्धं विधायोच्चैर्धृत्वा शत्रुभूपतीन् ॥१३८॥
कोपात्तन्मुकुटे पादं न्यसंस्तत्र विलोक्य च। जिनबिम्बानि हा कष्टं मया किं पापिना कृतम् ॥१३९॥
इत्युक्त्वा तान्प्रति प्राह यूयं जैनाः किमत्र भो। तदातैरोमिति प्रोक्ते करकण्डुश्च भूपतिः ॥१४०॥
हा हा मया निकृष्टेन क्रोधान्धेन विनिर्मितः। उपसर्गो हि जैनानां महापापविधायकः ॥१४१॥
इत्यात्मनिन्दनं कृत्वा कारयित्वा च तान्क्षमाम्। तैः सार्द्धं च समागच्छन्स्वदेशं प्रति संमुदा ॥१४२॥
मार्गे तेरपुराभ्यर्णे संस्थितः सैन्यसंयुतः। तदागत्य च भिल्लाभ्यां तं प्रणम्य प्रजल्पितम् ॥१४३॥
अस्मात्तेरपुरादस्ति दक्षिणस्यां दिशि प्रभो। गव्यूतिकान्तरे चारु पर्वतस्योपरिस्थितम् ॥१४४॥

है। इस समय ढील कर देने से सम्भव है थोड़े ही दिनों में शत्रुओं का जोर अधिक बढ़ जायें इसलिए इसके लिए प्रयत्न कीजिए कि वे ज्यादा सिर पर न चढ़ें, उसके पहले ही ठीक ठिकाने लगाया जाये। मंत्रियों की सलाह सुन और उस पर विचार कर पहले करकण्डु ने उन लोगों के पास अपना दूत भेजा। दूत अपमान के साथ लौट आया। करकण्डु ने सब सीधी तरह सफलता प्राप्त न होती देखी तब उसे युद्ध के लिए तैयार होना पड़ा। वह सेना लिए युद्धभूमि में जा डटा। शत्रु लोग भी चुपचाप न बैठकर उसके सामने हुए। दोनों ओर की सेना की मुठभेड़ हो गई घमासान युद्ध हुआ। दोनों ओर के हजारों वीर काम आए। अन्त में करकण्डु की सेना के युद्धभूमि से पाँव उखड़े। यह देख करकण्डु स्वयं युद्धभूमि में उतरा। बड़ी वीरता से वह शत्रुओं के साथ लड़ा। इस नई उम्र में उसकी इस प्रकार वीरता देखकर शत्रुओं को दाँतों तले उँगली दबाना पड़ी। विजयश्री ने करकण्डु को ही वरा। जब शत्रु राजा आ-आकर इसके पाँव पड़ने लगे और इसकी नजर उनके मुकुटों पर पड़ी तो देखकर यह एक साथ हतप्रभ हो गया और बहुत-बहुत पश्चाताप करने लगा कि-हाय! मुझ पापी ने यह अनर्थ क्यों किया? न जाने इस पाप से मेरी क्या गति होगी? बात यह थी कि उन राजाओं के मुकुटों में जिन भगवान् की प्रतिमाएँ खुदी हुई थी और वे राजा जैनी थे। अपने धर्मबन्धुओं को जो उसने कष्ट दिया और भगवान् का अविनय किया उसका उसे बेहद दुःख हुआ। उसने उन लोगों को बड़े आदरभाव से उठाकर पूछा- क्या सचमुच आप जैनधर्मी हैं? उनकी ओर से सन्तोषजनक उत्तर पाकर उसने बड़े कोमल शब्दों में उनसे कहा-महानुभावो, मैंने क्रोध से अन्धे होकर जो आपको यह व्यर्थ कष्ट दिया, आप पर उपद्रव किया, इसका मुझे अत्यन्त दुःख है। मुझे इस अपराध के लिए आप लोग क्षमा करें। इस प्रकार उनसे क्षमा कराकर उनको साथ लिए वह अपने देश को रवाना हुआ ॥१३२-१४२॥

रास्ते में तेरपुर के पास इनका पड़ाव पड़ा। इसी समय कुछ भीलों ने आकर नम्र मस्तक से इनसे प्रार्थना की-राजाधिराज, हमारे तेरपुर से दो-कोस दूरी पर एक पर्वत है। उस पर एक छोटा-सा धाराशिव नाम का गाँव बसा हुआ है। इस गाँव में एक बहुत बड़ा ही सुन्दर और भव्य जिनमन्दिर बना हुआ है। उसमें विशेषता यह है कि उसमें कोई एक हजार खम्भे हैं। वह बड़ा सुन्दर है। उसे आप देखने को चलें। इसके सिवा पर्वत पर एक यह आश्चर्य की बात है कि वहाँ एक बाँवी है। एक हाथी रोज

धाराशिवपुरं चास्ति सहस्त्रस्तंभसंभवम्। श्रीमज्जिनेन्द्रदेवस्य भवनं सुमनोहरम् ॥१४५॥
तस्योपरि तथा शैलमस्तके संप्रवर्त्तते। वल्मीकं तच्च सद्धस्ती शुभो भक्त्या दिनं प्रति ॥१४६॥
शुण्डादण्डेन सत्तोयं गृहीत्वा कमलं सुधीः। समागत्य परीत्योच्चैः समभ्यर्च्य नमत्यलम् ॥१४७॥
इत्याकर्ण्य प्रहर्षेण ताभ्यां दत्वोचितं द्रुतम्। करकण्डुर्महाराजो जिनभक्तिपरायणः ॥१४८॥
गत्वा तत्र समालोक्य जिनेन्द्रभवनं शुभम्। समभ्यर्च्य जिनाधीशान्स्वर्गमोक्षसुखप्रदान् ॥१४९॥
स्तुतिं चक्रे च सद्भक्त्या शर्मकोटिविधायिनीम्। प्रमादो नैव सद्दृष्टेर्धर्मकर्मणि सर्वदा ॥१५०॥
ततो दृष्ट्वा च वल्मीकं पूजयन्तं महाद्विपम्। अत्रास्ति कारणं किंचिच्चेतसि संविचार्य च ॥१५१॥
तद्वल्मीकं समुन्मूल्य मंजूषां तत्र संस्थिताम्। दृष्ट्वोद्घाट्य प्रयत्नेन वीक्ष्य रत्नमयीं च सः ॥१५२॥
श्रीमत्पार्श्वजिनेन्द्रस्य प्रतिमां पापनाशिनीम्। सन्तुष्टो मानसे चारुसद्दृष्टिर्धर्मवत्सलः ॥१५३॥
तस्याश्च भवनं चारु कारयित्वा सुभक्तितः। सुधीरग्गलदेवाख्यं स्थापयामास तत्र ताम् ॥१५४॥
स मूलप्रतिमाङ्गे च ग्रन्थिं दृष्ट्वा महीपतिः। शिल्पकर्मिणं सोपि प्राह विरूपं दृश्यते तराम् ॥१५५॥
इमां स्फोटय तच्छ्रुत्वा शिलाकर्मी जगाद च। अत्र तोयसिरा देव विद्यते तन्न भिद्यते ॥१५६॥

अपनी सूँड में थोड़ा-सा पानी और एक कमल का फूल लिए वहाँ आता है और उस बाँवी की परिक्रमा देकर वह पानी और फूल उस पर चढ़ा देता है। इसके बाद वह उसे अपना मस्तक नवाकर चला जाता है। उसका यह प्रतिदिन का नियम है। महाराज! नहीं जान पड़ता कि इसका क्या कारण है? करकण्डु भीलों द्वारा यह शुभ समाचार सुनकर बहुत प्रसन्न हुआ। इस समाचार को लाने वाले भीलों को उचित इनाम देकर वह स्वयं सबको साथ लिए, उस कौतुकमय स्थान को देखने गया। पहले उसने जिनमन्दिर जाकर भक्ति पूर्वक भगवान् की पूजा की, स्तुति की। सच है—धर्मात्मा पुरुष धर्म के कामों में कभी प्रमाद-आलस नहीं करते। बाद में वह उस बाँवी की जगह गया। उसने वहाँ भीलों के कहे माफिक हाथी को उस बाँवी की पूजा करते पाया। देखकर उसे बड़ा अचम्भा हुआ उसने सोचा कि इसका कुछ न कुछ कारण होना चाहिए। नहीं तो इस पशु में ऐसा भक्तिभाव नहीं देखा जाता। यह विचार कर उसने उस बाँवी को खुदवाया। उसमें से एक सन्दूक निकली। उसने उसे खोलकर देखा। सन्दूक में एक रत्नमयी पार्श्वनाथ भगवान् की पवित्र प्रतिमा थी। उसे देखकर धर्मप्रेमी करकण्डु को अतिशय प्रसन्नता हुई उसने तब वहाँ 'अग्गलदेव' नाम का एक विशाल जिन मन्दिर बनवाकर उसमें बड़े उत्सव के साथ उस प्रतिमा को विराजमान किया। प्रतिमा पर एक गाँठ देखकर करकण्डु ने शिल्पकार से कहा—देखो, तो प्रतिमा पर यह गाँठ कैसी है? प्रतिमा की सब सुन्दरता इससे मारी गई इसे सावधानी के साथ तोड़ दो। यह अच्छी नहीं दीख पड़ती ॥१४३-१५५॥

शिल्पकार ने कहा—महाराज, यह गाँठ ऐसी वैसी नहीं है जो तोड़ दी जाये। ऐसी रत्नमयी दिव्य प्रतिमा पर गाँठ होने का कुछ न कुछ कारण जान पड़ता है। इसका बनाने वाला इतना कम बुद्धि न होगा कि प्रतिमा की सुन्दरता नष्ट होने का ख्याल न कर इस गाँठ को रहने देता। मुझे जहाँ तक जान

भिद्यते चेदयं ग्रन्थिस्तोयपूरो महानहो। निर्गच्छति ततस्तस्य महाग्रहवशेन च ॥१५७॥
स्फोटितः शिल्पिनासौ च निर्गतो जलपूरकः। तस्मान्निर्गमने जातो राजादीनां च संशयः ॥१५८॥
तदासौ करकण्डुश्च राजा श्रीजिनभक्तिभाक्। जलापनयनाग्राहं कृत्वा धर्मानुरागतः ॥१५९॥
दर्भशय्यां समासीनो द्विधा संन्यासपूर्वकम्। तत्पुण्यतस्तदा शीघ्रं देवो नागकुमारकः ॥१६०॥
प्रत्यक्षीभूय तं प्राह नत्वा सद्विनयान्वितः। कालमाहात्म्यतो देव प्रतिमा रत्ननिर्मिता ॥१६१॥
रक्षितुं शक्यते नैव तस्माच्च लयणं मया। तोयपूर्णं कृतं सर्वं भवद्भिस्तु ततः प्रभो ॥१६२॥
जलापनयने चात्र कर्त्तव्यो नाग्रहः सुधीः। इत्याक्षेपेण देवेन स राजा धार्मिको महान् ॥१६३॥
भक्त्या सद्दर्भशय्यायाः शीघ्रमुत्थापितो वदत्। केनेदं लयणं ब्रूहि कारितं सुमनोहरम् ॥१६४॥
तथा वल्मीकमध्ये च प्रतिमा पापनाशिनी। स्थापिता केन तच्छ्रुत्वा जगौ नागकुमारकः ॥१६५॥
अत्रैव विजयार्द्धेस्ति चोत्तरश्रेणिसंस्थितम्। नभस्तिलकमत्युच्चैः संपदाभिर्भृतं पुरम् ॥१६६॥
तत्र चामितवेगाख्यसुवेगौ खचराधिपौ। संजातौ श्रीजिनेन्द्राणां पादपद्मद्वये रतौ ॥१६७॥
ज्येष्ठः परश्च भद्रात्मा तौ द्वौ चैकदिने मुदा। आर्यखण्डेऽत्र सद्भक्त्या समायातौ जिनालयान् ॥१६८॥
वन्दितुं च समभ्यर्च्य मलयाख्यगिरौ जिनान्। भ्रमन्तौ पर्वते तत्र श्रीमत्पार्श्वजिनाकृतिम् ॥१६९॥

पड़ता है, इस गाँठ का सम्बन्ध किसी भारी जल-प्रवाह से होना चाहिए और यह असंभव भी नहीं। संभवतः इसकी रक्षा के लिए यह प्रयत्न किया गया हो। इसलिए मेरी समझ में इसका तुड़वाना उचित नहीं। करकण्डु ने उसका कहा न माना। उसे उसकी बात पर विश्वास न हुआ। उसने तब शिल्पकार से बहुत आग्रह कर आखिर उसे तुड़वाया ही। जैसे ही वहाँ गाँठ टूटी उसमें से एक बड़ा भारी जल-प्रवाह वह निकला। मन्दिर में पानी इतना भर गया कि करकण्डु वगैरह को अपने जीवन के बचने का भी सन्देह हो गया। तब वह जिनभक्त उस प्रवाह के रोकने के लिए संन्यास ले कुशासन पर बैठ कर परमात्मा का स्मरण चिंतन करने लगा। उसके पुण्य-प्रभाव से नागकुमार ने प्रत्यक्ष आकर उससे कहा- राजन् काल अच्छा नहीं इसलिए प्रतिमा की सुरक्षा के लिए मुझे यह जल पूर्ण लवण बनाना पड़ा इसलिए आप इस जलप्रवाह के रोकने का आग्रह न करें इस प्रकार ककण्डु को नागकुमार ने समझा कर आसन पर से उठ जाने को कहा। करकण्डु नागकुमार के कहने से संन्यास छोड़ उठ गया। उठकर उसने नागकुमार से पूछा-क्यों जी, ऐसा सुन्दर यह लवण यहाँ किसने बनाया और किसने इस बाँवी में इस प्रतिमा को विराजमान किया? नागकुमार ने कहा-सुनिए, विजयार्द्ध पर्वत की उत्तर श्रेणी में खूब सम्पत्तिशाली नभस्तिलक नाम का एक नगर था। उसमें अमितवेग और सुवेग नाम के दो विद्याधर राजा हो चुके हैं। दोनों धर्मज्ञ और सच्चे जिनभक्त थे। एक दिन वे दोनों भाई आर्यखण्ड के जिनमन्दिरों के दर्शन करने के लिए आये। कई मंदिरों में दर्शन-पूजन कर वे मलयाचल पर्वत पर आये यहाँ घूमते हुए उन्होंने पार्श्वनाथ भगवान् की इस रत्नमयी प्रतिमा को देखा। इसके दर्शन कर उन्होंने इसे एक सन्दूक में बन्द कर दिया और सन्दूक को एक गुप्त स्थान पर रखकर वे उस समय चले गए। कुछ समय बाद वे आकर उस सन्दूक को कहीं अन्यत्र ले जाने के लिए उठाने लगे पर सन्दूक अब

दृष्ट्वा नत्वा समादाय मञ्जूषायां निधाय च। अत्रैव सद्गिरौ चेमां मञ्जूषां सारयन्नतः ॥१७०॥
संस्थाप्य क्वापि गत्वा च पुनश्चागत्य भक्तितः। समुत्थापयतो यावत्तावन्नोत्तिष्ठति त्वसौ ॥१७१॥
ततस्तेरपुरं गत्वा प्रणम्यावधिलोचनम्। मुनीन्द्रं प्राहतुः स्वामिन्कथं नोत्तिष्ठति प्रभो ॥१७२॥
मञ्जूषिकेति संश्रुत्वा ज्ञानी प्राह मुनीश्वरः। अहो खगाधिपौ चेषा मञ्जूषा शर्मकारिणी ॥१७३॥
लयणस्योपरि व्यक्तं लयणं संभविष्यति। वक्त्येवं च पुनर्वक्ति भावि यच्छ्रुणुतादरत् ॥१७४॥
अयं सुवेगनामा च मृत्वार्त्तध्यानतो ध्रुवम्। गजो भूत्वा स्वमंजूषामिमां संपूजयिष्यति ॥१७५॥
करकण्डुर्यदा राजा तां समुत्पाटयिष्यति। तदा द्विपस्तु संन्यासं कृत्वा स्वर्गं प्रयास्यति ॥१७६॥
इत्याकर्ण्य मुनेर्वाक्यं मानसे तौ खगाधिपौ। प्रतिमायाः स्थिरत्वस्य संज्ञात्वा कारणं महत् ॥१७७॥
पुनस्तं मुनिमानम्य पृष्टवन्तौ महामुने। कारितं लयणं केन शर्मदं भव्यदेहिनाम् ॥१७८॥
तन्निशम्य मुनिः सोपि जगौ संज्ञानविग्रहः। इहैव विजयार्द्धे च दक्षिणश्रेणिसंस्थिते ॥१७९॥
रथनूपुरसन्नाम्नि पुरे ख्यातौ खगाधिपौ। जातौ नीलमहानीलौ संग्रामे शत्रुभिः क्रुधा ॥१८०॥
प्राप्तविद्याधनच्छेदौ ताविहागत्य पर्वते। कृत्वा वासं सुखं स्थित्वा कियत्कालं सुधार्मिकौ ॥१८१॥
कारयित्वा जिनेन्द्राणां लयणं सौख्यकारणम्। पुण्याद्विद्याः समाप्योच्चैर्विजयार्द्धं गतौ सुखम् ॥१८२॥
ततस्तौ खेचरेन्द्रौ च तपः श्रीमज्जिनोदितम्। कृत्वा नीलमहानीलौ प्राप्तौ स्वर्ग गुणोज्ज्वलौ ॥१८३॥
इत्यादिसर्वसम्बन्धं संश्रुत्वामितवेगवाक्। ज्येष्ठो दीक्षां समादाय खगेशो सुतपोनिधिः ॥१८४॥
कालं समाधिना कृत्वा स्वर्गं ब्रह्मोत्तराभिधम्। गत्वा महर्द्धिको देवः संजातो जिनभक्तिभाक् ॥१८५॥

की बार उनसे न उठी। तब तेरपुर जाकर उन्होंने अवधिज्ञानी मुनिराज से अब हाल कहकर सन्दूक के न उठने का कारण पूछा। मुनि ने कहा–''सुनिए, यह सुखकारिणी सन्दूक तो पहले लयण ऊपर दूसरा लयण होगी। मतलब यह कि यह सुवेग आर्तध्यान से मरकर हाथी होगा। वह इस सन्दूक की पूजा किया करेगा। कुछ समय बाद करकण्डु राजा यहाँ आकर इस सन्दूक को निकालेगा और सुवेग का जीव हाथी तब संन्यास ग्रहण कर स्वर्ग गमन करेगा। इस प्रकार मुनि द्वारा इस प्रतिमा की चिरकाल तक अवस्थिति जानकर उन्होंने मुनि से फिर पूछा–तो प्रभो! इस लयण को किसने बनाया? मुनिराज बोले–इसी विजयार्द्ध की दक्षिण श्रेणी में बसे हुए रथनूपुर में नील और महानील नाम के दो राजा हो गए हैं। शत्रुओं के साथ युद्ध में उनकी विद्या, धन, राज्य वगैरह सब कुछ नष्ट हो गया। तब वे इस मलय पर्वत पर आकर बसे। यहाँ वे कई वर्षों तक आराम से रहे। दोनों भाई बड़े धर्मात्मा थे। उन्होंने यह लयण बनवाया। पुण्य से उन्हें उनकी विद्याएँ फिर प्राप्त हो गई तब वे पीछे अपनी जन्मभूमि रथनूपुर चले गए। इसके बाद कुछ दिनों तक वे दोनों गृह-संसार में रहे। फिर जिनदीक्षा लेकर दोनों भाई साधु हो गए। अन्त में तपस्या के प्रभाव से वे स्वर्ग गए।'' इस प्रकार सब हाल सुनकर बड़ा भाई अमितवेग तो उसी समय दीक्षा लेकर मुनि हो गया और अन्त में समाधि से मरकर ब्रह्मोत्तर स्वर्ग में महर्द्धिक देव हुआ और सुवेग-अमितवेग का छोटा भाई आर्तध्यान से मरकर वह हाथी हुआ। सो ब्रह्मोत्तर स्वर्ग से पूर्व जन्म के भातृप्रेम के वश देखने आकर उसे धर्मोपदेश किया, समझाया। उससे

आर्त्तध्यानेन मृत्वा स सुवेगस्तु खगाधिपः। हस्ती जातोयमत्युच्चैस्तेन देवेन बोधितः ॥१८६॥
भूत्वा जातिस्मरः पुण्यात्सम्यक्त्वाणुव्रतानि च। समादाय च वल्मीकं भक्त्या संपूजयन्स्थितः ॥१८७॥
करकण्डो महीनाथ भो त्वयोत्पाटिते सति। वल्मीके सोपि हस्ती च संन्यासेनात्र तिष्ठति ॥१८८॥
त्वं च तेरपुरेऽत्रैव पुरा गोपोसि भो प्रभो। पूजया जिननाथस्य राजा जातोसि साम्प्रतम् ॥१८९॥
तस्मादिदं जगत्सारं सुधीः श्रीमज्जिनार्चनम्। येन प्राणी भवत्येवं क्षणात्सत्सौख्यभाजनम् ॥१९०॥
इत्युच्चैस्तं सुराजानं करकण्डुं गुणोज्ज्वलम्। सुधीर्नागकुमारोसौ संबोध्यैवं सुरोत्तमः ॥१९१॥
नत्वा धर्मानुरागेण संप्राप्तः स्वालयं मुदा। अहो पुण्येन जन्तूनां मित्रत्वं तादृशं भवेत् ॥१९२॥
ततस्तेन नरेन्द्रेण तृतीयदिवसे द्रुतम्। कारितं जैनसद्धर्मश्रवणं तस्य दन्तिनः ॥१९३॥
सोपि दन्ती तदा मृत्वा सम्यक्त्वपरिणामभाक्। सहस्त्रारं दिवं प्राप्य देवो जातो महर्द्धिकः ॥१९४॥
पशुश्चापि सुरो भूत्वा बभूव सुखभाजनम्। भवेच्छ्रीमज्जिनेन्द्रोक्तधर्मात्किं प्राणिनां धनम् ॥१९५॥
करकण्डुश्च भूपालो जैनधर्मधुरंधरः। स्वस्य मातुस्तथा बालदेवस्योच्चैः सुनामतः ॥१९६॥
कारयित्वा सुधीस्तत्र लयणत्रयमुत्तमम्। तत्प्रतिष्ठां महाभूत्या शीघ्रं निर्माप्य सादरात् ॥१९७॥
स्वपुत्रवसुपालाय राज्यं दत्वा विरक्तधीः। संसारदेहभोगांश्च ज्ञात्वासौ बृहद् दोषमान् ॥१९८॥

इस हाथी को जातिस्मरण हो गया। तब उसने अणुव्रत ग्रहण किए। तब से यह इस प्रकार शान्त रहता है और सदा इस बाँवी की पूजन किया करता है तुमने बाँवी तुड़ाकर उसमें से प्रतिमा निकाल ली तब से हाथी संन्यास लिए यहीं रहता है और राजन्, आप पूर्वजन्म में इसी तेरपुर में ग्वाले थे। आपने तब एक कमल के फल द्वारा जिनभगवान् की पूजा की थी। उसी के फल से समय आप राजा हुए हैं। राजन्, यह जिनपूजा सब पुण्यकर्मों में उत्तम पुण्यकर्म है यही तो कारण है कि क्षणमात्र में इसके द्वारा उत्तम से उत्तम सुख प्राप्त हो सकता है। इस प्रकार करकण्डु को आदि से इति पर्यन्त सब हाल कहकर और धर्म प्रेम से उसे नमस्कार कर नागकुमार अपने स्थान चला गया। सच है यह पुण्य ही का प्रभाव है जो देव भी मित्र हो जाते हैं ॥१५६-१९२॥

हाथी को संन्यास लिए आज तीसरा दिन था। करकण्डु ने उसके पास जाकर उसे धर्म का पवित्र उपदेश किया हाथी अन्त में सम्यक्त्व सहित मरकर सहस्रार स्वर्ग में महर्द्धिक देव हुआ। एक पशु धर्म का उपदेश सुनकर स्वर्ग में अनन्त सुखों का भोगने वाला देव हुआ, तब जो मनुष्य जन्म पाकर पवित्र भावों से धर्म पालन करें तो उन्हें क्या प्राप्त न हो? बात यह है कि धर्म से बढ़कर सुख देने वाली संसार में कोई वस्तु है ही नहीं। इसलिए धर्म प्राप्ति के लिए सदा प्रयत्नशील रहना चाहिए। करकण्डु ने इसके बाद इसी पर्वत पर अपने, अपनी माँ के तथा बालदेव के नाम से विशाल और सुन्दर तीन जिनमन्दिर बनवाएँ, बड़े वैभव के साथ उनकी प्रतिष्ठा करवाई जब करकण्डु ने देखा कि मेरा सांसारिक कर्तव्य सब पूरा हो चुका, तब राज्य का सब भार अपने पुत्र वसुपाल को सौंप कर और संसार, शरीर, भोगों को महादोष वाला जानकर करके भोगादि से विरक्त होकर आप अपने माता-पिता तथा और भी कई

पित्रा क्षत्रियभूपाद्यैश्चेरमाद्यैः विचक्षणः। पद्मावत्या समं मात्रा दीक्षां जैनेश्वरीं श्रितः ॥१९९॥
कृत्वा तपो जगत्सारं संसारम्भोधिपारदम्। निर्मलं निर्मलः सोपि संन्यासेन समं स्थिरः ॥२००॥
ध्यायन्पादाम्बुजद्वंद्वं जिनेन्द्राणां सुखप्रदम्। सहस्त्रारं दिवं प्राप्तः करकण्डुमुनीश्वरः ॥२०१॥
दन्तिवाहनभूपाद्याः कालान्ते तेऽपि सद्धियः। स्वस्वपुण्यानुसारेण स्वर्गलोकं ययुः सुखम् ॥२०२॥
पुरा पद्मेन संपूज्य श्रीजिनं कोटिशर्मदम्। करकण्डुः सुखं प्राप्तः किं पुनश्चाष्टधार्चनैः ॥२०३॥
ये भव्याः श्रीजिनेन्द्राणां भक्त्या पादद्वयार्चनम्। नित्यमेव प्रकुर्वन्ति ते लभन्ते परं सुखम् ॥२०४॥

गोपालो धनदत्तवागपि पुरा मुग्धोऽपि पद्मेन च
श्रीमज्जैनपदाम्बुजं शुभतरं संपूज्य पूज्योभवत्।
देवाद्यैः करकण्डुनामनृपतिः श्रीमत्प्रभाचन्द्रव-
त्तस्माद्भव्यजनैर्जिनेन्द्रचरणाम्भोजं सदाभ्यर्च्यते ॥२०५॥

इति कथाकोशे करकण्डुनृपतेराख्यानं समाप्तम्।

११४. जिनपूजाफलप्राप्तभेकाखयानम्

श्रीमज्जिनं जगत्पूज्यं भारतीं भुवनोत्तमाम्। वक्ष्येहं सद्गुरुं नत्वा जिनपूजाफलोदयम् ॥१॥

राजाओं के साथ जिनदीक्षा ले योगी हो गया। योगी होकर करकण्डु मुनि ने खूब तप किया, जो कि निर्दोष और संसार-समुद्र से पार करने वाला है। अन्त में परमात्म-स्मरण में लीन हो उसने भौतिक शरीर छोड़ा। तप के प्रभाव से उसे सहस्त्रार स्वर्ग में दिव्य देह मिली। पद्मावती, दन्तिवाहन तथा अन्य राजा तो अपने पुण्य के अनुसार स्वर्गलोक गए ॥१९३-२०२॥

करकण्डु ने ग्वाले के जन्म में केवल एक कमल के फूल द्वारा भगवान् की पूजा की थी। उसे उसका जो फल मिला उसे आप सुन चुके हैं। तब जो पवित्र भावपूर्वक आठ द्रव्यों से भगवान् की पूजा करेंगे उनके सुख का तो फिर पूछना ही क्या? थोड़े में यों समझिए कि जो भव्यजन भक्ति से भगवान् की प्रतिदिन पूजा किया करते हैं वे सर्वोत्तम-सुख मोक्ष भी प्राप्त कर लेते हैं, तब और सांसारिक सुखों की तो उनके सामने गिनती ही क्या हैं? ॥२०३-२०४॥

एक बे-समझ ग्वाले ने जिन भगवान् के पवित्र चरणों की एक कमल के फूल से पूजा की थी, उसके फल से वह करकण्डु राजा होकर देवों द्वारा पूज्य हुआ। इसलिए सुख की चाह करने वाले भव्यजनों को भी उचित है कि वे जिन-पूजा की ओर अपने ध्यान को आकर्षित करें। उससे उन्हें मनचाहा सुख मिलेगा, क्योंकि भावों का पवित्र होना पुण्य का कारण है और भावों के पवित्र करने को जिन-पूजा भी एक प्रधान कारण है ॥२०५॥

११४. जिनपूजन-प्रभाव-कथा

संसार द्वारा पूजे जाने वाले जिनभगवान् को, सर्वश्रेष्ठ गिनी जाने वाली जिनवाणी को और राग, द्वेष, मोह, माया आदि दोषों से रहित परम वीतरागी साधुओं को नमस्कार कर जिनपूजा द्वारा फल प्राप्त

श्रीमज्जिनेन्द्रचन्द्राणां पूजा पापप्रणाशिनी। स्वर्गमोक्षप्रदा प्रोक्ता प्रत्यक्षं परमागमे ॥२॥
यः करोति सुधीर्भक्त्या पवित्रो धर्महेतवे। स एव दर्शने शुद्धो महाभव्यो न संशयः ॥३॥
यस्तस्या निन्दकः पापी स निन्द्यो जगति ध्रुवम्। दुःखदारिद्र्यरोगादिदुर्गतेर्भाजनं भवेत् ॥४॥
स्नपनं पूजनं प्रीत्या स्तवनं जपनं तथा। जिनानामाकृतीनां च कुर्याद्भव्यमतल्लिकः ॥५॥
जिनयात्राप्रतिष्ठाभिर्गरिष्ठाभिर्विशिष्टधीः। प्रासादप्रतिमोद्धारैः कुर्याद्धर्मप्रभावनाम् ॥६॥
यस्यां संक्रियमाणायां सत्यं स्वर्गापवर्गयोः। प्राप्यते कारणं पूतं सम्यग्दर्शनमुत्तमम् ॥७॥
इन्द्रनागेन्द्रचन्द्रार्क-नरेन्द्रार्चितपङ्कजाः। श्रीजिनेन्द्राः सदा पूज्याः सतां शर्मश्रिये मुदा ॥८॥
जिनेन्द्रार्चा महापुण्यं प्रसिद्धवचनं यतः। जिनपूजासमं पुण्यं न भूतं न भविष्यति ॥९॥
अनेकैर्भव्यसंमुख्यैर्भरतादिभिरुत्तमैः। प्राप्तं जिनेन्द्रपूजायाः फलं केनात्र वर्ण्यते ॥१०॥
जलाद्यैरष्टभिर्द्रव्यैर्जिनार्चायाः किमुच्यते। पद्मेनैकेन भेकेन फलं प्राप्तं यदुत्तमम् ॥११॥

तथा च समन्तभद्रस्वामिभिरुक्तं—

अर्हच्चरणसपर्या महानुभावं महात्मनामवदत्। भेकः प्रमोदमत्तः कुसुमेनैकेन राजगृहे ॥

करने वाले एक मेंढक की कथा लिखी जाती है ॥१॥

शास्त्रों में उल्लेख किए उदाहरणों द्वारा यह बात खुलासा देखने में आती है कि जिन भगवान् की पूजा पापों की नाश करने वाली और स्वर्ग-मोक्ष के सुखों की देने वाली है। इसलिए जो भव्यजन पवित्र भावों द्वारा धर्मवृद्धि के अर्थ जिनपूजा करते हैं वे ही सच्चे सम्यग्दृष्टि हैं और मोक्ष जाने के अधिकारी हैं। इसके विपरीत पूजा की जो निन्दा करते हैं वे पापी हैं और संसार में निन्दा के पात्र हैं। ऐसे लोग सदा दुःख, दरिद्रता, रोग, शोक आदि कष्टों को भोगते हैं और अन्त में दुर्गति में जाते हैं। अतएव भव्यजनों को उचित है कि वे जिनभगवान् का अभिषेक, पूजन, स्तुति, ध्यान आदि सत्कर्मों को सदा किया करें। इसके सिवा तीर्थयात्रा, प्रतिष्ठा, जिन मन्दिरों का जीर्णोद्धार आदि द्वारा जैनधर्म की प्रभावना करना चाहिए। इन पूजा प्रभावना आदि कारणों से सम्यग्दर्शन प्राप्त होता है। जिनभगवान् इंद्र, धरणेन्द्र, विद्याधर, चक्रवर्ती आदि सभी महापुरुषों द्वारा पूज्य हैं। इसलिए उनकी पूजा तो करनी ही चाहिए। जिनपूजा के द्वारा सभी उत्तम-उत्तम सुख मिलते हैं। जिनपूजा करना महापुण्य का कारण है, ऐसा शास्त्रों में जगह-जगह लिखा मिलता है। इसलिए जिनपूजा समान दूसरा पुण्य का कारण संसार में न तो हुआ और न होगा। प्राचीन काल में भरत जैसे अनेक बड़े-बड़े पुरुषों ने जिनपूजा द्वारा जो फल प्राप्त किया है, किसकी शक्ति है जो उसे लिख सके। आठ द्रव्यों से पूजा करने वाले जिनपूजा द्वारा जो फल लाभ करते हैं, उनके सम्बन्ध में हम क्या लिखें, जब कि केवल फूल से पूजा कर एक मेंढक ने स्वर्ग सुख प्राप्त किया ॥२-११॥

समन्तभद्र स्वामी ने भी इस विषय में लिखा है-राजगृह में हर्ष से उन्मत्त हुए एक मेंढक ने सत्पुरुषों को यह स्पष्ट बतला दिया कि केवल एक फूल द्वारा भी जिन भगवान् की पूजा करने से

अस्य कथा–

अथ जम्बूमति द्वीपे मेरोर्दक्षिणदिक्कृते। क्षेत्रे तीर्थेशिनां जन्मपवित्रेत्रैव भारते ॥१२॥
देशोस्ति मगधो नाम्ना निवेशो वा जगच्छ्रियः। जना यत्र वसन्त्युच्चैर्धनैर्धान्यैः सुधर्मतः ॥१३॥
तत्र राजगृहं नाम नगरं गुणिभिर्वरम्। भोगोपभोगसामग्रीप्राप्त्या यत्र निरन्तरम्। ॥१४॥
यन्नराः सुरशोभाढ्या नार्यो वा सुरकन्यकाः। सम्यक्त्वव्रतसम्पन्नास्तस्मात्स्वर्गाधिकं पुरम् ॥१५॥
यत्र शर्मकरो धर्मः प्रसिद्धो जिनभाषितः। तस्य किं वर्ण्यते शोभा त्रैलोक्यप्रीतिदायिनी ॥१६॥
तत्पाताभूत्पवित्रात्मा श्रेणिको दर्शनप्रियः। श्रीमज्जिनेन्द्रपादाब्जसेवनैकमधुव्रतः ॥१७॥
यः प्रतापः स्वशत्रूणां शान्तो वा चन्द्रमाः सताम्। प्रजानां पालने नित्यं पिता वा हितकारकः ॥१८॥
तस्य राज्ञी महासाध्वी रूपसौभाग्यशालिनी। चेलिनी जिनचन्द्राणां चरणार्चनकोविदा ॥१९॥
सम्यक्त्वव्रतसद्भूषारत्नभूषाविराजिता। सर्वविज्ञानसम्पन्ना जिनवाणीव सुन्दरा ॥२०॥
नागदतोभवच्छ्रेष्ठी परमेष्ठिपराङ्मुखः। श्रेष्ठिनी भवदत्ताख्या तस्याभूत्प्राणवल्लभा ॥२१॥

उत्तम फल प्राप्त होता है जैसा कि मैंने प्राप्त किया।

अब मेंढक की कथा सुनिए

यह भारतवर्ष जम्बूद्वीप के मेरु की दक्षिण दिशा में है। इसमें अनेक तीर्थंकरों का जन्म हुआ है। इसलिए यह महान् पवित्र है। मगध भारतवर्ष एक प्रसिद्ध और धनशाली देश है। सारे संसार की लक्ष्मी जैसे यहीं आकर इकट्ठी हो गई हो। यहाँ के निवासी प्रायः धनी है, धर्मात्मा है, उदार है और परोपकारी हैं ॥१२-१३॥

जिस समय की यह कथा है उस समय मगध की राजधानी राजगृह एक बहुत सुन्दर शहर था। सब प्रकार की उत्तम से उत्तम भोगोपभोग की वस्तुएँ वहाँ बड़ी सुलभता से प्राप्त थीं। विद्वानों का उसमें निवास था। वहाँ के पुरुष देवों से और स्त्रियाँ देवबालाओं से कहीं बढ़कर सुन्दर थीं। स्त्री-पुरुष प्रायः सब ही सम्यक्त्वरूपी भूषण से अपने को सिंगारे हुए थे और इसलिए राजगृह उस समय मध्यलोक का स्वर्ग कहा जाता था। वहाँ जैनधर्म का ही अधिक प्रचार था। उसे प्राप्त कर सब सुख-शान्ति लाभ करते थे ॥१४-१६॥

राजगृह के राजा तब श्रेणिक थे। श्रेणिक धर्मज्ञ थे। जैनधर्म और जैनतत्त्व पर उनका पूर्ण विश्वास था। भगवान् की भक्ति उन्हें उतनी ही प्रिय थी, जितनी कि भौंरे को कमलिनी। उनका प्रताप शत्रुओं के लिए मानों धधकती आग थी। सत्पुरुषों के लिए वे शीतल चन्द्रमा थे। पिता अपनी सन्तान को जिस प्यार से पालता है श्रेणिक का प्यार भी प्रजा पर वैसा ही था। श्रेणिक की कई रानियाँ थी। चेलना उन सबमें उन्हें अधिक प्रिय थी। सुन्दरता में, गुणों में, चतुरता में चेलना का आसन सबसे ऊँचा था। उसे जैनधर्म से, भगवान् की पूजा-प्रभावना से बहुत ही प्रेम था। कृत्रिम भूषणों द्वारा सिंगार करने को महत्त्व न देकर उसने अपने आत्मा को अनमोल सम्यग्दर्शन रूप भूषण

सर्वदासौ महामायावेष्टितः श्रेष्ठिकः कुधीः। एकदा स्वाङ्गणे वाप्यां मृत्वा भेको महानभूत् ॥२२॥
नरो मृत्वा यतो जातः पापात्तोयचरोत्र सः। तस्मात्पापं न कर्त्तव्यं भो भव्याः संकटेऽपि च ॥२३॥
कदाचित्सा समायाता भवदत्ता जलार्थिनी। तां विलोक्य स मण्डूको जातो जातिस्मरस्ततः ॥२४॥
तस्याः समीपमागत्य तदङ्गे चटितो द्रुतम्। निर्घाटितस्तया सोपि रोमाञ्चितशरीरया ॥२५॥
तथापि पूर्वसम्बन्धाद्दर्दुरः प्रीतिनिर्भरः। तस्यामुच्चैश्चटत्येव मत्वेति प्राक्तनी प्रिया ॥२६॥
ततस्तया ममेष्टोयं कोपि जातः कुयोनिजः। इति ज्ञात्वावधिज्ञानी पृष्टः श्रीसुव्रतो मुनिः ॥२७॥
तेनोक्तं सुव्रताख्येन मुनिना ज्ञानचक्षुषा। मूढस्ते नागदत्तोयं पतिर्मायासमन्वितः ॥२८॥
संजातः पापतः पुत्रि मण्डूको मोहमण्डितः। श्रुत्वेति तं मुनिं नत्वा भक्त्या संसारतारणम् ॥२९॥
तयासौ मोहतो नीत्वा दर्दुरः स्वगृहे धृतः। तत्र हृष्टमनाः सोपि तस्थौ यावत्ततोन्यदा ॥३०॥
आगत्य वनपालस्तं राजानं श्रेणिकं मुदा। नत्वा व्यजिज्ञपद्देव दिव्ये वैभारपर्वते ॥३१॥
इन्द्रनागेन्द्रचन्द्राद्यैः समर्चितपदद्वयः। वर्द्धमानो जिनेन्द्रोसौ समायातो जगत्प्रियः ॥३२॥

से भूषित किया था। जिनवाणी सब प्रकार के ज्ञानविज्ञान से परिपूर्ण है और अतएव वह सुन्दर है, चेलना में किसी प्रकार के ज्ञान-विज्ञान की कमी न थी। इसलिए उसकी रूपसुन्दरता ने और अधिक सौन्दर्य प्राप्त कर लिया था। 'सोने में सुगन्ध' की उक्ति उस पर चरितार्थ थी ॥१७-२०॥

राजगृह में एक नागदत्त नाम का सेठ रहता था। वह जैनी न था। इसकी स्त्री का नाम भवदत्ता था। नागदत्त बड़ा मायाचारी था। सदा माया के जाल में वह फँसा हुआ रहता था। इस मायाचार के पाप से मरकर यह अपने घर के आँगन की बावड़ी में मेंढक हुआ। नागदत्त यदि चाहता तो कर्मों का नाश कर मोक्ष जाता, पर पाप कर वह मनुष्य पर्याय से पशुजन्म में आया, एक मेंढक हुआ। इसलिए भव्य-जनों को उचित है कि वे संकट समय भी पाप न करें ॥२१-२३॥

एक दिन भवदत्ता इस बावड़ी पर जल भरने को आई उसे देखकर मेंढक को जातिस्मरण हो गया। वह उछल कर भवदत्ता के वस्त्रों पर चढ़ने लगा। भवदत्ता ने डरकर उसे कपड़ों पर से झिड़क दिया। मेंढक फिर भी उछल-उछलकर उसके वस्त्रों पर चढ़ने लगा। उसे बार-बार अपने पास आता देखकर भवदत्ता बड़ी चकित हुई और डरी भी। पर इतना उसे भी विश्वास हो गया कि इस मेंढक का और मेरा पूर्वजन्म का कुछ न कुछ सम्बन्ध होना ही चाहिए। अन्यथा बार-बार मेरे झिड़क देने पर भी यह मेरे पास आने का साहस न करता। जो हो, मौका पाकर कभी किसी साधु-सन्त से इसका यथार्थ कारण पूछूँगी ॥२४-२७॥

भाग्य से एक दिन अवधिज्ञानी सुव्रत मुनिराज राजगृह में आकर ठहरे। भवदत्ता को मेंढक का हाल जानने की बड़ी उत्कण्ठा थी। इसलिए वह तुरन्त उनके पास गई उनसे प्रार्थना कर उसने मेंढक का हाल जानने की इच्छा प्रकट की। सुव्रत मुनिराज ने तब उससे कहा-जिसका तू हाल पूछने को आई है, वह दूसरा कोई न होकर तेरा पति नागदत्त है। वह बड़ा मायाचारी था, इसलिए मर कर माया के पाप से यह मेंढक हुआ है। उन मुनि के संसार-पार करने वाले वचनों को सुनकर भवदत्ता को सन्तोष

श्रुत्वेति श्रेणिको राजा जिनभक्तिपरायणः। दत्वा तस्मै महादानं परोक्षे कृतवन्दनः ॥३३॥
आनन्ददायिनीं भेरीं दापयित्वातिसंभ्रमी। चलच्चामरसद्भूत्या चलितो निश्चलाशयः ॥३४॥
समवादिसृतिं दृष्ट्वा हृष्टो राजा जगद्धिताम्। मेघमालां मयूरो वा धातुर्वादीव सद्रसम् ॥३५॥
तं वीक्ष्य केवलज्ञान-लोचनं परमेष्ठिनम्। प्रणम्य प्रातिहार्यादिसंयुक्तं सेवितं सुरैः ॥३६॥
विशिष्टाष्टमहाद्रव्यैर्जलाद्यैर्जिनपुङ्गवम्। संपूज्य जगतां पूज्यं चकार स्तवनं शुभम् ॥३७॥
जय त्वं जिनदेवात्र कर्मेन्धनहुताशनः। दुःखदारिद्र्यदावाग्निशमनैकघनाघनः ॥३८॥
जय त्वं जिनसद्भानो लोकालोकप्रकाशकः। वचनांशुलसज्जालैर्भव्यपद्मविकाशकः ॥३९॥
जय जन्मजरामृत्युज्वरनाशभिषग्वरः। अनेकगुणमाणिक्य-रोहणाद्रे महास्थिरः ॥४०॥
त्वं त्राता जगतां तात त्वं त्रैलोक्यविभूषणम्। त्वं ह्यकारणसद्बन्धुस्त्वमापत्क्षयकारणम् ॥४१॥
त्वत्पादसेवया देव यत्सुखं प्राप्यते ध्रुवम्। अन्यैर्भूरितरक्लेशैः स्वप्ने तदपि दुर्लभम् ॥४२॥

हुआ। वह मुनि को नमस्कार कर घर पर आ गई उसने फिर मोहवश हो उस मेंढक को भी अपने यहाँ ला रखा। मेंढक वहाँ आकर बहुत प्रसन्न रहा ॥२८-३०॥

इसी अवसर में वैभार पर्वत पर महावीर भगवान् का समवसरण आया। वनमाली ने आकर श्रेणिक को खबर दी कि राजराजेश्वर, जिनके चरणों को इन्द्र, नागेन्द्र, चक्रवर्ती, विद्याधर आदि प्रायः सभी महापुरुष पूजा-स्तुति करते हैं, वे महावीर भगवान् वैभार पर्वत पर पधारे हैं। भगवान् के आने के आनन्द-समाचार सुनकर श्रेणिक बहुत प्रसन्न हुए। भक्तिवश हो सिंहासन से उठकर उन्होंने भगवान् को परोक्ष नमस्कार किया। इसके बाद इन शुभ समाचारों की सारे शहर में सबको खबर हो जाए, इसके लिए उन्होंने आनन्द घोषणा दिलवा दी। बड़े भारी लाव-लश्कर और वैभव के साथ भव्यजनों को संग लिए वे भगवान के दर्शनों को गए। वे दूर से उन संसार का हित करने वाले भगवान के समवसरण को देखकर उतने ही खुश हुए, जितने खुश मोर मेघों को देखकर होते हैं। रासायनिक लोग अपना मन चाहा रस लाभ कर होते हैं। समवसरण में पहुँचे। भगवान के उन्होंने दर्शन किए और उत्तम से उत्तम द्रव्यों से उनकी पूजा की। अन्त में उन्होंने भगवान् के गुणों का गान किया ॥३१-३७॥

हे भगवान्! हे दया के सागर! ऋषि-महात्मा आपको 'अग्नि' कहते हैं, इसलिए कि आप कर्मरूपी ईंधन को जला कर खाककर देने वाले हैं। आपको वे 'मेघ' भी कहते हैं, इसलिए कि आप प्राणियों को जलाने वाली दुःख, शोक, चिन्ता, क्रोध, मान, माया, लोभ, राग, द्वेष आदि दावाग्नि को क्षणभर में अपने उपदेश रूपी जल से बुझा डालते हैं। आप 'सूरज' भी हैं, इसलिए कि अपने उपदेशरूपी किरणों से भव्यजनरूपी कमलों को प्रफुल्लित कर लोक और अलोक के प्रकाशक हैं। नाथ, आप एक सर्वोत्तम वैद्य हैं, इसलिए कि धन्वन्तरी से वैद्यों की दवा से भी नष्ट न होने वाली ऐसी जन्म, जरा, मरण रूपी महान् व्याधियों को जड़ मूल से खो देते हैं। प्रभो, आप उत्तमोत्तम गुणरूपी जवाहरात के उत्पन्न करने वाले पर्वत हो, संसार के पालक हो, तीनों लोक के अनमोल भूषण हो, प्राणी

ततः श्रीमज्जिनाधीश भुक्तिमुक्तिप्रदायिनी। त्वद्भक्तिर्मे सदा भूयादाससारं शुभप्रदा ॥४३॥
इति स्तुत्वा जिनाधीशं भक्त्या नत्वा मुहुर्मुहुः। गौतमादीन्मुनींश्चापि प्रणम्य श्रेणिकः स्थितः ॥४४॥
तथा च भवदत्तादौ जिनभक्त्या गते सति। वन्दनार्थं जिनेन्द्रस्य शर्मकोटिविधायिनः ॥४५॥
श्रुत्वा सुरखगेन्द्रादिवादित्रध्वनिमम्बरे। प्रोल्लसज्जयघोषं च स भेको जातसंस्मृतिः ॥४६॥
तद्वापीसंभवं पद्म समादाय समुत्सुकः। श्रीमज्जिनेन्द्रपादाब्जपूजार्थं चलितो भृशम् ॥४७॥
मार्गे गच्छन्मुदा हस्तिपादेनैव प्रचम्पितः। त्रैलोक्यप्रभुपूज्यस्य वर्द्धमानजिनेशिनः ॥४८॥
पूजानुरागतोत्यन्तसमर्जितशुभोदयात्। मृत्वा सौधर्मकल्पेऽसौ देवो जातो महर्द्धिकः ॥४९॥
क्व भेकः क्व च देवोभू-न्न हि चित्रं जगत्त्रये। जिनपूजाप्रसादेन किं शुभं यन्न जायते ॥५०॥
तत्र चान्तर्मुहूर्तेन भूत्वासौ नवयौवनः। रूपलावण्यसम्पन्नः पूर्वपुण्येन संयुतः ॥५१॥
नाना रत्नप्रभाजालैर्जटिलो दिव्यवस्त्रभाक्। सुगन्धकुसुमोद्दाममालालंकृतविग्रहः ॥५२॥
लब्ध्वावधिमहाबोधः ज्ञानं पूर्वभवान्तरे। पूजया जिननाथस्य भावनामात्रतो यतः ॥५३॥
देवो जातोस्मि दिव्योहं तस्मात्सा क्रियते तराम्। संविचार्येति सद्भक्त्या मुकुटाग्रे विधाय च ॥५४॥

मात्र के निःस्वार्थ बन्धु हो, दुःखों के नाश करने वाले हो और सब प्रकार के सुखों के देने वाले हो। जगदीश! जो सुख आपके पवित्र चरणों की सेवा से प्राप्त हो सकता है वह अनेक प्रकार के कठिन से कठिन परिश्रम द्वारा भी प्राप्त नहीं होता। इसलिए हे दयासागर! मुझ गरीब को अपने चरणों को पवित्र और मुक्ति का सुख देने वाली भक्ति प्रदान कीजिए। जब तक कि मैं संसार से पार न हो जाऊँ। इस प्रकार बड़ी देर तक श्रेणिक ने भगवान् का पवित्र भावों से गुणानुवाद किया। बाद वे गौतम गणधर आदि महर्षियों को भक्ति से नमस्कार कर अपने योग्य स्थान पर बैठ गए ॥३८-४४॥

भगवान् के दर्शनों के लिए भवदत्ता सेठानी भी गई, आकाश में देवों का जय-जयकार और दुन्दुभी बाजों की मधुर-मनोहर आवाज सुनकर उस मेंढक को जातिस्मरण हो गया। वह भी तब बावड़ी में एक कमल की कली को अपने मुँह में दबाये बड़े आनन्द और उल्लास के साथ भगवान् की पूजा के लिए चला। रास्ते में आता हुआ वह हाथी के पैर नीचे कुचला जाकर मर गया। पर उसके परिणाम त्रैलोक्य पूज्य महावीर भगवान् की पूजा में लगे हुए थे, इसलिए वह उस पूजा के प्रेम से उत्पन्न होने वाले पुण्य से सौधर्म स्वर्ग में महर्द्धिक देव हुआ। देखिये, कहाँ तो वह मेंढक और कहाँ अब स्वर्ग का देव पर इसमें आश्चर्य की कोई बात नहीं। कारण जिनभगवान् की पूजा से सब कुछ प्राप्त हो सकता है ॥४५-५०॥

एक अंतर्मुहूर्त में वह मेंढक का जीव आँखों में चकाचौंध लाने वाला तेजस्वी और सुन्दर युवा देव बन गया। नाना तरह के दिव्य रत्नमयी अलंकारों की कान्ति से उसका शरीर ढक रहा था, बड़ी सुन्दर शोभा थी। वह ऐसा जान पड़ता था, मानों रत्नों की एक बहुत बड़ी राशि रखी हो या रत्नों का पर्वत बनाया गया हो। उसके बहुमूल्य वस्त्रों की शोभा देखते ही बनती थी। गले में उसके स्वर्गीय कल्पवृक्षों के फूलों की सुन्दर मालाएँ शोभा दे रही थी। उनकी सुन्दर सुगन्ध ने सब दिशाओं को

भेकचिह्नं महाभूत्या समागत्य सुरोत्तमः। प्रवृत्तो जिनपादाब्जपूजां कर्त्तुं प्रहर्षतः ॥५५॥
तं पूजां जिनराजस्य कुर्वाणं शर्मदायिनीम्। विलोक्य श्रेणिको राजा नत्वा संपृष्टवान्गुरुम् ॥५६॥
स्वामिन्नस्य किरीटाग्रे भेकचिह्नं प्रवर्तते। तस्य किं कारणं ब्रूहि संशयध्वान्तभास्करः ॥५७॥
तच्छ्रुत्वा गौतमस्वामी संज्ञानमयविग्रहः। अवोचत्तस्य वृत्तान्तं सर्वमेव प्रपञ्चतः ॥५८॥
श्रुत्वा तद्भव्यलोकास्ते सर्वे श्रीश्रेणिकादयः। पूजाफलं जगत्सारं तस्यां जातास्तरां रताः ॥५९॥
मत्वेति श्रीजिनेन्द्राणां पूजातिशयमुत्तमम्। महाभव्यैः सदाकार्या जिनार्चा शर्मकारिणी ॥६०॥
धनं धान्यं महाभाग्यं सौभाग्यं राज्यसम्पदा। पुत्रमित्रकलत्रं च सत्कुलं गोत्रमुत्तमम् ॥६१॥
दीर्घायुर्दुर्गतेऽनाशो विनाशः पापसन्ततेः। अभीष्टफलसम्प्राप्तिर्मणिमुक्ताफलादिकम् ॥६२॥
सम्यक्त्वं मुक्तिसद्बीजं भवभ्रमणनाशनम्। सद्विद्या सच्चरित्रं च सौख्यं स्वर्गापवर्गयोः ॥६३॥
प्राप्यते भो महाभव्या जिनपूजाप्रसादतः। तस्मात्प्रमादमुत्सृत्य कार्या सा सौख्यदायिनी ॥६४॥
सम्यक्त्वद्रुमसिञ्चने शुभतरा कादम्बिनी बोधदा भव्यानां वरभारतीव नितरां दूती सतां सम्पदे।
मुक्तिप्रोन्नतमन्दिरस्य सुखदा सोपानपंक्तिः शुभा पायाद्वस्तु समस्तसौख्यजननी पूजा जिनानां सदा ॥६५॥

सुगन्धित बना दिया था। उसे अवधिज्ञान से जान पड़ा कि मुझे जो यह सब सम्पत्ति मिली है और मैं देव हुआ हूँ, यह सब भगवान् की पूजा की पवित्र भावना का फल है। इसलिए सबसे पहले मुझे जाकर पतित-पावन भगवान् की पूजा करनी चाहिए। इस विचार के साथ ही वह अपने मुकुट पर मेंढक का चिह्न बनाकर महावीर भगवान् के समवसरण में आया। भगवान् की पूजन करते हुए इस देव के मुकुट पर मेंढक के चिह्न को देखकर श्रेणिक को बड़ा आश्चर्य हुआ। उन्होंने गौतम भगवान् को हाथ जोड़ कर पूछा-हे संदेहरूपी अँधेरे को नाश करने वाले सूरज! कृपाकर कहिए कि इस देव के मुकुट पर मेंढक का चिह्न क्यों है? मैंने तो आज तक देव के मुकुट पर ऐसा चिह्न नहीं देखा। ज्ञान की प्रकाशमान ज्योतिरूप गौतम भगवान् ने तब श्रेणिक को नागदत्त के भव से लेकर जब तक की सब कथा कह सुनाई उसे सुनकर श्रेणिक को तथा अन्य भव्यजनों को बड़ा ही आनन्द हुआ। भगवान की पूजा करने में उनकी बड़ी श्रद्धा हो गई। जिनपूजन का इस प्रकार उत्कृष्ट फल जानकर अन्य भव्यजनों को भी उचित है कि वे सुख देने वाली इस जिन पूजन को सदा करते रहें। जिन पूजा के फल से भव्यजन धन-दौलत, रूप-सौभाग्य, राज्य-वैभव, बाल-बच्चे और उत्तम कुछ जाति आदि सभी श्रेष्ठ सुख-चैन की मनचाही सामग्री लाभ करते हैं, वे चिरकाल तक जीते हैं, दुर्गति में नहीं जाते और उनके जन्म-जन्म के पाप नष्ट हो जाते हैं। जिनपूजा सम्यग्दर्शन और मोक्ष का बीज है, संसार का भ्रमण मिटाने वाली है और सदाचार, सद्विद्या तथा स्वर्ग-मोक्ष के सुख की कारण है। इसलिए आत्महित के चाहने वाले सत्पुरुषों को चाहिए कि वे आलस छोड़कर निरन्तर जिनपूजा किया करें। इससे उन्हें मनचाहा सुख मिलेगा ॥५१-६४॥

यही जिन-पूजा सम्यग्दर्शनरूपी वृक्ष के सींचने को वर्षा सरीखी है, भव्यजनों को ज्ञान देने वाली मानों सरस्वती हैं, स्वर्ग की सम्पदा प्राप्त कराने वाली दूती है, मोक्षरूपी अत्यन्त ऊँचे मन्दिर

शक्राः स्नानविधायिनः सुरगिरिः स्नानप्रपीठं पयः सिन्धुर्यस्य सुकुण्डिका सुरगणाः सत्किंकराः सादराः।
नर्त्तक्योप्सरसः सुकीर्त्तिमुखरा गन्धर्वसन्नाकिनो जाता जन्ममहोत्सवेऽत्र भवतां स श्रीजिनः शं क्रियात् ॥६६॥
श्रीमच्चारुमयूरवाहनपरा पद्मासना निर्मला मिथ्याध्वान्तभरप्रणाशविलसद्भास्वत्प्रभाभासुरा।
भव्याब्जप्रवनप्रमोदजननी सन्मार्गसंदर्शिनी देवेन्द्रादिसमर्चिता जिनपतेर्जीयात्सतां भारती ॥६७॥
जातः श्रीमति मूलसंघतिलके सारस्वते सच्छुभे गच्छे स्वच्छतरे प्रसिद्धमहिमा श्रीकुन्दकुन्दान्वये।
श्रीजैनागमसिन्धुवर्द्धनविधुर्विद्वज्जनैः सेवितः श्रीमत्सूरिमतल्लिको गुणनिधिर्जीयात्प्रभाचन्द्रवाक् ॥६८॥
श्रीमज्जैनपदाब्जसारमधुकृच्छ्रीमूलसंघाग्रणीः सम्यग्दर्शनसाधुबोधविलसच्चारित्रचूडामणिः।
विद्यानन्दिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः श्रीभट्टारकमल्लिभूषणगुरुर्भूयात्सतां शर्मणे ॥६९॥
श्रीसर्वज्ञविशुद्धिभक्तिनिरतो भव्यौघसम्बोधकः कामक्रूरकरीन्द्रदुर्मदलये कण्ठीरवो निष्ठुरः।
ज्ञानध्यानरतः प्रसिद्धमहिमा रत्नत्रयालंकृतः कुर्याच्छर्मसतां प्रमोदजनकः श्रीसिंहनन्दी गुरुः ॥७०॥

तक पहुँचाने को मानो सीढ़ियों की श्रेणी है और समस्त सुखों को देने वाली है। यह आप भव्यजनों की पाप कर्मों से सदा रक्षा करें। जिनके जन्मोत्सव के समय स्वर्ग के इन्द्रों ने जिन्हें स्नान कराया, जिनके स्नान का स्थान सुमेरु पर्वत नियम किया गया और समुद्र जिनके स्नानजल के लिए बावड़ी नियत की गई, देवता लोगों ने बड़े आदर के साथ जिनकी सेवा बजाई, देवांगनाएँ जिनके इस मंगलमय समय में नाची और गन्धर्व देवों ने जिनके गुणों को गाया, जिनका यश बखान किया ऐसे जिन भगवान् आप भव्य-जनों को और मुझे शान्ति प्रदान करें ॥६५-६६॥

वह भगवान् की पवित्र वाणी जय लाभ करे, संसार में चिर समय तक रहकर प्राणियों को ज्ञान के पवित्र मार्ग पर लगाये, जो अपने सुन्दर वाहन मोर पर बैठी हुई अपूर्व शोभा को धारण किए हैं, मिथ्यात्वरूपी गाढ़े अँधेरे को नष्ट करने के लिए जो सूरज के समान तेजस्विनी है, भव्यजनरूपी कमलों के वन को विकसित कर आनन्द की बढ़ाने वाली है, जो सच्चे मार्ग को दिखाने वाली है और स्वर्ग के देव, विद्याधर, चक्रवर्ती आदि सभी महापुरुष जिसे बहुत मान देते हैं ॥६७॥

मूलसंघ के सबसे प्रधान सारस्वत नाम के गच्छ में कुन्दकुन्दाचार्य की परम्परा में प्रभाचन्द एक प्रसिद्ध आचार्य हुए हैं। वे जैनागमरूपी समुद्र के बढ़ाने के लिए चन्द्रमा की शोभा को धारण किए थे। बड़े-बड़े विद्वान् उनका आदर सत्कार करते थे। वे गुणों के मानों जैसे खजाने थे, बड़े गुणी थे ॥६८॥

इसी गच्छ में कुछ समय बाद मल्लिभूषण भट्टारक हुए। वे मेरे गुरु थे। वे जिनभगवान् के चरण-कमलों के मानों जैसे भौंरे थे-सदा भगवान् की पवित्र भक्ति में लगे रहते थे। मूलसंघ में इनके समय में यही प्रधान आचार्य गिने जाते थे। सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र रूप रत्नत्रय के ये धारक थे। विद्यानन्दि गुरु के पट्टरूपी कमल को प्रफुल्लित करने को ये जैसे सूर्य थे। इनसे उनके पट्ट की बड़ी शोभा थी। ये आप सत्पुरुषों को सुखी करें ॥६९॥

वे सिंहनन्दी गुरु भी आपको सुखी करें, जो जिन भगवान् की निर्दोष भक्ति में सदा लगे रहते थे। अपने पवित्र उपदेश से भव्यजनों को सदा हितमार्ग दिखाते रहते थे। जो कामरूपी निर्दयी हाथी

प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभङ्गीतरङ्गैर्निर्द्धूतैकान्तमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः।
श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेन्दुप्रवृद्धिर्जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यः श्रुताब्धिः ॥७१॥
तेषां पादपयोजयुग्मकृपया श्रीजैनसूत्रोचिताः सम्यग्दर्शनबोधवृत्ततपसामाराधनासत्कथाः।
भव्यानां वरशान्तिकीर्तिविलसत्कीर्त्तिप्रमोदं श्रियं कुर्युः संरचिता विशुद्धशुभदाः श्रीनेमिदत्तेन वै ॥७२॥

इति कथाकोशे भट्टारकश्रीमल्लिभूषणशिष्य-ब्रह्मनेमिदत्तविरचिते जिनपूजाफलप्राप्तभेकाख्याने चतुर्थः परिच्छेदः समाप्तः।

का दुर्मद नष्ट करने को सिंह सरीखे थे, काम को जिन्होंने वश कर लिया था। वे बड़े ज्ञानी ध्यानी थे, रत्नत्रय के धारक थे और उनकी बड़ी प्रसिद्धि थी ॥७०॥

वे प्रभाचन्द्राचार्य विजय लाभ करें, जो ज्ञान के समुद्र हैं। देखिये, समुद्र में रत्न होते हैं आचार्य महाराज सम्यग्दर्शनरूपी श्रेष्ठ रत्न को धारण किए हैं। समुद्र में तरंगें होती हैं वे भी सप्तभंगीरूपी तरंगों से युक्त हैं-स्याद्वादविद्या के बड़े ही विद्वान् हैं। समुद्र की तरंगें जैसे कूड़े-करकट को निकाल बाहर फेंक देती हैं उसी तरह ये अपनी सप्तभंगी वाणी द्वारा एकान्त मिथ्यात्वरूपी कूड़े-करकट को हटा दूर करते थे, अन्य मत के बड़े-बड़े विद्वानों को शास्त्रार्थ में पराजित कर विजय लाभ करते थे। समुद्र में मगरमच्छ, घड़ियाल आदि अनेक भयानक जीव होते हैं पर प्रभाचन्द्ररूपी समुद्र में उससे यह विशेषता थी, अपूर्वता थी कि उसमें क्रोध, मान, माया, लोभ, राग-द्वेषरूपी भयानक मगरमच्छ न थे। समुद्र में अमृत रहता है और इनमें जिन भगवान् का वचनमयी अमृत समाया हुआ था और समुद्र में अनेक बिकने योग्य वस्तुएँ रहती है ये भी व्रतों द्वारा उत्पन्न होने वाली पुण्यरूपी विक्रय वस्तु को धारण किए थे। अतएव वे समुद्र की उपमा दिये गए ॥७१॥

इन्हीं के पवित्र चरणकमलों की कृपा से जैनशास्त्रों के अनुसार मुझ नेमिदत्त ब्रह्मचारी ने सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र और सम्यक्तप को प्राप्त करने वालों की इन पवित्र पुण्यमय कथाओं को लिखा है। कल्याण करने वाली ये कथाएँ भव्यजनों की धन-दौलत, सुख-चैन, शान्ति-सुयश और आमोद-प्रमोद आदि सभी सुख सामग्री प्राप्त कराने में सहायक हो। यह मेरी पवित्र कामना है ॥७२॥

❑ ❑ ❑